काश्यस्यकाशिस्तत्पुत्रोराष्ट्रोदीर्घतमःपिता धन्वन्तरिर्दीर्घतमसआयुर्वेदप्रवर्तकः ४ यज्ञभुग्वासु
देवांशः स्मृतमात्रार्तिनाशनः तत्पुत्रः केतुमानस्यजज्ञेभीमरथस्ततः ५

तस्यपंचसु सुतेषुक्षत्रवृद्धादिचतुर्णांवंशवर्णनं रजेश्रीकृष्णावतारस्थलोपायवंशानुक्रमणामल्पादि
क्रमेणप्रक्रान्तमिति यस्यवंशेकृष्णावतारस्तस्यवंशोनिविस्तरेणादनेनिरूप्यते अतः पुरूरवसः पुत्रा
णांपंचानांकनिष्ठानांवंशानुक्रमोदानींप्रथमस्यवंशमाहयइति एवंनहुषयस्तत्रवृद्धः क्षत्रवृद्धस्यदीयनप

ततः तदेवादिष्टाद्भृगावाप्यायमतः सकशादलर्कोदयः ९० संततिसंततः ८ सत्यकेतोर्हृष्टकेतुः तस्मात्स
कुमारः तस्माद्वीतिहोत्रः तस्य भर्गः अतो भर्गाद्भार्गभूमिः ९ काश्यः काशेर्वंश्यः काशः प्रपितामहस्य

दिवोदासो द्युमांस्तस्मात्प्रतर्दनः इति स्मृतः सएव शत्रुजिद्वत्स ऋतध्वज इतीरितः तस्मात्कुवल।
यश्चेति प्रोक्तोऽलर्कोदयस्ततः ९ षष्टिवर्षसहस्राणि षष्टिवर्षशतानि च नालर्कादपरो राजन्
भुजेन महीं युवा ० अलर्कात्संततिस्तस्मात्सुनीतोऽथ सत्यकेतनः धर्मकेतस्ततस्तस्मात्सत्यकेतु।
रजायत ८ धृष्टकेतुः विततस्तस्मात्सुकुमारः ततीश्वरः वीतिहोत्रस्य भर्गोऽतो भार्गभूमिरभून्नृप
इति मे काश्यपा भूपाल ब्रह्मणान्वयायिनः रंभस्य रभसः पुत्रो गंभीरश्चाक्रियः स्मृतः १० तस्य क्षेत्रे।
ब्रह्म जज्ञे शृणु वंशमनेनसः शुद्धस्ततः शुचिस्तस्मात्त्रिककुद्धर्मसारथिः ११ ततः शांतरयो जज्ञे २
तेकृतकृत्यः स आत्मवान् रजेः पंचशतान्यासन्पुत्राणाममितौजसां १२ देवैरभ्यर्थितो दैत्यान्। हं
हत्वेंद्रायाददाद्दिवं इंद्रस्तस्मै पुनर्दत्वा गृहीत्वा चरणौ रजेः आत्मानमर्पयामास प्रह्लादाद्यरिशंकितः।

तत्र शूद्रस्यात्वयं अयं तेयां तीनितया ९ अनेनसः शुद्धो जज्ञे ११ कृतकृत्यः सः यतः आत्मवान् ता।
नी अतः पुत्रोऽस्मात् दत्तेन कृतवानित्यर्थः १२

श्री
भाग
टी
९८

48

१७ तेषां मतिभ्रंशाय गुरुणा बृहस्पतिनाभिचारविधानेनाग्नौ हूयमाने सति १८ सिंहावलोकनेनाह लो
त्रवृद्धवंशमाह कुशात्प्रतिः प्रतेः संजयः १८ । १९ इति श्रीभावार्थदीपिकायां नवमस्कंधे सप्तदशोऽध्यायः १७ अष्टादशे तु ।

पितर्युपरते पुत्रा याचमानाय नो ददुः त्रिविष्टपं महेंद्राय यज्ञभागान्समाददुः १६ गुरुणा हूयमा
नेऽग्नौ बलभित्तनयान्रजेः अवधीद्भ्रंशितान्मार्गान्न कश्चिदवशेषितः १७ कुशात्प्रतिः क्षात्रवृद्धा
त्संजयस्तत्सुतो जयः ततः कृतः कृतस्यापि जज्ञे हर्यवनो नृपः १८ सहदेवस्ततो हीनो जयसे
नस्तु तत्सुतः संकृतिस्तस्य च जयः क्षत्रधर्मा महारथः क्षत्रवृद्धान्वया भूपा इमे शृण्वथ नाहुषा
न् १९ इति श्रीभागवते नवमस्कंधे सप्तदशोऽध्यायः १७ शुक उवाच यतिर्ययातिः संयातिरायति
र्वियतिः कृतिः षडिमे नहुषस्यासन्निंद्रियाणीव देहिनः १ राज्यं नैच्छद्यतिः पित्रा दत्तं तत्परिणा
मवित् यत्र प्रविष्टः पुरुष आत्मानं नावबुध्यते २ पितरि भ्रंशिते स्थानादिंद्राण्या धर्षणाद्द्विजैः प्रा
पितेऽजगरत्वं वै ययातिरभवन्नृपः ३ ॥

यातेऽस्मिन्नाहुषस्य कथोच्यते यस्य पंचसु पुत्रेषु कनीयाननुग्रहीतवान् १ तस्य राज्यपरिणामं प्रवर्त्य(?)
वृद्धत्वं चेतितया तत्र देवैः पतेति २ स्थानात्त्वयार्गा(?) द्विजैर्यस्मादिति ३ ॥

९८

यवीयसो भ्रातुर्न्नातिशिवान् काव्यस्य शुक्रस्य वृषपर्वणश्च कन्याभ्यां कृतं दारसंग्रहम् ॥ ४ ॥ न प्रतिलोमसमाहेतः ईश्वर यत्र नातिदिनिदर्शयन्नाह एकदेत्यादिना प्रतिज्ञाह्वानाद्वचश्च मते नगरे शुक्रस्य पुत्र्या देवयान्या

चन सख्यादि शिहित्व भ्रातृभ्यां नाय वीयसः कृतदारो जगोपोर्वी काव्यस्य वृषपर्वणः ॥ ४ ॥ राजोवाच ब्रह्मर्षिर्भगवान्काव्यः क्षत्रबन्धुश्च नाहुषः राजन्यविप्रयोः कस्माद्विवाहः प्रतिलोमकः ॥ ५ ॥ शुक उवाच एकदा दानवेन्द्रस्य शर्मिष्ठा नाम कन्यका सखीसहस्रसंयुक्ता गुरुपुत्र्या च भामिनि ॥ ६ ॥ देवयान्याः पुरोद्याने पुष्पितद्रुमसंकुले व्यचरत्कलगीतालिनलिनीपुलिने बला ॥ ७ ॥ ता जलाशयमासाद्य कन्याः कमललोचनाः तीरे न्यस्य दुकूलानि विजह्रुः सिञ्चतीर्मिथः ॥ ८ ॥ वीक्ष्य व्रजन्तं गिरिशं सह देव्या वृषस्थितं सहसोत्तीर्य वासांसि पर्यधुर्व्रीडिताः स्त्रियः ॥ ९ ॥ शर्मिष्ठाजानती वासो गुरुपुत्र्याः समव्ययत् स्वीयं मत्वा प्रकुपिता देवयानीदमब्रवीत् ॥ १० ॥ अहो निरीक्षतास्या दास्याः कर्म ह्यसाम्प्रतं अस्मद्धार्यं धृतवती शुनीव हविरध्वरे ॥ ११ ॥

व्यचरदिति द्वयोरन्वयः ॥ ७ ॥ कलगीता अलयो भ्रमरा येषु तानि नलिनीपुलिनानि कमलसहितानि पुलिनानि यस्मिन् पुरोद्याने व्यचरत् ॥ ७ ॥ सिञ्चतीः सिञ्चन्त्यः ॥ ८ ॥ अजानती स्वीयं मत्वा गुरुपुत्र्याः वासः समव्ययत् पर्यधात् ॥ १० ॥ अस्याः

श्री
भाग
टी
५१

अन्यायमेव ब्राह्मणोत्कर्षं वर्णनेनानुमनन्ति यैरिति त्रिभिः येन ब्राह्मणाः परस्य पुंसो मानवे स्वारोऽ
न्यत्र नेननभिव्यक्तेन वक्ष्यत्यतस्तस्यैः ज्योतिर्ब्रह्म पन्था वेदमार्गः १२ १३ नैवं ब्राह्मणमात्रमेव ना।

यैरिदं तपसा सृष्टं सुत्वं पुंसः परस्य ये धार्यते यैर्विदन्नोति शिवः पन्थाश्च दर्शितः १२ यान्वै दृ
ष्ट्वापि तिष्ठन्ते लोकनाथाः सुरेश्वराः भगवानपि विष्णुर्यो भावनः श्रीनिकेतनः १३ वयं तत्रा
पि भृगवः शिष्यो ऽस्मान्नः पितामहः अस्मद्धार्ये भूतवती भूद्वेदस्मि वा सती १४ एवं त्रिपैती।
पार्मिष्ठा गुरुपुत्रीमभाषत रुषा श्वसन्त्युरगीव धर्षिता दष्टदच्छदाः १५ आत्मवृत्तमविज्ञायक।
त्थमेव बहुभिर्वत्कि किं न प्रतीक्षसे स्माकं गृहान्बलिभुजो यथा १६ एवंविधैः सुपरुषैः क्षिप्त्वा।
चार्यसुतां सती शर्मिष्ठा प्राक्षिपत्कूपे वासश्चादाय मन्युना १७ तस्यां गतायां स्वगृहं ययातिर्मृ
गयां चरन् प्राप्तो यदृच्छया कूपे जलार्थी तां ददर्श ह १८ दत्वा स्वमुत्तरं वासस्तस्यै राजा विवाससे
गृहीत्वा पाणिना पाणिमुज्जहार दयापरः १९ तं वीरमाहौशनसी प्रेमनिर्भरया गिरा राजंस्त्व
या गृहीतो मे पाणिः परपुरंजय २०

वन्सूनं तत्रापि भवत्यं भृगवः अस्माकं पिता नः शिष्यः एवं समपि यस्या अभिर्धार्यं वासः इयमसतीष्टता।

निषिद्धोयंपतेलोमसंवंधइतिनममब्राह्मणएषइति २१ ब्राह्मणीमेववनंद्धाणीहि किमनेनागृह्णोतिवेनब्रा।
ह्म नब्राह्मणाइति हूहस्पतेः सुतः कचः शुक्रात्मनसंजीवनीविद्यां विद्यामध्यगात ततस्तंदेवयानीपति
चकमे सचगुरुपुत्रीमेपूज्येतिनतामूढवान ततस्तंकुपितासतीनवेद्यंविद्यानिष्फलाभवितेतिशशा
पाय सचतवब्राह्मणः पतिर्नभवेदितितांशशाप नदेवतात यमहमध्यापतेनतस्यापणाम २१ श्रुत्वा।

इत्वाग्रहोपरोमाभूद्दीनायास्त्वयाहिमे एषईशाकृतोवीरसंवंधोनोनपूरुषः यदिदंकूपल
ग्नायाभवतोदर्शनंमम नब्राह्मणोमेभविताइत्युग्राहोमहाभुज कचस्यवार्हस्पत्यस्यशापा
दमर्पसंपुरा २२ ययातिरनभिप्रेतंदैवोपभृतमात्मनः मनस्तत्तत्कृतंबुद्ध्वाप्रतिजग्राहतद्वचः
२३ गतेराजनिसर्वीरेततस्समुदस्तीपितः निवेदयत्ततःसर्वंमुनयेशर्मिष्ठयाकृतं २४

शुक्रहीयत्वाद्नभिप्रेतमपिदैवेनोपभृतंप्रापितं वुद्ध्वातत्कृतंतस्याः सकामंमनस्यवुद्धा नहुषस्यैषमा
नः प्रविशेदितितस्यावचः प्रतिजग्राहस्वीकृतवान २५ शर्मिष्ठासंवत्सरोपिदैववशाद्देवयानीसदृशी
यज्ञाद गतेराजनीतिनवधिः उक्तोभिन्नःकौमारादिकृतंकूपप्रवेशादि २६॥

श्री
माल
ती
५०

कपोतीमंत्रवृत्तिं ॥१९॥ प्रत्यनीकाश्चैवाः तेविवर्द्धिताः तयेप्राप्यणीयाश्च मभिप्रेतं यस्मात्तयाभूतंता ।
त्रा प्रत्यनीकानां विवर्द्धितमितिवा ॥१९॥२०॥ सानुगामभ्रोमसहिताशर्मिष्ठामामनुयात इति ॥१८॥ ततस्मा
न्निर्गताकृष्णात्मकटंवीक्ष्य ततस्मादवस्थितानदृष्ट्वास्वप्रयोजनतस्य च गौरवंवीक्ष्य ॥१९॥ तस्यैमाथा

दुर्मनाभयवाल्काश्चं पोरोहितंविगार्द्दयत स्त्रवन्तुर्निचकापोतीतुद्दिश्यामयपोप्रगात ॥२१॥ ह
षपर्वोनमात्तायप्रत्यनीकविवर्द्धिते गुरुप्रसादयन्मूर्खापादयोःपतितःपथि ॥२१॥ वाणार्थमस्तु ।
भगवाव्दिशिष्ठं व्याचष्टभार्गवः कामोस्याःक्रियतां राजन्नेनान्यक्षमिहोत्सवे ॥२१॥ तथेत्येवंस्थिते ।
पादेदेवयानीमनोगते पित्रादत्तायतोयास्येमानुगायातमामनु ॥१८॥ स्यानातत्संकटंवीक्ष्यत ।
दर्थस्यचगौरवं देवयानीपर्यंचारत्तौ सहस्रेणदासवत् ॥१९॥ नाहृषायसतांदत्वा सहशर्मिष्ठयोश
नाः तामाहराजन्नमांशर्मिष्ठामायातल्पेनकर्हिचित ॥२०॥ विलोक्यौशनसीराजन्नमांशर्मिष्ठांस्पृश्ज्ञो ।
कचित तमेववत्रेरहसिमार्द्दुःपतिमृतोसती ॥२१॥ राजन्नभ्यर्थितोपत्योधर्मवावेक्ष्यधर्मवित ।
स्मरतुष्कवचः कालेदिष्टमेवाभ्यपद्यत ॥२२॥

तोपगाव्दौरिष्यर्थः ॥२३॥ अपत्यार्थेतावस्याःकामस्याणंधर्ममवेक्ष्य ष्कुक्रस्यवचःस्मरन्दिष्टेवैस्वकापि ।
तमेवतत्संगममभ्यपद्यत ततकामतत्सार्थः ॥२२॥

१०

११ आसुर्याः शर्मिष्ठाया भर्तुः सकाशात् १४ उपमेत्रयत्समाह्वयत् १५ विकृतं करोतीति नेतुर्हिता।
विकामे रयाप्यतृप्तोस्मि कामानां भोगैरितिवा १६ नर्हिं योभियास्यति प्रभितो यारयिष्यति तस्यवा।
यस्याकामं व्यस्तनोयच्छेद्धेनराव्यसंपयायात् व्यसयंतीयनामितिवा १७ व्यास्पेति छेदः तोनरांग्या।
यदुं च तुर्वसुं चैव देवयानी व्यजायत द्रुह्युं चानुं च पूरुं च शर्मिष्ठा वार्षपर्वणी ११ तामेव सा भवमाह्वयो
भर्तुर्विज्ञाय मानिनी देवयानी पितुर्गेहं ययौ क्रोधविमूर्छिता १४ प्रियामनुगतः कामी वचोभि
रुपमंत्रयत् नप्रसादयितुं शेके पादसंवाहनादिभिः १५ शुक्रस्तमाह कुपितः स्त्रीकामानृतपू
रुष त्वाजरा विशतां मंदविरूपकारिणी नृणां ययातिरुवाच अतृप्तोस्म्यद्य कामानां ब्रह्मन्दुहितृ
तरिस्मते १८ शुक्रउवाच व्यस्यतां यथाकामं वयसा योभियास्यति इतिलब्धव्यवस्थानं पुत्रं
ज्येष्ठमवोचत १९ यदो तात प्रतीच्छेमां जरां देहि निजं वयः मातामहकृतां वत्स न तृप्तो विषयेष्वहं २०
यदुरुवाच नोत्सहे जरया स्थातुमंतरा प्राप्तया त्वया अविदित्वा सुखं ग्राम्यं वैतृष्ण्यं नैति पूरुषः २१
तुर्वसुश्चोदितः पित्रा द्रुह्युश्चानुश्च भारत प्रत्याचख्युरधर्मज्ञा ह्यनित्ये नित्यबुद्धयः २२ अपृच्छत
तनयं पूरुं वयसोनं गुणाधिकं न त्वमग्रजवद्वत्स मां प्रत्याख्यातुमर्हसि २३
स्वा संगमयेमर्थः इति लब्धव्यवस्थानेन याया व्यवस्थितिर्येन सः २१ वयसा भवदीयेन रंस्ये कतिपयाः
समाः २२ २३ यदो तव पर्यत्ताः अनित्ये च यौवने नित्यबुद्धयः २४ तेन तां किं गृहीष्यसीत्यपृच्छत् प्रत्याख्या

श्री भाग टी ५१

शात्मकृतः स्वदेहकर्तुः कोनुमः ४२ तथापि पितर्यस्मिं निर्तं कुर्यात्सुतन्मः यस्य शोककारी समध्य
मः अकर्तापि तस्य वितिशुषीषयायः ४३ तत्तत्वेषैसेवितवान ४४ यथोपजोषं यथाप्रीतितत्तत्वे ४५

सूत उवाच कोनुलोके मनुष्येंद्र पितुरात्मकृतः पुमान् प्रतिकर्तुं क्षमो यस्य प्रसादाद्विंदते परं
उत्तमश्चिंतितं कुर्यात्प्रोक्तकारी च मध्यमः अधमोऽश्रद्धया कुर्यादकर्तोच्चरितं पितुः ४३ इति प्र
मुदितः सूतः प्रतिगृह्णान्नंदितः सोपि तद्यथाकामान्यथावज्जुजुषेन्नृप ४४ सप्तद्वीपवा
तीसम्यकित्वनालयस्तनाः यथोपजोषं विषयान्जुजुषेव्याहतेंद्रियः ४५ देवयानप्यनना
दिनेमनोवाग्देहवस्तुभिः प्रेयसा परमां प्रीतमुवाहप्रेयसीरहः ४६ अयजद्यज्ञपुरुषं क्रतुभि
र्भूरिदक्षिणैः सर्वदेवमयं देवं सर्ववेदमयं हरिं ४७ यस्मिन्निदं विरचितं व्योम्नीव जलदावलिः
नानेव भाति नाभाति स्वप्नमायामनोरथः ४८ तमेव हृदि विन्यस्य वासुदेवं गुहाशयं नारायण
मणीयांसं निराशीरयजत्प्रभुः ४९

४९ ५० नानेव भाति यावदिंद्रियवृत्तिः तद्रूपमेनाभाति स्वप्नमायाभ्यां सहितो मनोरथश्चेत्यर्थः ४८

५१

मनः सर्वं कामभोगं कृपणात्मनः ५१ इति श्रीभावार्थे नवमस्कंधेऽष्टादशोऽध्यायः १८ ऊनविंशे ययातिः
स्वचेष्टितं नवस्तोपमं देवयानीसमाश्वासविरक्तो मुक्तिमाप्तवान्‌ भुंक्तभोगामनोदास्यत्र ऽजवहूनमात्म-
नः विडंबनं प्रियायामाहृत्य निर्वेदयितमात्मवान्‌ कामानाचरन्नुपभुंजानो गाथा इतिहासं १ मद्विधेन मा-
दृशेनाचरितामनुष्ठितां मद्विधस्य चरितं यस्यानुशोचंति ग्रामनिवासिनः कामिनो मद्विधस्य तस्य गा-
एवं वर्षसहस्राणि मनः षष्ठैर्मनः सुखं विदधानोऽपि नातृप्यत्सार्वभौमः कदिंद्रियैः ५१ इति श्री-
भागवते नवमस्कंधेऽष्टादशोऽध्यायः १८ श्रीशुक उवाच स इत्थमाचरन्कामान्स्त्रैणोऽपह्नवमात्मनः
बुद्ध्वा प्रियायै निर्विण्णो गाथामेतामगायत १ शृणु भार्गव्यमूं गाथां मद्विधाचरितां भुवि धीरा यस्या-
नुशोचंति वने ग्रामनिवासिनः २ बस्त एको वने कश्चिद्विचिन्वन्प्रियमात्मनः ददर्श कूपे पतितां
स्वकर्मवशगामजां ३ तस्या उद्धरणोपायं बस्तः कामी विचिंतयन्‌ व्यधत्त तीर्थमुद्धृत्य विषाणा-
ग्रेण रोधसी ४ सोत्तीर्य कूपात्सुश्रोणी तमेव चकमे किल तया वृतं समुद्वीक्ष्य बह्व्योऽजाः कांत-
कामिनीः ५ पीवानं श्मश्रुलं प्रेष्ठं मीढ्वांसं याभकोविदं स एकोऽजवृषस्तासां बह्वीनां रतिवर्ध-
घोः शृणु २ आत्मानमनुलक्ष्याह बस्त इति प्रियामनुलक्ष्याह शृण्विति वने संसारे विषये ३ रो-
धसी तटे विषाणाग्रेण मृदादिकमुद्धृत्य तीर्थं निर्गमाय सोपानं विधत्त ४ बह्व्य इति श्लोकद्वयस्य लोः कामा-
यामासुः कांतं पतिं कामिनीः कामवत्यः ५ पीवानं पुष्टं श्मश्रुबहुलं रतिसमर्थं मिमर्थः मीढ्वांसं रेतः

श्री
भाग
टी
५२

स्वामिनमिति पुत्रकाभिप्रायेणाह ८९ तृष्णामछिन्नतया वृद्धावस्थायां भोगेष्वसमर्थमकरोत् य

तमेवं प्रेष्ठतमया रममाणमनात्मया विलोक्य नृपसंविग्नानामृत्युहस्तकर्मतान् ७ तदुत्स्यंदं
स्वाह्लपं कामिनं त्वां सौहृदं इंद्रियाणामनुत्सृज्य स्वामिनं दुःखितायसौ ८ सोऽप्यज्ञानुगत
द्विणः कृपणस्त्वां प्रसादितं कृचिल्लिष्टिविद्राणं नाशकोऽत्यपि संधितं ९ तस्मात्तत्र द्विजः
कश्चित्तत्रःसर्वमछिन्नतृष्णा लं वंनतृष्णाभूयः संदर्येधाोयद्योगवित् १० संवं तृष्णाः सोऽपि
त्यजतया कृपलब्धया कालेवहूनिष्ठंभद्रकामैर्नोयामितच्छति ११ तस्मादेकृपणः स्वभुभव
मायेमयंत्रितः आत्मानेनाभिज्ञानाभिमोहितस्तवमायया १२

धार्यस्त्वप्रज्ञाः कामभोगाय योगविदुपायतः उपायतः उपायं ज्ञानानीतिनिजराज्यमासेनवतिशक्तिं
ददाविमर्यः ९ कृपलब्धयामद्रकामैः सेव्यमानैर्नेतच्छति ११२

५२

ननु तर्हि पुनरपि बहवो विषयाः सेव्यन्तां ततो मनसि निवृत्तिर्भविष्यति कामोपशान्त्या मोहो निवर्त्तते ति चेत्तत्रा
ह यदिति त्रिभिः । नदुह्यन्ति न पूरयन्ति दुह पूरणे ॥१३॥ हविषा घृतेन कृष्णवर्त्मा अग्निरिव ॥१४॥ तर्हि
केनोपायेन कामशमः संपूर्णप्रीतिः स्यात् यथा कामोपशमः स्यादित्यत आह यदेति त्रिभिः अमङ्गलं

यत्पृथिव्यां व्रीहियवं हिरण्यं पशवः स्त्रियः । नदुह्यन्ति मनःप्रीतिं पुंसः कामहतस्य ते ॥१३॥ न जातु
कामः कामानामुपभोगेन शाम्यति । हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते ॥१४॥ यदा न कुरुते
भावं सर्वभूतेष्वमङ्गलं । समदृष्टेस्तदा पुंसः सर्वाः सुखमया दिशः ॥१५॥ या दुस्त्यजा दुर्मतिभिर्या
न जीर्यति जीर्यतः । तां तृष्णां दुःखनिवहां शर्मकामो द्रुतं त्यजेत् ॥१६॥ मात्रा स्वस्रा दुहित्रा वा नावि
विक्तासनो भवेत् । बलवानिन्द्रियग्रामो विद्वांसमपि कर्षति ॥१७॥ पूर्णं वर्षसहस्रं मे विषयान्सेव
तोऽसकृत् । तथापि चानुसवनं तृष्णा तेषूपजायते ॥१८॥ तस्मादेतामहं त्यक्त्वा ब्रह्मण्यध्याय माना
सं । निर्द्वन्द्वो निरहंकारश्चरिष्यामि मृगैः सह ॥१९॥

भावं रागद्वेषादिवैषम्यं दुःखानि
निवहतीति तथा ॥१६॥
॥१६॥ स्त्रीसन्निधाने न सर्वथा स्थातव्यमित्याह मात्रेति अविविक्तं संकीर्णमासनं यस्य सः कर्षत्याकर्षति ॥१७॥
॥१८॥ ननु तस्मात्त्यागस्यापि दुष्करत्वात्कथं ब्रह्मणि मनःसमाधानं ग्रहणं स्यात्तत्राह इहमिति ॥१९॥

श्री
भाग
टी
५३

येनानुध्यायेत्तत्संविशेत्तथोपभुंजीत तत्तद्दृष्टश्रुतयोरनुध्यानादौ स्मर्यात्मकृष्णभवति २·२१ २२ तस्यदु
र्वैशेष्यापयिना २३ विषयेषुशाह्यादिषु ग्रामेष्वितेषड्वर्गेषडिंद्रियमात्रेषुमचेतन्यात यद्वा विषये

दृष्टंश्रुतमसमेवध्यानानुध्यायेत्तत्संविशेत संसृतिंचात्मनाशंचतत्रविद्वान्सगात्मदृक् २·२१
मुक्कानाहृषोनायांनटीयंपूरयेद्बुधः दत्तार्थरजसंतस्मादादेदेविगतस्पृहः दिशिदिशिणपू
वेस्याद्गुह्यंद्दृत्तणलोयत्रुं प्रतीक्षानर्वणुंचक्रादेदीच्यामनुमीश्वरं २२ भूमंडलस्यसर्वस्यपूरु
मर्दनमसंविधु यमिषिच्याग्रतोस्तस्यवशोस्याप्यवर्तेयथो २३ ग्रामेष्वितेवर्षपूगान्बहूनोविष
येषुसः दशोनमनुमचेनीडंनातपदर्ववह्निनः २४ सनत्रनिर्भक्तसदुहसंगचात्मानुभूत्यावि
धूतत्रिलिंगः पोरमलेत्रहत्तिवासुदेवेलेभगतिंभागवतीयतीतः २५ श्रुत्वागाथांदेवयानी
मेनेप्रस्तोभमात्मनः हीयसोवृद्वेश्याम्यविहासिमिवेवितं २६ सासत्रिवासंमृदिदोषा
पायामिवरावृतां विन्नायेश्वरतेत्राणांमायाविरचितंप्रभोः २७

ग्रामेष्वितिनासेवांकारितं षष्मामिंद्रियाणांवरैस्त्रिमुचेत्पैविनितेमर्थः २४ विधूतंनिरस्तंत्रिगुणात्मकं
लिंगंयेन प्रतीतःप्रख्यातः २५ प्रस्तोभमेवाह परिहासमिवेति यद्वा प्रस्तोभनिर्हृतिमार्गोप्रोत्साहते

२८ कथंसमावेशयतस्तेद नमस्तेति नमस्कारादिभिः समावेशयेत्यर्थः शुकदेवोवानमस्करोति २९ इति श्रीभावार्थे नवमस्कंधे एकोनविंशोध्यायः १९ विंशे पित्रप्रसादात्मराज्ञा सतनस्तेन्नतेः पूरोर्वंशेन।

सर्वत्रसंगमुत्सृज्यस्वप्नौपम्येनभार्गव कृष्णेमनः समावेश्यमधुनोलिंगमात्मनः २८ नमस्तुभ्यंभगवतेवासुदेवायवेधसे सर्वभूताधिवासायशांतायबृहतेनमः २९ इतिश्रीभागवते नवमस्कंधे एकोनविंशोध्यायः १९ शुकउवाच पूरोर्वंशंप्रवक्ष्यामियत्रजातोसिपांडव यत्रराजर्षयोवंश्याब्रह्मवंश्याश्चजज्ञिरे १ जनमेजयोह्यभूत्पूरोः प्रचिन्वांस्तत्सुतस्ततः प्रवीरोथमनस्युर्वैतस्माच्चारुपदोभवत् २ तस्यसुद्युरभूत्पुत्रस्तस्माद्बहुगवस्ततः संयातिस्तस्याहंयातीरौद्राश्वस्तत्सुतः स्मृतः ३ ऋतेयुस्तस्यकक्षेयुः स्थंडिलेयुः कृतेयुकः जलेयुः संततेयुश्च धर्मसत्यव्रतेयवः ४

द्वौषंतेभरतस्येयंतेयवः १२ तस्मात्तोयातेः स्मृतः ३ धर्मेयुश्चव्रतेयुश्चधर्मसत्यव्रतेयवः ४ ॥

श्री
भाग
टी
५४

वनेयुश्चावमः कनिष्ठः स्मृतः एवं दशौनेयुप्रमुखास्तस्यौरसास्तस्य हृताच्यामप्सरसि पुत्रा जाताः घृताच्या
निषष्ठी विभक्तिः समसंबंधे वर्त्तते इत्युक्तः जगदात्मनः जगत्यात्मभूतस्य मुख्यस्य प्राणस्य इंद्रियाणि वा

दशैतेप्सरसः पुत्रा वनेयुश्चावमः स्मृतः घृताच्यामिंद्रियाणीव मुख्यस्य जगदात्मनः ५ ऋतेयो
रंतिभारोभूत्त्रयस्तस्यात्मजा नृप सुमतिर्ध्रुवोप्रतिरथः कण्वोप्रतिरथात्मजः ६ तस्य मेधाति
थिस्तस्मात्प्रस्कन्नाद्या द्विजातयः पुत्रोभूत्सुमते रेभिर्दुःष्यंतस्तत्सुतो मतः ७ दुःष्यंतो मृगयां
यातः कण्वाश्रमपदं गतः तत्रासीनां स्वप्रभया मंडयंतीं रमामिव ८ विलोक्य सद्यो मुमुहे देव
मायामिव स्त्रियं बभाषे तां वरारोहां भटैः कतिपयैर्वृतः ९ तद्दर्शनप्रमुदितः संनिवृत्तपरि
श्रमः पप्रच्छ कामसंतप्तः प्रहसन् श्लक्ष्णया गिरा १० का त्वं कमलपत्राक्षि कस्यासि हृदयं
गमे किंस्विच्चिकीर्षितं तत्र भवत्या निर्जने वने ॥

रेभ्यार्थे ५६७ दुःष्यंतस्य शाकुंतलायां भरतः पुत्रो भवदिति कथामाह दुःष्यंत इति पंचदशभिः ८
तत्राश्रमे मंडयंतीं स्त्रियं विलोक्य मुमुहे मुह्यति स्म ९ तस्या दर्शनेन प्रमुदितः अतएव संनिवृत्तः परि

५४

पौरवाणां चेतो न ह्यधर्मे रमते ततो मद्वेन सत्वयि रमणं देवमद्दं त्वां राजन्यतनयां वेद्मि ॥ १ ॥ विश्वामित्रस्य
त्मजाहं मेनकायां जाता तथा च स्वर्गं गच्छेत्याः त्यक्ता तो राजन्यकन्यैवाहमित्यर्थः ॥ २ ॥ ४ ॥ किंकरवाम

व्यक्तं राजन्यतनयां वेद्म्यहं त्वां सुमध्यमे न हि चेतः पौरवाणामधर्मे रमते क्वचित् ॥ १ ॥ शकुन्तलो
वाच विश्वामित्रात्मजैवाहं त्यक्ता मेनकया वने वेदैतद्भगवान्कण्वो वीर किं करवाम ते ॥ २ ॥ आ।
स्यतां मम विश्रान्तं गृह्यतां मद्दृगौ च ते भुज्यतां सन्ति नीवारा उष्यतां यदि रोचते ॥ ४ ॥ दुःषन्त उवाच।
उपपन्नमिदं सुभ्रु जातायाः कुशिकान्वये स्वयं हि वृणुते राज्ञां कन्यका सदृशं वरं ॥ ५ ॥ ओमित्यु।
क्ते यथा धर्मं प्रपद्ये मे शकुन्तला गान्धर्वविधिना राजा देशकालविधानवित् ॥ ६ ॥ अमोघवीर्यो रा
जर्षिर्मे हि वीर्यमादधे स्वो भूते स्वपुरं यातः कालेनासूत सा सुतं ॥ ७ ॥ कण्वः कुमारस्य वने चक्रे
समुचिताः क्रियाः बद्ध्वा मृगेन्द्रान्स राजा क्रीडति स्म स बालकः ॥ ८ ॥ तं दृष्ट्वाप्य विक्रान्तमादाय सा।
महोत्तमा दूरे वेशं शासं भूतं भर्तारं तिकमागमत् ॥ ९ ॥

त्याहि वाक्यात्त्वदीक्षि प्रार्थं ताना उपपन्नमिति ॥ ५ ॥ गान्धर्वविवाहविधिना मिथः समयपूर्वकेण मिथः
ति त्वं मे भार्या त्वं मे पतिरिति वाक्येन ॥ ६ ॥ ७ ॥ ८ ॥ दृष्ट्वाप्य विक्रान्तं विक्रमणां यस्य ॥ ९ ॥

श्री भाग टी ५५

भस्त्रा चर्मपात्रमिति यस्यां भस्त्रायां वस्त्रादि निष्पतेऽभ्रश्यतीति तद्वन्माता नाधारमात्रं पितुरेव पुत्रः तद्दे
तः येनेति श्लो॰ माता वै पुत्रनामासीतिश्रुतेः भरस्व पुत्रं शाकुन्तलं यद्धनेन भरतनामेति कृत्के ॥२०॥ किंच रेतोधाः रे
तः सेक्ताः वंशस्कृत्स्वरोयमतथापिनेरं नयति तारयति तथाच श्रुतिः पुत्रात्मको नरकाय सन्तायते पिता

यदा तत्र गृहे राज्ञा भार्यापुत्रौ च विनिन्दितौ सूपुवतां सर्वभूतानां ववाचाशरीरिणी ॥२०॥ माता भ
स्त्रा पितुः पुत्रो येन जातः स एव सः भरस्व पुत्रं दुष्यन्त मावमंस्थाः शकुन्तलां ॥२१॥ रेतोधाः पुत्रो न
यति नरदेव यमक्षयात् त्वं चास्य धाता गर्भस्य सत्यमाह शकुन्तला ॥२२॥ पितर्युपरते सोऽथ चक्र
वर्ती महायशाः महिमा गीयते यस्य हरेरंशभुवो भुवि ॥२३॥ चक्रं दक्षिणहस्तेऽस्य पद्मकोशोऽस्य पा
दयोः ईजे महाभिषेकेण सोऽभिषिक्तोऽधिराड्विभुः ॥२४॥

रेतः तस्मात्तद्वदिति श्लोकः स्वयमेव स्वयंभुवा पादांत
रे मातृपुत्रो विवादे पुत्रं पश्यति यमक्षयात् इमं निर्णेतुं अस्य भार्यायाः सकाशात् रेतोधाः पितैव धर्मेण विनि
त्य पुत्रं नयति तत्र मातृस्वार्थः तत्र भार्यापुत्रौ स्वीकृतवानिति तेषां ॥२३॥ चक्रवर्ती बभूवेति शेषः तस्या
महिमा गीयते तदपि श्लोकाः यभिगीता इत्यादिवत् चक्रमादौ हरेरंशभुवः अंशा तानस्य ॥२४॥ तल्लिंग

९ स्कं श्री भागवत टी ५५

गंगायामनुलोमं पंचपंचाशत्तावाजिभिरीजे पुरोधाय पुरोहितं कृत्वा यमुनायामनु च यमुनायाश्चानु-
लोमं २५ अष्टाधिकसप्ततिमेध्यानश्वान्बबंध किं कुर्वन् वसूनथनप्रकर्षेणाददन् २६ साचीगुणे प्रकृ-
ष्टगुणावति देशेग्निश्चितोभूत् यस्मिन्नग्निचयने देशे वा सहस्रं ब्राह्मणाः भरतेन भूविहातेन दत्ता गा व-
द्वशः प्रत्येकं बद्धं विभेजिरे विभज्य जगृहुः चतुरशीत्यधिके सहस्रे योदेशाहाद्वसैरेकं बद्धं भवति तथा हि।
हिरण्येनपरिवृतान् कृष्णान् शुक्लदतो मृगान् मष्णारे भरतोददात् शतं बद्धानि सप्त चेति स्मृतम् स्मृता।

पंच पंचाशता मेध्यैर्गंगायामनु वाजिभिः मामतेयं पुरोधाय यमुनायामनु प्रभुः २५ अष्ट सप्त-
तिमेध्याश्वान्ववंधप्रददद्वसु २६ भरतस्य हि दौःषंतेरग्निः साचीगुणे चितः सहस्रं बद्धशो यस्मि-
न्ब्राह्मणा विभेजिरे २७ त्रयस्त्रिंशच्छतं राज्ञाश्वान्बद्धा विस्मापयन्नृपान् दौष्यंतिरत्यगान्मायां
देवानां गुरुमाययौ २८

ति सप्ताधिकशतं बद्धानि भीष्म केनोक्तश्लोके चतुर्दशलक्षत्वेन संगृहीता।
ति अक्षात्कर्माणि मष्णारे नियुतानि चतुर्दशेति एवं चतुर्दशलक्षाणां सप्ताशीत्यधिकशतभागो ब-
द्धमितं बद्धं भवति इयं च बद्धसंख्या श्लोके न संगृह्यते चतुर्दशानां लक्षाणां सप्ताधिकशतांशकः बद्धं
चतुरशीत्यधिके सहस्राणि त्रयोदश २८ देवानामपि वैभवमत्यगात् अत्यशेत यतो गुरुं स्वं हरिमाययौ

श्री
मान
ली
५९

मृगानथो हगजानश्वान्मृगाद्द्योगजज्जातिभेदाः मयारत्नमम्मस्तुतिमिषट्स्य व्याख्याने कर्मणीतिक
श्चित्कर्मविशेषे केचित्तमम्यारे तीर्थ इति व्याचक्षते ४१ ४२ ४३ तस्मै देवा जिनायेः स्वरसौ कासिरस्ता।
नलस्थानानि भेजिरे तैः प्राणिभिर्वलिभिर्देवस्त्रियोरमन्तेऽम्बुनीताः सतीः पुनरादरहानित्ये प्राणि।
भिरन्यैर्मनुष्यादिभिः सहलीनाः इति वा प्राणिभिरिति जलायावे धरणयोः स्मरः तैर्नीतासती ४३ य

मृगानपुत्रकदनः कृसान्द्विरणेन परिहृतान् अस्ताङ्कर्मणि मुख्यरेनिपुणानिचनर्देश ४४ म
रतस्यमदृत्कर्सेन पूर्वैर्नापरेनृपाः नैवापुनैवप्राप्स्यन्ति वा हृम्यं त्रिदिवं यया ४५ किरातहूना।
न्यवनान्धान्कंकान्कषान्शकान् अस्त्राप्यणान्नृपांश्चाद्दन्द्विधान्दिग्विजये विलान् ४६
जित्वा पुरा स्वरान्देवान्स्मरसौ कांस्मिमे जिरे देवस्त्रियोरमन्नीताः प्राणिभिः पुनरादरात् ४७ सर्व
कामानुदुहनुः प्रजानांतस्यरोदसी समास्त्रिणवसाहस्त्रीर्दिलथक्रमवर्तयत् ४८ ससम्राट्
लोकपालाख्यमैश्वर्यमधिराट्छियं चक्रं चास्खलितं प्राणान्मृषेत्सुपरात्मद ४९

णायोहूतात्मैः हूतात्मैः हूतान्मस्थापणाद्द्वयदिन्ययोः ५० त्रिणवसाहस्रीः समाः सप्तविंशतिसहस्रं व
त्सरान् चक्रं सेनाग्रगतावता ५१ तस्यैवराज्येण मोतप्रकारमाह सर्वानि मृषेति विचार्यं निशोषः ५२ ५८

नानुरूपः सत्स्य सदृशात्मभवेन्नीति भवोऽर्द्दविते मतिख्यभिचारिणीं कयाः स्मात्स्य सतीति भयात्मुज्ञांजनुः पुनः
पुनः पुत्राणां दर्शने वेसा सदृशपानु संथाने तस्य जेत नात्मथे त्माशायेना दृतवन्मः २५ ततश्चेश्वर्थे सा-
ति तदर्थे पुत्रार्थं मरुत्सोमेन यागेन यजते तस्य प्रसन्नाः संतो मरुतो भरद्वाजं नाम पुत्रमुपाददुः समर्प-
यामासुः २६ मरुत्स्ते भरद्वाजानामप्रकारं दर्शयन्नाह अंतर्वत्न्यां गर्भिण्यां भ्रातरुतथ्यस्य पत्न्यां म-

तस्मात्सत्रूपवैदर्भ्यः पत्न्यस्तिस्रः सुसंमताः तत्पुत्रान्यागभयात्सुज्ञाज्ञानुरूपा इतीरते २५ ततोऽसौ
वैवितथं वंशे तदर्थं यजते स्मतं मरुत्स्तोमेन मरुतो भरद्वाजमुपाददुः २६ अंतर्वत्न्यां भ्रातुः
पत्न्यां मैथुनाय बृहस्पतिः प्रवृत्तो वारितो गर्भेण शशापावीर्यमवासृजत् २७

ममतायां चोतथ्यैणमैथुनाय कदाचित्प्रवृत्तो बृहस्पतिः तदा द्वितीयगर्भस्यावकाशाभावादाक्रोशत्पूर्वो
गर्भस्थ तत्र वारितः ततः क्रुद्धो बृहस्पतिरंधो भवेति तं गर्भं शशाप बलाद्वीर्यं न्यषिंचत् ततो बृहस्पतेः शा-
पादंधो भूत्वा दीर्घतमा अभूत् तेन च तद्वीर्यं पार्ष्णिप्रहारेण योनेर्बहिर्निस्सारितं भूमौ पतितं तत्र एव कु-
मारो भवत् २७ ॥

तेनच परवीर्यजं भर्तृत्यागाद्विशंकितां सतीं त्यक्तुकामां ममतां प्रति सुराः एवं बृहस्पतिं ममतायाश्च विवा
दरूपं श्लोकं जगुः सुरा यदाह तस्य नाम निरुक्त्यर्थं येन तं तन्नाम निर्वचनेनैव भर्तृत्यागमशंकां मपाकर्तुं
मित्यर्थः ३७ तत्र पूर्वं त्यक्तायां ममतां बृहस्पतिराह हे मूढे इमं पुत्रं भर पोषाण भर्तृविभीति चेत्
त्राह द्वाजं एकस्य क्षेत्रे अन्यस्य वीजाद्भिर्द्वाभ्यां जातं अतस्त्वम्प्यमुं पुत्रं इति तस्यामाज्ञया शंकेत्य
र्थः एवमुक्ता ममतेति प्रत्याह हे बृहस्पते त्वमिमं भरद्वाजं द्वाभ्यामावाभ्यां प्रत्यायतो जातं अतो नाहं

तं त्यक्तुकामां ममतां भर्तृत्यागविशंकितां नामनिर्वचनं तस्य श्लोकमेवं सुरा जगुः ३७ मूढे
भरद्वाजमिमं भरद्वाजं बृहस्पते यातौ यदुक्त्वा पितरौ भरद्वाजस्ततस्त्वयं ३८ चोद्यमाना सुरै
रेवं मत्वा वितथमात्मजं विसृजन्मरुतोबिभ्रन्दत्तोयं वितथेन्वये ३९ इति श्रीभागवते नवम
स्कंधे विंशोऽध्यायः २०

काकिनी भरद्वाजीत्यर्थः यद्यस्मादेवमुक्त्वा पितरौ ममताबृहस्पती विवादमानौ पुत्रं परित्यज्य यातौ
ततोऽयं भरद्वाज इति पाठांतरे यस्य पुत्रोऽस्य त्यागः दुःखात् पितरौ यातौ इत्यर्थः ३८ वितथं व्यभिचार
संभवात्मानं वितथं निरर्थकं मत्वा ममता व्यसृजत् तत्यजतुः पाठांतरे साध्वितं प्रथमं जं भर्ता
वीर्यात्तातमेव मुख्यमात्मजं ममताबृहस्पतिभ्यां त्यक्तमित्यर्थः एवं तं यात्यक्तं मरुतो विभ्रत अबिभरुः

एकविंशेनवैः षष्ठेः सप्तमस्यान्वयउच्यते रंतिदेवाजमीढादेर्यत्र कीर्तिः प्रतन्यते भरतस्यान्वये वितथे।
सति दत्तकाद्वितथसंज्ञो भरद्वाजः स च बालत्वेपि भरतस्य दत्तपुत्रो जात इति तद्वंशोनुक्रम्यते वितथस्य।
सुतो मन्युस्तस्मात् बृहत्क्षत्त्रजयमहावीर्यनरगर्गाः पंच पुत्रा बभूवुः १ वियद्वित्तस्य वियतो गगनादिवो

षुकउवाच वितथस्य सुतान्मन्योर्बृहत्क्षत्त्रो जयस्ततः महावीर्यो नरो गर्गः संकृतिस्तु नरात्म
जः १ गुरुश्च रंतिदेवश्च संकृतेः पांडुनंदन रंतिदेवस्य हि यश इहामुत्र च गीयते २ वियद्वि।
त्तस्य ददतो लब्धं लब्धं बुभुक्षतः निष्किंचनस्य धीरस्य सकुटुंबस्य सीदतः ३ व्यतीयुरष्टचत्वा
रिंशदहान्यपिबतः किल घृतपायससंयावं तोयं प्रातरुपस्थितं ४ कृच्छ्रप्राप्तकुटुंबस्य तृ।
ड्भ्यां जातवेपथुः अतिथिर्ब्राह्मणः काले भोक्तुकामस्य चागमत् ५ तस्मै संव्यभजत्सोन्नमादृ
त्य श्रद्धयान्वितः हरिं सर्वत्र संपश्यन्स भुक्त्वा प्रययौ द्विजः ६

धर्मं विना दैवादुप पस्थितमेव वित्तं भोग्यं य
स्य यद्वा वियत्प्राये ग्रामे वर्त्तितं यस्य तदेवाह ददतो लब्धं देवतः तस्य पंचयति निष्किंचना।
सेन्नादिसाधैः पचदशभिः ३ अपिबतो जलपानमप्यकुर्वतः क्षुन्नादिजयाणां द्वंद्वे कांतोयं च ४ ५ ६

श्री
भाग
टी
५८

58

अथान्यो वृषलोऽतिथिरागमत् विभक्तस्य कुटुंबार्थमन्नादिकं विभक्तवतः ७ सगणाय पृथक्सहिताय ८
९ उच्छेषं देहि तं पक्वमेव तर्पयतीति तथा १० परदुःखात्मसहृदि स्थितस्तथा सर्वेषां दुःखं स्वयमाप्नोत्वेनेति ॥ अ-
णिमाद्यष्टसमृद्धियुक्तां गतिमपि मोक्षमपि चाहं न कामये तर्हि किं कामये तत्राह अखिलदेहभाजाम

अथान्यो भोक्ष्यमाणस्य विभक्तस्य महीपतेः विभक्तं व्यभजत्तस्मै वृषलाय हरिं स्मरन् ७ याते शू-
द्रे तमन्योऽगादतिथिः श्वभिरावृतः राजन्मे दीयतामन्नं सगणाय बुभुक्षते ८ स आदृत्यावशिष्टं य-
द्बहुमानपुरस्कृतं तच्च दत्वा नमश्चक्रे श्वभ्यः श्वपतये विभुः ९ पानीयमात्रमुच्छेषं तच्चैकपरित-
र्पणं पास्यतः पुल्कसोऽभ्यागादपो देह्यशुभस्य मे १० तस्य तां करुणां वाचं निशम्य विपुलश्रमां
कृपया भृशसंतप्त इदमाहामृतं वचः ११ न कामयेऽहं गतिमीश्वरात्परामष्टर्द्धियुक्तामपुनर्भवं वा।
आर्तिं प्रपद्येऽखिलदेहभाजामंतःस्थितो येन भवंत्यदुःखाः १२ क्षुत्तृट्श्रमो गात्रपरिभ्रमश्च दैन्यं
क्लमः शोकविषादमोहाः सर्वे निवृत्ताः कृपणस्य जंतोर्जिजीविषोर्जीवजलार्पणान्मे १३

किं दुःखं तत्राह कृपणानां अन्तःस्थितः सन्नहं प्रपद्ये प्राप्नुयामित्येव कामये येन तद्दुःखभोक्त्रा मया हेतुभूतेन तेषां
सर्वे अदुःखा भवंति ननु दुःखं किमिति प्रार्थयसि परदुःखनिवृत्त्यैव मम सर्वदुःखनिवृत्तिरित्याह क्षुत्तृडि-
ति कृपणजंतोर्जीवनहेतोर्जलस्यार्पणान्मे सर्वे क्षुत्तृडादयो निवृत्ता एवेत्येवं प्रभाष्य १३ ॥

५८

त्रिभुवनाधीशा बलादयः मायाः नदीर्थपरीक्षार्थं प्रथमं मायायाद्बलादिरूपेण प्रतीताः संतस्त्वा
र्थेः ५ परं केवलं वासुदेवे भक्त्या नमस्कृत्य ननतान्किमपि याचितवान् ६ अनन्यराधसः ईश्वराति
रिक्तफलांतरानपेक्षस्य प्रत्यलीयत लीनाबभूव ।।७।। मनुसुतस्य वंशमुक्त्वा तस्यैव गार्ग्यस्य वं

पवेश्र भाक्ष्यपानीयं म्रियमाणः पिपासया युक्तस्तयाद्दाद्धोरे निसर्गकरुणो नृपः ५ त
स्य त्रिभुवनाधीशाः फलदाः फलमिच्छतां आत्मानं दर्शयांचक्रुर्माया विष्णुविनिर्मिताः ५
स वै तेभ्यो नमस्कृत्य निःसंगो विगतस्पृहः वासुदेवे भगवति भक्त्या चक्रे नमः परं ६ ईश्वरा
लंबनं चित्तं कुर्वतोनन्यराधसः मायागुणमयी राजन्स्वप्नवत्प्रत्यलीयत ७ तत्प्रसंगानुभा
भावेन रंतिदेवानुवर्तिनः अभवन्योगिनः सर्वे नारायणपरायणाः ८ गर्गाच्छिनिस्ततोगा
र्ग्यः क्षत्राद्ब्रह्मह्यवर्तत दुरितक्षयो महावीर्यात्तस्य त्रय्यारुणिः कविः ९ पुष्करारुणिरि
त्यत्र ये ब्राह्मणगतिं गताः बृहत्क्षत्रस्य पुत्रोभूद्धस्ती यद्धस्तिनापुरं १ अजमीढो द्विमीढ
श्च पुरुमीढश्च हस्तिनः अजमीढस्य वंश्याः स्युः प्रियमेधादयो द्विजाः २१
श्रमाद्ब्रह्मगार्ग्योरिति महावी
र्यस्य वंशमाह दुरितक्षयात्त्र्य्यारुणिः कविः ९ पुष्करारुणिश्चेति त्रयः पुत्राः कथंभूताः

श्री
भा नै
टी
५५

अजमीढाद्देवास्य योर्ह्लिनः पुत्राः अजमीढाद्वैवाल्यः पुत्रो बृहदिषुर्नामाभूत् २२ २३ पारस्य तनयो
नीपः नीपस्य पुत्रशतं २४ स पञ्चकृत्वी मन्तायां शुककन्यायां ब्रह्मदत्तं जनयामास तदुक्तं हरिवंशात्।
हि ष पराशरकुलोत्पन्नः शुको नाम महायशाः व्यासादरण्यां संभूतो विधूमोग्निरिव ज्वलन् स तस्यां
पितृकन्यायां पीवर्यां जनयिष्यति कृष्णं गौरं प्रभुं शंभुं तथा भूरिश्रुतं जयं कन्यां कीर्तिमतीं षष्ठीं यो

अजमीढाद्बृहदिषुस्तस्य पुत्रो बृहद्धनुः बृहत्कायस्ततस्तस्य पुत्र आसीज्जयद्रथः २२ तत्सुतो
विश्वदस्तस्य सेनजित्समजायत रुचिराश्वो दृढहनुः काश्यो वत्सश्च तत्सुताः २३ रुचिराश्वसु
तः पारः पृथुसेनस्तदात्मजः पारस्य तनयो नीपस्तस्य पुत्रशतं त्वभूत् २४ स कृत्व्यां शुककन्या
यां ब्रह्मदत्तमजीजनत् योगी स गवि भार्यायां विष्वक्सेनमधात्सुतं २५ जैगीषव्योपदेशेन।
योगतन्त्रं चकार ह उदक्सेनस्ततस्तस्माद्भल्लाटो बार्हदीषवाः २६

गिनीं योगमातरं ब्रह्मदत्तस्य जननीं महिषीमणुहस्य चेति यद्यपि शुकः अत्यन्तमेव विमुक्तसंगो निर्गतः
तथापि विरहातुरं व्यासमनुसंधाय तत्छायाशुकं निर्माय गतवान् तदपि प्रायेणैवायं गार्हस्थ्यादि
व्यवहारस्त्वविरोधः स च ब्रह्मदत्तो योगी गवि वाचि सरस्वत्यां २५ स पञ्च योगतन्त्रं चकार बार्हदीषवाः

५५

सुपार्श्वकृत सुपार्श्वात्सुमतिः २२ प्राच्यसाम्नां षट् संहिता जगौ विभज्याध्यापितवान् २८॥ अजमीढस्य
वंश्याः प्रियमेधादयः केचिद्ब्राह्मणा बभूवुः बृहदिषुप्रभृतयः क्षत्रिया इति वंशपादद्वयमुक्तं तस्यैव वंशे शांतनु
यवीनरो द्विमीढस्य कृतिमांस्तत्सुतः स्मृतः नाम्ना सत्यधृतिस्तस्य दृढनेमिः सुपार्श्वकृत २७ सुपा
र्श्वात्सुमतिस्तस्य पुत्रः सन्नतिमांस्ततः कृती हिरण्यनाभाद्यो योगं प्राप्य जगौ स्म षट् २८ संहिताः
प्राच्यसाम्नां वै नीपो ह्युद्ग्रायुधस्ततः तस्य क्षेम्यः सुवीरोऽथ सुवीरस्य रिपुंजयः २९ ततो बहुरथो ना
म पुरुमीढोऽप्रजोऽभवत् नलिन्यामजमीढस्य नीलः शांतिस्ततः सुतः ३० शांतेः सुशांतिस्तत्पुत्रः पु
रुजोऽर्कस्ततोऽभवत् भर्म्याश्वस्तनयस्तस्य पंचासन्मुद्गलादयः ३१ यवीनरो बृहद्विश्वः कांपिल्यः संज
यः सुताः भर्म्याश्वः प्राह पुत्रा मे पंचानां रक्षणाय हि ३२ विषयाणामलमिमे इति पंचालसंज्ञिताः।
मुद्गलाद्ब्रह्मनिर्वृत्तं गोत्रं मौद्गल्यसंज्ञितं ३३ मिथुनं मुद्गलाद्भार्म्याद्दिवोदासः पुमानभूत् अहल्या क
न्यका यस्यां शतानंदस्तु गौतमात् ३४ तस्य सत्यधृतिः पुत्रो धनुर्विद्याविशारदः शरद्वांस्तत्सुतो य
स्मादुर्वशीदर्शनात्किल ३५ शरस्तंबेऽपतद्रेतो मिथुनं तदभूच्छुभं तद्दृष्ट्वा कृपयागृह्णाच्छंतनुर्मृग।
यां चरन् ३६ कृपः कुमारः कन्या च द्रोणपत्न्यभवत्कृपी ३७ इति श्रीभागवते नवमस्कंधे एकोनविंशो
ऽ नलिन्यामिति यावत्समाप्ति ३० मुद्गलपक्षः यवीनरादयस्तस्य नामानि पंचेव पंच ३१ ३२ ३३ भार्म्याश्वपुत्रान्मि
थुनं चाभूत् तदेवाह दिवोदासः पुमानहल्या कन्यकेति ३४ ३५ ३६ इति श्रीभावार्थे नवमस्कंधे एकोनविंशो

द्वाविंशेतु दिवोदासवंशमुक्त्वाथवर्ण्यते ऋक्षवंशोजरासंधपार्थदुर्योधनादयः तस्य सोमकपु-
त्राणां शतंच तेषांजंतुः ज्येष्ठः यवीयान् पृषदः १ अजमीढस्य वंशान्तरमाह य इति ततः संवरणा-

शुक उवाच मित्रायुश्च दिवोदासाच्च्यवनस्तत्सुतो नृप सुदासः सहदेवोथ सोमको जंतुजन्मकृ-
त् १ तस्य पुत्रशतं तेषां यवीयान् पृषतः सुतः द्रुपदो द्रौपदी तस्य धृष्टद्युम्नादयः सुताः २ धृष्टद्यु-
म्नाद्धृष्टकेतुर्भार्म्याः पंचालका इमे योजमीढसुतो ह्यन्य ऋक्षः संवरणस्ततः ३ तपत्यां सूर्य-
कन्यायां जज्ञे क्षेत्रपतिः कुरुः परीक्षित्सुधनुर्जह्नुर्निषधाश्च कुरोः सुताः ४ सुहोत्रोभूत्सुधनु-
षश्च्यवनोथ ततः कृती वसुस्तस्योपरिचरो बृहद्रथमुखास्ततः ५ कुशाम्बमत्स्यप्रत्यग्रचेदि-
पाद्याश्च चेदिपाः बृहद्रथात्कुशाग्रोभूदृषभस्तस्य तत्सुतः ६ जज्ञे सत्यहितोपत्यं पुष्पवांस्त-
त्सुतो जहुः अन्यस्यामपि भार्यायां शकले द्वे बृहद्रथात् ७

त् ३ संवरणात्कु — रुः ४ तस्य कृतिन उपरिच-
रो वसुः तस्य वसोर्बृहद्रथो मुख्यमादिर्येषां ५ तानेवाह कुशाम्ब इति ६ तस्य ततः पुष्पवान् जतेतस्याप्य

60

नरवाणतस्मा ८ यस्मात्सोमापेः श्रुतश्रवाः कुरोः पुत्रः परीक्षिदनपत्यः जाह्नवः जह्नोः पुत्रः ९ सुरथो रा
धिकस्तयुरभूदित्यर्थः १०। ११ तस्य प्रतीपस्य देवापिशान्तनुबाह्लीकाः १२ प्राक् पूर्वजन्मनि महाभिष इति सं
ज्ञा यस्य १३ यदा देवो न ववर्ष तदा शान्तनुस्तत्र कारणं ब्राह्मणान्पृष्टवान् १४ ज्यालतीश्चैवमुक्तः स्वराज्ये दोष।

तेमागधावार्हद्रथस्थे जरयाचाभिसंधिते जीवजीवेतिक्रीडेर्त्वज्जरासंधोभवत्सुतः ८ ततश्च सहदे
वोभूत्सोमापिर्यच्छ्रुतश्रवाः परीक्षिदनपत्योभूत्सुरथोनामजाह्नवः ९ ततोविदूरथस्तस्मात्सा
र्वभौमस्ततोभवत् जयसेनस्तत्तनयोराधिकोयुतोह्यभूत् १० ततश्चाक्रोधनस्तस्माद्देवातिथिर
मुष्य च ऋक्षस्तस्य दिलीपोभूत्प्रतीपस्तस्यचात्मजः ११ देवापिशान्तनुस्तस्य बाह्लीकइतिचात्मजाः
पितृराज्यंपरित्यज्यदेवापिस्तुवनंगतः १२ अभवच्छन्तनूराजाप्राङ्महाभिषसंज्ञितः यंयंकराभ्यां
स्पृशतिजीर्णंयौवनमेतिसः १३ शान्तिमाप्नोतिचैवाग्र्यांकर्मणातेनशन्तनुः समाद्वादशतद्रा
ज्येनववर्षयदाविभुः १४ शन्तनुर्ब्राह्मणैरुक्तः परिवेत्तायमग्रभुक् राज्यंदेह्यग्रजायाशुपुरराष्ट्र
विवृद्धये १५

संयोगंयः कुर्यादग्रजेस्थिते परिवेत्तासविज्ञेयः परिवित्तिस्तुपूर्वजः इतिस्मृतेः योग्रभुक् सएवमग्रजोभु
नक्ति स्वयंमाहृशोपिपरिवेत्तैवभवति ततस्तस्मैषपरिहाराय राज्यमग्रजायदेहि ततोवृष्टिर्भविष्यतीत्ये

वमुक्तः शंतनुर्वनं गत्वा ज्येष्ठं छंदयामास राज्ञः प्रजापालनादिः परो धर्मः अतस्त्वं राज्यं स्वीकुर्विति प्रा
र्थितवांस्ततः पूर्वमेवाश्ममंत्रिणा प्रथमरायसंज्ञेन देवापिपाषंडीकृत्य राज्यानर्हः कर्तव्य इति प्रहिता वि
प्राः तैः पाषंडमतोपदेशपया गिरा वेदाद्विभ्रंशितः सन् ॥ १४ ॥ वेदवादस्यातिवादान् निंदावचनानि सोऽब्रवी
त् ततस्तस्यापातित्येन राज्यानर्हत्वे जाते शंतनोर्दोषाभावाद्देवो ववर्षेत्यर्थः ॥ १५ ॥ ततः सोमदत्ताद्यृ ॥

एवमुक्तो द्विजैर्ज्येष्ठं छंदयामास सोऽब्रवीत् तन्मंत्रिप्रहितैर्विप्रैर्वेदाद्विभ्रंशितो गिरा ॥ १४ ॥ वेदवादा
तिवादान्वै तदा देवो ववर्ष ह देवापिर्योगमास्थाय कलापग्राममाश्रितः ॥ १५ ॥ सोमवंशे कलौ न
ष्टे कृतादौ स्थापयिष्यति बाह्लीकात्सोमदत्तोऽभूद्भूरिर्भूरिश्रवास्ततः ॥ १६ ॥ शलश्च शंतनोरासीद्गं
गायां भीष्म आत्मवान् सर्वधर्मविदां श्रेष्ठो महाभागवतः कविः ॥ १७ ॥ वीरयूथाग्रणीर्येन रामोऽपि
युधि तोषितः शंतनोर्दाशकन्यायां जज्ञे चित्रांगदः सुतः ॥ १८ ॥ विचित्रवीर्यश्चावरजो नाम्ना चित्रांगदो
हतः यस्यां पराशरात्साक्षादवतीर्णो हरेः कला वेदगुप्तो मुनिः कृष्णो यतो

भ्रवाः शलश्चेति त्रयः ॥ १६ ॥ १७ ॥ रामो जामदग्न्यः दाशकन्यायामित्युपरिचरवसोर्वीर्यान्मत्स्यगर्भोद्भूता।
ज्ञाकन्या दाशैः कैवर्तैः पालिता यतो दाशकन्येति प्रसिद्धा यां सत्यवत्यां ॥ २१ ॥ नाम्ना तत्समानेन नाम्ना चित्रां
गदेन गंधर्वेण हतः यस्यां सत्यवत्यां शंतनुपरिग्रहात्पूर्वमेव वेदगुप्तो येन यतो ऽहं ज्ञातवानिदं श्रीभागवत

२२ स्वयंवराद्भीष्मेण बलादुपानीते २३ मात्रा सत्यवत्योक्तः इति निषेधाभावमाह अपत्यलिप्सुर्देवरात्तत्स्य।
युक्तादन्तमृतौ त्यादिवचनात् २४ २५ दुःशला नाम कन्यका च जाते २६ शापान्मैथुनेन रुद्धस्य २६

हित्वा स्वशिष्यान्पैलादीन्भगवान्बादरायणः मह्यं पुत्राय शांताय परं गुह्यमिदं जगौ २२ विचित्रवी
र्यश्चाथोवाह काशिराजसुते बलात् स्वयंवरादुपानीते अंबिकांबालिके उभे २३ तयोरासक्तहृदयो
गृहीतो यक्ष्मणा मृतः क्षेत्रेऽप्रजस्य वै भ्रातुर्मात्रोक्तो बादरायणः २४ धृतराष्ट्रं च पांडुं च विदुरं चाप्यजी
जनत् गांधार्यां धृतराष्ट्रस्य जज्ञे पुत्रशतं नृप २५ तत्र दुर्योधनो ज्येष्ठो दुःशला चापि कन्यका शापा
न्मैथुनरुद्धस्य पांडोः कुंत्यां महारथाः २६ जाता धर्मानिलेंद्रेभ्यो युधिष्ठिरमुखास्त्रयः नकुलः सह
देवश्च माद्र्यां नासत्यदस्रयोः २७ द्रौपद्यां पंच पंचभ्यः पुत्रास्ते पितरोऽभवन् युधिष्ठिरात्प्रतिविंध्यः श्रु
तसेनो वृकोदरात् २८ अर्जुनाच्छ्रुतकीर्तिस्तु शतानीकस्तु नाकुलिः सहदेवसुतो राजन्श्रुत
कर्मा तथापरे २९ युधिष्ठिरात्तु पौरव्यां देवकोऽथ घटोत्कचः भीमसेनाद्धिडिंबायां काल्यां सर्वगतस्ततः ३०

नासत्यदस्राभ्यामश्विभ्यां २७ पंचभ्यो युधिष्ठिरादिभ्यः पंचाभवन् २८ तथा परे च भार्यांतरेषु २९ काली
चाम्ना भीमस्य भार्या तस्यां ततो नाम पुत्रोऽभवदित्यर्थः ३०

श्री
भाग
टी
९२

२१ उलूप्यां नागकन्यायां मणिपुरपतेः सुतायां पुत्रिकाधर्मेण दत्तायां बभ्रुवाहनमसूत यत्तस्मिन् सुतः पुत्रि-
पितुः पुत्रिकासुत इत्यर्थः २२ २३ २४ २५ २६ तव सतं पुत्रोद्दिष्टं कृत्वा २७ अभिषेचनात् तस्य पुत्रत्वं इति यावत्

सहदेवात्सुहोत्रं तु विजयासूत पार्वती करेणुमत्यां नकुलो निरमित्रं तथार्जुनः ३१ इरावंतमुलू-
प्यां तु सुतायां बभ्रुवाहनं मणिपुरपतेः सोऽपि तत्पुत्रः पुत्रिकासुतः ३२ तव तातः सुभद्रायामभिम-
न्युरजायत सर्वातिरथजिद्वीर उत्तरायां ततो भवान् ३३ परिक्षीणेषु कुरुषु द्रौणेर्ब्रह्मास्त्रतेजसा ।
त्वं च कृष्णानुभावेन सजीवो मोचितोऽन्तकात् ३४ तवेमे तनयास्तात जनमेजयपूर्वकाः श्रुतसेनो भी-
मसेन उग्रसेनश्च वीर्यवान् ३५ जनमेजयस्त्वां विदित्वा तक्षकान्निधनं गतम् सर्पान्वै सर्पयागाग्नौ ।
स होष्यति रुषान्वितः ३६ कालषेयं पुरोधाय तुरं तुरगमेधषाट् समन्तात्पृथिवीं सर्वां जित्वा यक्ष्य-
ति चाध्वरैः ३७ तस्य पुत्रः शतानीको याज्ञवल्क्यात्त्रयीं पठन् अस्त्रज्ञानं क्रियाज्ञानं शौनकात्परमे-
ष्यति ३८ ॥

माप्स्यति याज्ञवल्क्यात्क्रियाज्ञानं परं चात्मज्ञानं शौनकात्प्राप्स्यति अस्त्रज्ञानं च कृपाचार्यादिति द्रष्टव्यं
याज्ञवल्क्यात्त्रयीमधीत्य सहाध्यायाद्दृष्ट्वा एव वाप्यमिवेत्यलं केऽस्त्रविद्यास्त्रज्ञानं कृपाचार्यादित्येव पाठः ३८ ९२

२९ ४० यद्यस्मात्सुखीनलः पुत्रः ४१ तस्मात्परिप्लवात्सुनयः यस्मात्सुतो मेधावी मध्यः ४२ तस्मात्स

सहस्रानीकस्तस्य चक्रस्तत्पुत्रोऽश्वमेधजः अधिसीमकृष्णस्तस्यापि नेमिचक्रस्तत्सुतः ३९ गजा
ह्वये हृते नद्या कौशाम्ब्यां साधु वत्स्यति उक्तस्ततश्चित्ररथस्तस्मात्कविरथस्ततः ४० तस्माच्छुचि
वृष्टिमांस्तस्य सुषेणोऽथ महीपतिः सुनीथस्तस्य भविता नृचक्षुर्यत्सुखीनलः ४१ परिप्लवः सुत
स्तस्मान्मेधावी सुनयात्मजः नृपंजयस्ततो दूर्वस्तिमिस्तस्माज्जनिष्यति ४२ तिमेर्बृहद्रथस्तस्मा
च्छतानीकः सुदासजः ४३ शतानीकाद्दुर्दमनस्तस्यापत्यं वहीनरः दंडपाणिर्निमिस्तस्य क्षेमको
भविता नृपः ४४ ब्रह्मक्षत्रस्य वै योनिर्वंशो देवर्षिसत्कृतः क्षेमकं प्राप्य राजानं संस्थां प्राप्स्यति वै
कलौ ४५ अथ मागधराजानो भवितारो वदामि ते भविता सहदेवस्य मार्जारिर्यच्छ्रुतश्रवाः ४६
ततोऽयुतायुस्तस्यापि निरमित्रोऽथ तत्सुतः सुनक्षत्रः सुनक्षत्राद्बृहत्सेनोऽथ कर्मजित् ४७ ततः
सुतंजयाद्विप्रः शुचिस्तस्य भविष्यति क्षेमोऽथ सुव्रतस्तस्माद्धर्मसूत्रः शमस्ततः द्युमत्सेनोऽथ सु
मतिः सुबलो जनिता ततः ४८

शुभत

दासः शतानीकस्तदर्थः ४३ ४४ ४५ बृहद्रथस्य सुता संथस्तस्य सहदेवस्तस्य मार्जारिः यस्मात्मार्जारेः

श्री
भाग
टी
६२

62

सहस्रवत्सरमेतेभोक्ष्यन्ति भूपाला ततःपरंभाव्यान्द्वादशस्कंधेवक्ष्यति ४९ इतिश्रीभावार्थेनवमस्कंधे
द्वाविंशोध्यायः २२ त्रयोविंशेनवर्द्रुह्युस्तुर्वसुबाल्ययदुक्रमात् यदोश्चवंशोनुक्रांतोयावत्सात्वतसंभ।

सेनीनसत्यजिद्रथविश्वजित्तद्रिपुंजयः बार्हद्रथाश्चभूपालाभाव्याः साहस्रवत्सरं ४९ इतिश्री
भागवतेनवमस्कंधेद्वाविंशोध्यायः २२ श्रीशुकउवाच अनोःसभानरश्चक्षुःपरोक्षश्चत्रयःसुताः
सभानरात्कालनरः सृंजयस्तत्सुतस्ततः १ जनमेजयस्तस्यपुत्रोमहाशालोमहामनाः उशी
नरस्तितिक्षुश्चमहामनसआत्मजौ २ शिबिर्वनःशमिर्दक्षश्चत्वारोशीनरात्मजाः वृषदर्भः
सुवीरश्चमद्रःकैकेयआत्मजाः शिबेश्चत्वारएवासंस्तितिक्षोश्चरुषद्रथः ३ ततोहेमोथसुत
पाबलिःसुतपसोभवत् अंगवंगकलिंगाद्याःसुह्मपुंड्रोड्रसंज्ञिताः ४ जज्ञिरेदीर्घतमसोब
लेःक्षेत्रेमहीक्षितः चक्रुःस्वनाम्नाविषयान्षडिमान्प्राच्यकांश्चते ५
न

वः तदेवंययातेःपुत्राणांपंचमस्यपूरोर्वंशोनुक्रांतःइदानींचतुर्थस्यानोर्वंशमनुक्रमति अनोरिति।
कर्णस्यजगतीपतेरित्यंतेन १ तस्यजनमेजयस्यमहामनोः चत्वारउशीनरस्तात्मजाः २ ३ ४ ५

८ ० ८ ९ ९ ११ १२ १३ १४ १५ १६ दुःष्यंतः पौरवंशेषु ७ ८ ९ ॥

खनपानोऽगतो जज्ञे तस्माद्दिविरथस्ततः सुतो धर्मरथो यस्य जज्ञे चित्ररथोऽप्रजाः ॥ ६ रोमपाद इति ख्यातस्तस्मै दशरथः सखा शान्तां स्वकन्यां प्रायच्छदृष्यशृंग उवाह तां ७ देवेऽवर्षति यं रामा आनिन्युर्हरिणीसुतं नाट्यसंगीतवादित्रैर्विभ्रमालिंगनार्हणैः ८ स तु राज्ञोऽनपत्यस्य निरूप्येष्टिं मरुत्वतः प्रजामदाद्दशरथो येन लेभेऽप्रजाः प्रजाः ९ चतुरंगो रोमपादात्पृथुलाक्षस्तु तत्सुतः बृहद्रथो बृहत्कर्मा बृहद्भानुश्च तत्सुताः १० आद्याद्बृहन्मनास्तस्माज्जयद्रथ उदाहृतः विजयस्तस्य संभूत्यां ततो धृतिरजायत ११ ततो धृतव्रतस्तस्य सत्कर्माधिरथस्ततः योऽसौ गंगातटे क्रीडन्मंजूषान्तर्गतं शिशुं १२ कुन्त्यापविद्धं कानीनमनपत्योऽकरोत्सुतं वृषसेनः सुतस्तस्य कर्णस्य जगतीपते १३ द्रुह्योश्च तनयो बभ्रुः सेतुस्तस्यात्मजस्ततः आरब्धस्तस्य गान्धारस्तस्य धर्मस्ततो धृतः १४ धृतस्य दुर्मदस्तस्मात्प्रचेताः प्राचेतसं शतं म्लेच्छाधिपतयोऽभूवन्नुदीचीं दिशमाश्रिताः १५ तुर्वसोश्च सुतो वह्निर्वह्नेर्भर्गोऽथ भानुमान् त्रिभानुस्तत्सुतोऽस्यापि करंधम उदारधीः १६ मरुतस्तत्सुतोऽपुत्रः पुत्रं पौरवमन्वभूत् दुःष्यंतः स पुनर्भेजे स्ववंशं राज्यकामुकः १७ ययातेर्ज्येष्ठपुत्रस्य यदोर्वंशं नरर्षभ वर्णयामि महापुण्यं सर्वपापहरं नृणां १८ यदोर्वंशं नरः श्रुत्वा सर्वपापैः प्रमुच्यते यत्रावतीर्णो

प्रथममस्य सहस्रजित आत्मजः २० २१ सोहञ्जेर्महिष्मान् महिष्मतो भद्रसेनकः तस्य दुर्मदो धनकश्चे-
ति द्वौ पुत्रौ कृतवीर्यस्य जनकः कृतवीर्यादयश्चत्वारो धनकस्यात्मजा इत्यर्थः २२ २३ २४ अनष्टमवि-

यदोः सहस्रजित्क्रोष्टा नलो रिपुरिति श्रुताः चत्वारः सूनवस्तत्र शतजित्प्रथमात्मजः २० महा-
हयो वेणुहयो हैहयश्चेति तत्सुताः धर्मस्तु हैहयसुतो नेत्रः कुन्तेः पिता ततः २१ सोहञ्जिरभव-
त्कुन्तेर्महिष्मान्भद्रसेनकः दुर्मदो भद्रसेनस्य धनकः कृतवीर्यसूः कृताग्निः कृतवर्मा च कृतौ-
जा धनकात्मजाः २२ अर्जुनः कृतवीर्यस्य सप्तद्वीपेश्वरोऽभवत् दत्तात्रेयाद्धरेरंशात्प्राप्तयोगम-
हागुणः २३ न नूनं कार्तवीर्यस्य गतिं यास्यन्ति पार्थिवाः यज्ञदानतपोयोगश्रुतवीर्यजयादिभिः
२४ पंचाशीतिसहस्राणि ह्यव्याहतबलः समाः अकरोदर्जुनो राज्यं हृषीकेशान्वहं स्मरन् अनष्ट-
वित्तस्मरणो बुभुजेऽक्षय्यषड्वसु २५ तस्य पुत्रसहस्रस्य पंचैवोर्वरिता मृधे जयध्वजः शूरसेनो वृषभो
मधुरूर्जितः २६ जयध्वजात्तालजंघस्तस्य पुत्रशतं त्वभूत् क्षत्रं यत्तालजंघाख्यमौर्वतेजोपसंहृ-
ते २७

नाशं चित्तं येन तथाविधं स्मरणं यस्य सः अक्षय्यषड्वसु यथा तथा बुभुजे २५ २६ और्वस्य तेजसा सगरेणोपसं-
हृतमित्यर्थः २७

तेषां तालजंघपुत्राणां ज्येष्ठस्तस्य मधोः पुत्रः शतं वृष्णिर्ज्येष्ठो यस्मिन् प्रतीमधोः वृष्णेश्वदेतोः २८ २९ चा
तुर्दशमहारत्नानि तत्त्वज्ञानि श्रेष्ठानि यस्य सः तानि च मार्कंडेयपुराणे वर्णितानि गजवाजिरथस्त्रीषुनि
धिमाल्यांबरद्रुमाः शक्तिः पाशमणिश्छत्रविमानानि चतुर्दश इति ३० दशानां पत्नीसहस्राणां भार्याणां तस्य

तेषां ज्येष्ठो वीतिहोत्रो वृष्णिः पुत्रो मधोः स्मृतः तस्य पुत्रशतं त्वासीद्वृष्णिः ज्येष्ठं यतः कुलं २८ माधवा
वृष्णयो राजन्यादवश्चेति संज्ञिताः यदुपुत्रस्य च क्रोष्टोः पुत्रो वृजिनवांस्ततः २९ स्वाहितस्ततो रुषद्गु
र्वैतस्य चित्ररथस्ततः शशबिन्दुर्महायोगी महाभोजो महानभूत् ३० चतुर्दशमहारत्नश्चक्रवर्त्यप
राजितः तस्य पत्नीसहस्राणां दशानां समहायशाः ३१ दशलक्षसहस्राणि पुत्राणां तास्वजीजनत्
तेषां तु षट्प्रधानानां पृथुश्रवस आत्मजः ३२ धर्मो नामोशना तस्य हयमेधशतस्य याट् तत्सुतो
रुचकस्तस्य पंचासन्नात्मजाः शृणु पुरुजिद्रुक्मरुक्मेषुपृथुज्यामघसंज्ञिताः ३३ ज्यामघस्त्वप्रजो
ऽप्यन्यां भार्यां शैब्यापतिर्भयात् नाविन्दच्छत्रुभवनाद्भोज्यां कन्यामहारषीत् ३४

यस्मैकं लत्तं लत्तं तासु पुत्राणां दशलक्षसहस्राणि जनयामास पृथुश्रवाः पृथुकीर्तिः पृथुश्रवा इत्याद्य
षट्प्रधानाः श्रेष्ठा येषां तेषां ३२ तेषां मध्ये पंचात्मजा आसन् तान् शृणु नामनिर्वाद पुरुजिदिति ३३ भा
र्याभयाद्वैकभार्यस्य वन्यापत्ने ज्यामघस्यापुत्रस्य तत्र यमेव पुत्रप्रदमभवदिति दर्शयन्नाह ज्यामघस्त्विति।

श्री भा न टी ७

३५ यदिमेसपत्नीस्यात्तर्हिस्नुषेयंपुत्रेणातिपिनन्वेतदस्लीस्याद् असपत्नीचेति ३६ प्रतिभयव्याकुलत्वाद्
जनयिष्यसीति भार्याभयप्रकम्पमानस्विन्नसर्वांगस्यान्तःप्राणसंकटमालोक्यानुकम्पितास्तेनपूर्वंव
कृकालमाराधिताविश्वेदेवाःपितरश्चतथास्त्वित्यन्वमोदन ३७ ततश्चदेवताप्रसादेनजनयिष्यसीतिभ
तिवचनस्यहृतगुणेनचतिहृतत्वात्स्याःपिशैव्यागर्भमधात् तस्यचमहिमापराशरादिभिरुक्तः यथोक्तं।

३५ स्नुषातवेत्यभिहितेस्मयंतीपतिमब्रवीत् अहंवंध्यासपत्नीचस्नुषामेयुज्यतेकथं ३६ जनयि-
ष्यसियंराज्ञितस्येयमुपयुज्यते अन्वमोदंततद्विश्वेदेवाःपितरएवच ३७ शैव्यागर्भमधात्काले।
कुमारंसुषुवेशुभं सविदर्भइतिप्रोक्तउपयेमेस्नुषांसतीम् ३८ इतिश्रीभागवतेनवमस्कंधेत्र-
योविंशोध्यायः २३ शुकउवाच तस्यांविदर्भोजनयत्पुत्रौनाम्नाकुशक्रथौ तृतीयंरोमपादंचवि-
दर्भकुलनंदनं १

भार्यावश्यास्तुयेकेचिद्भविष्यंत्यथवामृताः तेषांतुज्यामघःश्रेष्ठःशैव्यापतिरभून्नृपइति
३८ इतिश्रीभावार्थदीपिकायांनवमस्कंधेयदुवंशानुकथनेत्रयोविंशोध्यायः २३ चतुर्विंशेविदर्भ
स्यपुत्रत्रयसमुद्भवाः वंशानानामुख्याःप्रोक्तारामकृष्णोद्भवावधि १ ॥

५५

चैद्यादयः दमघोषादय २ ३ ४ ततोदशार्हाद्याल्कुकमिः पुराणोक्तं तएवं देवमादिशेषोदृष्टव्यः ततः कृतवंशा।
दनुः ५ अनोः पुत्रः पुरुहोत्रः सात्वतस्य देवावृधपुत्रस्य वंशमाह ६ महाभोजस्येत्येवं सप्तमतमारिषदे।

रोमपादसुतोबभ्रुर्बभ्रोः कृतिरजायत उशिकस्तत्सुतस्तस्माच्चैदिचैद्यादयोनृपाः २ क्रथस्यकुं।
तिः पुत्रोभूद्वृष्णिस्तस्याथनिर्वृतिः ततोदशार्होनाम्नाभूत्तस्यव्योमासुतस्ततः ३ जीमूतोविकृति
स्तस्ययस्यभीमरथःसुतः ततोनवरथःपुत्रोजातोदशरथस्ततः ४ करंभिःशकुनेःपुत्रोदेवरातस्त
दात्मजः देवक्षत्रस्ततस्तस्यमधुःकुरुवशादनुः ५ पुरुहोत्रस्त्वनोःपुत्रस्तस्यायुःसात्वतस्ततः भज।
मानोभजिर्दिव्योवृष्णिर्देवावृधोंधक ६ सात्वतस्यसुताःसप्तमहाभोजश्चमारिष भजमानस्यनि।
म्लोचिः किंकणोधृष्टिरेवच ७ एकस्यामात्मजापत्न्यामन्यस्यांचत्रयःसुताः शतजिच्चसहस्रा।
जिदयुतजिदितिप्रभोः ८ बभ्रुर्देवावृधसुतस्तयोःश्लोकावमंपठन्त्यमू यथैवशृणुमोदूरात्संपश्या
मस्तथांतिकात ९ बभ्रुःश्रेष्ठोमनुष्याणांदेवैर्देवावृधःसमः पुरुषाःपंचषष्टिश्चषट्सहस्राणिचा
ष्टच १० येमृतत्वमनुप्राप्ताबभ्रोर्देवावृधादपि महाभोजोतिधर्मात्माभोजाआसंस्तदन्वये ११

प्रार्थ १ ८ ९ १० तत्रउपदेशाभेदेनयेपंचषष्ट्यादिसंख्याःपुरुषास्तेअमृतत्वंमोक्षंप्राप्ताः ११ रामाय

हरि

तस्य युधाजितः शिनिरनमित्रश्च १२ १३ सात्यकिः सत्यकस्य पुत्रो युयुधानः तस्य कुणिः ततः कुणेर्युगंध
रः अनमित्रस्यैवापरः वृष्णिर्नाम पुत्रः १४ अक्रूरः प्रमुखो येषामित्येतद्गुणसंविज्ञानो बहुव्रीहिः १५ १६
अतो क्रूरादिभिर्द्वादशान्ये पुत्रा आसंगादय इति १७ पृथुरेकः विदूरथाद्याश्चान्ये बहवः पृथुपनाद्याः

वृष्णेः सुमित्रः पुत्रोभूद्युधाजिच्च परंतप शिनिस्तस्यानमित्रश्च निघ्नोभूदनमित्रतः १२ सत्रा
जितः प्रसेनश्च निघ्नस्याथासतुः सुतौ अनमित्रसुतो योन्यः शिनिस्तस्याथ सत्यकः १३ युयुधा
नः सात्यकिर्वै जयस्तस्य कुणिस्ततः युगंधरोनमित्रस्य वृष्णिः पुत्रोपरस्ततः १४ श्वफल्कः
चित्ररथश्चैव गांदिन्यां च श्वफल्कतः अक्रूरप्रमुखा आसन्पुत्रा द्वादश विश्रुताः १५ आसंगः सा
रमेयश्च मृदुरो मृदुविद्गिरिः धर्मवृद्धः सुकर्मा च क्षेत्रोपेक्षोरिमर्दनः १६ शत्रुघ्नो गंधमादश्च प्रतिबा
हुश्च द्वादश तेषां स्वसा सुचाराख्या द्वावक्रूरसुतावपि १७ देववानुपदेवश्च तथा चित्ररथात्मजाः
पृथुर्विदूरथाद्याश्च बहवो वृष्णिनंदनाः १८ कुकुरो भजमानश्च शुचिः कंबलबर्हिषः कुकुरस्य सु
तो वह्निर्विलोमा तनयस्ततः १९

तिपादे आद्यशब्देन विदूरथो गृह्यते ततः शूरो विदूरथादासीदिति वक्ष्यमाणान्निर्दे।
शोणपतिः १८ कुकुरादयश्चत्वारो गंधकस्य सुता इति तेषां यथाश्रीपराशरः कुकुरभजमानशुचिकंबलबा।

टिकात्मजासच्चकतुह्यःलि

अंधकाद्दुंदुभिरित्यपि तद्वचनाद्देवत्तेयं २० २१ धृतदेवप्रादियासां शांतिदेवादीनामुपसंतानासम २२ २३ औग्र
सेनय उग्रसेनस्य सुताः २४ वसुदेवस्य ये अनुजा देवभागादयः तेषां स्त्रियो भार्याः अंधकस्य सुतानां चत्ता।

कपोतरोमा तस्यानुः सखा यस्य च तुंबुरुः अंधकाद्दुंदुभिस्तस्मादविद्योतः पुनर्वसुः २० तस्याहुक
श्चाहुकी च कन्या चैवाहुकात्मजौ देवकश्चोग्रसेनश्च चत्वारो देवकात्मजाः २१ देववानुपदेवश्च।
सुदेवो देववर्द्धनः तेषां स्वसारः सप्तासंधृतदेवादयो नृप २२ शांतिदेवोपदेवा च श्रीदेवा देवरक्षि
ता सहदेवा देवकी च वसुदेव उवाह ताः २३ कंसः सुनामा न्यग्रोधः कंकः शंकुः सुहूस्तथा रा
ष्ट्रपालोथ सृष्टिश्च तुष्टिमानौग्रसेनयः २४ कंसा कंसवती कंका शूरभू राष्ट्रपालिका उग्रसेन
दुहितरो वसुदेवानुजस्त्रियः २५ शूरो विदूरथादासीद्भजमानः सुतस्ततः शिनिस्तस्मात्स्वयं भोजो
हृदीकस्तत्सुतो मतः २६

एतौ प्रथमस्य कुकुरस्य वंश उक्तः २५ द्वितीयस्य भजमानस्य वंशमाह शूरो विदूरथादिति भजमानस्य
विदूरथात्कुरु इति पराशरादिवचनात् एषु विदूरथायास्येति एवोक्तास्मि वरथात्मजाद्विदूरथात् २६

देवमीढस्य यः शूरो नाम पुत्रस्तस्य देवमीढो हृदीकस्यैव सुतः यथाह पराशरः तस्यापि कृतवर्मश
तधन्वदेवमीढुषाख्याः पुत्रा बभूवुः देवमीढस्य शूरस्यापि मारिषा नाम पत्न्यभूत् तस्यां चासौ दशपु
त्रानजनयत् २७ वसुदेवपूर्वकान्दशेति २८ आनकाश्च नेदुः २९ हरेः प्रादुर्भावस्थानं ३० पृथायाः

देवबाहुः शतधनुः कृतवर्मेति तत्सुताः देवमीढस्य शूरस्य मारिषा नाम पत्न्यभूत् २७ तस्यां स ज
नयामास दश पुत्रानकल्मषान् वसुदेवं देवभागं देवश्रवसमानकं २८ संजयं श्यामकं कं
कं शमीकं वत्सकं टकं देवदुंदुभयो नेदुरानका यस्य जन्मनि २९ वसुदेवं हरेः स्थानं वदंत्या
नकदुंदुभिं पृथा च श्रुतदेवा च श्रुतकीर्तिः श्रुतश्रवाः ३० राजाधिदेवी चैतेषां भगिन्यः पंच क
न्यकाः कुंतेः सख्युः पिता शूरो ह्यपुत्रस्य पृथामदात् ३१ सापदुर्वाससो विद्यां देवहूतीं प्रतोषि
तात् तस्या वीर्यपरीक्षार्थमाजुहाव रविं शुचिः ३२

कन्यकावस्थायां कर्णोत्पत्तिप्रकारमाह कुंतेरिति पंचभिः ३१ कदाचिदागतं दुर्वाससं पृथा परिच
र्यादिना तोषयामास ततस्तस्मात्सा देवहूतीं देवाह्वानविद्यामवाप तदाह सापेति ३२

ऽदेवमुपागतं वीक्ष्य साश्राह यत्पयार्थ्यं परीतार्थं मया विद्या प्रयुक्ता न तत्त्वया किं चित्कार्यमित्यभिसंधिता
प्रतोयाद्रीत्येवमुक्तो गं विकथाच अमोघं दर्शनं देवीति ३३ कन्याद्रमितिचेन्नवाह यद्यायोनेऽनुष्ठेन तथा

तदेवोपगतं वीक्ष्य देवं विस्मितमानसा प्रत्ययार्थं प्रयुक्ता मे याहि देव क्षमस्व मे ३३ अमोघं दर्श
नं देवि विप्राय त्यसे त्वयि चात्मजे योनिर्यथा न दुष्येत कर्ताहं ते सुमध्यमे ३४ इति तस्यां स आधाय
गर्भं सूर्यो दिवंगतः सद्यः कुमारः संजज्ञे द्वितीय इव भास्करः ३५ तं सात्यजन्नदीतोये कृच्छ्राल्लो।
कस्य बिभ्यती प्रति त्तामुद्वहत्पाण्डुर्वै सत्यविक्रमः ३६ श्रुतदेवां तु कारूषो वृद्धशर्मा सम।
ग्रहीत यस्यामभूद्दन्तवक्त्र ऋषिशप्तो दितेः सुतः ३७ कैकेयो धृष्टकेतुश्च श्रुतकीर्तिमविन्दत सं
तर्दनादयस्तस्यां पंचासन्कैकयाः सुताः ३८ राजाधिदेव्यामावन्त्यौ जयसेनोऽजनिष्ट ह दमघो
षश्चेदिराजः श्रुतश्रवसमग्रहीत ३९ शिशुपालः सुतस्तस्याः कथितस्तस्य संभवः देवभाग
स्य कंसायां चित्रकेतुबृहद्बलौ ४० कंसवत्यां देवश्रवसः सुवीर इषुमांस्तथा कंकायामान।
काज्जातो सत्यजित्पुरुजित्तथा ४१ संजयो राष्ट्रपाल्यां च वृषदुर्मर्षणादिकान् हरिकेशहिरण्या

ह्वं कलोकरिष्यामीति ३४ ३५ ३६ ३७ ३८ श्रावंत्यो विंदानुविंदौ ३९ तदेवं वसुदेवस्य भगिनीनां प्रजनी
स्तुत्रा श्लोका तद्भ्रातृणां वालां पत्नीः पुत्रांश्चाह देवभागस्येति सार्धैः श्लोकैर्नवभिः ४० ४१ ४२

४३ ४४ वसुदेवस्य पत्नीः पुत्रांश्चाह पौरवीत्येकादशभिः ४५ ४६ ४७ कौसल्या भद्रा ४८ ४९ ५०

मिश्रकेशी मदिरा सिंहकादीन्वत्सकलत्रया नन्दपुष्करशालादीन्सुदेवात्वृकस्यादये ४३ स
मित्रा नन्दपालादीन्शमीकावत्सपामिनी कंकस्य कर्णिकायां वैधृतया मजयावपि ४४ पौ
रवी रोहिणी भद्रा मदिरा रोचना इला देवकीप्रमुखाश्चासन्पत्न्य आनकदुन्दुभेः ४५ वलं गदं
सारणं च दुर्मदं विपुलं ध्रुवं वसुदेवस्तु रोहिण्यां कृतादीनुदपादयत् ४६ सुभद्रो भद्रवाहुश्च
दुर्मदो भद्र एव च पौरव्यास्तनया ह्येते भूताद्या द्वादशाभवत् ४७ नन्दोपनन्दकृतकशूराद्या म
दिरात्मजाः कौसल्या केशिनं त्वेकमसूत कुलनन्दनं ४८ रोचनायामतो जाता हस्तहेमांग
दादयः इलायामुरुवल्कादीन्यदुमुख्यानजीजनत् ४९ विपृष्ठो धृतदेवायामेक आनकदुन्दु
भेः शान्तिदेवात्मजा राजन्प्रशमप्रसितादयः ५० राजन्यकल्पवर्षाद्या उपदेवासुता दश
वसुहंससुवंशाद्याः श्रीदेवायास्तु षट्सुताः ५१ देवरक्षितया लब्धा नव चात्र गदादयः वसुदे
वः सुतानष्टावादधे सहदेवया ५२ पुरुविश्रुतमुख्यांस्तु साक्षाद्धर्मो वसूनिव वसुदेवस्तु देव
क्यामष्टौ पुत्रानजीजनत् ५३ कीर्तिमन्तं सुषेणं च भद्रसेनमुदारधीः ऋजुं सम्मर्दनं भद्रं संकर्षणं।
५१ ५२ ५३ ५४ अष्टमस्तु स्वयमेवासीत्तनकमोदिनादेनानाम्भोजनिनो वायनो सोश्रीहरिः ५५

रामजन

तदेवोपपादयति यदीतित्रिभिः ५६ ईशस्यमायानियंतुःपरस्मात्तेनास्यद्रष्टुः साक्षिणः आत्मनःसर्व
गतस्य नत्वेवंभूतस्यमायाविनोदंविनात्मनःकर्मणोवादेहःसंभवतीत्यर्थः ५७ किंच यस्यमाया।
चेष्टितेपुंसोजीवस्यानुग्रहस्तस्यसर्वजीवानुग्राहकस्यकुतःकर्मादिपारतंत्र्येणजन्मादिसंभवःअत।

यदायदाहिधर्मस्यक्षयोवृद्धिश्चपाप्मनां तदातुभगवानीशआत्मानंसृजतेहरिः ५६ नह्यस्या।
जन्मनोहेतुःकर्मणोवामहीपते आत्ममायांविनेशस्यपरस्यद्रष्टुरात्मनः ५७ यन्मायाचेष्टि
तंपुंसःस्थित्युत्पत्त्यप्ययायहि अनुग्रहस्तन्निवृत्तेरात्मलाभायचेष्यते ५८ अक्षौहिणीनांप
तिभिरसुरैर्नृपलांछनैः भुवआक्रम्यमाणायाअभारायकृतोद्यमः ५९ कर्माण्यपरिमेया।
निमनसापिसुरेश्वरैः सहसंकर्षणश्चक्रेभगवान्मधुसूदनः ६०

अनुग्रहमेवाह हियस्मात्तदेवंस्थित्यादा।
योऽर्थ्यन्ते प्रलयेलीनोपाधेर्जीवस्यधर्माद्यसंभवादुपाधिसमष्ट्यादिनाधर्मादिसंपादनेनानुग्रहस्तथात्म
लाभायमोक्षायचेष्यते नत्वेवंहेतुः तेनैवम्भूयमाणेनतस्यस्थित्यादेर्निवृत्तेः श्चेष्टितेभूमेरनुग्रहमाह अक्षौ
हिणीनामितिद्वाभ्यां अभारायभारपरिहाराय ५९ सुरेश्वरैरपिमनसाप्यपरिमेयान्यचिंत्यानिकर्माणिसंक

संकल्पमात्रेण भूभारहरणसमर्थस्यापि कर्मकरणं यशोविस्तारद्वारा भक्तानुग्रहार्थमित्याह कलौ
इति द्वाभ्यां दुःखशोकतमांसि नुदतीति तथा तद्यशो व्यतनोत ॥ ६१ ॥ यस्मिन्सतां कर्णपीयूषे यशः
तीर्थवरे श्रोत्रमेवांजलिः पात्रं यस्य सः पुरुषः सकृदपि उपस्पृश्य आचमनमात्रं कृत्वा
तन्सौटद्यांकृष्टधियः कर्मवासनां धुनुते ॥ ६२ ॥ तदेवाह द्वाभ्यां भोजादिभिः श्लाघनीयमीहितं यस्य ॥ ६३ ॥

कलौ जनिष्यमाणानां दुःखशोकतमोनुदं अनुग्रहाय भक्तानां सुपुण्यं व्यतनोद्यशः ॥ ६१ ॥ य
स्मिन्सत्कर्णपीयूषे यशस्तीर्थवरे सकृत् श्रोत्रांजलिरुपस्पृश्य धुनुते कर्मवासनां ॥ ६२ ॥ भोजवृ
ष्ण्यंधकमधुशूरसेनदशार्हकैः श्लाघनीयेहितः शश्वत्कुरुसृंजयपांडुभिः ॥ ६३ ॥ स्निग्धस्मि
तेक्षितोदारैर्वाक्यैर्विक्रमलीलया नृलोकं रमयामास मूर्त्या सर्वांगरम्यया ॥ ६४ ॥ यस्याननं म
करकुंडलचारुकर्णभ्राजत्कपोलसुभगं सविलासहासं नित्योत्सवं न ततृपुर्दृशिभिः पिबंत्यो
नार्यो नराश्च मुदिताः कुपिता निमेश्च ॥ ६५ ॥

सर्वैरंगै रम्यया मूर्त्या च ॥ ६४ ॥ तद्दर्शनार्थं सुखशोभमाना
द यस्याननं दृशिभिर्नेत्रैः पिबंत्यो नार्यो नराश्च न ततृपुर्न तृप्ता बभूवुः निमेषोन्मेषमात्रव्यवधानमप्यसह
मानाः तत्कर्तुर्निमेः कुपिताश्च बभूवुः कथंभूतमाननं मकरकुंडलाभ्यां चारुकर्णौ भ्राजंतौ कपो
लौ चयेन सुभगं सविलासो हासो यस्मिन् नित्यमुत्सवो यस्मिन् ॥ ६५ ॥

श्रीकृष्णस्य चरितं समासतो वर्णयति जातः इति द्वाभ्यां जातो निजेन रूपेण पश्चात्सुहृषो मनुष्याकारः संप्रवे।
गतः व्रजवासिनामेधितार्थो येन तेषु दारेषु सुतानां शतानि उत्पाद्य आत्मनिगमं स्वकीयं वेदमार्गम् ६६ पृ
नः समुत्थेन कलिना निमित्तेन उरुभारं क्षपयन्दृष्ट्यैव भूपचमूः क्षितिपालानां सेना विधूय विजयेन यश्चर्वते
न जितमित्येवं सद्घोषं कृत्वा परं तत्त्वमुद्धवायोपदिश्य स्वधाम स्वकेनैव रूपेण जगामेति ६७ इति श्रीभा

जातो गतः पितृगृहाद्व्रजमेधितार्थो हत्वा रिपून्सुतशतानि कृतोरुदारः उत्पाद्य तेषु पुरुषः क्र
तुभिः समीजे आत्मानमात्मनिगमं प्रथयंजनेषु ६६ पृथ्व्याः स वै गुरुभरं क्षपयन्कुरूणामंतः
समुत्थकलिना युधि भूपचम्वः दृष्ट्या विधूय विजये जयमुद्विघोष्य प्रोच्योद्धवाय च परं समगात्स्व
धाम ६७ इति श्रीभागवते महापुराणे नवमस्कंधे यदुवंशानुकीर्तनं नाम चतुर्विंशोध्याय २४

गवते नवमस्कंधे यदुवंशानुकीर्तनं नाम चतुर्विंशोध्यायः २४ समाप्तश्चायं नवमस्कंधे नवभिर्ली
लाणीलेस्येनवभक्तिषु ललितं वल्लवमपरमेवंदे परमानंदविग्रहं श्रीभागवतभावार्थदीपिकासंप्रका
शिता स्वपादनवभक्तानामस्मदादीनामदेहिश्वरः परमानंदसंसेवि श्रीधरस्वामिसत्यतः कृतिमालोऽस्य गृ
रतिरंगसौरतैः ११ तामाहभगवान्कार्ष्णिर्मातस्तेमतिरन्यथा मातृभावमतिक्रम्यवर्तसेकामिनी
यथा १२ रतिरुवाच भवान्नारायणसुतःशंवरेणाहृतोवलात् अहंतेधिकृतापत्नीरतिःकामो
भवान्प्रभो १३ एषत्वानिर्दशंसिंधावक्षिपच्छंवरोसुरः मत्स्योग्रसीत्तदुदरादितःप्राप्तोभवान्प्रभो १४
तमिमंजहिदुर्धर्षंदुर्जयंशत्रुमात्मनः मायाशतविदंत्वंचमायाभिर्मोहनादिभिः १५ परिशोचतिते
माताकुररीवगतप्रजा पुत्रस्नेहाकुलादीनाविवत्सागौरिवातुरा १६ ॥

एतस्येप्रभतेव ॥ १२ अधिकृतापत्नीःमत्रदेवःरतिरहंभवान्कामइति १३ १४ दुर्जयत्वेहेतुःमायाशतवि
दमितिकथंतर्हिहंतव्यःतत्राहमायाभिरिति १५ नवत्सविलंवःकार्यइत्याह परिशोचतिरोदितीत्यर्थः १६ ३३

१७ १८ १९ वज्रनिष्पेषे निर्घोषे यथा निष्ठुरः तीव्रो नादो भवति तथाभूतं नादं व्यनदत् प्रतिनिष्ठुरं नादमक
रोदित्यर्थः २० २१ वैहायसस्त्वाकाशे स्थितः २२ सत्वात्मिकां गुणमयीं प्रायुङ्क्ते त्युत्तरस्यान्वयः २३ नाम॥

प्रभाष्यैवं ददौ विद्यां प्रद्युम्नाय महात्मने मायावतीं महामायां सर्वमायाविनाशिनीं १७ स च शंब
रमभ्येत्य संयुगाय समाह्वयत् अविषह्यैस्तमाक्षेपैः क्षिपन्संजनयन्कलिं १८ सोऽधिक्षिप्तो दुर्वचो
भिः पादाहत इवोरगः निश्चक्राम गदापाणिरमर्षात्ताम्रलोचनः १९ गदामाविध्य तरसा प्रद्युम्नाय
महात्मने प्रक्षिप्य व्यनदन्नादं वज्रनिष्पेषनिष्ठुरं २० तामापतन्तीं भगवान्प्रद्युम्नो गदया गदाम् अ
पास्य शत्रवे क्रुद्धः प्राहिणोत्स्वगदां नृप २१ स च मायां समाश्रित्य दैतेयीं मयदर्शितां मुमुचेऽस्त्र
मयं वर्षं कार्ष्णौ वैहायसोऽसुरः २२ बाध्यमानोऽस्त्रवर्षेण रौक्मिणेयो महारथः सत्वात्मिकां म
हाविद्यां सर्वमायोपमर्दिनीं २३ ततो गौह्यकगान्धर्वपैशाचोरगराक्षसीः प्रायुङ्क्त शतशो दैत्यः।
कार्ष्णिर्व्यधमयत्स ताः २४ निशातमसिमुद्यम्य सकिरीटं सकुण्डलं शंबरस्य शिरः कायात्ताम्र
श्मश्र्वोजसाहरत् २५ आकीर्यमाणो दिविजैः स्तुवद्भिः कुसुमोत्करैः भार्ययाम्बरचारिण्या पुरं नीतो।
नो विहायसा २६

याः व्यधमयत् व्यनाशयत् २४ ताम्राणि श्मश्रूणि यस्मिन् तत् ओजसा बलेन २५ २६ ॥

श्री
भाग
पु टी
५५

रुक्माणी
24

विद्युतासहवलाहकोमेघइव २७ २८ नीलाम्बुतेवक्राःयेअलकास्तेषांवालयःतैःशोभिताःलक्षिताः २९ ।
श्रीकृष्णोनभवतीत्यवधार्यसखीरत्नंशेषारतिःतन्मदितम् ३० सततंस्मरंतीआह्लादकोऽयमिति नरवैदूर्यः

ततःपुरवरंप्राणंचलललनाशतसंकुलं विवेशपत्न्यागगनाद्विद्युतेवबलाहकः २७ तंदृष्ट्वाजलदश्यामंपीतकौशेयवाससं प्रलंबबाहुंताम्राक्षंसुस्मितंरुचिराननं २८ स्वलंकृतमुखांभोजंनीलवक्रालकालिभिः कृष्णंमत्वास्त्रियोह्रीतानिलिल्युस्तत्रतत्रह २९ अवधार्यशनैरीषद्वैदर्भीपद्वलहरुणी। तपोषिणी अस्मात्त्वमस्तनंनष्टंस्नेहस्नुतपयोधरा ३१ कोन्वयंनरवैदूर्यःकस्यवाकमलेक्षणः धृतःकयावाजठरेकेयंलब्धात्वनेनवा ३२ ममचाप्यात्मजोनष्टोनीतोयःसूतिकागृहात् एतत्तुल्यवयोरूपोयदिजीवतिकुत्रचित् ३३ कथंत्वनेनसंप्राप्तंसारूप्यंशार्ङ्गधन्वनः आकृत्यावयवैर्गत्यास्वरहासावलोकनैः ३४ सएववाभवेन्नूनंयोमेगर्भेधृतोऽर्भकः अमुष्मिन्प्रीतिरधिकावामःस्फुरतिमेभुजः ३५ एवंमीमांसमानायांवैदर्भ्यांदेवकीसुतः देवक्यानकदुंदुभ्यामुत्तमश्लोकआगमत् ३६

पृष्ठधरत्नःपृष्ठधरवोपि ३२ एतेनतुल्यंवयोरूपंचयस्य ३३ तस्यपुत्रत्वंसंभावयति कथंचिदिति ३४ तदेवाधिकंसंभावयति ३५ देवक्यानकदुंदुभ्यांदेवक्यानकदुंदुभिभ्यामित्यर्थः ३६ ॥

५५

३७ ३८ ३९ ४० प्रतिलोमदर्पेणप्रद्युम्नमनुवर्णयति यमिति पितुःश्रीकृष्णस्य सरूपे प्रद्युम्ने निजत्वात्मी
यं शः मत्वेति भावो भावनायामातरः तन्मातरः कृष्णपत्न्योऽपि रहसि निरूढभावाः सत्यः यदभजन्निति
यत्. तावत्तत्खलु चित्रं कथं यतः स्मरोऽस्मर्यमाणत्वेनैव लोभके कामेऽक्षविषये सति किंच रमास्पदं श्री।

विज्ञातार्थोऽपि भगवांस्तूष्णीमासीज्जनार्दनः नारदोऽकथयत्सर्वं शंबराहरणादिकं ३७ तच्छ्रु
त्वा महदाश्चर्यं कृष्णांतःपुरयोषितः अभ्यनंदन्बहूनब्दान्नष्टं मृतमिवागतं ३८ देवकीवसुदेव
श्च रामकृष्णौ तथा स्त्रियः दंपती तौ परिष्वज्य रुक्मिणी च ययुर्मुदं ३९ नष्टं प्रद्युम्नमायातमाकर्ण्य द्वा
रकौकसः अहो मृत इवायातो बालो दिष्ट्येति हाब्रुवन् ४० यं वै मुहुः पितृसरूपनिजेशभावास्तन्मा।
तरो यदभजन्रहरूढभावाः चित्रं न तत्खलु रमास्पदबिंबबिंबे कामे स्मरेऽक्षविषये किमुतान्यनार्यः ४१
इति श्रीभागवते महापुराणे दशमस्कंधे विस्मोश्चरितवर्णनं नाम पंचपंचाशत्तमोऽध्यायः ५५

कृष्णः तस्य बिंबं श्रीमूर्तिः तस्य बिंबे प्रतिबिंबे पुत्रे तदा किंच वक्तव्यं अन्यनार्योऽभजन्निति ४१ इति श्रीभा।
वार्थदीपिकायां दशमस्कंधे विस्मोश्चरितवर्णनं नाम पंचपंचाशत्तमोऽध्यायः ५५ ॥

षट्पंचाशत्तमे मिथ्याभियोगो मणिमाहरत् कन्यां जाम्बवतः प्राप्य कृष्णः सत्राजितस्ततः पुत्रादिकामतो।
ऽस्य निष्ठा भुक्तानि पंचलोकार्थं ध्यानार्थं नामाह स्यमंताद्दूरमणिदिना सत्यभामा जाम्बवत्यो विवाह प्रस्तावा
य स्यमंतकाख्यानमाह सत्राजितइति सत्राजित इत्याकारितोऽप्यनयानुसारेणेदं श्रुत्वा कृष्णापराधः तच्छा
न्तये स्वयमेवोद्यमं कृत्वा मणिना सह प्रादादिति १ २ भक्तस्य सत्राजितः सूर्यः स्वस्यापि सखैवासीत् स च तु

शुक उवाच सत्राजितः स्वतनयां कृष्णाय कृतकिल्बिषः स्यमंतकेन मणिना स्वयमुद्यम्य दत्तवान्
राजोवाच सत्राजितः किमकरोद्ब्रह्मन्कृष्णस्य किल्बिषं स्यमंतकः कुतस्तस्य कस्माद्दत्ता सुता हरेः २
शुक उवाच आसीत्सत्राजितः सूर्यो भक्तस्य परमः सखा प्रीतस्तस्मै मणिं प्रादात्स च तुष्टः स्यमंतकं ३
स तं बिभ्रन्मणिं कंठे भ्राजमानो यथा रविः प्रविष्टो द्वारकां राजन्तेजसा नोपलक्षितः ४ तं विलोक्य
जना दूरात्तेजसा मुष्टदृष्टयः दीव्यतेऽक्षैर्भगवते शशंसुः सूर्यशंकिताः ५ नारायण नमस्तेस्तु श
ङ्खचक्रगदाधर दामोदरारविंदाक्ष गोविंद यदुनंदन ६ एष आयाति सविता त्वां दिदृक्षुर्जगत्पते मु
ष्णन्गभस्तिचक्रेण नृणां चक्षूंषि तिग्मगुः ७

ष्टः तस्मै स्यमंतकं नाम मणिं प्रादात् प्रीतः स्निग्धः ३ नोपलक्षि
तः सत्राजितोऽसाविति विज्ञातः दीव्यते क्रीडते सूर्योऽयमिति शंकिताः संतः कथयामासुरिति ४ सूर्येण सका
शाद्यागतं कल्पयित्वोद्दिश्य भक्तीनां संबोधनानि नारायणेत्यादीनि ५ गभस्तिचक्रेण रश्मिजालेन मुष्णन्प्र

श्री भाग दशो ५५

25

तिग्मगुः तिग्माः तीक्ष्णा गावो रश्मयो यस्य सः

५

नचेदमयदमानमित्याहुः नन्विति अन्विछंति मृगयंते अजः स्रष्टा ७ बालानामज्ञानां वचनं ज्वलन्निति द्योतमानः ८ कृतानि कौतुकेन उत्सवेन मंगलानि यस्मिन् विप्रैः कृत्वा ९ भारप्रमाणं चतुर्भिर्व्रीहिभिर्गुंजा गुंजा पंचपणः पणानष्टौ धरणमष्टौ च कर्षस्तांश्चतुरः पलं तुलां पलशतं प्राहुर्भारः स्याद्विंशतिस्तुलेति १० मा

नन्वन्विछंति ते मार्गं त्रिलोक्यां विबुधर्षभाः ज्ञात्वाद्य गूढं यदुषु द्रष्टुं त्वां यात्यजः प्रभो ७ शुक उवाच निशम्य बालवचनं प्रहस्यांबुजलोचनः प्राह नासौ रविर्देवः सत्राजिन्मणिना ज्वलन् ८ सत्राजित्स्वगृहं श्रीमत्कृतकौतुकमंगलं प्रविश्य देवसदने मणिं विप्रैर्न्यवेशयत ९ दिने दिने स्वर्णभारानष्टौ स सृजति प्रभो दुर्भिक्षमार्यरिष्टानि सर्पाधिव्याधयोऽशुभाः न संति मायिनस्तत्र यत्रास्तेऽभ्यर्चितो मणिः ११ स याचितो मणिं क्वापि यदुराजाय शौरिणा नैवार्थकामुकः प्रादाद्याच्ञाभंगमतर्कयन् १२ तमेकदा मणिं कंठे प्रतिमुच्य महाप्रभं प्रसेनो हयमारुह्य मृगयां व्यचरद्वने १३ प्रसेनं सहयं हत्वा मणिमाछिद्य केसरी गिरिं विशंजांबवता निहतो मणिमिछता १४ सोपि चक्रे कुमारस्य मणिं क्रीडनकं बिले अपश्यन्भ्रातरं भ्राता सत्राजित्पर्यतप्यत १५

री नाम अकालमृत्युः अरिष्टमभद्रं अशुभाः दुःखहेतवः ११ क्वापि कदाचित् अनेन श्रीभगवत्समर्पणं स्वयमग्रतो भोक्तुः सर्वारिष्टनिवर्तकमप्यभिप्रेतं तेनैव भवतीति सूचितं १२ तदेव दर्शयितुमाह तमेकदेति प्रतिमुच्य बद्ध्वा प्रसेनः सत्राजिद्भ्राता १३ आछिद्य आकृष्य गृहीत्वा १४ १५ ॥

श्री
भाग
वती
२६

अजपन् उपांशु अवोचन् १६ १७ १८ १९ २० २१ २२ २३ क्रव्यार्थे आमिषार्थे २३ अष्टाविंशतिदिनानि यस्मिं
स्तत् अष्टाविंशाहं विंशतिशब्दे इति लोपः शाकपार्थिवः वज्रस्य निष्पेषो निर्घातः तद्वत् परुषैः निष्ठुरैः २४ श्रीकृ

प्रायः कृष्णेन निहतो मणिग्रीवो वनं गतः भ्राता ममेति तच्छ्रुत्वा कर्णे कर्णेऽजपन् जनाः १६ भगवांस्त
दुपश्रुत्य दुर्यशो लिप्तमात्मनि मार्ष्टुं प्रसेनपदवीमन्वपद्यत नागरैः १७ हतं प्रसेनमश्वं च वीक्ष्य।
केसरिणा वने तं चाद्रिपृष्ठे निहतमृक्षेण ददृशुर्जनाः १८ ऋक्षराजबिलं भीममन्धेन तमसावृतं।
एको विवेश भगवानवस्थाप्य बहिः प्रजाः १९ तत्र दृष्ट्वा मणिप्रेष्ठं बालक्रीडनकं कृतं हर्तुं कृत।
मतिस्तस्मिन्नवतस्थेऽर्भकान्तिके २० तमपूर्वं नरं दृष्ट्वा धात्री चुक्रोश भीतवत् तच्छ्रुत्वाभ्यद्रवत्क्रुद्धो
जाम्बवान्बलिनां वरः २१ स वै भगवता तेन युयुधे स्वामिनात्मनः पुरुषं प्राकृतं मत्वा कुपितो ना
नुभाववित् द्वन्द्वयुद्धं सुतुमुलमुभयोर्विजिगीषतोः आयुधाश्मद्रुमैर्दोर्भिः क्रव्यार्थे श्येनयोरिव
२३ आसीत्तदष्टाविंशाहमितरेतरमुष्टिभिः वज्रनिष्पेषपरुषैरविश्रममहर्निशं २४ कृष्णमुष्टिवि
निष्पातनिष्पिष्टाङ्गोरुबन्धनः क्षीणसत्त्वः स्विन्नगात्रस्तमाहातीव विस्मितः २५

स्वस्य मुष्टीनां विनिष्पातैः आघातैः निष्पिष्टानि विश्लथानि अङ्गानां मूरूणां च बन्धनानि यस्य सः २५ ॥ ॥

लोके कोवाश्रयं मनोवलीयानिति विस्मितस्य न विस्मयात् जानेइति सर्वभूतानां यः प्राणः न च यदोजः सहो
बलं चेन्द्रियदेहमनसां सामर्थ्यं तत्सर्वं त्वमित्यहं जाने कथं तथात्वमत आह विद्मेमित्यादि २६ पुराणं देहं
वेद्मीति सृष्टिनिमित्तं यस्य सन् उपादाने अतः पुराणः पुरुषः विश्वं वेदेत्वं कालः इति पृथिवीश्वर एवं सर्वेषामाह
ईशः परः इति वचनस्यार्थमाह आत्मना आत्मेति २६ यत एवंभूतः अतो ममेह देवो नाथ एवं त्वमित्याह

जानेत्वां सर्वभूतानां प्राणमोजः सहोबलं विष्णुं पुराणपुरुषं प्रभविष्णुमधीश्वरं २६ त्वं हि विश्वसृजां
स्रष्टा सृष्टानामपि यच्च सन् कालः कलयतामीशः परआत्मा तथात्मनां २७ यस्येषदुत्कलितरोषक
टाक्षमोक्षैर्वर्त्मादिशत्क्षुभितनक्रतिमिङ्गिलोब्धिः सेतुः कृतः स्वयश उज्ज्वलिता च लङ्का रक्षःशिरां
सि भुवि पेतुरिषुक्षतानि २८ इति विज्ञातविज्ञानमृक्षराजानमच्युतः व्याजहार महाराज भगवान्देव
कीसुतः २९ ॥

यस्येति ईषदुत्कलितः उद्दीपितो यो रोषस्तेन ये कटाक्षास्तैः क्षुभितानक्रादयो यत्र तिमिङ्गिला महामत्स्याश्च
यस्मिन्सोब्धिः वर्त्ममार्गमादिशत् दत्तवान् तथापि येन यस्मिंश्च स्वयश एव सेतुः कृतः उज्ज्वलिता च लङ्का दग्धा
इषुभिः क्षतानि छिन्नानि रक्षसां दशग्रीवस्य शिरांसि भुवि पेतुः स एव त्वमिति जाने २९ इति विज्ञातं विज्ञानं येन
तं विज्ञानशब्दः करणसाधनः कर्मसाधनो वा अक्षराजं इति उक्तवान् २९ ॥

२० वधं तत्र दृष्ट्वा वो विलद्वारं प्राप्ताः तत्र मिथ्याभिशापमसहमानमणिनाथ श्रमज्जन प्रभाते मन्दमन्तर्विलमिद्दृशा
मत्स्यर्थः २१ सहमनिनाममर्षयामास २२ २३ २४ श्रीकृष्णधामध्ये चेद्रभागोनामतुर्गाश्च भजन २५ सा

श्रिमन्थ्यारविंदात्तः परिणामाशंकरेणतं कृपयापरयाभक्तं मेवगंभीरयागिरा २६ मणिहेतो
विद्दृशामावयमृत्यवते विले मिथ्याभिशापंप्रमज्जन्नाम्नो मणिनामुना २७ इत्युक्तः स्वांतुद्दितरं।
कन्यां जांबवतीं ततः अर्हणार्थं समर्पिणा नाकृत्स्नायोपजहार स्व २८ प्रदृष्ट्वा निर्गमं शौरेः शेवहा।
स्य विलेन तलाः पत्नीस्तद्वाद्दशाद्दानितुः खिन्नाः स्वपुरं ययुः २९ निशाम्य देवकी देवी रुक्मिण्यानक।
दुंदुभिः सुहृदोज्ञातयो शोचन्बिलान्कृष्ण मनिर्गतं ३० सत्राजितं शपंत स्तेदुःखिता द्वारकौ।
कसः उपतस्थुर्मद्दामायां दुर्गांकृष्णोपलब्धये ३१ तेषां तु देव्युपस्थानात्प्रत्यादिष्टाशिषा सह।
प्रादुर्बभूव सिद्धार्थः सदारो हर्षयन्हरिः ३२ उपलभ्य हृषीकेशं मृतं पुनरिवागतं सहपत्नीम।
णिग्रीवं सर्वे जाता महोत्सवाः ३३ सत्राजितं समाहूय सभायां राजसंनिधौ प्राप्तिं चाख्याय भग।
वान्मणिनस्मै निवेदयत ३४

च कृष्णः तेषां प्रादुर्भूत कस्मादेव्या उपस्थानात तान्प्रति प्रादिष्टादत्ताया आशीः श्रीकृष्णं दृष्ट्वेति तत्र यास
हैव ३५ यदि लोके जनाः कथं चित्रिस्पृतंवेध पुनरभात्तमुपलभंते तद्वदुपलभ्य सर्वे जाता महोत्सवा प्रा

27

पाप्मनापरितापेनानुतप्यमानः ३९ अघं दोषं आत्मनो रजो मलं अपराधमिति ४० किं कृत्वा कस्मिन् कृते मह्यं साधु भद्रं अदीर्घदर्शिनं अविचारकं क्षुद्रं कृपणं मूढं मे त्वमिति ४१ एवं ध्यायन् उपायं निश्चितेनि दास्य इति द्वा। रत्नं तावत् दुहितरं तावदास्यापि तदनेनतं पापिविदं तेन रत्नमपीति ४२ ४३ बहुभिः कृतवर्मादिभिर्या।

सत्राजित्स्वतनयां गृहीत्वा वा स्वयमेव स ततः अनुतप्यमानो भवन् मगाम स्वेन पाप्मना ४० सोनुध्या।
यंस्तदेवाघं बलवद्विग्रहाकुलः कथं मृजाम्यात्मरजः प्रसीदेद्वाच्युतः कथं ४१ किं कृत्वा साधु मह्यं स्या
न्न शपेद्वा जनो यथा अदीर्घदर्शिनं क्षुद्रं मूढं द्रविणलोलुपं ४२ दास्ये दुहितरं तस्मै स्त्रीरत्नं रत्नमेव च
उपायोयं समीचीनः तस्य शान्तिर्न चान्यथा ४३ एवं व्यवसितो बुद्ध्या सत्राजित्स्वसुतां शुभां मणिं च स्व।
यमुद्यम्य कृष्णायोपजहार ह ४४ तां सत्यभामां भगवानुपयेमे यथाविधि बहुभिर्याचितां शीलरूपौ
दार्यगुणान्वितां ४५ भगवानाह न मणिं प्रतीच्छामो वयं नृप तवास्तां देवभक्तस्य वयं च फलभागि।
नः ४६ इति श्रीभागवते दशमस्कंधे स्यमंतकहरणं नाम षट्पंचाशत्तमोध्यायः ५६

चितां ४५ मणिं न प्रतीच्छामः न ह्यौ कर्मः देवः सूर्यस्तद्भक्तस्येति कथयन् तस्य फलभागिनः इति न वा पुत्रत्वात्
तदीयं धनं अस्माकमेवेति गूढोभिप्रायः ४६ इति श्रीभावार्थदीपिकायां दशमस्कंधे षट्पंचाशत्तमोध्या

श्री भाग दशो ५८

समर्पयामासमैन पुनः शतधन्वपि प्रार्थेदहर्षशो मार्ष्टिं कृस्नो कृताह्न्तान्यमणेः अक्रूरमुररीकृत्य मणेः पात्रमथ्यागमत् उपायेऽस्मन्मेकांते सरामो गजसाह्वयं सत्राजितवधीं कृष्णा तत्ताभंगाफलेष्वक्रो कर्तमाह। विज्ञातार्थोपीति पांडवान् दग्धान् विलद्वारेण निर्गतान् इत्येवं विज्ञातार्थाय नमः कुंतीं च द्रष्टुमाकर्ण्य

शुक उवाच विज्ञातार्थोपि गोविंदो दग्धानाकर्ण्य पांडवान् कुंतीं च कुल्यकरणे सहरामो ययौ कुरून् १ भीष्मं कृपं सविदुरं गांधारीं द्रोणमेव च तुल्यदुःखौ च संगम्य हा कष्टमिति होचतुः २ लब्ध्वैतदंतरं राजन् शतधन्वानमूचतुः अक्रूरकृतवर्माणौ मणिः कस्मान्न गृह्यते ३ योस्मभ्यं संप्रतिश्रुत्य कन्यारत्नं विगर्ह्य नः कृस्नायादान्न सत्राजित्कस्माद्भ्रातरमन्वियात् ४ एवं भिन्नमतिस्ताभ्यां सत्राजितमसत्तमः शयानमवधील्लोभात्स पापः क्षीणजीवितः ५ स्त्रीणां विक्रोशमानानां क्रंदंतीनामनाथवत् हत्वा पशून्सौनिकवन्मणिमादाय जग्मिवान् ६ सत्यभामा च पितरं हतं वीक्ष्य शुचार्पिता व्यलपत्तात तातेति हा हतास्मीति मुह्यती ७ तैलद्रोण्यां मृतं प्रास्य जगाम गजसाह्वयं कृस्नाय विदितार्थाय तप्ताचख्यौ पितुर्वधं ८

रुदतीन्

कुल्यकरणे कुले जातानां व्यवहारार्थे अन्येषां तद्दाहदुःखाभावात् भीष्मादीन्संगम्येत्यन्वयः २१ ननु सत्राजितं कथं मणिं दास्यतीति तत्राहतुः योस्मभ्यमिति भ्रातरं प्रसेनं मृतं कस्मान्नान्वियान्नानुगच्छेत्।

१ ९ श्रीकृष्णस्योद्यमं ॥ द्वैलनं प्रतिकूलं च तूर्णिनमपाराय ॥ ९ अपीतोमनः सप्तदशसंख्याकात् संयुगात्
विरथो गतः ॥ १३ ॥ रामकृष्णावेकमेवतत्त्वमित्यभिप्रेत्याह यदिदमिति अनयामायया मोहिता नेति संधिः ॥

तदाकर्ण्य स्वैरोगान तत्र तत्र लोककर्ता अहोनः परमं कष्टमित्यप्राप्तो विलेपतुः ॥ १ आगतस्य भगवा-
न्तस्मात्सभार्यः साग्रजः पुरे शतधन्वानमारेभे हन्तुं हर्तुं मणिं ततः ॥ ९ सोपि कृष्णस्योद्यमं ज्ञात्वा भीतः प्रा-
णपरीप्सया साहाय्ये कृतवर्माणमयाचत सचाब्रवीत् ॥ नाहमीश्वरयोः कुर्यां हेलनं रामकृष्णयोः
कोनु क्षेमाय कल्पेत तयोर्वृजिनमाचरन् ॥ ९ कंसः सहानुगोपीतो यद्द्वेषात्त्याजितः श्रिया जरासंधः
सप्तदशसंयुगाद्विरथो गतः ॥ १ प्रत्याख्यातः स चाक्रूरं पार्ष्णिग्राहमयाचत सोप्याह को विरुध्येत
विद्वानीश्वरयोर्बलं ॥ १४ य इदं लीलया विश्वं सृजत्यवति हन्ति च चेष्टां विश्वसृजो यस्य न विदुर्मोहिता-
जया ॥ १५ यः सप्तहायनः शैलमुत्पाट्यैकेन पाणिना दधार लीलया बाल उच्छिलीन्ध्रमिवार्भकः ॥ १६
नमस्तस्मै भगवते कृष्णायाद्भुतकर्मणे अनन्तायादिभूताय कूटस्थायात्मने नमः ॥ १७ प्रत्याख्यातः
स तेनापि शतधन्वा महामणिं तस्मिन्न्यस्याश्वमारुह्य शतयोजनगं ययौ ॥ १८ गरुडध्वजमारुह्य रथं
रामजनार्दनौ अन्वयातां महावेगैरश्वैराजन्गुरुद्रुहं ॥ १९

अथार्थः ॥ १ ॥ १ ॥ ९ अंतर्यामिश्रीकृष्णस्तिग्मकः तस्मिन्नक्रूरे मणिं स्थापितवान् ययौ पलायत ॥ ९ गुरुः स्वशुरः ॥

सर्वं

शानंदोजनमात्रमामिन्नाततः पर्यंतं तमशाक्कं तत्रपतितंदृष्ट्वंविस्मयमकरोत् १९ व्यचिनोतमृगयामास
यक्क्रेमणिरत्नीतिविदित्वापितामवंचनायतयाकृतवानितिभावः २१।२२ अन्वेषयन्विञ्च २३ सर्वम

मिथिलायाउपवनेविस्मयपतितंदृष्ट्वं यज्ञामथावत्संज्ञलः कुसोप्युल्यादवत्तत्र १९ पततेभगा।
वांतस्यपदानिल्लिग्मनेमिना चक्रेणाशिरउत्क्रमवासमोञ्चिनोत्मणिं २० यतव्यमणिरा
गम्यकृत्स्नमाहाग्रतोतिके दृष्ट्वाहृतःशतधन्वमणिरत्नंनविद्यते २१ ततआहबलोनूनंसम।
णिःशतधन्वना कस्मिंश्चित्सुहृदेन्यस्तस्तेनमन्वेषपुरंव्रज २२ अहंविदेहमिच्छामिद्रष्टुंप्रियतरंमम
म इत्युक्त्वामिथिलांराजन्विवेशयदुनंदनः २३ तंदृष्ट्वासहसोत्थायमैथिलःप्रीतमानसः अ
र्हयामाससविधिवदर्हणीयंसमर्हणैः २४ उवासतस्यांकतिचिन्मिथिलायांसमाविभुः मानितःप्री
तियुक्तेनजनकेनमहात्मना ततोशिक्षद्गदांकाले धार्तराष्ट्रःसुयोधनः २५ केशवोद्वारिकामेत्य
निधनंशतधन्वनः अप्राप्तिंचमणेःप्राहप्रियायाःप्रियकृद्विभुः २६ ततःसकारयामाससक्रियावै
योर्देनस्यच साकंसुहृद्भिर्भगवान्यायाःस्युःसाम्परायिकाः २८

सैतन्नेष्टितंस्पष्टंचनायेतिमत्वागूढमेवाह अद्दर्शिति २७ २८ कतिचित्समाःसेवत्सरान् प्रासंगिक
माह ततइति २९ सत्यभामामण्यंचयद्दितिस्वचयत्राहकेशवइति २० वंधोसज्जनिःसम्परायिकाः

सूचनः द्वारकायाः सकाशात् क्वापि पलायितौ प्रयोजकौ मणिहरणे शतधन्वनः प्रवर्तकौ तत्राक्रूरः श्री
कृष्णात् समतेनैव गतः कृतवर्मा तु भक्तः पलायनं प्रकटं भयादिबोधितं तत्र लिगाम्यते कथमन्यथा सर्वेतत्पर्यवं च
नेतयोः संभवतीति ॥२९॥ तदेवं श्रीनारायणस्याद्दालपतिसमाख्यायामणिद्धृतेः कृते कृस्वदेशिकैः महाप्रयत्नेर्ष
नमानेनिवसति पुनः श्रीकृष्णेनैव प्रख्यापितो क्रूरइनिकर्णैकर्णजपतितने सत्यभामारामादीनामप्यविप्रा

अक्रूरः कृतवर्मा च श्रुत्वा शतधनोर्वधं व्यूषतुर्भयवित्रस्तौ द्वारकायाः प्रयोजकौ ॥२९॥ अक्रूरे प्रोषितेऽरि
ष्टान्यासन्वै द्वारकौकसां शारीरा मानसास्तापा मुहुर्दैविकभौतिकाः ॥३०॥ ततो एकं हृषीकेशो वदन्
त्सर्वान्मनीषिणः कस्मादिहासन्विघ्नानि प्रोच्यतामचिरेण नः ॥३१॥ इत्यंगोपदिशंत्येके विस्मृत्य प्राग्
दाहृतं मुनिवासनिवासे किं घटेतारिष्टदर्शनं ॥३२॥

सेजनसंग्रहायाक्रूरमाह यस्मादेवं श्रीकृष्णः शाद्वरं भावन्मतं संगो यकेच नत्र तयोर्मध्ये कारणमक्रूरा
नयनेवार्यमिति तद्यथाश्रुतं हृषिपतिमनुवदति अक्रूरे प्रोषित इति ॥३०॥ ३१॥ कृष्य निर्यतीति अंगदेशानन्
श्रीकृष्णमाहात्म्यं विस्मृत्येति तदेवाह स्तनिवासइति मुनीनां वासस्थानं वासो यस्मिन्स मुनिवासः श्रीकृष्णः
तस्य निवासस्थानं इति अक्रूरापगममात्रेणारिष्टदर्शनं किं घटेत तदिच्छां विना न घटेतेत्यर्थः ॥३२॥

श्री
भाग
उत्त
२

पुनस्तत्कमतमेवाः स्वरूपयति काशिदेशेषुदेवेमघवन्यः वर्षतिस्मेति ३३ ३४ इत्येवंभूतमक्रूरमहिमा।
प्रतिपादनपरं वृद्धानां वाक्यं श्रुत्वा सत्यमेवं तथाप्येतावदेवकारणं न भवति किंतु मणेरप्यागम इति
मत्वेत्यर्थः तदेतेन परमत ३४ विज्ञातमखिलं येन सवासावनपववि मतत्तस्य ग्रंथभावः महाभागवतस्य।
मर्यादतोपि एतावयेतानाम्वैवयस्मादाहूतो मनिना सहैवागतइतितत्तावेत्ति ३६ ३७ ततः किमतआह

देवेवर्षतिकाशीशः श्वफल्कायागतायवै स्वसुतांगांदिनींप्रादात्ततोवर्षत्स्मकाशिषु ३२ त
त्सुतस्तत्प्रभावोसावक्रूरोयत्रयत्रह देवोभिवर्षतेतत्रनोपतापानमारिका ३३ इतिवृद्धवचः
श्रुत्वानैतावदिहकारणं इतिमत्वासमानीयप्राहाक्रूरंजनार्दनः ३४ पूजयित्वाभिभाष्यैनंक
थयित्वाप्रियाःकथाः विज्ञाताखिलचित्तज्ञःस्मयमानउवाचह ३५ ननुदानपतेन्यस्तस्त्वय्या
स्तेशतधन्वना स्यमंतकोमणिःश्रीमान्विदितःपूर्वमेवनः ३६ सत्राजितोनपत्यत्वाद्गृह्णी
युर्दुहितुःसुताः दायंनिनीयापःपिंडान्विमुच्यर्णंचशेषितं ३७ तथापिदुर्धरस्त्वन्यैस्त्वय्यास्तांसुव्र
तेमणिः किंतुमामग्रजःसम्यङ्नप्रत्येतिमणिंप्रति ३८

सत्राजितइति अपः पिंडांश्च निनीयदत्वा ऋणंते
नविमुच्यापाकृत्यशेषितमवशिष्टंदायंभुवितःसत्यभामायाःसुताःगृह्णीयुरितिशास्त्रं तथापिसमर्थं।
तिपत्नीदुहितरस्त्वैवपितरौभ्रातरस्तथा तत्सुतागोत्रजाबंधुःशिष्याःसब्रह्मचारिणइति ३८ अग्रजोपि

२८ सत्राजितोरिनपत्यता २

पु सत्राजितोऽनपत्यता

नास्तीति च न वक्तव्ये यतः अव्युच्छिन्नाः संततामखाः वर्तंते इति ४ आलब्धः उक्तः हे विरस्य ह्यु इति वा ४१ रजः
मिथ्याभिशापं प्रमृजन् स्वयं ईश्वरः मिमार्ष्टि मणिना भूयः तस्मै प्रत्यर्पयतवानिति ४२ दुष्कीर्तिं तन्मूलं दुरितं
चेति ४२ इति श्रीभावार्थदीपिकायां दशमस्कंधे सप्तपंचाशतमोऽध्यायः ५७ अष्टपंचाशतमेन कृष्णः पंचकरेग्रहीत ।

दर्शयस्व महाभाग बंधूनां शांतिमावह अव्युच्छिन्ना मखास्तेद्य वर्तंते रुक्मवेदयः ३८ एवं सामभिराल
ब्धः श्वफल्कतनयो मणिं आदाय वाससाच्छन्नं ददौ सूर्यसमप्रभं ३९ स्यमंतकं दर्शयित्वा ज्ञातिभ्यो र
ज आत्मनः विमृज्य मणिना भूयः तस्मै प्रत्यर्पयत्प्रभुः ४० यस्त्वेतद्भगवत ईश्वरस्य विष्णोर्वीर्याढ्यं वृ
जिनहरं सुमंगलं च आख्यानं पठति शृणोत्यनुस्मरेद्वा दुष्कीर्तिं दुरितमपोह्य याति शांतिं ४२ इति
श्रीभागवते दशमस्कंधे स्यमंतकोपाख्याने सप्तपंचाशतमोऽध्यायः ५७ शुक उवाच एकदा पांडवान्द्र
ष्टुं प्रतीतान्पुरुषोत्तमः इंद्रप्रस्थं गतः श्रीमान्युयुधानादिभिर्वृतः १ दृष्ट्वा तमागतं पार्था मुकुंदमखिले
श्वरं उत्तस्थुर्युगपद्वीराः प्राणा मुख्यमिवागतं २ परिष्वज्याच्युतं वीरा अंगसंगहतैनसः सानुराग
स्मितं वक्त्रं वीक्ष्य तस्य मुदं ययुः ३

कालिंदीं मित्रविंदां च सत्यां भद्रां च लक्ष्मणां कालिंदीं निजलाभाय तपः
परमसीयुषी परिणीता स्त्रियावासमिंद्रप्रस्थमथागमत् प्रतीतान् नष्टान् पितुः पदः गृहीपुनः सर्वैरेव तान् युयु
धानः सात्यकिः १ प्राणाः इंद्रियाणि मुख्यं पंचवृत्तिं प्राणमिव २ ३ ॥

श्री
भाग
टी
३१

ज्येष्ठयोः प्रणामं कृत्वा समेनालिंगितः कनिष्ठाभ्यामभिवादितो बभूव ४ कृत्वाशीःपदवीं बद्ध्वा भार्याः समन्व-
न्विता निद्रारहिता पार्थैः नवमविरमन्त्रापरिणीता ५९ अतिहार्दैन स्नेहेनार्द्रं सजलेक्षणो यस्यास्तया
परिष्वक्तः तथा परिष्टष्टा बांधवाः यथाक्रमः ६ प्रेमणा वैक्लव्येन रुद्धः कंठो यस्याः क्लेशपापायेश्चात्मनेदर्शनं।

युधिष्ठिरस्य भीमस्य कृत्वा पादाभिवंदनं अर्जुनेन परिरभ्याथ यमाभ्यां चाभिवादितः ७ परमासनमा
सीनं कृष्णा कृष्णमनिंदिता नवोढा व्रीडिता किंचिच्छनैरेत्याभ्यवंदत ८ तथैव सात्यकिः पार्थैः पू-
जितश्चाभिवंदितः निषसादासनेन्ये च पूजिताः पर्युपासत ९ पृथां समागत्य कृताभिवादनस्तया
तिहार्दर्द्रदृशाभिरंभितः आपृष्टवांस्तां कुशलं सहस्नुषां पितृष्वसारं परिपृष्टबांधवः १० तमाह प्रेम
वैक्लव्यरुद्धकंठाश्रुलोचना स्मरंती तान्बहून्क्लेशान्क्लेशापायात्मदर्शनं ११ तदैव कुशलं नो भूत्स-
नाथास्ते कृतावयं ज्ञातीन्नः स्मरता कृष्ण भ्राता मे प्रेषितस्त्वया १२ न तेस्ति स्वपरभ्रांतिर्विश्वस्य सुहृ-
दात्मनः तथापि स्मरतां शश्वत्क्लेशान्हंसि हृदि स्थितः १३

यच्छ्रुते भजतां भक्तानां क्ले- शापापायात्मनेदर्शनं
दर्शयतीति भावः ११ ज्ञातीन्नः स्मरता अस्मान् यदा भ्राता अक्रूरः प्रेषितः प्रेषितः १२ ज्ञातीनिति वचनात्मा मे
मोहं वारयति स्तौति न ते स्तीति न चेतः विश्वस्येति सुहृदात्मा च तस्य हंसि नाशयसि १३ ॥

३१

क्रमेथ सो विषयात्मकं विनानांदृष्टोसि ॥ स त्वमव सदितिशेषः स त्वमभ्यर्थितः सन्निवाक्ष्यिया समाभिवो ॥
कालिंदीदर्शनेश्च सत्यमाहुएकदेति एवत्याः सायकाः ययोस्तौ तूणीरधुषी ॥ ३ ॥ ४ ॥ ५ ॥ तत्रैयुधिष्ठिराय एव

युधिष्ठिर उवाच किं न श्राव वितं श्रेयो न वेदाहमधीश्वर योगीश्वराणां दुर्दर्शो यत्रोद्भुः क्रमेथ सौ ॥ १ ॥
इति वैवार्षिकान्मासान्त्रातासोभ्यर्थितः स्वावे जनयन्नयलानेटमिर्हूप्रस्थ्योकसौ विभुः ॥ २ ॥ एकदा रथ
मारुह्य विजयो वानरध्वजं गांडीवं धनुरादाय तूणी चाक्षयसायकौ ॥ ३ ॥ साकं कृष्णेन सन्नद्धो विव
ते विपिने वने बहुव्यालमृगाकीर्णं प्राविशत्परवीरहा ॥ ४ ॥ तत्राविध्यच्छरैर्व्याघ्रान्सूकरान्महि
षान्रुरून् शरभान्गवयान्खड्गान्हरिणान्शशशल्लकान् ॥ ५ ॥ तान्निन्युः किंकरा राज्ञे मेध्यान्पर्वण्यु
पागते तृट्परीतः परिश्रान्तो बीभत्सुर्यमुनामगात् ॥ ६ ॥ तत्रोपस्पृश्य विशदं पीत्वा वारि महारथौ ।
कृष्णौ ददृशतुः कन्यां चरन्तीं चारुदर्शनां ॥ ७ ॥ तामासाद्य वरारोहां सुद्विजां रुचिराननां पप्रच्छ प्रेषि
तः सख्या फाल्गुनः प्रमदोत्तमां ॥ ८ ॥ का त्वं कस्यासि सुश्रोणि कुतो वा किं चिकीर्षसि मन्ये त्वां पति
मिच्छंतीं सर्वं कथय शोभने ॥ ९ ॥ कालिंद्युवाच अहं देवस्य सवितुर्दुहिता पतिमिच्छती विष्णुं वरेण्यं
वरदं तपः परममास्थिता नान्यं पतिं वृणे वीर तमृते श्रीनिकेतनं तुष्यतां मे स भगवान्मुकुंदोनाथ।

थान्कमांनदान्वीभत्सुरर्जुनः ॥ १० ॥ सख्या श्रीकृष्णेन ॥ ११ ॥ १२ ॥ अयं मां कामयेदिति शंकायामाह न

श्री
भाग
टी
३२

२२ प्राहावेवन्तद्विद्वान २२ प्रसंगात्तत्कालीनं चरितं तदाह यदैवेति पार्थैर्यदेवसंदिष्टो विश्वापितः।
श्रीकृष्णः तदेव तेषां विश्वकर्मणा देवशिल्पिना नगरं कारयामास २४ किंच भगवन्नूनिरतिशयैश्वर्य।
गुणवानपि अर्जुनस्य धनुरादिलाभाय मारयिष्यामि सर्वोऽवं नामेंद्रस्य वनं २५ प्रलयावततयसायको २६

कालिंदीतिसमाख्याता वसामियमुनाजले निर्मिते भुवने पित्रा यावदच्युतदर्शनं २२ तथाव
दद्गुडाकेशो वासुदेवाय सोपिनां रथमारोप्य तद्विद्वान्यमसदन्मयागामत २३ यदैव कृष्णः संदिष्टः
पार्थानां परमाद्भुतं कारयामास नगरं विचित्रं विश्वकर्मणा २४ भगवांस्तत्र निवसन्स्वानां प्रिय
चिकीर्षया अग्नये खांडवं दातुमर्जुनस्यास सारथिः २५ सोग्निस्तुष्टो धनुरदाद्धयान् श्वेतान्रथं नृप
अर्जुनायाक्षयौ तूणौ वर्म चाभेद्यमस्त्रिभिः २६ मयश्च मोचितो वह्नेः सभां सख्य उपाहरत् यस्मि
न्दुर्योधनस्यासीज्जलस्थलदृशिभ्रमः २७ स तेन समनुज्ञातः सुहृद्भिश्चानुमोदितः आययौ द्वार
कां भूयः सात्यकिप्रमुखैर्वृतः २८

खांडवदाहकवह्नेः सकाशादर्जुनेनायं मयो मोचित इति समासान्वयतो निर्देशः यस्यां सभायां जलस्थलयोर्दृशोर्दृष्टेर्भ्र
मः यथा जले स्थलवत् दृक् दृष्टिर्यस्मिन् जलस्थलदृक् तस्मिन्भ्रम आसीदिति २८ २२

सुपुण्याः स्मरतः स्मरन्तं च यथास्मितं २९ पंचमं मित्रविन्दाविवाहमाह विन्द्यानुविन्द्यावित्यादिना द्वाभ्यां आवन्त्यावावन्तिरा
जानौ ३०।३१। षष्ठमाह नग्नजिदिति कौसल्यः अयोध्यापतिः सत्यानामकन्याभवत् देवी कांतिमती नाग्न

स्वयंवरे स्वभगिनीं कृष्णे सक्तां न्यषेधतां ३० राजाधिदेव्यास्तनयां मि
त्रविंदां पितृष्वसुः प्रसह्य हृतवान्कृष्णो राजन्राज्ञां प्रपश्यतां ३१ नग्नजिन्नाम कौसल्य आसीद्रा
जातिधार्मिकः तस्य सत्याभवत्कन्या देवी नाग्नजिती नृप ३२ न तां शेकुर्नृपा वोढुमजित्वा सप्त गोवृषा
न् तीक्ष्णशृंगान्सुदुर्धर्षान्वीर्यगंधासहान्खलान् ३३ तां श्रुत्वा वृषजिल्लभ्यां भगवान्सात्वतां पतिः
जगाम कौसल्यपुरं सैन्येन महता वृतः ३४ स कौसल्यपतिः प्रीतः प्रत्युत्थानासनादिभिः अर्हणे
नापि गुरुणा पूजयन्प्रतिनंदितः ३५ वरं विलोक्याभिमतं समागतं नरेंद्रकन्या चकमे रमापतिं।
भूयादयं मे पतिराशिषोऽमलाः करोतु सत्या यदि मे धृतो व्रतैः ३६

जितो लिपितस्त्राम्नाः प्रसिद्धेत्यर्थः ३२ वीरस्य गंधमपि न सहंते इति तथा तान् खलान् दुष्टान् ३३ वृषा
जयनियतेन लभ्यां ३४ प्रतिनंदितः प्रतिनंदितवान् श्रीकृष्णेन वा सः प्रतिनंदितः ३५ ॥

३७ ३८ ३९ हैहयराजन्यबन्धोः क्षत्रियस्य शुल्कदाः द्रव्यादिप्रदाः ४० गुणानामेकमेवधाम अस्यानंतंतथा

अर्चितं पुनरित्याह नारायण जगत्पते आत्मानंदेन पूर्णस्य करवाणि किमल्पकः ३७ यस्याङ्घ्रिपं-
कजरजः शिरसा विभर्ति श्रीरब्जजः सगिरिशः सह लोकपालैः लीलातनुः स्वकृतसेतुपरीप्सया-
यः काले दधत्स भगवान्मम केन तुष्येत् ३८ शुक उवाच तमाह भगवान्कृष्णः कृतासनपरिग्र-
हः मेघगंभीरया वाचा सस्मितं कृतवेदनं ३९ श्रीभगवानुवाच नरेन्द्र याच्ञा कविभिर्विगर्हिता रा-
जन्यबंधोर्निजधर्मवर्तिनः तथापि याचे तव सौहृदेच्छया कन्यां त्वदीयां न हि शुल्कदा वयं ४० रा-
जोवाच कोन्यस्तेभ्यधिको नाथ कन्यावर इहेप्सितः गुणैकधाम्नो यस्यांगे श्रीर्वसत्यनपायिनी
४१ किंत्वस्माभिः कृतः पूर्वं समयः सात्वतर्षभ पुंसां वीर्यपरीक्षार्थं कन्यावरपरीप्सया ४२ सप्तै-
ते गोवृषा वीर दुर्दान्ता दुरवग्रहाः एतैर्भग्नाः सुबहवो भिन्नगात्रा नृपात्मजाः ४३

भूतस्य न वा गो ४१ ४२ दुर्दान्ता अशिक्षिताः दुरवग्रहाः अप्रग्राह्याः कृतसाहाट् एतैरिति भग्नाः भंगं प्रा-
प्ताः एतान्यो निगृह्णाति तस्य कन्येति समयः कृतः ४२

श्री
भाग
उती
३२

3

३२

यत्र यदि इमे गोहृषाः ॥५५ सप्तधाकृतेनैव वह्नीनां योषितां सम्पूर्णं एवाहं संभोगयोग्यः स्यामिति सप्तधात्मस्य स्या
पत्न्यप्सरसो नार्थमात्मनः सप्तधाकरणम् ॥५५ ५९ निष्कग्रीवास्ततः स्ववाससस्थ नासां युवतीनां नटीसी

यदि मे निगृहीताः स्युः नैवैव यदुनंदन वरोभवानभिमतोऽइहितमे स्त्रियः पते ॥५५ एवं सप्तधमा।
कर्णं एवह्वापरिकरं प्रभुः आत्मानं सप्तधाकृत्वा व्यग्रहीलीलयैव ताः ॥५७ वद्धा तान्वामभिः शौरि
भग्रदर्पहतोजसः व्यकर्षल्लीलया वद्धान्बालो दारुमयान्यथा ॥५७ ततः प्रीतः सुतां राजा ददौ कृ।
ष्णाय विस्मितः तां प्रत्यगृह्णाद्भगवान्विधिवत्सदृशीं प्रभुः ॥५४ राजपत्न्यश्च दुहितुः कृष्णं लब्ध्वा प्रि
यंपतिं लेभिरे परमानंदं जातश्च परमोत्सवः ॥५८ शंखभेर्यानकाने दुर्गीतवाद्यद्विजाशिषः नरा
नार्यः प्रमुदिताः सुवासः स्रगलंकृताः ॥५९ दशधेनुसहस्राणि पारिवर्हमदाद्विभुः युवतीनां त्रि।
साहस्रे निष्कग्रीव सुवाससां ॥५० नवनागसहस्राणि नागाच्छतगुणान्रथान् रथाच्छतगुणानश्वा।
न्श्वाच्छतगुणान्नरान् ॥५१ दंपती रथमारोप्य महत्या सेनया वृतौ स्नेहप्रक्लिन्नहृदयः प्रेषया।
मास कोसलः ॥५२ ॥

तो ॥५० नागान्नागेभ्यः शतगुणान्नवलक्षाणि रथान् तेभ्यः शतगुणान्नवकोटीः अश्वान्नश्वे।
भ्यः शतगुणान्नवपद्मानि ॥५१ ५२ ॥

श्री
भाग
टी
२४

यदुभिर्गोवृषैश्च भग्नवीर्या अविसदुर्मर्षाः कृतद्युः ५३ तस्यतः क्षिपतः सुगुं नानानिनिपावत ५४ ५५
सप्तमे विवाहमाह श्रुतकीर्तेरिति श्रुतकीर्तिर्नाम या पितृष्वसा तस्याः सुतां भद्रां नाम कैकेयीं तद्देशजा

श्रुत्वैतद्रुरुधुर्भूपा नयन्तं पथि कन्यकां भग्नवीर्याः सुदुर्मर्षा यदुभिर्गोवृषैः पुरा ५३ तानस्यतः शरव्रातान्बन्धुप्रियकृदर्जुनः गाण्डीवी कालयामास सिंहः क्षुद्रमृगानिव ५४ पारिबर्हमुपागृह्य द्वारकामेत्य सत्यया रेमे यदूनामृषभो भगवान्देवकीसुतः ५५ श्रुतकीर्तेः सुतां भद्रामुपयेमे पितृष्वसुः कैकेयीं भ्रातृभिर्दत्तां कृष्णः सन्तर्दनादिभिः ५६ सुतां च मद्राधिपतेर्लक्ष्मणां लक्षणैर्युतां स्वयंवरे जहारैकः स सुपर्णः सुधामिव ५७ अन्याश्चैवंविधा भार्याः कृष्णस्यासन्सहस्रशः । भौमं हत्वा तन्निरोधादाहृताश्चारुदर्शनाः ५८ इति श्रीभागवते महापुराणे दशमस्कन्धे अष्टपञ्चाशत्तमोध्यायः ५८ ॥

अ० ५८ अष्टममाह सुतां चेति एक एवं श्रीकृष्णो लक्ष्मणां जहार ५७ ता
स्त्रीनिरोधात् ततः पुरं तस्मात् भैष्मी जाम्बवती सत्यभामा सत्या भद्रा च लक्ष्मणा कालिन्दी मित्रविन्दा चेत्यष्टौ पट्ट
महिष्यः ५८ इति श्रीभावार्थदीपिकायां दशमस्कन्धे अष्टपञ्चाशत्तमोध्यायः ५८ २४

ऊनषष्टितमे भौमं हत्वा तेनाहृता हरिः। कन्याः सहस्रशः प्राप्य पारिजातं दिवो हरन्। परिणीय ततस्ताभिस्स्वात्म
नो बहुधा रमणैः आत्मारामोऽप्यसौ रेमे तद्गेहेषु गृहस्थवत्। येन ताः स्त्रियो निरुद्धाः स भौमः चकारान्नयेन कारा।
गेन व्यरुन्धत तदाचक्ष्वेति १ इंद्रेण भौमविचेष्टितं ज्ञापितः सन् प्राग्ज्योतिषपुरं ययावित्यन्वयः कथंभूतेन।
हृतं छत्रं यस्य तेन लोकपालप्रधानत्वाद्दिक्स्थवरुणच्छत्रहरणेपि तस्यैव मानभंगात् इति तथोक्तं हृते कुंड।
लेयस्याः सादितिर्वंधुर्माता यस्य तेन च हृतममराद्रेः स्थानं मणिपर्वतलक्षणं यस्य तेन सत्यभामया गृहे।

राजोवाच यथा हतो भगवता भौमो येन च ताः स्त्रियः निरुद्धा एतदाचक्ष्व विक्रमं शार्ङ्गधन्वनः १
शुक उवाच इंद्रेण हृतछत्रेण हृतकुंडलबंधुना हृतामराद्रिस्थानेन ज्ञापितो भौमचेष्टितं २ स
भार्यो गरुडारूढः प्राग्ज्योतिषपुरं ययौ ३

भगवंतमिंद्रआगमनं विज्ञापितवान् २ तदा तस्याः कौतुकाय तया भार्यया सह गच्छेयाविति यद्वा तदग्रा।
त्यैव न स्वतंत्रं हनिष्यामीति इति ब्रह्मोक्तं भूम्यैव वरं दत्तं सत्यं कर्तुं सत्यभामायाः भूम्यंशजातया सह गतो या।
हा नारदानीतपारिजातकुसुमे रुक्मिण्यै दत्ते सति कुपितां सत्यभामां सांत्वयता त्वभ्यं पारिजातमेवहा
स्यामीति श्रीकृष्णेन प्रतिश्रुतं तद्विशेषेण सिद्धं तदर्थं तां नीतवानिति विवेचे ३ ॥

गरुडेनयानेकाशणंगिरित्रिदुर्गैर्विमाद्दितेरूपलक्षितेनजलाग्निलिरनिलैश्चसर्वतोवर्तमानेदुर्गमे ४९ युगांता
शनेर्धनिवङ्गीषणंप्रहारिवायाजलान ५० प्राविध्यप्रानोयमद्दानवनादेत्यर्थः ५ नसैश्रीकृसायगदो।

गिरित्रिदुर्गैः शस्त्रदुर्गैर्जलाग्निनिलदुर्गमे मरपाशायुनेचाँरैर्दैः सर्वतःप्राहृते ४ गादयानिर्विभे
दादीनशस्त्रदुर्गाणिसायकैः चक्रेणाग्निजलेवायुंमरपाशांस्तथासिना ५ शंखेनादैत्यपंचाशि
लद्दयानिमनर्षिनो प्रकारांगदयागुर्वानिर्विभेदगदाधरः ६ पांचजन्यध्वनिश्चनायुगांनाश।
निर्भीषणं स्वरःशयानत्रस्थोदैत्यः पंचशिराजलात ७ त्रिशूलमुद्यम्यसदुर्निरीक्षणोयुगांतसू
र्यानलरोचिरुल्वणः ग्रसंस्त्रिलोकीमिवपंचभिर्मुखैरभ्यद्रवत्तार्क्ष्यसुतंयथोरगः ८ प्राविध्य।
शूलेनरसागरुस्मसेनिरस्यवक्त्रैर्व्यनदत्सपंचभिः स्वेनोदसीसर्वदिशोंवरंमहानापूरयत्रक्कटा।
हमावृणोत ९ तदापतद्वैत्रिशिखंगरुत्मतेहरिःशराभ्यामहनत्रिधोजसा मुखेषुतंचापिशरैर
ताडयत्तस्मैगदांसोपिरुषाव्यमुंचत १० तामापतंतींगदयागदांमृधेगदाग्रजोनिर्विभिदेसहस्र।
धा उद्यम्यबाहूनभिधावतोजितःशिरांसिचक्रेणजहारलीलया ११ व्यसुःपपातांभसिकृत्तशीर्षो
व्यमुंचत १० ११ इंद्रतेनसावज्रेण प्रतिक्रियया हेतभूतया प्रमर्षजघः १२ ॥

पीठं पीठनामानं निरगन् निरगमन् ॥ १३ ॥ निकृत्तानि शीर्षादीनि येषां तान् ॥ १४ ॥ १५ ॥ शतघ्नीं शक्तिविशेषम् ॥ १६ ॥
विचित्रा वाजाः पत्त्राणि येषां तैर्निशितैः बाणैः निकृत्ता बाहव ऊरवः शिरोध्राश्च ग्रीवाः विग्रहाश्च देहाः यस्य तं तर्हि ।

ताम्रोऽन्तरिक्षः श्रवणो विभावसुर्वसुर्नभस्वानरुणश्च सप्तमः पीठं पुरस्कृत्य चमूपतिं मृधे भौमप्र
युक्ता निरगन्धृतायुधाः ॥ १३ ॥ प्रायुञ्जतासाद्य शरानसीन्गदाः शक्त्यृष्टिशूलान्यजिते रुषोल्बणाः
तच्छस्त्रकूटं भगवान्स्वमार्गणैरमोघवीर्यस्तिलशश्चकर्त ह तान्पीठमुख्याननयद्यमक्षयं निकृ
त्तशीर्षोरुभुजाङ्घ्रिवर्मणः ॥ १४ ॥ स्वानीकपानच्युतचक्रसायकैस्तथा निरस्तान्नरको धरासुतः नि
रीक्ष्य दुर्मर्षण आस्रवन्मदैर्गजैः पयोधिप्रभवैर्निरक्रमत् ॥ १५ ॥ दृष्ट्वा सभार्यं गरुडोपरि स्थितं सूर्योप
रिष्टात्सतडिद्घनं यथा कृष्णं स तस्मै व्यसृजच्छतघ्नीं योधाश्च सर्वे युगपत्स्म विव्यधुः ॥ १६ ॥ तद्भौमसै
न्यं भगवान्गदाग्रजो विचित्रवाजैर्निशितैः शिलीमुखैः निकृत्तबाहूरुशिरोध्रविग्रहं चकार तर्ह्येव
हताश्वकुञ्जरं ॥ १७ ॥ यानि योधैः प्रयुक्तानि शस्त्रास्त्राणि कुरूद्वह हरिस्तान्यच्छिनत्तीक्ष्णैः शरैरेकै
कशस्त्रिभिः उह्यमानः सुपर्णेन पक्षाभ्यां निघ्नता गजान् ॥ १८ ॥

वतं यदा विव्यधुः तस्मिन्नेव क्षणे ॥ १७ ॥ प्रत्यास्यर्थे कुरूद्वहेति संबोधनं तथाहि तैर्योधैः प्रयुक्तानि शस्त्राणि ता
न्यस्त्राणि पूर्वमेव तत्सैन्यं सर्वं हत्वा पश्चात्तानि शस्त्राण्यस्त्राणि च चिच्छेद तत्राप्येकैकं शस्त्रमस्त्रं च त्रिभिः श

५

श्री
भाग
उत्त
५९

36

कृत्वा

किंच गरुत्मतेति १७ यतः यया शक्त्या वज्रः प्रतिहतः १८ प्रसीं गरुडस्तत्राकम्पत गरुडे वितथोद्यमः स

गरुत्मता हन्यमानास्तुंडपक्षनखैर्गजाः पुरमेवाविशन्नार्ता नरक एको ऽयुध्यत १७ दृष्ट्वा विद्रावितं सैन्यं गरुडेनार्दितं स्वकं तं भौमः प्राहरच्छक्त्या वज्रः प्रतिहतो यतः १८ नाकंपत तया विद्धो मालाहत इव द्विपः शूलं भौमोच्युतं हंतुमाददे वितथोद्यमः १९ तद्विसर्गात्पूर्वमेव नरकस्य शिरो हरिः अपाहरद्गजस्थस्य चक्रेण क्षुरनेमिना २० सकुंडलं चारुकिरीटभूषणं बभौ पृथिव्यां पतितं समुज्ज्वलत् हाहेति साध्वित्यृषयः सुरेश्वरा माल्यैर्मुकुंदं विकिरंत ईडिरे २१ ततश्च भूः कृष्णमुपेत्य कुंडले प्रतप्तजांबूनदरत्नभास्वरे सवैजयंत्या वनमालयार्पयत्प्राचेतसं छत्रमथो महामणिं २२ अस्तौषीदथ विश्वेशं देवी देववरार्चितं प्रांजलिः प्रणता राजन्भक्तिप्रवणया धिया २३ भूमिरुवाच नमस्ते देवदेवेश शंखचक्रगदाधर भक्तेच्छोपात्तरूपाय परमात्मन् नमोस्तु ते २४

न. २१ २२ २३ प्रतप्तमेजांबूनदेयानिते भांस्वरे मेरुं वशभूतं मंदरशिखरं महामणिं चार्पयदिति २४ २५ पे। अस्यर्यंता ना भूमिस्तोतिनमस्त इति परमात्मन् देवायंतर्यामिन् २६

२६

येन मंत्रेण कृत्याः सर्वेष्य समन्त्रयासीतेन मंत्रेण नमस्यति नमस्ति पंकजं नाभौ यस्य तस्मै जगत्कारणायेत्यर्थः
अत एव सत्कीर्तिमयी पंकजमाला विद्यते यस्य तस्मै एवंभूतं ध्यायतां पंकजवत्संप्रसन्नेन तापोपशमनेन नेत्रेय
स्य तस्मै पंकजवत्प्रसन्नौ पंकजौ किं तौ वा नेत्रे यस्य तस्मै नमस्ति २० किंच भगवते निरतिशयैश्वर्याय
वासुदेवाय सर्वभूताश्रयाय अत एव विश्वव्यापिने नहि सर्वभूताश्रयत्वं परिच्छिन्नस्य संभवति कुतः स
र्वभूताश्रयत्वं पुरुषाय सर्वस्मात्कार्यात्पूर्वमेव सते सर्वमेवाहमिहासमिति तस्मात्पुरुष इति श्रुतेः।

ॐ नमः पंकजनाभाय नमः पंकजमालिने नमः पंकजनेत्राय नमस्ते पंकजांघ्रये २१ ॐ नमो भग
वते तुभ्यं वासुदेवाय विश्ववे पुरुषायादिबीजाय पूर्णबोधाय ते नमः २२ अनन्ताय जनयित्रे ब्र
ह्मणेऽनन्तशक्तये परावरात्मभूतात्मन परमात्मन्नमोस्तु ते २३

एतदपि कुतः आदिबीजाय आदेर्जगत्कारणस्यापि कारणाय एवमपि तन्मया दिव्यज्ञानमित्याह पू
र्णबोधायेति २२ नन्वेवमपि स्वकर्मणामेव सर्वं तस्मादुत आह अनन्तायेति स्वयमजाय अस्य जगतः ज
नयित्रे उभयत्रापि क्रमेण हेतुद्वयं ब्रह्मणे बृहते अनन्तशक्तये इति च बृहत्त्वाज्जनकं अनन्तशक्तित्वाज्ज
नयितृत्वमित्यर्थः ननु पित्रादयः पुत्रादीनां जनकास्तेषां च तत्त्वं तेषां च भूतानि तेषां च स्वकर्माहारेण।
जीवाः किमत्राह तत्राह परात्मन्नित्यादि पित्रादयो यामाः ताबभव जनकरमित्यर्थः २३

श्री
भाग

न्नगुणानां विक्षोभस्तस्मादिदं तत्त्वं तेन प्रधानस्यैव तस्य च पुरुषस्य च क्षोभकः तत्र च कालो निमित्तमिति प्रसिद्धं कि
मत्र ब्राह्मं तत्राह त्वमेवेति तमसो धारणी ध्यस्तं तत्त्वं व्याख्यानाय पालनाय जगतः सृष्ट्यादौ श्लोकत्रयेण ब्र
ह्मैव विमर्शसिद्धमित्यर्थः कालप्रधानपुरुषाणामत्रेत्यतिरिक्तान्न सन्ति त्वं तत्परः सर्वव्यतिरिक्तः यतस्त्व

त्वं वै सिसृक्षुरज उत्कटं प्रभो तमो निरोधाय बिभर्ष्यसंवृतः स्थानाय सत्त्वं जगतो यदात्मने कालः प्र
धानपुरुषो भवान्परः ॥२१॥ अहं पयो ज्योतिरथानिलो नभो मात्राणि देवा मन इन्द्रियाणि च कर्ता महा
निति सर्वमखिलं चराचरं त्वय्यद्वितीये भगवन्नयं भ्रमः ॥ तस्यात्मजोऽयं तव पादपंकजं भीतः प्रपन्नार्तिहरोप
सादितः तत्पालयैनं कुरु हस्तपंकजं शिरस्यमुष्याखिलकल्मषापहं ॥२२॥ श्रीशुक उवाच ॥ इति भू
म्यार्थितो वाग्भिर्भगवान्भक्तिनम्रया दत्त्वाभयं भौमगृहं प्राविशत्सकलर्द्धिमत् ॥२३॥

मेवं जनयतीत्यर्थः ॥२१॥ कार्यकारणप्रपंचस्य तद्व्यतिरेकं तस्य च सर्वव्यतिरेकमुपपादयति अहमि
ति अहं भूमिः मात्राणीति देवा मन इन्द्रियाणीति च त्रिविधाहंकारकार्याणि कर्ता अहंकारः एवं स्तुत्वा
प्रार्थयते तस्येति हे प्रपन्नार्तिहर तस्य नरकस्यायं भगदत्तो नाम भीतः अतएव मया तव पादपंकजमु
पसादितः ॥२२॥ अभयं दत्त्वा ॥२३॥

शताधिकमित्यपि ज्ञातव्यं यदाहुः श्रीपराशराः कन्यापुरे स कन्यानां षोडशातुलविक्रमः शताधिकानि ददृशे
सहस्राणि महामना इति नानात्वसंख्योपलक्षणं सिद्धान्तनिरूपणे वेति तथाहि तैत्तिरीयोक्तं देवसिद्धासुरादीनां नृपाणां
च जनार्दन हृता हि भौमासुरः कन्या हरोध निजमंदिरे इति ३० ३१ ३२ प्राहिणोत् प्रस्थापयामास समस्ताः कन्याः

तत्र राजन्यकन्यानां षट्सहस्राधिकायुतं भौमाहृतानां विक्रम्य राजभ्यो ददृशे हरिः ३३ तं प्रविष्टं स्त्रि
यो वीक्ष्य नरवीरं विमोहिताः मनसा वव्रिरेऽभीष्टं पतिं दैवोपसादितं ३४ भूयात्पतिरयं मह्यं धाता तद
नुमोदतां इति सर्वाः पृथक् कृष्णे भावेन हृदयं दधुः ३५ ताः प्राहिणोद्द्वारवतीं सुमृष्टविरजोंबराः नरा
यानैर्महाकोशान् रथाश्वान्द्रविणं महत् ३६ ऐरावतकुलेभांश्च चतुर्दन्तांस्तरस्विनः पाण्डुरांश्च चतुःष
ष्टिं प्रेषयामास केशवः ३७ गत्वा सुरेन्द्रभवनं दत्त्वादित्यै च कुंडले पूजितस्त्रिदशेन्द्रेण महेन्द्राण्या च स
प्रियः ३८ चोदितो भार्ययोत्पाट्य पारिजातं गरुत्मति आरोप्य सेन्द्रान्विबुधान्निर्जित्योपानयत्पुरं ३९
स्थापितः सत्यभामाया गृहोद्यानोपशोभनः अन्वगुर्भ्रमराः स्वर्गात्तद्गंधासवलंपटाः ४०

नीयाश्वताः विरजांबराश्च अंबराः नरयानैः शिबिकाभिः प्रापित महाकोशान् इति ३६ ३७ सप्रियः सत्यभामास
हितः ३८ ३९ गृहोद्यानं निष्कुटमुपशोभयतीति सः सेन्द्रान्विबुधान्निर्जित्येति द्वयोः संग्रामतः ४०

श्री
भाग
उटी
४८

38

नन्वकथंप्रसादितस्वमनोरथेनश्रीकृष्णेनमहर्षिर्द्वन्द्वस्यसंग्रामस्मराशंक्याह यथाचरति अच्युतमर्थसाधनमि
तिचकर्मद्वयं याचतिधातोः विगृह्यते विग्रहंकरोति महानपिनमस्कारोति याच्ञार्थलिकृतौ १२ यथाय
यावत् अनेनैवक्वापि विधुजनसमागमोपि प्रतिगृहं योगबलेन सूचितः अव्ययः सर्वात्मापि संपूर्णएव १३

ययाच आनम्य किरीटकोटिभिः पादौ स्पृशन्नच्युतमर्थसाधनं सिद्धार्थएतेन विगृह्यते महानहो।
नृणांचनमोधिगाह्मलां १२ अथो मुहूर्तएकस्मिन्नानागारेषुताः स्त्रियः यथोपयेमे भगवा
न्तावद्रूपधरोव्ययः १३ गृहेषुतासामनपाय्यतर्क्यकृन्निरस्तसाम्यातिशयेष्ववस्थितः रेमेरमा।
भिर्निजकामसंप्लुतोयथेतरोगार्हकमेधिकांश्चरन १४ यत्ययरमापतिमवाप्यपतिं स्त्रियस्ता।
ब्रह्मादयोपिनविदुःपदवींयदीया भेजुर्मुदाविरतमेधितयानुरागहासावलोकनवसंगमज।
ल्पलज्जा १५

अहो भाग्यं नारीणामित्याह गृहेष्विति त्रिभिः अनपायीनि कर्माणि करोतीति तथा सः निरस्तं साम्यमति।
शयश्चयैः अव्ययानि तेषु गृहेषु अनपायी अवस्थितः रमाभिर्लक्ष्म्या अंशभूताभिः निजकामसंप्लुतः स्वानं
दपरिपूर्णः गार्हमेधिकान् गृहस्थधर्मान् १४ अनुरागहासः सस्पृहितमवलोकं च नवसंगमं च।
तत्कृतं जल्पं च तस्मिन् लज्जां च भेजुः १५

१०

विश्रमणं संवाहनं केशप्रसाधः केशप्रसाधनं दासीनां शतानि विद्यन्ते यासां तथाभूता अपि स्वयमेव विभो
र्दास्यं विदधुरिति ४५ इति श्रीभावार्थदीपिकायां दशमस्कंधे एकोनषष्टितमोऽध्यायः ५९ प्रथषष्टितमे कृष्णः परिहा
सेन रुक्मिणीं कोपयित्वा ततः प्रेमकलहे तां समसान्त्वयत् ग्राम्यग्राम्यजनानंदमदोदयविडंबनैः रुक्मि
ण्याः प्रेमकलहं कृष्णेनैश्वर्यमीर्यते स्वतल्पस्थं स्वपर्यंकस्थं १ वक्ष्यमाणं रुक्मिण्याः श्रियः श्रीकृष्णसेवया

प्रमृष्टमासनवरार्हणपादशौचताम्बूलविश्रमणवीजनगंधमाल्यैः केशप्रसाधशयनस्नपनोप
हार्यैर्दासीशता अपि विभोर्विदधुः स्म दास्यं ४५ इति श्रीभागवते दशमस्कंधे एकोनषष्टितमो
ऽध्यायः ५९ शुक उवाच कर्हिचित्सुखमासीनं स्वतल्पस्थं जगद्गुरुं पतिं पर्यचरद्भैष्मी व्यजनेन
सखीजनैः १ यस्त्वेतल्लीलया विश्वं सृजत्यत्त्यवतीश्वरः स हि जातः स्वसेतूनां गोपीथाय यदुष्वजः २
तस्मिन्नंतर्गृहे भ्राजन्मुक्तादामविलंबिना विराजिते वितानेन दीपैर्मणिमयैरपि ३ ॥

तं प्रेमसंभावयितुं तस्याः कृष्णमेव तत्त्वमनुस्मारयति यस्त्विति २ याहशीलावद्भिः श्लोकैर्मंदिरमवर्णयति
तस्मिन्निति तच्छब्देन निश्चसिद्धतामाह भ्राजंतीनि यानि मुक्तादामानि तेषां विलंबाः संति यस्मिन् तेन वि
तानेन विराजिते तृतीयांतानां विराजितपदेनान्वयः ३ ॥

श्री
भाग
टी
३१

स्रग्भिः पुनः द्विरेफकुलैर्नादितैश्च विशिष्टां गवाक्षैः रश्मिभिः ४ निर्गच्छद्भिर्गवाक्षेभ्यो धूपैः अतिमनोहरैः दर्शिते ५ पयःफेनवच्छुभ्रमृदुनि पर्यंके कशिपूत्तमे हंसतूलिकायां उपनस्थे सेवत ६ तं देवी वीजयति वालव्यजनमिति ७ उपास्यच्युतमच्युतस्य समीपे सा मणिनूपुराभ्यां रेजे क्वणयंती मयो॥

मल्लिकादामभिः पुष्पैर्द्विरेफकुलनादितैः जालरंध्रप्रविष्टैश्च गोभिश्चंद्रमसोऽमलैः ४ पारिजातवनामोदवायुनोद्यानशालिना धूपैरगुरुजैराजन्जालरंध्रविनिर्गतैः ५ पयःफेननिभे शुभ्रे पर्यंके कशिपूत्तमे उपतस्थे सुखासीनं जगतामीश्वरं पतिं ६ वालव्यजनमादाय रत्नदंडं सखीकरात् तेन वीजयती देवी उपासांचक्र ईश्वरं ७ सोपाच्युतं क्वणयती मणिनूपुराभ्यां रेजेंगुलीयवलयव्यजनाग्रहस्ता वस्त्रांतगूढकुचकुंकुमशोणहारभासा नितंबधृतया च परार्ध्यकांच्या ८

नूपुरौ क्वणयंती तथा अंगुलीयवलयव्यजनानि अग्रहस्ते हस्ताग्रे यस्याः सा वस्त्रांतेन स्थगितौ कुचौ तयोः कुंकुमेन शोणो यो हारस्तस्य भासा तथा नितंबे धृतया परार्ध्यया अमूल्यया कांच्या तया च रेजे ८ ॥

३१

तां निरीक्ष्य प्रीतः सन् स्मयमानो हरिराबभाषे कथंभूतां या लीलया धृततनोस्तस्यानुरूपरूपा अनुरूपं रूपं यस्या-
स्याः यथोक्तं श्रीपाराशरेण देवत्वे देवदेहेयं मनुष्यत्वे च मानुषी विष्णोर्देहानुरूपां वै करोत्येषात्मनस्तनुमि-
ति किंच अलकैः कुंडलाभ्यां निष्केन पदकेनालंकृतकंठेन च वदनेन शोभितेन वक्त्रे उल्लसंती स्मितसुधा यस्या-
स्तां ९ सर्वगुणयुक्तायाया अपि नववृद्धिर्मंदस्मायाशयेनाह राजपुत्रीत्येकादशभिः हे राजपुत्रि लोकपालानां

तां रूपिणीं श्रियमनन्यगतिं निरीक्ष्य या लीलया धृततनोरनुरूपरूपा प्रीतः स्मयन्नलककुंडलनिष्ककं-
ठवक्त्रोल्लसत्स्मितसुधां हरिराबभाषे ९ श्रीभगवानुवाच राजपुत्रीप्सिता भूपैर्लोकपालविभूति-
भिः महानुभावैः श्रीमद्भी रूपौदार्यबलोर्जितैः १० तान्प्राप्तानर्थिनो हित्वा चैद्यादीन्स्मरदुर्मदान् दत्ता
भ्रात्रा स्वपित्रा च कस्मान्नो ववृषेऽसमान् ११ राजभ्यो बिभ्यतः सुभ्रु समुद्रं शरणं गतान् बलवद्भिः कृत-
द्वेषान्प्रायस्त्यक्तनृपासनान् १२ अस्पष्टवर्त्मनां पुंसामलोकपथमीयुषां आस्थिताः पदवीं सुभ्रु प्रा-
यः सीदन्ति योषितः १३ ॥

मिव विभूतिर्येषां विभूतिरैश्वर्यं येषां तैः तथा महानुभावैः श्रीमद्भिः रूपादिभिरूर्जितैश्च एवमीप्सिता १० तान्हि-
त्वा नोऽस्मानसमान् कस्माद्ववृषे वृतवती ११ किंच प्रायशो राजभ्यो जरासंधादिभ्यो बिभ्यतो भयं प्राप्तवतः
१२ अस्पष्टवर्त्मनामविज्ञाताचाराणां अलोकपथमीयुषां तेषां पदवीं मार्गमास्थिता अनुसृताः १३ ॥

श्री
भाग
दुती
५

किंच निष्किंचनाइति ॥ आत्मसमंपरस्परमनुरूपंजन्मैश्वर्याभ्यांसहिता आकृतिःरूपंतानिर्वासमावयः
आयतिः ॥ तदैवोसमीतावविचारोयस्मात्तया २९ अथेदानीमपि ॥ तर्हिकिमित्यालोतादृ मितिवेदत्रा

निष्किंचनावयंशश्वन्निष्किंचनजनप्रियाः तस्मात्प्रायेणनह्याढ्यामांभजंतिसुमध्यमे ॥ ययोरा-
त्मसमंवित्तंजन्मैश्वर्याकृतिर्वयः तयोर्विवाहोमैत्रीचनोत्तमाधमयोःक्वचित् ॥ वैदर्भ्येतदविज्ञा-
यत्वयादीर्घसमीक्षया वृतावयंगुणैर्हीनाभिक्षुभिःश्लाघितामुधा ॥ अथात्मनोनुरूपंवैभजस्व
क्षत्रियर्षभं येनत्वमाशिषःसत्याइहामुत्रचलप्स्यसे ॥ चैद्यशाल्वजरासंधदंतवक्त्रादयोनृपाः स-
र्वेद्विषंतिवामोरुरुक्मीचापितवाग्रजः ॥ तेषांवीर्यमदांधानांदृप्तानांस्मयनुत्तये आनीतासि
मयाभद्रेतेजोपहरताऽसताम् ॥ उदासीनावयंनूनंनस्त्र्यपत्यार्थकामुकाः आत्मलब्ध्यास्महेपूर्णा
देहयोर्ज्योतिरक्रियाः २०॥

तेषांगर्वापनयनाय ॥ स्त्रीणामति
हू वैदेति मममांद्विषंति ॥ स्मयन
दुःसहस्सोदासीन्यमकामत्वेवाह उदासीनाइति देहयोर्देहगेहयोरुदासीनाः अतएवज्योतिरक्रियाःज्यो-
तिःप्रदीपादि तद्वत्साक्षिमात्रतयाःक्रियारहिताआत्मदेवतामदेइति २०॥

५

40

प्रविश्लेषाद्धेतोर्यस्मात्तस्मै वेश्म वार्ष्णेयवशात्: ॥ २२ विललापसमाद् पेटेति नवैव रुणश्रीःकांतिर्यस्या
तेन सजातेनसखक्रमोरणपस ॥ २३ स दुःखमप्रियश्रवणाद्दये न्यागशोकपाशोकोः तुनापसे विनष्टबुद्धिर्य

शुकउवाच एतावदुक्त्वा भगवानात्मानं वल्लभामिव मन्यमानामविश्लेषाद्दर्पघ्न उपारमत ॥ २४ इति
त्रिलोकेशपतेस्तस्यात्मनः प्रियस्य देव्यश्रुतपूर्वमप्रियं श्रुत्वा सभीताहृदि जातवेपथुश्चिंतां दुरंतां रुदत्या
दत्तीन्मामद ॥ २५ पदासन्नातेनन खोहृणाश्चियाध्रुवेलि वंसतुभिरेत ना सितैः प्रसिद्धलीकेकमह्
षितौस्तनौनस्यावयोमुखेनिदुःखरुद्धवाक ॥ २६ तस्याःसदुःखभयशोकविनष्टबुद्धेर्हस्ताच्छ्लथ्या
द्वलयतोव्यजनंपपात देहश्च विक्लवधियः सद्य एव मुमोह रंभेव वातविहता प्रविकीर्य केशान् ॥ २७
तद्दृष्ट्वा भगवान्कृष्णः प्रियायाः प्रेमबंधनं हास्यप्रौढिमजानंत्याः करुणःसोन्वकंपत ॥ २८ पर्यंकाद
वरुह्याशु तामुत्थाप्य चतुर्भुजः केशान्समुह्य तद्वक्त्रं प्रामृजत्पद्मपाणिना ॥ २९

स्तनस्यास्सृष्टेतिपतेति वलयानि यस्मान्हस्तात् देहश्चपपात विक्लवा वशार्थी यस्यास्तस्याः ॥ २७ हास्य
प्रौढिं गांभीर्यं ॥ २८ चतुर्भुज इति उत्थापनाश्लेषणचक्रपरिमार्जनार्थमाविष्कृतचतुर्भुज इत्यर्थः सम्
ह्यत्विवध्य ॥ २९ ॥

श्री
भाग
दशो
ध

अश्रुकले अश्रुभिः शोभिते शुचा शोकाश्रुभिः २२ सांत्वयामास सांत्वनवान् २३ मा मा त्वद्वचः किंतु वा
दिष्यतीति श्रोतुकामेन श्रोतुमिच्छता क्ष्वेल्या नर्मणा एवमाचरितमुक्तं न तु वस्तुतः देशे गाने संहरी २४ प्रेम

प्रमृज्याश्रुकले नेत्रे स्तनौ चोपहतौ शुचा आश्लिष्य बाहुना राजन्ननन्यविषयां सतीं २२ सांत्वयामा
स सांत्वज्ञः कृपया कृपणां प्रभुः हास्यप्रौढिभ्रमच्चित्तामतदर्हां सतां गतिः २३ श्रीभगवानुवाच
मा मा वैदर्भ्यसूयेथा जाने त्वां मत्परायणां त्वद्वचः श्रोतुकामेन क्ष्वेल्याचरितमंगने २४ मुखं च प्रे
मसंरंभस्फुरिताधरमीक्षितुं कटाक्षेपारुणापांगं सुंदरभ्रुकुटीतटं २५ अयं हि परमो लाभो गृहेषु
गृहमेधिनां यन्नर्मैरीयते यामः प्रियया भीरु भामिनि २६ शुक उवाच सैवं भगवता राजन्वैदर्भी
परिसांत्विता ज्ञात्वा तत्परिहासोक्तिं प्रियत्यागभयं जहौ २७

संरंभेण प्रणयकोपेन स्फुरितः कम्पितो ऽधरो यस्मिंस्तत् कटाक्षेण कटाक्षपातेन सहासेनारुणे अपांगौ
यस्मिंस्तत् अतएव सुंदरं कुटिलं भ्रुकुटीतटं यस्मिंस्तत् २५ ननु कलहे किं कौतुकं स्यादत आह अ
यमिति नर्मैर्नर्मभिः यामः कालः २६

भगवतस्तस्यैश्वर्यपूर्णंमुखंसव्रीडहासेनरुचिरेण स्निग्धेनापांगेनवीक्षमाणा ३३ अस समत्वंभयंदुर्गेश्रयतो
प्रबलैःकलिःअज्ञानतमविज्ञानालौकिकेद्वावसाधने निष्किंचनत्वंतस्मीनिराच्छोनाद्दशणीयता अनेकवि
त्संनिर्गुणत्वंतृष्णाज्ञाचावभित्वभि ग्रेदासीनमकामत्वंस्वदोषान्योडशामतः अतोनाटीचेदर्शितवैभआत
तावद्गुणानांकृत्स्नतमोटिता न्यैक्यौम्यषेधतन्द्गुणस्तवैः श्रीभगवतःस्वनिंदापराणीवयानिवचनानिता।

वभाषऋषभंपुंसांवीक्ष्यतंत्रीभगवन्मुखं सव्रीडहासरुचिरस्निग्धापांगेनभारत ३३ श्रीरुक्मिण्यु
वाच नन्वेवमेतदरविंदविलोचनाहयद्वैभवान्भवतःसदृशीविभूम्नः क्वस्वेमहिम्न्यभिरतोभग
वांस्त्र्यधीशःक्वाहंगुणप्रकृतिरज्ञगृहीतपादा ३४

नि सर्वोत्कर्षपरतयाव्याचष्टाणप्रतिभाषते नतुषडंकेकस्मात्रोवदृषेसमानिति तत्राम्सांमंस्तमेवेत्या
ह नन्वेवमिति हेअरविंदलोचन अधीशस्त्र्याणांब्रह्मादीनामप्यधीशीनियंतात्वंक्व क्वचाहंगुणप्रकृ।
तिःत्रिगुणस्वभावाप्राकृतागुणमयी प्रकृतिर्वा नन्वेवमेवाधीश्वरीश्रीः सर्वोपास्यत्वादित्याह अतैः
सकामैःगृहीतोपादोयस्याःसा ३४ ॥

श्री
भाग
उदी
५२

यदुक्तं राजन्येभ्यो बिभ्यतः समुद्रं शरणं गतानिति तत्राह सत्त्वमिति हे उरुक्रम नितिभयाभावे दर्शयति गु-
णाः शब्दादयस्तएव राजानस्तेभ्योभयादिवेति शेते हृदयसमुद्रेन्तः हृद्गताये विषयाकारैरपरिच्छिन्नस्व-
रूपः शेते निश्चलतया प्रकाशते उपलम्भनमात्रश्चैतन्यघनः आत्मा भगवानिति बलवद्भिः कृतद्वेषानिति य-
दुक्तं तदपि सत्यमिति कदिंद्रियगणैः कुत्सितैर्बहिर्मुखैरिंद्रियगणैः कृतमिति शायेणबहुवचनं कुत्सितेइंद्रि-
यगणैरेषामिति वा नित्यं कृतविग्रहः तेषु वाप्रतीतेः यदुक्तं त्यक्तनृपासनानिति तत्राह त्वत्सेवकैरिति

सत्त्वं भयादिव गुणेभ्य उरुक्रमांतः शेते समुद्र उपलम्भनमात्र आत्मा । नित्यं कदिंद्रियगणैः कृतविग्रह-
स्त्वं त्वत्सेवकैर्नृपपदं विधुतं तमोन्धं ॥ ३५ ॥ त्वत्पादपद्ममकरंदजुषां मुनीनां वर्त्मास्फुटं नृपशुभिर्ननु दुर-
विभाव्यं यस्मादलौकिकमिवेहितमीश्वरस्य भूमंस्तवेहितमथो अनु ये भवंतं ३६

नृपाणां पदमासनं अंधं गाढं तमएव तद्विवेकबहुलत्वात् त्वत्सेवकैरेव तत्त्यक्तं किं पुनर्वक्तव्यं त्वया त्य-
क्तमिति ३५ यत्पदवर्त्मनां पुंसामलोकपथमीयुषामिति यदुक्तं तदपि तथैवेत्याह त्वत्पादेति नृपशुभिर्न-
राकारैः पशुभिः किं पुनर्वक्तव्यं तव वर्त्मास्फुटमिति किं च तस्मात्भवंतमनुवर्तंते तेषामपीहितमलौ-
किकमिव यद्वा किं वक्तव्यं तवेश्वरस्येहितमलौकिकमित्यर्थः शाखिताः पदवीं मृगशावः सीदंति योषि-
तश्चास्य परिहारं वदन्ति यदात्थ्ययेपंचश्लोकैः ३६ ॥

५२

निष्किंचना वयं शश्वन्निष्किंचनजनप्रियाः तस्मात्प्रायेण न ह्याढ्या मां भजंति सुमध्यमे इत्येतच्छ्लोकोक्तं दूष-
यं परिहरति निष्किंचन इति दरिद्रत्वलक्षणं न निष्किंचनत्वं तव न दरिद्रत्वात् यस्मादिति अस्मत्तो बलिभुजः
मृत्याग्रपि ब्रह्मादयो यस्मै भगवते बलिं हरंति तस्य सर्वेश्वरस्य भवतो दरिद्रत्वानवघटनं यतो निष्किंचनजनप्रि-
यात्वं तत्र अस्य रूपेणैव बहुरूपं दीनानां विनिवारणादिति त्वयमप्युभयथा नास्तीति प्रेष्ठो भवानिति तेन चित्तमस्मं तुभ्य।

निष्किंचनो ननु भवान्न यतोऽस्ति किंचिद्यस्मै बलिं बलिभुजोऽपि हरंत्यजाद्याः न त्वा विदंत्यसुतृपोंतकमाढ्यतांधाः प्रेष्ठो भवान्बलिभुजामपि तेऽपि तुभ्यं ३७ ॥

आयाविति निष्किंचनाः निष्किंचनाः विषयावैतृष्ण्यवन्तः निष्केण विना निष्किंचनः बलिभुजां ब्रह्मा-
दीनां लोकेश्वराणां त्वं प्रेष्ठः तेऽपि तुभ्यं तवेति तस्मात्प्रायेण न ह्याढ्या मां भजंतीमस्योत्तरं न त्वा विदंतीति
आढ्यतांधाः त्वामंतकं न विदंतीति गुरुनलेश्वराणां प्रेष्ठः अस्मत्तु पः अस्मत्तेव त्वर्पयंति न त्वां भजंति।

श्री
भाग
टी
४३

वलिभुजामपिभवाब्धेरुत्तरणंददतीति यथोरेवसमंविजन्मिन्यनेनोक्रमनोऽपिविल्पपरिहरति तवैति ।
फलात्मापरमानंदरूपः पुनसेवानंदस्याभ्यानिभूतानिमात्राम्रुपत्नीवेनीतिफलतेः समानः सेव्यसेवक
लक्षणः संबंधः ननुपुंसःस्त्रियाश्चमिथोरतयोरतएवतत्कृतमसुखदुःखितोःतदाऊलयोरित्यर्थः २५
भित्तभिःश्राविनामुधन्यस्यपरिहारः तथेतिनिमित्तपदव्याख्यानेनयस्तदंदैर्मुनिभिरितिमुग्धोन्यस्यपा

तवैवमसलपुरुषार्थमयःफलात्मायद्वांछयासमतयोविसृजंतिकृत्स्नं तेषांविभोसमुचितो
भवतःसमानःपुंसःस्त्रियाश्चरतयोःसुखदुःखितोनः २५ त्वंन्यस्तदंडमुनिभिर्गदितानुभाव
आत्मात्मदश्चजगतामितिमेवृतोसि हित्वाभवद्भ्रुवउदीरितकालवेगध्वस्ताशिषोब्जभवनाक
पतीन्कृतोन्ये २६

विहारः आत्मेतिपदद्वयेसर्वप्रियंतस्यजगतामात्मनस्तववर्णनंतस्यृष्टेत्यर्थः किंच आत्मदश्च निवेद
भेतदविताघनयादीर्घसमीलयेतिभवप्रियत्वमेदोषद्वयंपरिहरति इतीति इतितातैवमेमयाहृतो।
सीत्यतत्वपरिहारः हित्वेत्यदीर्घसमीक्ष्यापरिहारः भवतोभ्रुवोःसकाशादुदीरितोयःकालस्तस्यवे
गात्तेनध्वस्ताआशिषोयेषांतान ब्रह्मादीनपिविहायकृतोन्येवराकाइत्यर्थः २९

स्वात्तान्वेपरिक्लृप्तपुरुषान्तरगुणावर्णनप्रदीप्तकोपसंरंभेणानस्मित्रेवानानमापादयति नाऽस्मि ति सिंहाय
ध्यापष्टुं लिप्सायामस्वबलिं हरति तथा शार्दूलः पञ्चविंशादैनैव नत्वा संस्थाप्य लिप्सायामात्मभागं श्रियं यस्त्वं न हार्यः।
स्वतन्त्रानसि तस्मात्तवगात्रभ्यो भयादुदधिं प्रपन्नस्तिनि तद्देवो भाषणोनन्तासंमान्यं न घटते इत्यर्थः ४४ यथा।

नाऽसौ वचस्तवगदाप्यगतयस्वभूपालिप्सायामशार्दूलः तिनदेन नदृश्यंमां वं सिंहोयथा स्वबलिमेंशाप्य पूर्व
भागं तेभ्यो भयाद्युदधिं शरणं प्रपन्नः ४५ यहाल्लयान्तपशिलामनयोंगवेन्यजायेतनाद्रूषगाया
दयपेकपत्रं रात्रेविस्मयविविस्मृवेतमंजाततसीदंतिनेनुपदवीं तरद्वा स्थिताः किं ४६॥

मदस्यच्छवर्त्मेनातिस्यादिनाग्रथांनांभजंतः सीदंति स्वव्रमादनं श्रमावलम्बमुकेनदपिमंदमेवेत्याह पदां
च्युत्येतियस्मतवभक्तनवाच्युयान्त्योनमाः श्रेणोवतस्यापिनां वैभवः पृथुः जायंते भवतः नातूषेयपाति गया।
स्यादिर्धेषाते यपनेतनवपदवीमार्गमाश्रितास्तेकिं सीदंतितन सीदंत्येव अपितनत्वदंशाप्ताः इत्यर्थः ४८

श्री
भाग
टी
४४

एवंचकोशवेशेनावश्यकस्यपरिहारादस्यष्टवर्त्मनामिच्छेनदातेनयेविद्यायाश्चोत्कर्षः एवंलोकमथा
स्मनोनुरूपमिति नचाहं कामयेऽमिति श्लोकद्वयेन गुणानामालयस्य तव पादसरोजगंधं ननुताया
अपवर्गमात्मनुरूपं लक्ष्म्या आलयं तस्मै द्धं महद्भिर्मुखरितं वर्णितं आघ्रायतमविगणय्यमर्त्तो मरणा
धर्मिकामसदोरुभयंयस्यतमेमंकामहो अयेनसेवेन अर्थैविविक्ताकृष्टिर्येषांमां गुणालयस्येस्मनः।

कामंअयेतनतवपादसरोजगंधमाघ्रायसन्मुखरितंजननतापवर्गं लक्ष्म्यालयंनविगणय्यगु।
णालयस्यमर्त्योसदोरुभयमर्थविविक्तदृष्टिः ४२ नेवानुरूपमभजंजगतामधीशमात्मानमत्र
वपरत्रचकामपूरं स्यान्मेतवांघ्रिरशरणंसृतिभिर्भ्रमन्त्यायोवैभजंतमनुयात्यनृतापवर्गः ४२

नगुणोहीनानुतियदुक्तंतदर्पयति ४२ अतस्त्वामेवाहमभजमित्याहनेवेति प्रार्थयतेस्यादिति अशरणं
शरणं सृतिभिर्देवतिर्यगादिभिर्नन्नमभिः पाठांतरे तदर्थवादवहुलकर्मभ्रमणेनित्यर्थः कथंभूतस्तव
यस्त्वंअनृतस्यसंसारस्यापवर्गोनाशोयस्मात्सः भजंतमनुयाति आत्मसात्करोतितस्यतवांघ्रिरिति भीतः
स्यादिशरणमेवानुरूपंभजनयोग्यं अतस्त्वामहमभजमित्यर्थः ४२

४४

येचोक्तागत्तावद्वोगुणाः राजपुत्रीक्षितभूपैलोकपालविभूतिभिरित्यादिना तत्रसेर्षंसशापंसाङ्गुलिभंगो।
वाद ह्यस्यो तस्याःस्तुतिरिति वेगरवकेवलंभारवाहाःगावोवलीवर्दाश्चनित्यंआधारद्विष्ठाः स्थानःस्थावमलाः
विरलाश्चवक्त्रपणाः द्विसाश्चभूस्याश्चकिंकराः नृपालसात्तुर्भगाघाःपतयःस्युःयस्याःकर्णपर्यंतनकयानश
मुपादिति धध तथाहि तेपदान्नमकरंदमजिघ्नतोमतीयास्त्रीविमूढा साकांतोयमितिमतिर्यस्याःसाको

तस्याःस्तुरंस्तुतनृपाभवतोपदिष्टाःस्त्रीणांगृहेषुखरगोष्ठविरालभूपाः यत्कर्णमूलमतिकर्षणा।
तोपयायायुष्मत्कथामृतविर्विविसभास्गीताः धध तत्कृष्णकरोमतत्वकेशपितद्वंतमोसास्थि
रक्तक्रिमिविट्कफपित्तवाते जीवच्छवेभजतिकांतमतिर्विमूढायातेपदान्नमकरंदमजिघ्नती।
स्त्री धध प्रस्तुतजातममतेचरणानुरागात्मत्रतस्समर्पयिचानतिरिक्तदृष्टेः यद्यस्यदृष्टयउपात
रजोतिमात्रेमामीदसेनतुदृतःपरमानुकंपा धध

तमतिःजीवच्छवंभजति त्वगादिभिर्वहिःपिनद्धंछन्ने अंतर्मांसादिमयमिति धध यउक्तमुदासीनांवयमि।
तितद्वाद प्रतिलिति ययपित्वंनिरपेक्षस्तथापिममत्वच्चरणानुरागोस्तु मयिच मय्यपि तच्छ्रुतिरिकाप्रतिष्ठा।
यवतीदृष्टिर्यस्य तस्यते प्रात्मन आत्मात्मेवरतस्य तर्हित्वतेनकोलाभः तच्चरणानुरमाएव महोलाभःकिं
च यदिप्रस्यविस्यस्यविश्वहृये उपातारजसोतिमात्रा उत्कसंपेनसतथाभूतःसतमासीदसे वपवार्थे हह

वे नैषधः परमानुकंपा मधुपदष्टि ५८ ॥

श्री
भाग
दशे
५५

तदेवं तदुक्तं सर्वं प्रतिव्याख्याय प्रसन्नचित्तामेवमुपदिशंत्यादहाभ्यां नैवेति अयात्मनोऽनुरूपमित्यादिनैव वचः ।
अलीकं मिथ्येति न मन्ये यतो लोके कन्याया एवं क्वचिद्रतिर्भवति यथा काशिराजकन्यानामंबांबिकांबा
लिकानां तिसृणां मध्ये अंबाया एव शाल्वे रतिर्नान्ययोरित्यर्थः ४७ व्यूढायाः परिणीताया अपीति उभयस्मा
ल्लोकद्वयाच्च्युतो भ्रष्ट इति ४८ प्रलंभिता उपहसितासि अन्वात्थ अनूदितवती ४९ मय्येकांतभक्ताया

नैवालीकमहं मन्ये वचस्ते मधुसूदन अंबाया एव हि प्रायः कन्यायाः स्याद्रतिः क्वचित ४७ व्यूढा
याश्चापि पुंश्चल्या मनोऽभ्येति नवंनवं बुधोऽसतीं न बिभृयात्तां बिभ्रदुभयच्युतः ४८ श्रीभगवानुवाच
साध्व्येतच्छ्रोतुकामैस्त्वं राजपुत्रि प्रलंभिता मयोदितं यदन्वात्थ सर्वं तत्सत्यमेव हि ४९ यान्यान्का
मयसे कामान्मय्यकामाय भामिनि संति ह्येकांतभक्तायास्तव कल्याणि नित्यदा ५० उपलब्धं प
तिप्रेमपातिव्रत्यं च तेऽनघे यद्वाक्यैश्चाल्यमानाया न धीर्मय्यपकर्षिता ५१ ये मां भजंति दांपत्ये तप
सा व्रतचर्यया कामात्मानोऽपवर्गेशं मोहिता मम मायया ५२

स्तेकामाः संत्येव अकामाय कामनिवृत्तये मोक्षप्रदाय वा मायिने इत्यर्थः ५० अनुवादेन तवान्येषां नाममभि
नंदति उपलब्धमिति यद्यस्मान्मयि वर्तमानाया धीर्नापकर्षिता नान्यविषया जाता ५१ एकांतभक्तिमभि
सात्ताछ्रीस्तपातेमवेश्वरी सनार्हतिकिलश्रीशानरदेवपरिछदान २६ पास्यांघ्रिपंकजरजोखि
ललोकपालैमौल्युत्तमैर्धृतमुपासिततीर्थतीर्थं ब्रह्माभवोद्दमपियस्यकलाः कलायाः श्रीश्चो।
द्वहेमचिरमस्यनृपासनंक्व २७ भुंजंतेकुरुभिर्दत्तं भूखंडं वृष्णयः किल उपानहृकिलवयंस्वयं।
तकृरवःश्रियः २८

श्रितानितीर्थानियैर्योगिभिः तेषामपितीर्थं पदा उपासितंसर्वैःसेवितंतीर्थं गंगा तस्यतीर्थत्वमिति।
ते किंच ब्रह्माभवश्चश्रीश्चयदहमपि उद्वहेम कथंभूतावयंयस्यकलायांशाः स्यकलाः श्रेशाः २७ २८ ९८

मत्तानामिवमघाटिका रूत्वाःपरुषाःश्रुत्वाशासितानांसंयदंडकराःसन् ३९ ४० लांगलाग्रेणदक्षिणेनः
प्राकारमूलेनिखातेनउद्धितार्थःउन्मादः ४१ ४२ जिजीविषवस्मत्तानामिकांक्षोढक्के ४३ ४४ ४५

अहोपेक्ष्यमत्तानांमत्तानामिवमानिनां असंवहारिणोभूत्वाःकःसहेतानुशासितां ३९ अ
पनिष्कौरवींपृथ्वींकरिष्यामीत्यमर्षतः गृहीत्वाहलमुन्नस्यौदह्नितिवजगाह्वयं ४० लांग
लाग्रेणनगरस्यहित्वार्थंगजाह्वयं विचकर्षसरोगाणांप्रहरिष्यन्नमर्षितः ४१ मलयानिवा
घूर्णमानगरंपतन आकृष्यमाणमालोक्यकौरवाजातसंभ्रमाः ४२ तमेवशरणंजग्मुः
सकुटुंबाजिजीविषव सलक्ष्मणपुरस्कृत्यसांबंप्रांजलयःप्रभुं ४३ रामरामाखिलाधार
प्रभावंनविदामते मूढानांनःकुबुद्धीनांक्षंतुमर्हस्यधीश्वरः ४४ स्थितिसर्गलयानांत्वमे
कोद्देतुर्निराश्रयः लोकान्क्रीडनकानीशक्रीडतस्तेवदंतिहि ४५ त्वमेवमूर्ध्नीदमनंतलीला
याभूमंडलंबिभर्षिसहस्रमूर्धन् अंतेचयःस्वात्मनिरुद्धविश्वःशेषेद्वितीयःपरिशिष्यमाणः ४६
कोपस्तेखिलशिक्षार्थंनद्वेषान्नचमत्सरात् बिभ्रतोभगवन्सत्त्वंस्थितिपालनतत्परः ४७

शोषशायनंकोपिशेषपर्यंकेपरिशिष्यमाणोयसचरमेवेतिवा ४८ अस्मासुकोपस्त्वयानमनुवि

श्री
भाग
उत्त
६८

विश्वकर्मकृतं यस्य सभामिति संबोधनं ४८ वेपमानं भयेन प्रेर्यमाणैः ५९ तुरंगमाश्च द्वादशायुतानि ५०

नमस्ते सर्वभूतात्मन् सर्वशक्तिधराव्यय विश्वकर्मन् नमस्तेऽस्तु त्वां वयं शरणं गताः ४८ शुक उवाच प
वं प्रपन्नैः संविग्नैर्वेपमानायनैर्वलः प्रसादितः प्रसन्नोऽभूत् मा भैष्टेत्यभयं ददौ ४९ दुर्योधनः पा
रिवर्हं कुंजरान् षष्टिहायनान् ददौ च द्वादशशतान्ययुतानि तुरंगमान् ५० रथानां षट्सहस्राणि
रौक्माणां सूर्यवर्चसां दासीनां निष्ककण्ठीनां सहस्रं दुहितृवत्सलः ५१ प्रतिगृह्य तु तत्सर्वं भगवा
न् सात्वतर्षभः ससुतः सस्नुषः प्रायात् सुहृद्भिरभिनंदितः ५२ ततः प्रविष्टः स्वपुरं हलायुधः समेत्य बं
धून् अनुरक्तचेतसः शशंस सर्वं यदुपुंगवानां मध्ये सभायां कुरुषु स्वचेष्टितं ५३ अद्यापि च पुरं ह्येत
त् सूचयद्रामविक्रमं समुन्नतं दक्षिणतो गंगायामनुदृश्यते ५४ एतत्तेकथितं सर्वं रामस्य चरितं म
हत् यः पठेच्छ्रावयेद्वाऽपि सर्वपापैः प्रमुच्यते ५५ इति श्रीभागवते महापुराणे दशमस्कंधे श्रीब
लभद्रविजयो नामाष्टषष्टितमोऽध्यायः ६८ ॥

५१ सुहृद्भिः कौरवैः ५२ मध्ये सभायां सभामध्ये ५३ ५४ ५५ इति श्रीभावार्थदीपिकायां दशमस्कंधे
षष्टितमोऽध्यायः ६८ ॥

६८

एकोनसप्ततितमेगार्हस्थ्यंप्रतिमंदिरं कृष्णस्यनारदोदृष्ट्वाविस्मितोभगवन्तमस्तवत् १ दिदृक्षुमभिनन्द्यो
नारद विचरेति उत्सवर्हृष्टमतिणेनवान् २ तांद्वारवतीमनुवर्णयतिसार्धत्रयेण पुष्पितेति पुष्पितेषूपव।

शुकउवाच

श्रीभगवानुवाच नरकंनिहतंश्रुत्वातथोद्वाहंचयोषितां कृष्णेनैकेनबह्वीनांतद्दिदृक्षुःस्मनारदः १
चित्रंबतैतदेकेनवपुषायुगपत्पृथक् गृहेषुद्व्यष्टसाहस्रंस्त्रियएकउदावहत् २ इत्युत्सुकोद्वारव
तींदेवर्षिर्द्रष्टुमागमत् पुष्पितोपवनारामद्विजालिकुलनादितां ३ उत्फुल्लेंदीवरांभोजकल्हार
कुमुदोत्पलैः छुरितेषुसरःसूच्चैःकूजितांहंससारसैः ४ प्रासादलक्षैर्नवभिर्जुष्टांस्फाटिकराजतैः
महामरकतप्रख्यैःस्वर्णरत्नपरिच्छदैः ५ विभक्तरथ्यापथचत्वरापणैःशालासभाभिःरुचिरांसु
रालयैः संसिक्तमार्गाङ्गनवीथिदेहलींपतत्पताकध्वजवारितातपां ६ ॥

तेषूद्यानेषुद्विजानामलीनांचकुलानितैर्नादितां ३ छुरितेषुव्याप्तेषु ४ महामरकतैःप्रख्यायंतेप्रकाशं
तेइतितथातैः स्वर्णरत्नमयाःपरिच्छदाःपरिकरायेषांतैः ५ पतत्सुःप्रचलत्सुःपताकायेषुतैर्ध्वजैर्वारित
आतपोयस्यांताम् ६ ॥

सर्वैर्धिष्ण्यपैर्लोकपालैरर्चिते ॥७॥ षोडशभिः पद्मसहस्रैः समलंकृते तस्य शौरेः पत्नीनां भवनेष्वेकतमं विवेशे-
त्यन्वयः यत्र च स्वकौशलं त्वष्ट्रा दर्शितमित्यतः ॥८॥ भवनयोर्विशेषणानदत्तवर्णयति चतुर्भिः विष्टब्धमिति
विद्रुमस्तंभैर्विष्टब्धं वैदूर्यमयानि फलकोत्तमानि स्तंभाश्रयाण्याच्छादनानि तैः इंद्रनीलमयैः कुड्यादि

तस्यामंतः परं श्रीमदर्चितं सर्वधिष्ण्यपैः हरेः स्वकौशलं यत्र त्वष्ट्रा कार्त्स्न्येन दर्शितं ॥७॥ तत्र षोड-
शभिः पद्मसहस्रैः समलंकृतं विवेशैकतमं शौरेः पत्नीनां भवनं महत् ॥८॥ विष्टब्धं विद्रुमस्तंभैर्वै-
दूर्यफलकोत्तमैः इंद्रनीलमयैः कुड्यैः जगत्या चाहतत्विषा ॥९॥ वितानैर्निर्मितैस्त्वष्ट्रा मुक्तादामवि-
लंबिभिः दान्तैरासनपर्यंकैर्मण्युत्तमपरिष्कृतैः ॥१०॥ दासीभिर्निष्ककंठीभिः सुवासोभिरलंकृतं पुं-
भिः सकंचुकोष्णीषसुवर्णमणिकुंडलैः ॥११॥ रत्नप्रदीपनिकरद्युतिभिर्निरस्तध्वांतं विचित्रवलभी-
षु शिखंडिनोंऽग नृत्यंति यत्र विहितागुरुधूपमक्षैर्निर्यांतमीक्ष्य घनबुद्धय उन्नदंतः ॥१२॥

भिश्चोपलक्षितं जगत्या भूमिकया चेंद्रनीलमय्या अहततिसंपत्त्या ॥९॥ मुक्तादामानां विलंबावि-
विधानि लंबनानि विद्यंते येषां तैः मण्युत्तमैः परिष्कृतैर्भूषितैः ॥१०॥११॥ उत्पसमीत्पचलोमेचोद्यमितिवृद्धिः

श्री भाग टी ६९

69

दशमे ६९

एतस्मिन्नेव काले आत्मनाम् समानानि गुणरूपवयांसि सवेशोलंकारस्य यस्य तेन दासीसहस्रेण युतया रु
क्मिण्या सह ॥ स्थितो यतः किल पर्यंकतः अवतीर्य तामुपवेशयामास ॥ अविषह्यदर्शितो व्यथा एतदर्थः विप्र
द्धिनिशं त्वं नवानवाचरसे हृद्याः निभाष्य प्रदेशमन्तःपुरालयः कथंभूतो यस्य वरणे श्रीनवं गतः सोऽवतीर्य स्तः अनय
नहक्कूहनतो विप्रसतां धर्मभृतां यत्नितान् देवमकरोदित्यर्थः सतां पतिर्निदेवः ब्रह्मण्यदेव इति यद्गुणकृते नामतः सो

तस्मिन्समानगुणरूपवयः सवेषदासीसहस्रयुतया नु सवैशृद्धिणा विप्रोद्दर्शचरमरञ्जनेन हक्कर्दु
देनसावनपतिः प्रियवीजयंस्मा ॥ तेसं निरीसभगवान्सदसो स्थितः श्रीपर्यंकतः सकलधर्मभृतांवरिष्ठः
श्रातस्पपादयुगलो शिरसा किरीटजुष्टेन सांजलिरवीविशदासनेसे ॥ तस्याव निजस्य वरणे तदपः स्वमू
र्ध्नाविभ्रद्गजहरुतनोपि सतां पतिर्हि ब्रह्मण्यदेव इति यद्गुणनामयुक्तं तस्यैव यच्चरणशौचमशेषतीर्थं ॥
सपूज्यदेव ऋषिवर्य मूर्षिः पुराणो नारायणो नरसखो विधिनोदितेन वाण्याभिभाष्य मितयामृतमिष्टयाजं
प्राहप्रभो भगवते नकरवाम किं ते ॥ नारदस्तवाव नेवाद्भुतमपि विभो खिललोकनाथ मैत्रीजनेषु सकले
षुदमः खलानां निःश्रेयसाय हि जगत्स्थितिरक्षणाभ्यां स्वैरावतार उरगाय विदाम सम्यक् ॥ १० ॥

वयतोयुक्तं समञ्जसं यत्तत्त्वहन्त्म प्रवर्तनायैसाचरतीत्यर्थः ॥ अभिभूष्यादिष्यान्तदागमनमिसाह प्रियमुक्ता ॥
श्रीभगवतामहर्षरादेणमनार्हमन्यमानस्तस्याभावयन्नाह नैवेति सर्वमिदमाश्चर्यं देवं ममाद्भुतमेव तहन्न गौरवात तर्हि कथं।
कं सादिमैत्री सादाद खलानाद मस्यनैवाद्भुतमित्यर्थः कुतो जगतः स्थितिपालनं च ताभ्यां सदनिः श्रेयसाय

पृथुक्षे प्रभो किं करवामेति तत्राह दृष्टमिति भक्तजनताया अपवर्गरूपं किंचातिदुर्लभतया ब्रह्मादिभिर्योगि
गम्यैरपि हृदि विचिंत्यं किंच संसारकूपे पतितानामुत्तारणायावलंबमाश्रयभूतं एवंभूतं तवांघ्रियुगलं म

दृष्टं तवांघ्रियुगलं जनतापवर्गं ब्रह्मादिभिर्हृदि विचिंत्यमगाधबोधैः संसारकूपपतितोत्तरणावा-
लंबं ध्यायंश्चराम्यनुगृहाण यथा स्मृतिः स्यात् १८ ततोन्यदविशद्गेहं कृष्णपत्न्याः स नारदः योगेश्व
रेश्वरस्यांग योगमायाविवित्सया १९ दीव्यंतमक्षैस्तत्रापि प्रियया चोद्धवेन च पूजितः परया भक्त्या प्र
त्युत्थानासनादिभिः २० पृष्टश्चाविदुषेवासौ कदायातो भवानिति क्रियते किं नु पूर्णानामपूर्णैरस्म
दादिभिः २१ तत्राप्यचष्ट गोविंदं लालयंतं सुतान् शिशून् ततोन्यस्मिन्गृहे पश्यन्मज्जनाय कृतोद्यमं
२२ जुह्वंतं च वितानाग्नीन्यजंतं पंचभिर्मखैः भोजयंतं द्विजान्क्वापि भुंजानमवशेषितं २४ क्वापि सं
ध्यामुपासीनं जपंतं ब्रह्म वाग्यतं एकत्र चासिचर्मभ्यां चरंतमसिवर्त्मसु २५

यादृष्टमतः कृतार्थोस्मि तथापि तत्स्मृतिर्यथा स्यात्तथानुगृहाण ततः तद्ध्यायन्नेव नित्यं चरामीति १८ १९
अत्रैते दीव्यंतमित्यादौ चतुर्दशश्लोका दिज्ञातव्यं २१ २२ वितानाग्नीनाहवनीयादीन् अग्निहोत्रेण पंचभिर्मखैर्महा
यज्ञैर्यजंतं २४ २५

२६ २७ २८ २९ ३० ३१ काले तत्समये विधिनोपयापने श्रयाणां विवाहमिश्रयोः कल्पयंतं घटयंतं विभूति-
भिर्विभवैः ३२ प्रस्थापनं दुहितॄणां मात्रादीनां स्वशृहान् स्वदेशतो नयनं उपनयनं नन्दहान् प्रवनायनयं तं तैः महोत्स

प्रेंखोलिनरथैः क्वापि विचरंतं गदाग्रजं क्वचिद्विलयानं पर्यंके स्तूयमानं च वंदिभिः २९ मंत्रयंतं च कस्मिं-
श्चिन्मंत्रिभिश्चोद्धवादिभिः जलक्रीडारतं क्वापि वारमुख्याबलावृतं ३० क्वचिद्द्विजमुख्येभ्यो ददतं
गाः स्वलंकृताः इतिहासपुराणानि शृण्वंतं मंगलानि च ३१ हसंतं हास्यकथया कयापि प्रियया गृ-
हे क्वापि धर्मं सेवमानमर्थं कामौ च कुत्रचित ३२ ध्यायंतमेकमात्मानं पुरुषं प्रकृतेः परं शुश्रूषंतं
गुरून्क्वापि कामैर्भोगैः सपर्यया ३३ कुर्वंतं विग्रहं केश्चित्संधिं चान्यत्र केशवं क्वापि सह रामेण चिंत-
यंतं सतां शिवं ३४ पुत्राणां दुहितॄणां च काले विध्युपयापनं दारैर्वरैस्तत्सदृशैः कल्पयंतं विभूतिभिः
३५ प्रस्थापनोपनयनैरपत्यानां महोत्सवान् वीक्ष्य योगेश्वरेशस्य येषां लोका विसिस्मिरे ३६ यजं-
तं सकलान्देवान्क्वापि क्रतुभिरूर्जितैः पूर्तयंतं क्वचिद्धर्मं कूपारामालयादिभिः ३७

वान्कल्पयंतं योगीश्वरेशस्येषामपत्यानां महोत्सवान्वीक्ष्य लोकाः सर्वे विसिस्मिरे विस्मयं चक्रुः तथाभू-
तान्कल्पयन्तम ३३ ३४ ॥

स्थ

श्री
भाग
उदी
७१

71

अव्यक्तलिंगं वेशांतोलक्ष्य ३६ ३७ हे योगीश्वर आत्मन्नात्मनि मम मनसि तव स्वरूपे वा निर्भाता स्तु ती ताः तव योगमायाः केवलं विस्मयं विस्मः न तत्त्वमस्परमार्थमिति भावः ३८ त्वन्मानुच्छ्नातेन महात्म्यतो मां प्रस्थाप।

चरंतं मृगयां क्वापि हयमारुह्य सैंधवं घ्नंतं ततः पशून्मेध्यान्परीतं यदुपुंगवैः ३५ अव्यक्तलिंगं प्रकृतिष्वंतःपुरगृहादिषु क्वचिच्चरंतं योगेशं तत्तद्भावबुभुत्सया ३६ अथोवाच हृषीकेशं नारदः प्रहसन्निव योगमायोदयं वीक्ष्य मानुषीमीयुषो गतिं ३७ विदाम योगमायास्ते दुर्दर्शा अपि योगिनो योगीश्वरात्मन्निर्भाता भवत्पादनिषेवया ३८ अनुजानीहि मां देव लोकांस्ते यशसाप्लुतान् पर्यटामि तवोद्गायंल्लीला भुवनपावनी ३९ श्रीभगवानुवाच ब्रह्मन्धर्मस्य वक्ताहं कर्ता तदनुमोदिता। तच्छिक्षयंल्लोकमिममास्थितः पुत्र माखिद ४० शुक उवाच इत्याचरंतं सद्धर्मान्पावनान्गृहमेधिनां तमेव सर्वगेहेषु संतमेकं ददर्श ह ४१ कृष्णस्यानंतवीर्यस्य योगमायामहोदयं मुहुर्दृष्ट्वा ऋषिरभूद्विस्मितो जातकौतुकः ४२ ॥

येनाह अनुजानीहीति ३९ तत्तस्माल्लोकं शिक्षयन्निमं धर्ममास्थितः त्वं तत्तत: अतो हे पुत्र माखिद मा दंमाशामुद्धीति ४० इत्येवमनुगृहीतस्तमेकमेव सर्वत्र ददर्शेति ४१ मुहुर्मुहुर्दृष्ट्वा जातकौतुको मुनिर्विस्मितो भूदिति ४२ ॥

७१

श्रद्धितः अद्धा युक्तः आत्मा यस्य तेन ॥ ४३ ॥ नारदः दृष्ट्वा कृष्णलीलां विस्मयते इति एवमिति अखिलस्य भवाय उद्भवाय गृहीताः शक्तयो नानामूर्तयो येन सः सव्रीडं च तत्सौहृदं च तेन निरीक्षणं हासस्तु ताभ्यां जुष्टः ॥ ४४ ॥ अनन्यविषयाणि असाधारणानि अपवर्गमार्गे मोक्षपदे ॥ ४५ ॥ इति श्रीभावार्थदीपिकायां दशमस्कन्धे एकोनसप्ततितमोऽध्याः

इत्यर्थकामधर्मेषु कृष्णेन श्रद्धितात्मना सम्यक्सभाजितः प्रीतस्तमेवानुस्मरन्ययौ ॥ ४३ ॥ एवं मनुष्यपदवीमनुवर्तमानो नारायणोऽखिलभवाय गृहीतशक्तिः रेमेऽङ्ग षोडशसहस्रवराङ्गनानां सव्रीडसौहृदनिरीक्षणहासजुष्टः ॥ ४४ ॥ यानीह विश्वविलयोद्भववृत्तिहेतुः कर्माण्यनन्यविषयाणि हरिश्चकार यस्त्वङ्ग गायति शृणोत्यनुमोदते वा भक्तिर्भवेद्भगवति ह्यपवर्गमार्गे ॥ ४५ ॥ इति श्रीभागवते महापुराणे दशमस्कन्धे एकोनसप्ततितमोऽध्यायः ६९ शुक उवाच अथोषस्युपवृत्तायां कुक्कुटान्कूजतोऽशपन् गृहीतकंठ्यः पतिभिर्माधव्यो विरहातुराः ॥ १ ॥

यः ६९ ततस्तु सप्ततितमे कृष्णस्याह्निककर्मणि दूतनारदयोः कार्ये मंत्रविचारणं जगन्मंगलचारिणः माह्निकं जगादीरितः नारदेन कविः किंचिद्दृष्टमाह यथाक्रमं इत्यर्थधर्मकामेषु कृष्णेन श्रद्धितात्मनेति श्र लोकस्य श्रीकृष्णाह्निकस्याधिकारे उपवृत्तायामासन्नायां पतिभिः श्रीकृष्णैः माधव्यो माधवस्य भार्याः ॥ १ ॥

श्री
भाग
उती
७२

72

वेदिनश्चपक्षीकुलसंबोधयंतिसंति वयांसिपत्त्रिणः रोरूवन्ति शब्देनाकूजन मंदारवनवायुभिःगायन्त्व
लिध्वनिद्राणिवयांसि २ वेदभीमूपलक्षणं परिरंभणविश्लेषात ३ ॥ तत्पर्यालोच्य एकमावेदं अद्वा-
दैतरनश्यनिःप्राधिमनएवाव्ययंनित्यंअव्ययंस्वयंज्योतिर्हृदितः नित्यनिष्कलंकल्मषमविद्यायस्मात्तदु
पलक्षमाह प्रस्येति विश्वस्य लक्षितोभावस्थाः सोनिर्हतिश्च भावसमानिर्वृतिरानंदः तथादिग्रुण।

वयांसिरोरुवंत्कुलसंबोधयंतीववेदिनः गायत्त्वलिध्वनिद्राणिमंदारवनवायुभिः १ मुहूर्तेनतवे
दभीनामृष्यदंतिशोभते परिरंभणविश्लेषात्प्रियवाद्कंनतंगताः २ अलिमुहूर्तउन्यायवार्युपस्त्र
पयमाधवः दध्यौप्रसन्नकरणाआत्मानंतमसः परं ३ एकंस्वयंज्योतिरनन्यमव्ययंस्वसंस्थया।
नित्यनिरस्तकल्मषं ब्रह्माख्यमस्योद्भवनाशहेतुभिस्वशक्तिभिर्लक्षितभावनिर्वृतं ४ समाहि
तोभस्यमलेयथाविधिक्रियाकलापंपरिधायवाससी चकारसंध्योपगमादिसत्तमोहुतानलो
ब्रह्मजजापवाग्यतः ५

ततोभानुर्वेसत्तमामातेयः सदेवसोमेदमग्रआसीदित्यादिश्रुतेः सएवानंदस्वविज्ञानमानंदमितिश्रुतेः त
सदानंदमित्यर्थः प्रातःस्नातः स्नातः संध्यायाउपगमउपासनं आदियंथाभवतितथा क्रियाकलापंचकार।
कार्यतांउदयात्पूर्वमेवहुतानलः ब्रह्मगायत्रींजजाप ५ ॥

कलौ प्राशान्देवानृषीन् पितॄंश्च तर्पयित्वा ॥ ७ ॥ ऋषीणां प्रथमप्रशस्तानां ॥ ८ ॥ बहुभिर्नितिद्विपश्चेन परिष्कृता ॥
न्कृष्णान् शुक्लदन्तान् मृगान् दृष्ट्वा रेभन्तो ददाश्च तेन बहूनि समस्वे चेति शुभ्रस्रक्काणि समेमान्न रशानं बहाम्येकीकृत
पुराणे च नर्दशालदत्तेन गणितानि यथोक्तं भारतमेवाधिकृत्य नवमाकेये मृगान् शुक्लदन्तः कृष्णान्सुवा
र्णेन परिष्कृतान् अष्टाल्कमेणा अष्टानियुतानि चवनर्दशेनितान श्वेयं बहुसंख्याश्लोकेन संगणितेनचतर्दश

उपस्थायार्कमुद्यन्तं तर्पयित्वात्मनः कलाः देवानृषीन्पितॄन्वृद्धान्विप्रान्भ्यर्च्य चात्मवान् ॥ ७ ॥ येन्रूतां
रुक्मशृङ्गीणां साध्वीनां मौक्तिकस्रजां पयस्विनीनां तृष्टीनां सवत्सानां सुवाससां ॥ ८ ॥ ददौ रूप्यखु
राग्राणां द्वौमानितिलैः सह अलंकृतेभ्यो विप्रेभ्यो बद्धं बद्धं दिने दिने ॥ ९ ॥ गोविप्रदेवतावृद्धगुरून्भू
तानि सर्वशः नमस्कृत्यात्मसंभूतमङ्गलानि समस्पृशत् ॥ १० ॥ आत्मानं भूषयामास नरलोकविभूष
णं वासोभिर्भूषणैः स्वीयैर्दिव्यस्रगनुलेपनैः ॥ ११ ॥ अवेक्ष्याज्यं तथादर्शं गोविप्रद्विजदेवताः का
मांश्च सर्ववर्णानां पौरान्तःपुरचारिणां ॥ १२ ॥ प्रदाप्य प्रकृतीः कामैः प्रतोष्य प्रत्यनंदत संविभज्याग्रतो
विप्रान्स्रक्ताम्बूलानुलेपनैः ॥ १३ ॥

नौ लक्षाणां समाधिकशतानां शाक :बद्धं च नरपतिस्य प्रसहस्राणि त्रयोदशेति
दिने दिने च प्रतिग्रहं चेति ॥ ९ ॥ आत्मसंभूतीः स्वविभूतीः मंगलानि कपिलादीनि ॥ १० ॥ नरलोकस्य विभूषणारूप
मात्मानं स्वीयैः पीतांबरकौस्तुभादिभिः ॥ ११ ॥ कामानभिलषितानर्थान् ॥ १२ ॥ विप्रान्स्वगादिभिः संविभज्यतेभ्य

उपयुक्तभोगार्थमगृहीत ॥१४॥ पाणीकृतेन नली गृहीत्वा ॥१५॥ सव्रीडप्रेमवीक्षितैः ताणां स्थितस्ताभिरेववी-
क्षितैः कृच्छ्राद्विसृष्टो निरगादिति ॥१६॥ एवं सर्वगृहीभ्यः पृथक् गत्वानन्तरमेकमेव सन् सुधर्मां प्राविशत्

सहर्षः प्रकृतीन्द्रादीनुपाप्रक्रन्तत स्वयं तावत्सूत उपानीय स्यन्दनं परमाद्भुतं सुग्रीवाद्यैर्हयैर्युक्तं
प्रणम्यावस्थितोऽग्रतः ॥१७॥ गृहीत्वा पाणिना पाणी सारथेस्तमथारुहत् सात्यक्युद्धवसंयुक्तः।
पूर्वाद्रिमिव भास्करः ॥१८॥ ईक्षितोऽन्तःपुरस्त्रीणां सव्रीडप्रेमवीक्षितैः कृच्छ्राद्विसृष्टो निरगाज्जात-
हासो हरन्मनः ॥१९॥ सुधर्माख्यां सभां सर्वैर्वृष्णिभिः परिवारितः प्राविशद्यन्निविष्टानां न सन्त्यङ्ग
षडूर्मयः ॥२०॥ तत्रोपविष्टः परमासने विभुर्बभौ स्वभासा ककुभोऽवभासयन् वृतो नृसिंहैर्यदुभिः
यदूत्तमो यथोडुराजो दिवि तारकागणैः ॥२१॥ तत्रोपमन्त्रिणो राजन्नानाहास्यरसैर्विभुं उपतस्थुर्न-
टाचार्या नर्तक्यस्ताण्डवैः पृथक् ॥२२॥ मृदङ्गवीणामुरजवेणुतालदरस्वनैः ननृतुर्जगुस्तुष्टुवुश्च
सूतमागधवन्दिनः ॥२३॥ तत्राहुर्ब्राह्मणाः केचिदासीना ब्रह्मवादिनः पूर्वेषां पुण्ययशसां राज्ञां
चाकथयन्कथाः ॥२४॥

न. यन्निविष्टानां यत्र प्रविष्टानां ॥२०॥ नृसिंहैर्नृश्रेष्ठैः ॥२१॥ उपमन्त्रिणः परिहासकाः पृथक्पृथक्स्वस्व-
समुदायैः ॥२२॥ मृदङ्गादयः प्रसिद्धाः दरः शङ्खः सूतादयस्तुष्टुवुः ॥२३॥ ब्राह्मणाः ब्रह्मवेदमाहुर्मन्त्रान् व्याचख्युः

२२ २३ गिरिव्रजे तेन रुद्धास्ते तत्केशरोगं कृष्णं प्रापन् तेषां च दुःखमावेदयति द्वाभ्याम्ः २४ श्रीकृष्णकृष्णेति षड्भिः श्लो

कैर्विज्ञापयति तत्र प्रथमे त्वां शरणं याम इत्यर्थं त्रिभिर्भयात्त्रवाणेहाभ्यां प्रार्थनमिति २५ एतदेव स्पष्टं विविनोति लोक

संभवभयं विवृणोति येन नमस्यंति लोक इति विकर्म निषिद्धं काम्यं च तत्र निरतो निरतोऽभ्यतः स्वकुशले धर्मे प्र

वदर्चने नयोदिते [illegible] तेषां चात्रे सोमानमन्तमं शीलानां यत्करोति [illegible] यस्य

तत्रैकः पुरुषो राजन्नागतोऽपूर्वदर्शनः विज्ञापितो भगवते प्रतीहारैः प्रवेशितः २२ स नमस्कृत्य कृ

ष्णाय परेशाय कृताञ्जलिः राज्ञामावेदयद्दुःखं जरासंधनिरोधजं २३ ये च दिग्विजये तस्य सन्नतिं न

ययुर्नृपाः प्रसह्य रुद्धास्तेनासन्नयुते द्वे गिरिव्रजे २४ कृष्ण कृष्णाप्रमेयात्मन्प्रपन्नभयभंजन व

यं त्वां शरणं यामो भवभीताः पृथग्धियः २५ लोको विकर्मनिरतः कुशले प्रमत्तः कर्मण्ययं त्वदुदि

ते भवदर्चने स्वे यस्तावदस्य बलवानिह जीविताशां सद्यश्छिनत्त्यनिमिषाय नमोऽस्तु तस्मै २६ लोके

भवाञ्जगदिनः कलयावतीर्णः सद्रक्षणाय खलनिग्रहणाय चान्यः कश्चित्त्वदीयमतियाति नि

देशमीश किं वा जनः स्वकृतमृच्छति

तन्न विद्मः २७

स्वाभिकौ नयतं कुरुष्व महत्यर्णमिति प्रमत्तो न वर्तितो यावदयं लोकस्तावदेवास्य लोकस्य यः सद्यो जीविता

शां छिनत्ति तस्मै अनिमिषाय कालात्मने नमः इति २६ अयं लोकस्यार्तिः [illegible] तदेवाप्रतोस्माकं कृ

त एव दुःखमापन्नमित्याश्चर्येणाहुः लोके भवानिति जगदीश्वरत्वं यज्जगद्रक्षणाय अवतीर्णोऽपि चेदस्माकं दुःखं सम्भा

व्यं स्यात्तर्हि किमन्यः कश्चित्तव संधादिद्व [illegible] आज्ञामतिलंघयति किं वा नयोः स्वप्रमाणोऽपि जनः स्वकर्मजं दुः

ख्यमीशोऽपि [illegible] स्मातिः नतस्तत् [illegible]

श्री
भाग
पटी
७४

74

किंभूः शवमितित दाहः स्वमार्थितमिति स्वमवज्ञ्मातेन नृपसत्वेन योचितं सुखं यतः परतंत्रविषयसाध्यं किंच
मेघतिशाखद्वयं यस्य तेन मतंतल्पेन शरीरेण धूंपुत्रदारादियुक्तराज्यं विना केवलं वदामः भ्रष्टाकष्टुंनः येव
यमितः पूर्वमेवं निष्क्रामाः संतस्त्वां नाश्रिता इत्याहुः द्विवेति नवततः यतीर्थं निष्क्रामेलंभ्यमाता निस्वतःमि
हंस्यावेतद्दिवाद्धिं इयाम दे स्के यणामः २८ तस्मा याकृतं कर्मवंधं निवर्तयेनिशार्थं यतेनत्रइति विपुंत्वविमो।
चय मग्योत्तरामंथस्तत्संतकाल्कर्मपाशात् भवद्भिर्वविक्रम्यनिगोम्यता मितिचेदत आहुः यइति यपकृप

स्वमार्थितेन नृपसत्वेपरतंत्रमीशशाखद्वयेनमतंकेनधुंवदामः द्विवावदान्मनिसत्वेनदत्तीदलभ्यं
ल्किं इयाम देति कृपणास्तवमाययश २८ नत्रोभवान्मुणतयोकदर्शाद्विमूलोवद्धात्विपंदत्सगाथा।
कृयकर्मपाशात् योभूभ्नोपुनमतंगजवीर्यमेकोविभुरुरोधभवनेमृगराडिवावीः २९ योवेनया
द्विनवकृतव्यदानवकभग्नामृधेवलभवंतमनंतवीर्यं जित्वानलोकनिरंतंसकृद्दृढदर्पोयुष्मय्यसनो
कृजतिनोजितनद्विधेदि ३०॥

वापुतमतंगजनानोवीर्यविभुरुत्वभवनेभूभ्नेतोस्मात्करोध सिंहोमीधीविव २९ किंचयुष्मदीयावर्यमितिवा।
स्मानपिकं वा यतेइत्याहुः योवाइति देवदानवक्रोधनसदर्शनेयोविद्विनवकृतंः अष्टादशवारान् नयामह
मृधेवर्तमाने तत्र समदर्पाकृतंत्वयाभग्नः खलपराजितः पश्चात्तंनवीर्यमपीन्लोकनिरंतेनरशरीरविनो।
टंभवंतंसकृत्जित्वाऽऽछ्दर्पः प्रामगर्वः युष्मद्व्यसनोकृजतिपीडयति ननेवयुक्तं नह्यिवेहीनमध्यः ३०॥

३१ ३२ ३३ ३४ भूयान्महान्गुणो लाभो यायमस्माकं यत्वत्सर्वेदृष्टांतत्वानमिति ३५ ईश्वरः कर्ता येषां तेषु ३६
एवमपि विद्धेषेव सर्वेत्तेन नरा संयवधार्यमेवपांडवचिकीर्षितं दृष्टोनारदो मायेयमिति तामादर्शयति त्रिभिः

राजदूत उवाच इति मागधसंरुद्धा भवद्दर्शनकांक्षिणः प्रपन्नाः पादमूलं ते दीनानां शं विधीयतां ३१ राजदू
ते ब्रुवत्येवं देवर्षिः परमद्युतिः बिभ्रत्पिंगजटाभारं प्रादुरासीद्यथा रविः ३२ तं दृष्ट्वा भगवान्कृष्णः स
र्वलोकेश्वरेश्वरः ववंद उत्थितः शीर्ष्णा ससभ्यः सानुगो मुदा ३३ सभाजयित्वा विधिवत्कृतासनपरि
ग्रहं बभाषे सूनृतैर्वाक्यैः श्रद्धया तर्पयन्मुनिं ३४ अपि स्विदद्य लोकानां त्रयाणामकुतोभयं ननु
भूयान्भगवतो लोकान्पर्यटतो गुणः ३५ न हि तेऽविदितं किंचिल्लोकेष्वीश्वरकर्तृषु अथ पृच्छामहे
युष्मान्पांडवानां चिकीर्षितं ३६ श्रीनारद उवाच दृष्टा मया ते बहुशो दुरत्यया माया विभो विश्वसृज
श्च मायिनः भूतेषु भूमंश्चरतः स्वशक्तिभिर्वह्नेरिव छिन्नरुचो न मेऽद्भुतं ३७

विश्वसृजश्च ब्रह्मणोऽपि मायिनो मोहकस्य ते स्वशक्तिभिर्भूतेषु नर्पामिन याचरतो वर्तमानस्य तव यद्यदं भूते
षु वर्तनं तद्धि भूतानि किमिति न पश्यंति वह्नेरिव छन्नरुच इति स्वशक्तिभिरेवच्छन्नात्मप्रकाशोपस्य त
स्यात तदेवं चश्चादि न मेऽद्भुतम ३७ ॥

इदं जगत्कार्यभूतमसदेव तव मायया अविद्यमानात्मतया आविर्भावयन्नेतज्जगत्सृजतः किं न केवलं तेन तथ्यं नम
नमेव शक्यमित्याह तस्मै नमः इति कृतः येन रूपेण सर्वतो विलक्षणात्मने विमायेत्यर्थः ४८ तन्वेतस्य किं
मायाचेष्टितैरित्यत आह जीवस्येति अविद्यातमसाछन्नत्वेनानर्थप्रापकाच्छरीरात्संसरतस्तेनैव च तमसा त

तवेहितं कोऽर्हति साधु वेदितुं स्वमाययेदं सृजतो नियच्छतः यद्विद्यमानात्मतयावभासते तस्मै नमस्ते
स्वविलक्षणात्मने ४९ जीवस्य यः संसरतो विमोक्षणं न जानतोऽनर्थवहाच्छरीरतः लीलावतारैः स्व
यशः प्रदीपकं प्राज्वालयत्त्वां तमहं प्रपद्ये ५० अथाप्याश्रावये ब्रह्म नरलोकविडम्बनं राज्ञः पैतृष्व
स्रीयस्य भक्तस्य च चिकीर्षितं ५१ यक्ष्यति त्वां मखेन्द्रेण राजसूयेन पाण्डवः पारमेष्ठ्यकामो नृपतिस्ता
द्भवाननुमोदितां ५२ तस्मिन्देव क्रतुवरे भवन्तं वै सुरादयः दिदृक्षवः समेष्यन्ति राजानश्च यशस्विनः
५३

स्माच्छरीराद्विमोक्षोपायमजानतः प्राज्वालयत्प्रदीपितवानसि त्वं यशः श्रवणादिभिर्जीवस्य मोक्षार्थमिति
५१ आश्रावये श्रावयिष्यामि नरलोकविडम्बनं ब्रह्मत्वं अलक्षितपादेऽप्यत्र ब्रह्मात्परमत्रलोकावकारिणं श्रा
वयिष्यामीति ५२ ५३ न चात्रैवानुमोदं कार्यं किं तत्र त्वयागन्तव्यमित्याशयेनाह तस्मिन्निति ५४ ॥

तत्रागतास्त्वत्संबंधेन दर्शनादिना पूता भविष्यंतीत्याह श्रवणादिति अंतेवसायिनः श्वपचा अपि ब्रह्ममयस्य
ब्रह्मघनमूर्तेः ईक्षा चाभिमर्शनं स्पर्शश्च ते विद्येते येषां ते ४३ कैमुत्यमेवाह यस्येति हे भुवनमंगल दि।
प दिवि पाताले भूमौ च प्रथितं यस्य यशो विश्वं पुनाति कथं तत्प्रथितं दिवि मंदाकिनीति अधश्च भोगवती।

श्रवणात्कीर्तनाद्ध्यानात्पूयंतेंतेवसायिनः तव ब्रह्ममयस्येश किमुतेक्षाभिमर्शिनः ४३ यस्यामलं दि
वि यशः प्रथितं रसायां भूमौ च ते भुवनमंगल दिग्वितानं मंदाकिनीति दिवि भोगवतीति चाधो गंगे
ति चेह चरणांबु पुनाति विश्वं ४४ शुक उवाच तत्रैतेष्वात्मपक्षेष्वगृणत्सु जिगीषया वाचः पेशैः स्म
यन् भृत्यमुद्धवं प्राह केशवः ४५ श्रीभगवानुवाच त्वं हि नः परमं चक्षुः सुहृन्मंत्रार्थतत्त्ववित् तथा
त्र ब्रूह्यनुष्ठेयं श्रद्दध्मः करवाम किं ४६ शुक उवाच इत्युपामंत्रितो भर्त्रा सर्वज्ञेनापि मुग्धवत् निदे
शं शिरसादाय उद्धवः प्रतिभाषत ४७ इति श्रीभागवते दशमस्कंधे सप्ततितमोध्यायः ७०

ति इह भूमौ च गंगेति तस्य तवानुगमानात्सर्वे मंगलं पवित्रं च भविष्यंतीति भावः ४४ तत्रैवं नारदोक्तेषु।
तत्र वर्तमानेष्वात्मनीयपक्षेषु यादवेषु जरासंधस्य जिगीषावः न गृणत्सु अवमन्यमानेषु वाचः पेशैः पेशलवा
ग्भिः स्मयन् ४५ चक्षुर्हितः मंत्राणां मंत्रसाध्यानां तत्त्ववित् परिपाकवेदिता ४६ ४७ इति श्रीभागवते दश
मस्कंधे सप्ततितमोध्यायः ७० ॥

यद्येकमसमर्थितं तमेवोद्धवस्य मतं मंत्रज्ञः इंद्रप्रस्थे गते कृष्णे पार्थानां परमोत्सवः राजसूयमिषं कृत्वा भीमदुर्योध।
नादिषु कलिमुत्पाद्य तद्द्वारा भूभारमहरद् इति देवर्षिमतं राजसूयागमनं सभ्यानां मतं राजरक्षा कृष्णस्य तद्भय
पदतो यागं करिष्यतः पैतृष्वसेयस्यापि तद्वमः पुत्रस्य सार्चिव्यं माहात्म्यं येन तच्च तथा शरणार्थिनां राज्ञां रक्षा च का।

शुक उवाच इत्युदीरितमाकर्ण्य देवर्षेरुद्धवोब्रवीत् सभ्यानां मतमाज्ञाय कृष्णस्य च महामतिः १
उद्धव उवाच यदुक्तमृषिणा देव साचिव्यं यक्ष्यतस्त्वया कार्यं पैतृष्वसेयस्य रक्षा च शरणैषिणां २ य-
ष्टव्यं राजसूयेन दिक्चक्रजयिना विभो अतो जरासुतजय उभयार्थो मतो मम ३ अस्माकं च महानर्थो
ह्येतेनैव भविष्यति यशश्च तव गोविंद राज्ञो बद्धान्विमुंचतः ४ स वै दुर्विषहो राजा नागायुतसमो बले
बलिनामपि चान्येषां भीमं समबलं विना ५ ॥

टी॰ १ तत्र प्रथमं राजसूयार्थं गंतव्यं ततो राजरक्षा च कर्तव्येत्याह यष्टव्यमित्यष्टभिः अतो दिग्विजयहेतोः उभया।
र्थः राजसूयार्थः शरणागतरक्षार्थश्च ३ ४ अस्मत्सकृतया मस्य पव राजसंबंधे सिद्धो यादवानां लाभः।
स वा इति अन्येषां ततो बलिनामपि यद्यपि समबल एव भीमस्तथापि तं विना भीमादन्यस्य मृत्युर्दुर्विषह इति।

तस्मात्तत्तत्स्वभितो विंद्रियलौल्यपिकोटोघलक्षणात् आत्मानं परं ब्रह्म चेद्विजानीयात् ज्ञानेनधुता
निरस्ताशेषशयावासनाचायस्य तस्य ज्ञानिनो लौल्यमेव न संभवेदिति भवतीतिभावः तथा च श्रुतिः आत्मा
नं चेद्विजानीयादयमस्मीति पूरुषः किमिच्छन्कस्य कामाय शरीरमनुसंज्वरेदिति ४४ सूत्रस्य लौल्येन
तत्पानापत्रे प्रथमे तत्र सद्यातन्नत्वाने यत्ति तत्त्वामितीमसर्थं आत्मानं विद्धि शारीरं रथमेव तु नाम्नस्कर
थरूपकत्वेन रेणाद आत्मा तु इतिमिहितः इन्द्रियेषु मनोभी पूर्व्वस्मीनाह्या मात्रा शब्दादीलक्ष्मी निर्गतस्थदे।

आत्मानं चेद्विजानीयात्परं ज्ञानधुताशयः किमिच्छन्कस्य वा हेतोर्देहं पुष्णाति लंपटः ४५ आ
त्मेः शरीरे रथमिन्द्रियाणि हयान भोग्यान्नरः इन्द्रियेषु वर्त्मानि मात्राधिषणां च सूतं सत्त्वं बृहद्बन्धु
रमीशसृष्टं ४६ एतदशप्राणमयं धर्मं बिकेभिमानेरथिने च जीवे धर्मद्विनस्यपणं वंपठंति
शरीरं तज्जीवपरमेव लक्ष्यं ४७

शानाढ्यः सत्त्वं चिन्नं हृहृद्ब्याणि वंय
तेचित्ते हृत्ताढ्यनिबद्धमिव शरीरं भवा
ति ईश्वरसृष्टमिति निबंधनकर्ता नीशापवेत्यर्थः प्राणादयः पंच नागः कूर्मश्च कृकरो देवदत्तो धनंजया
श्चेत्येवं दशविधं प्राणाणामभिमाने साहंकारं जीवं शरीरं परं ब्रह्मलक्ष्यं यथाधनुषा शरो लक्ष्ये निपात्यते।
तथा प्राणवेन जीवो ब्रह्मणि निपात्यत इत्यर्थः ४८

श्री भाग टी ८

७०

रागादयो जेतव्याः शत्रवः ४२ नचवतोभि दोषाः क्वचित्सत्वसमाधेः सत्वप्रकृतयोपि परोपकारादि प्रकृत
यः शत्रवः नृकायरूपं रथमात्मवश उपकल्प्यः इंद्रियादि परिकरो यस्मिं तथाभूतं यावद्धत्ते तावद्देवगति
छतां गुरूणां चरणसेवया निशितं ज्ञानासिं विभृत अच्युताश्रयः मित्रवत् शत्रुः उपशांतः स्यात् देवत

रागो द्वेषश्च लोभश्च शोकमोहौ भयं मदः। मानोवमानोसूयाश्च मायाहिंसाच मत्सरः ४३ रजः प्र
मादः क्षुन्निद्रा शत्रवस्त्वेवमादयः। रजस्तमः प्रकृतयः सत्वप्रकृतयः क्वचित् ४४ यावन्नृकाय
रथमात्मवशोपकल्पं धत्ते गरिष्ठचरणार्चनया निशातं। ज्ञानासिमच्युतवलो दधदस्तशत्रुः स्वा
नंदतुष्ट उपशांत इदं विजह्यात् ४५ नोचेत्प्रमत्तमसदिंद्रियवाजिसूता नीत्वोत्पथं विषयदस्यु
षु निक्षिपंति। ते दस्यवः सहयसूतममुं तमोंधे संसारकूप उरुमृत्युभये क्षिपंति ४६

तेभूताः इदं यस्यादिकमपेक्ष्य तेनत्यर्थः अच्युताश्रयाभावे बाधकमाह नोचेदिति प्रमत्तो बहिर्मुखतायेदं।
इंद्रियवाजिनः सज्जस्तेऽउत्पथं कुत्सितमार्गं नीत्वा विषयाख्येषु दस्युषु निक्षिपंति दस्यवः ससूतेन च वर्त्तमा
नं तमोन्धेन महाव्याप्ते उरुमृत्युभयं यस्मिन् ४६

नन्वेवं वेदविहितेष्टापूर्तादिकारिणः पुंसः कथं प्राप्तिः स्यादित्याशंक्य वेदोक्तकर्मणामपि द्वैविध्यं दर्शयन्न
सूत्रमाह प्रवृत्तं चेति दृष्टाभिः हिंसेदं यमयं काम्यमग्निहोत्राद्य यज्ञानि । दर्शपूर्णमासस्य चातुर्मा-
स्यपशुः सुतः हिंसयेनादिकर्म यज्ञानि दमयापकिव कर्म च मादिशाहार्ये विवरणं दर्शयेति पशुः
यागः सुतः सोमयागः ४७ इति वैश्वदेवं प्रवृत्तं विविधं वर्णं तत्सर्वं निष्कामत्वे एतद्वैदिकाम्या-
मशांति दच नहि प्रवृत्ताख्याममपीत्यर्थः आत्मा वेद्यमपि ४८ प्रवृत्तेन कर्मणा आरोहावरोहाभ्यां माह ।

प्रवृत्तं च निवृत्तं च द्विविधं कर्म वैदिकं आवर्तेत प्रवृत्तेन निवृत्तेनाश्नुतेमृतं ४९ एतद्विवृण्वन्
नाम्नैवं वृत्तमावृत्तमेवाह धूमं सप्तालयारात्मकं पूर्णा आत्मा आदिलक्षणे ५० दृश्यस्य सकलविपाकस्य
धूमो रात्रिरपक्षयः प्रयनं दक्षिणं सोमो दर्शमोषध्यो वीरुधः प्रत्येरेतः इति दर्शपितृयाणं पुनर्भवः ५१

इति प्रकारमाह दृश्यस्य च कर्त्रा ग्रहादेः सत्त्वो विपाकः परिणामो देहान्तरारंभकः येन संपरिष्वक्तो ना
श्वति यथावस्तु नावाप्नुयात् लोकास्तिनि पंच स्यामाहु नावाप्तः पुरुषवच्च सो भवतीति पादांतरे दृश्यस
हेतुनितो कालो निवृत्यार्णायां कृत्स्नविपाकस्य हेतुत्वादि पापग्रहयोनः तथा च श्रुतिः सर्वं भान्तो मन्त्राः ।
समस्तान्दृष्ट्वा लोकाद्दयमेवाग्नेः क्रामतीति नियोनत्वादयस्यागे प्रयोत ननेत्वेष आत्मानिष्कामतीति

श्री
भाग
टी
८१

भूम्यादिषु तैस्तैः स्वभिमानिभ्यो देवाः तत्राधिपतयः क्रमात् । सोमः सोमलोकः तत्र भुक्तभोगा स्वा-
वरोहणप्रकारमाह दर्शइत्यादि । दर्शइति विपरीतलक्षणया विशिष्टः सोमलयः शोकाग्निनादेहलये
नादर्शनमुच्यते एतदुक्तं भवति भूतसत्त्वयुक्तो भूम्याद्यभिमान्यादिदेवताभिः सोमलोकं प्रापितः त
द्भोगावसाने विलीनदेहो वृष्टिद्वारेण पृथिवीं प्राप्य आदिमाप्यायनक्रमेण जायते एवं पुनर्भवदेहः पि
तृयानेषु वृत्तकर्ममार्गइति लभ्यते ॥५९॥ पुनर्भवमेवाह एकैकशः एतेषु एकैकं क्रमेण भूतानां तन्मा
त्रिपंचाशच्च भूमौ जायते तत्राधिकारिणमाह निषेकादीनि श्मशानान्तादिकार्येष्वेवं जन्मनलभ
एकैकशः एतेषु एवं भूत्वा भूतेष्व जायते निषेकादिश्मशानान्तैः संस्कारैः संस्कृतो द्विजः ॥६०॥ श्री
रुद्रियेषु क्रियायत्तानतानदीपेषु नन्दने इंद्रियाणां मनसा मौना विवेकादिके मनः ॥६१॥ वाचेव
णोस्माम्नायेन मौकारं स्वरेणमेन ॐकारं विदो नादेन तेन तत्प्राणोमहत्वमम ॥६२॥
नेष्वर्थः ॥६०॥ निवृत्तकर्मनिष्ठयोर्यामनोविशेषमुपदिशन् निर्विकारत्वमार्गेण उत्तमलोकप्राप्तिमाह श्री
रुद्रियेष्वित्यादिना यदा तत्तु हिंसायाद्युर्वोरस्तादिनिमुक्त्वे निवृत्तकर्मवरशेषयत्राद तत्त्वेन नदीष्वते इति
तथा तेषु इंद्रियव्यापाराणां मिथ्यात्वादिनापि इंद्रियता वस्मात् तत्रा भावयस्यार्थः एव मनस्त्वापि ॥६१॥ दृष्टौ
दर्शनादि संकल्परूपे मनसि वैकारिकं विकारमुक्तं मनोवाचि विध्यादिलक्षणया वाचादि मनःक
र्तृत्वादि विकाराभ्यन्तलिवर्णमात्मं मात्राये प्रगल्भायते द्विषेनाहावः स्वरे अक्षकात्तादि स्वर उपसंके ऑविदो

अग्निरिति तदभिमानिन्यो देवतास्ताः प्रयोतिति एवंवत दिवाहः प्राह्णः तस्यैवांशः राकाशुक्लपक्षस्यो
तः उत्तरायणाराकेति चतुर्णां ताम्रमर्तं उत्तरमयनं स्वाराड्नामा एवं स्वर्लोकं गतस्यभौव साने मो।
तशकारमाह विश्वस्मै तनि विश्वः स्थूलोपाधिः तं स्थूलं स्थूलोपाधिर्लीनः सोभवति सूक्ष्मं च कारणे विलाप्य।
कारणोपाधिः प्राप्तो भवति कारणं च सर्वं साक्षिणि तेनाल्वयात्मा तिस्वरूपे विलाप्य तुर्यो भवति तेषां
च यथाभिवारेणा लयेष्ववश्यात्माभवमुच्यते इत्यर्थः यथोत्तरोभूत्वाभूत्वा निवर्तते तथा न निवर्तत इत्यर्थः

अग्निः सूर्यो दिवा प्राह्णः शुक्लो राकोत्तरायणाः विश्वस्मै ते नमः प्राप्त स्तुर्यमात्मा समन्वयात् २४
देवयानमिदं प्राहुर्भूत्वा भूत्वा नु पूर्वशः आत्मायान्मुमुक्षेतात्मात्मा त्यास्यां न निवर्तते २५ एते
पितृदेवानामयने वेदनिर्मिते प्राप्तेणाव त्वं यावेद् तन्मस्थोपि न मुह्यति २६ प्राप्य सर्वं ते न नानां
सदद्रिरितः परावरे तान्तेजे यव वाचा वाच्यं नमोऽस्तु नित्यं स्तयं २७

२७ तेषु समभिसंवर्तीत्यादीनां तेषु विरभिसंभवंती त्यानानिसु यो म विविष्णतापि ते इत्यर्थः तन्मस्थो
पितृदोष्यो पि न मुह्यति २८ तत्र देहमापरमाकांति तना नादेहादीनां आदौ कारणेन चैतव प्रवा
धिवेन यत्नत तथा बहिर्भोग्यमं तन्मेन्यप्रवशावश्यमीच तमो प्रकाशः ज्योतिः प्रकाशः तत सर्वं।
यं तानी स्वयमेव तत स्मात्सुतिरिक्तं वस्तु किंचिदस्ति येन मुह्येदित्यर्थः २९

नन्वनर्थकं एवं सूत्रार्थः तस्मादप्रतीयमानत्वात् स्थाव्यापितः तत्कथिये न सर्वलोकव्यापितोऽपि आभासः प्र
तिबिंबादिर्हि स्वतन्त्रयाथार्थ्यात्मनः न हि दृष्टं हि याकं सर्वं सूक्ष्मं तेन विकल्पितं न तत्त्वमाश्रितः दुर्घटत्वात् ५०
नदेवाह हिमादीनां पञ्चभूतानां कृत्वा पंचतत्त्वात्मकं तन्तुपंचेदशादि संख्यातारम्भपरिणामानां मध्ये ।
कतमोऽपि न भवेत्स्वतन्त्रापि न भवति तत्तावन्मेघानां संघातः तेषां परमाणवः प्रकटेषां कर्षणे सर्वलोक
धर्मानुपपत्तेः नत्वेकस्मिन् देशे कृत्स्ने सर्वे वर्तमानाः कृत्स्नेन च विकारसाम्यात् अवयवी शतादौ परि
णामोऽपि न पृथक् नः स किं स्वावयवेभ्यो नान्यो भिन्न एव भवतु तदव्यक्तोऽवान्तरावयवान्तरं स्यात्
सूत्रावयविनोऽपि तद्भावो यथा वस्तुतस्तु नः दुर्घटत्वादेव किं न हृदयं विकल्पिते ५० हिमा।
दीनां मिश्रत्वं तां कृत्वा यानकतमोऽपि हि नश्यता तो विकारोऽपि न पृथक् कालिंगमूषा ५८ यान।
वो वयवितानां नन्मा त्रावयवैर्विना तस्मात् तन्त्वयविसमन्वयवोऽनन्त ५९
प्रतीतेः तवचनत्विः स किं प्रत्यवयवं सर्वोऽपि ग्राह्यो यं गुणिमात्रेऽपि देहे बुद्धिः स्यात् इति येन स्वाकांशग्राही
कारे समस्तवस्त्वात्मान् यत्नामृषैव तत्त्वं ५८ एवं दृष्टान्तं दर्शयित्वा तन्मुक्तान्तेऽपि न तालिमादिनामपि मिथ्या
तस्मादृषाद्यवयवीति यावत्तो महाभूतानि तन्मात्रैः सोऽमरवयवैर्विना तस्य यावयविनां तेषां मायिन त्र्यंव्यया।
त्रसरेणुः इति चेत्तत्रादधानुरूपकारणानां तत्र अवयवविनियमति अवयविष्वन्तर्लोमत्रैवयविभ्यस्तु।
यानवयवर्ति विनानत्सज्ञावे प्रणामाभावादित्यर्थः नरकं पंचमस्तं येपवेनिरुक्तं दित्रिशद्गुणमिमादि

तत्त्वतः विद्वनोः भावेऽप्यामणाधिष्ठानत्वादिषु सोऽयं देवदत्त इति भिन्नत्वेन स्यात् ननु कोऽयं भेदः आविर्भावतिरो
भावधर्मकत्वेनाप्यापि यत् नहमीति तत्राह स्यातिविद्वन्ः परमात्मनो विकल्पभेदप्रसक्तिः यद्वा वस्तुनो वि
कल्पे सति पूर्वोक्तोपदेशोपमाः दृष्टान्तात्मपर्वतिभ्रमः स्यात् सच्चनावदेयावद्विद्यानिवृत्तिः ननु सर्वमि
थ्यात्वेऽप्यस्य विधिविशेषणता कथं तत्राह स्वमध्येऽनागतज्ञानमपचयव्याप्येति ९ इदानीमुक्तमेवाद्वैतं
भावनात्रयोपदेशेन दृढीकरोति भावाद्वैतमिति चतुर्भिः वर्तयन आलोचयन स्वानुभूत्याऽऽत्मनत्वा।

स्यान्नात् दृष्टपभ्रमत्वाद्विकल्पे सति वस्तुनः जाग्रत्स्वाप्नीययथास्वमेव तथाविधि निषेधता ९ भावा
द्वैतं क्रियाद्वैतं द्रव्याद्वैतं यथात्मनः वर्तयन्स्वानुभूत्येदं त्रीन्स्वमात्रानुपलुमेति: ९१ कार्यकारण
वस्त्वैक्यमर्षणं पटतन्तुवत् अवस्तुत्वाद्विकल्पस्य भावाद्वैतं तदुच्यते ९२ यद्ब्रह्मण्यपरेमात्मन्स
वेकर्मसमर्पणं मनोवाक्तनुभिः पार्थ क्रियाद्वैतं तदुच्यते ९३
नुभावेन त्रीन्जाग्र दादीन् त्रयः अवस्थाः
त्रयः स्वमः इति प्रथमः स्वमः इति स्वप्नतेः यद्वावस्तुभेदबुद्धिरेकः स्वामः तत्त स्वमदृष्टिकारभेदेन कर्मभेदबुद्धि
द्वितीयः ततोऽमन्कर्मसाधितमेतत्फलमममैवभोग्यमिति तृतीयः तन्त्र्यवतो निवर्तयति ९१ कार्यकार
णयोर्वस्त्वैक्यस्य मर्षणं तंतत्रैव तत्पटादृति ९२ मनोवाक्तनुभिः कृतानां कर्मणां समर्पणं तैः समर्प
णमिति वा तदेष्य फलभेदादिक्रियाभेदहेतोः ईश्वरार्पणेनतदभावात् क्रियाणामद्वैतं ९३

आत्मनः स्वस्य तापादीनां च तात्पर्थं स्वनयोर्देहादीनां पंचभूतात्मकत्वेन भोक्तृत्वपरमात्मनो नाभेदो ।
लोचनेनार्थकामयोर्यद्वैकादर्शनमित्यर्थः ९४ एकात्मानं सम्यर्धमात्मेति लिप्साद् यदीति द्वंतंपेनोप
येनयतः सकाशात् ९५ यत्तत्तत्सपसंहरति यतैरिति अस्य श्रीकृष्णस्य गतिं तद्वक्ति भोक्तृस्या
भक्तः ९६ यतश्च सर्वेषां याशरणंमुकुंदभक्तं स्यातमभक्तिरेवासर्वोपकृष्टार्थं देहेति निपात्वाद्वेवलही ।
आत्मतापामृतादीनां मध्ये घांसर्वदेहिनां यत्तदार्थकामयोरैकांत्यास्त्वेनेनद्वावने ९७ य
यस्य वानिषिद्धस्यापेनयत्र यतोनुप सतेनेहेन कार्याणि नराणां रतापपि ९८ यतैरस्यै ।
अवेदोक्तैर्वेतमानः स्वकर्मभिः गृहे व्यस्यानि यो यादृतेनतद्वक्ति भाक्तारः ९९ यथा हि पूर्वं
नृपदेव तुभ्यं तातापद्वृणां तु नरतात्मनः प्रभोः यस्मात्पके रूढ्स्वेव यथा भवान् तद्वा षीत्रितिना ।
हिरण्यतः कृतन ९ अदृष्टपगभवं कश्चिद्भूयर्वंउपवदेणः नाम्नातो नेमहाकल्पे तं पवीणो ।
समसंमतः १० नृपयपालमापुर्वमे गोप्यविपदर्शनः हीणां विपतमो नित्यं मानसत्वपूहलप
कृत्वाद्य यथाहोति देवदेव नृपैर्दैवस्य सहायैः स्वस्यनादिति वा आत्मनः श्रीकृष्णदेवप्रभोर्दृत्तोः स्व
नुभावश्चार्थः उत्कर्षेणानरतेनार्थः यथा यथावत् तमेवभजनेतिशेषः पत्न्या यथा आपदृणां तुभ्यो ।
ऐंल्हं यथा वक्रतन प्रकाशीन यथा श्रीकृष्णाद्देवनाकांतस्यारादप्युत्तरतेनार्थः ११ श्रीकृष्णस्ये
वामद्गानामवत्तथा भवपानि तत्कृपया वासिद्धानीनि दर्शयन स्वत्रर्वेद्गानान मात्स्वदमिति सार्थः पंचा

श्री
भाग
स्कं
७

श्र

॥ नंद्या ब्रह्मसंविद्वान् जन्मनः सन्न्यायवेदगः ६७ ६८ ६९ तत्वेंकृतार्थयवेतिद्वेषे ताश्रुतः पूर्वश्लोका
एकस्मैदेवमेव गुणं यथावो ह्यसंमताः उपहूता विश्वसृग्भिर्हरिगाथोपगायने ७० अहं च गायंस्त
द्विद्वान्स्त्रीभिः परिवृतो गतः तान्नाविश्वसृजस्त्वमे हेलनेशोऽशपोजसा ७१ शूद्रेस्मूद्रतामाशु नष्ट
श्रीक्रृतहेलनः ताववदास्यामहं जज्ञे तत्रापिब्रह्मवादिनां शुश्रूषयानुषंगेन प्राप्तोहं ब्रह्मपुत्र
तां ७२ धर्मस्ते गृहमेधीयो वर्णितः पापनाशनः गृहस्थो येन पदवीमंजसा न्यासिनामियात् ७३
यूयं नृलोके बत भूरिभागा लोकं पुनाना मुनयोभियंति येषां गृहानावसतीति साक्षाद्गूढं परं ब्रह्म
मनुष्यलिंगं ७४ स वा अयं ब्रह्म महद्विमृग्यं कैवल्य निर्वाण सुखानुभूतिः प्रियः सुहृद्वः खलु
मातुलेय आत्मार्हणीयो विधिकृद्गुरुश्च ७५ न यस्य साक्षाद्भवपद्मजादिभी रूपं धिया वस्तुतयो
पवर्णितं मौनेन भक्त्योपशमेन पूजितः प्रसीदतामेष स सात्वतां पतिः ७६ श्रीशुक उवाच इति
देवर्षिणा प्रोक्तं निशम्य भरतर्षभः पूजयामास सुप्रीतः कृष्णं च प्रेमविह्वलः ७७ कृष्णपार्था
वुपामंत्र्य पूजितः प्रययौ मुनिः श्रुत्वा कृष्णं परं ब्रह्म पार्थः परमविस्मितः ७८ इति दाक्षायणी
नां ते पृथग्वंशाः प्रकीर्तिताः देवासुरमनुष्याद्या लोका यत्र चराचराः ७९ इति श्रीभागवते म
सप्तमस्कंधे प्रह्लादाख्यचरिते युधिष्ठिरसंवादे सदाचारो नाम पंचदशोध्यायः १५
देवपदनिरूपणमिति शेषः ७४ ७५ ७६ ७७ ७८ ७९ इति श्रीभागवते सप्तमस्कंधे प्रह्लादचरिते पु

१८

॥ समाप्तोयंसप्तमस्कन्धाध्याय ८४ चतुराशीति ८४ ॥

ह = ११ग.

समाप्तोयं एकादशस्कंधः अध्याय ३१ १०९१ ❁

एवंभूते सोमवंशे श्रीमुक्तस्वरकीर्तावर्णिता आसत एवं वंशो भाविवर्ण्यते श्रीकृष्णस्य मकिंमुक्ताग्रतो वंशेमकालीतिवक्ते तदेवं वैवस्वतमनुवंशे सोमवंशश्च श्लाघ्यते न श्रीकृष्णावतारचरितानि सप्रपंचमनुवर्णितानि अथेदानीं भाविसोमवंशः कलौ विज्ञानीयमं कयादिमलीमसो वैराग्यद्वारा श्रीकृष्णैकभक्तिनिगमनायानुवर्ण्यते तत्र तत्सोमवंशशाखास्वचिरकालानुवर्तितया मागधवंशोनुवर्ण्यते तत्र दूर्वशेषु।

शुक उवाच योंत्यः पुरंजयो नाम भविष्यो बार्हद्रथः तस्यामात्यस्तु शुनको हत्वा स्वामिनमात्मजे १ प्रद्योतसंज्ञं राजानं कर्ता यत्पालकः सुतः विशाखयूपस्तत्पुत्रो भविता राजकस्ततः २ नंदिवर्धनस्तत्सुतः पंचप्रद्योतना इमे अष्टत्रिंशोत्तरशतं भोक्ष्यंति पृथिवीं नृपाः ३ शिशुनागस्ततो भाव्यः। काकवर्णस्तु तत्सुतः क्षेमधर्मा तस्य सुतः क्षेत्रज्ञः क्षेमधर्मजः ४ विधिसारः सुतस्तस्याजातशत्रुः। भविष्यति दर्भकस्तत्सुतो भावी दर्भकस्याजयः स्मृतः ५ नंदिवर्धन आजेयो महानंदिः सुतस्ततः

शिशुनागा दशैवैते षष्ट्युत्तरशतत्रयं ६

पुचरीवसुः तस्य बृहद्रथः तस्य जरासंधः तस्य सहदेवः पुत्रो भूदिति केतवमस्कंधे तस्यैव सहदेवात् मार्जारिः ततश्च्यावद्योरिपुंजयांता विंशतिः भाविनो राजानो निरूपिताः तदुपरितनं वंशं संकराद्दिलोषः प्रपंचयति योंत्य इति रिपुंजय एव पुरंजयः स्वामिनं पुरंजयं हत्वा स्वपुत्रं प्रद्योतं राजानं करिष्यति २ यत्पालको नाम भविष्यति ३ प्रद्योतनाः प्रद्योतसंज्ञाः ४ ५ ६ ७

श्री
भाग
द्वाटी
२

८ नंदो नाम कश्चिन्महापद्मसंख्यायाः सेनायाः पतिस्स च पतिर्भविष्यति शतपद्म महापद्मस्त्वपिता।
स नंद एवापरं नाम ९ एकमेवच्छत्रं यस्यां तां पृथिवीं शासिष्यति तत्रोक्तान्दृष्टान्ते नः भार्गवः परशु-
रामवत् १० समाः संवत्सरान् ११ नव नंदानुद्धरन् सम्यक्शत्रोरेवं तनवपपन्नान् विश्वस्तानित्यानाला।

समा भोक्ष्यंति पृथिवीं कुरुश्रेष्ठ कलौ नृपाः महानंदिसुतो राजन् शूद्रागर्भोद्भवो बली ८ मा-
हापद्मपतिः कश्चिन्नंदः क्षत्रविनाशकृत् ततो नृपा भविष्यंति शूद्रप्रायास्त्वधार्मिकाः ९ स
एकच्छत्रां पृथिवीमनुल्लंघितशासनः शासिष्यति महापद्मो द्वितीय इव भार्गवः १० तस्य चा-
ष्टौ भविष्यंति सुमाल्यप्रमुखाः सुताः य इमां भोक्ष्यंति महीं राजानः स शतं समाः ११ नव नंदा-
न्द्विजः कश्चित्प्रपन्नानुद्धरिष्यति तेषामभावे पृथिवीं मौर्या भोक्ष्यंति वै कलौ १२ स एव चंद्र-
गुप्तं वै द्विजो राज्येऽभिषेक्ष्यति तत्सुतो वारिसारस्तु ततश्चाशोकवर्धनः १३ सुयशो भविता तस्य
संगतः सुयशःसुतः शालिशूकस्ततस्तस्य सोमशर्मा भविष्यति १४ शतधन्वा ततस्तस्य
भविता तद्बृहद्रथः मौर्या ह्येते दश नृपाः सप्तत्रिंशच्छतोत्तरं समा भोक्ष्यंति पृथिवीं कलौ कुरु- कुलोद्वह

द्विजः कौटिल्यश्चाणक्यापरनामा द्विजपापः वा[illegible]ः उद्धरिष्यति उन्मूलयिष्यति मौर्याः मौर्यसंज्ञाः १२ ।
कष्टं भोक्ष्यंति तच्चाह सप्तवर्षाणि द्वयधिकं प्रथमे १३ १४ तेषां सप्तमोत्तरार्थः पराशरादिभिरुक्तोप्य

१९ ॥ बृहद्रथस्य सेनापतिः पुष्यमित्रो नाम स्वामिनं हत्वा राज्यं करिष्यति स च शुंगानां प्रथमः ततोऽग्निमित्रात्
योऽनर्वश्यैवं शुंगा दशवर्षशताधिकं द्वादशाधिके वर्षशते । १८ कथं कण्वान्समस्थितवान्दशरसीकामितं देवभू

अग्निमित्रस्ततस्तस्मात्सुज्येष्ठो भविता ततः वसुमित्रो भद्रकस्तु पुलिंदो भविता ततः १९ ततो घोषः सु।
तस्तस्माद्वज्रमित्रो भविष्यति ततो भागवतस्तस्माद्देवभूतिः कुरूद्वह १७ शुंगा दशैते भोक्ष्यंति भूमिं व
र्षशताधिकं ततः कण्वानियं भूमिर्यास्यत्यल्पगुणान्नृप १९ शुंगं हत्वा देवभूतिं कण्वोऽमात्यस्तु कामिनं
स्वयं करिष्यते राज्यं वसुदेवो महामतिः १९ तस्य पुत्रस्तु भूमित्रस्तस्य नारायणः सुतः कण्वायना इमे भू
मिं चत्वारिंशच्च पंच च शतानि त्रीणि भोक्ष्यंति वर्षाणां च कलौ युगे २० हत्वा कण्वं सुशर्माणं तद्भृत्यो
वृषलो बली गां भोक्ष्यत्यन्ध्रजातीयः कंचित्कालमसत्तमः २१ कृष्णनामाथ तद्भ्राता भविता पृथिवी।
पतिः श्रीशातकर्णिस्तस्य पुत्रः पौर्णमासस्तु तत्सुतः २२ लंबोदरस्तु तस्यात्र तस्माच्चिबिलको नृपः ।
मेघस्वातिश्चिबिलकादटमानस्ततस्ततः २३

ति भागमात्रं शुंगं हत्वा तस्मात्मा वसुदेवनामा कण्वो राज्यं करिष्यति १९ कण्वायनानां चत्वारः सुशर्मा इमे
वंशात्मसदेवात्मयः कण्वायनाः वर्षाणां द्विचत्वारिंशदुत्तराणि पंचचत्वारिंशद्वर्षाणि भूमिं भोक्ष्यंति २१ कण्वानामे
नि मेमं सुशर्माणं हत्वा बलिक्किकनामा तद्भृत्यो गां भोक्ष्यति २१।२२।२३ ॥

श्री भाग द्वाटी २

२४ मृत्येषु चन्द्रसंतेषु ग्रहस्त तदनुमः शिवस्वातिनामाभविता २५ २६ २७ आवभृत्याश्चावभृतिलमन। गर्दभिनोजाताः २८-२९ एतेषामाभीरादयो मौनान्ता निर्दिष्टाः पंचषष्टिनृपाः एकोनशताधिकं वर्षसहस्रं।

अनिष्टकर्मा हालेयस्तलकस्तस्य चात्मभूः पुरीषभीरुस्तत्पुत्रस्ततो राजा सुनंदनः २४ चकोरो ब हवो यत्र शिवस्वातिररिंदमः तस्यापि गोमती पुत्रः पुरीमान्भविता ततः २५ मेदशिराः शिवस्कंदो यज्ञश्रीस्तत्सुतस्ततः विजयस्तत्सुतो भाव्यश्चंद्रविज्ञः सलोमधिः २६ एते त्रिंशन्नृपतयश्च त्वार्यब्दशतानि च षट्पंचाशच्च पृथिवीं भोक्ष्यंति कुरुनंदन २७ सप्ताभीरा आवभृत्या दश गर्दभिनो नृपाः कंकाः षोडश भूपाला भविष्यंति च लोलुपाः २८ ततोष्टौ यवना भाव्याश्चतुर्दश तुरुष्ककाः भूयो दश गुरुंडाश्च मौना एकादशैव तु २९ एते भोक्ष्यंति पृथिवीं दश वर्षशतानि च। नवाधिकां च नवतिं मौना एकादश क्षितिं ३० भोक्ष्यंत्यब्दशतान्यंग त्रीणि तैः संस्थिते ततः कि। लिकिलायां नृपतयो भूतनंदोथ वंगिरिः ३१ शिशुनंदिश्च तद्भ्राता यशोनंदिः प्रवीरकः इत्येते वै वर्षशतं भविष्यंत्यधिकानि षट् ३२

पृथिवीं भोक्ष्यंति ३० ततः पूर्वोक्ता एकादश मौनाः त्रीण्यब्दशतानि क्षितिं भोक्ष्यंति तैः संस्थितेषु मौ। नेषु मृतेषु किलिकिलायां नगर्यां नृपतयो भविष्यंति इत्यन्वयः ३१ अधिकानि षड्वर्षाणि ३२

तेषांभूपाः [illegible] यथा यथा क्रीकालतयामात्रयोदशसुताभविष्यन्ति अथ पुष्यमित्रो नामान्यो रा
जन्यः अस्य च दुर्मित्रो नाम पुत्रः ३३ तथा आन्ध्राः कौशलाः वैदूर्यपतयः निषधाश्च एते तत्तद्देशनामभिः ख्या
ख्याताः तुल्यकालाः खंडमंडलेषु भूपाः ततएतेभ्यो वाह्लिकेभ्य एव भाव्या भविष्यन्ति ३४ ततश्च माग
धानां तु राजा विश्वस्फूर्जिर्नाम भविता स पूर्वोक्तात्पुरंजयादेति प्रसिद्धः सन् वर्णान्ब्राह्मणादीन् पुलिंद

तेषां त्रयोदश सुता भवितारश्च वाह्लिकाः पुष्यमित्रोथ राजन्यो दुर्मित्रोस्य तथैव च ३३ एकका
लाइमे भूपाः सप्तान्ध्राः सप्तकौशलाः वैदूरपतयो भाव्या नैषधास्तत एव हि ३४ मागधानां तु भा
विता विश्वस्फूर्जिः पुरंजयः करिष्यत्यपरो वर्णान्पुलिंदयदुमद्रकान् ३५ प्रजाश्चाब्रह्मभूयि
ष्ठाः स्थापयिष्यति दुर्मतिः वीर्यवान्क्षत्रमुत्साद्य पद्मावत्यां स वै पुरि अनुगंगमाप्रयागं गुप्तां भोक्ष्य
ति मेदिनीं ३६ सौराष्ट्रावंत्याभीराश्च शूरा अर्बुदमालवाः व्रात्या द्विजा भविष्यन्ति शूद्रप्राया जनाधि
पाः ३७

यदुमद्रसंज्ञान् म्लेच्छप्रायान्करिष्यति अपरः निति पाठे अन्यान्पुलिंदादिसंज्ञान्वर्णान्करिष्यतीत्य
र्थः ३५ सर्वानेकीकृत्वा अब्रह्मभूयिष्ठाः नब्रह्मज्ञानं अथवा ब्रह्म वेदं वेदपाठिनं ब्राह्मणं वा प्रचुराः सन्तीः ।
प्रजाः स्थापयिष्यति पालयिष्यति स च पद्मावत्यां पुर्यां गंगामनुप्रयागपर्यन्तं गुप्तां रक्षितां
मेदिनीं भोक्ष्यति ३६ तदनंतरं सौराष्ट्रादिदेशवर्तिनो द्विजाः व्रात्याः संस्कारहीना भविष्यं ।

त

८६

श्री
भाग
द्वादी
४

म्लच्छाश्चाब्रह्मवर्चसः तेदावाश्च भूभृतः ३८ एतेच म्लेच्छप्राया भूभृतः तुल्यकाला भविष्यंति किंचएते सर्वे ऽ
धर्मानृतपराः अथ ते एते च पाद विनिहिताः फल्गुदाः अल्पदानाः ३९ ४ असंस्कृताः ग्राम्या धनादि

सिंधोस्तटं चंद्रभागां कौंतीं काश्मीरमंडलं भोक्ष्यंति शूद्रा व्रात्याद्या म्लेच्छाश्चाब्रह्मवर्चसः ३८
तुल्यकाला इमे राजन्म्लेच्छप्रायाश्च भूभृतः एतेऽधर्मानृतपराः फल्गुदास्तीव्रमन्यवः ३९ स्त्री
बालगोद्विजघ्नाश्च परदारधनादृताः उदितास्तमितप्राया अल्पसत्वाल्पकायुषः ४० असंस्कृ
ताः क्रियाहीना रजसा तमसावृताः प्रजास्ते भक्षयिष्यंति म्लेच्छा राजन्यरूपिणः ३ उदितास्तमि
तमायाः हर्षशोकादिविह्वलाः ४१ तन्नाथास्ते जनपदास्तच्छीलाचारवादिनः अन्योन्यतो
राजभिश्च क्षयं यास्यंति पीडिताः ४२ इति श्रीभागवते द्वादशस्कंधे दशानुवर्णने नाम प्रथ
मोध्यायः १ ॥

रुद्रहिताः प्रजा भक्षयिष्यंति पलायपहारा दीनाः पीडयिष्यंति ४१ किंच तन्नाथास्ते भूपाः तासां प्र
जानां नाथाः तेनाथा येषां ते जनपदाः देशवर्तिनो मनुष्याः तच्छीलाचारवादिनः तेषां मेव शीला
चारवादा येषां ते तथा ४२ इति श्रीभावार्थदीपिकायां द्वादशस्कंधे प्रथमोध्यायः १

४

द्वितीयेन कलेर्दोषवृद्धौ करणं वनाशनः अथ पश्चिरिह जनेनैव पुनः कृतयुगागमः १ कालिषमोस्य पंचपति
नमस्येन्नादितो १ धर्मसाधनयोः अवस्थायां बलमेव हि २ तामसेषु निभावोऽग्रभितृविशेषदेशः कालतो
चादिभिः आवहारिके क्रयविक्रययोः स्त्रीतेषु चैव तथाः अच्छेदनिको फलमेव देशः मकलस्यावारोलवा
माश्रमाणां व्यानो तासे लिंगमेवदेशजिनादिके देशः तथाचारविशेषः अन्यो माणलिकारणेव आश्रमाद
श्रमोनरशोभोचकारणं यद्गावहृदकदेसादीनामस्योन्यापनेन संस्कारादिव्यवहारेकारणं अनुमानमुग्धदे।

पुत्र उवाच तस्माद्दितंधर्मः स्नानशौचं तथा पादयो कालेन बलिना मानं त्वत्साधुर्वे लभ्यते १ वि
नमनकलौ नराणां तस्माचारगुणोदयः धर्मसाधनअवस्थायां कारणं बलमेव हि २ तापनेऽभिहितिदे
नमोयथैव व्यावहारिके स्त्रीतेषु तेषु च हितैरतिविपन्ने सत्रमेव हि ३ लिंगमेवाश्रमाणां मोचानां
स्वापनिकारणे श्रुत्वा नासायदोर्बल्यं पदोहितं चापलं तथा च ४ अनस्नानेनावासाधुनेनासाधु नेदं भयवत सौ
कारणवचोद्दारे स्नानमेवप्रसादनं ५ दूरेवार्थयने नीर्थलावण्यकेशपाशतां उदरवरता स्वार्थः समवे
णादितानां सामर्थ्ये तस्मायदौर्बल्यं पराजयः चापलं वचः बहुभाषणं ४ असाधुने चौर्यायाभियोगो अस्माभि
काकौलिः स्वाहापवनस्करत्वे करोति मायाविनजायते नतयोनस्नानेनेदं भयम् उहादेविवादे स्त्रीकारः नव
तानवृष्टिः स्नानमेवप्रसादनं सलेकारः नतयोगस्नानं ५ दूरेवर्तमाने तलाशयतीर्थेन तथा गुर्वादि स्ना
वण्यकेशपाशयार्थे सातोष प्रमाद्भीशोभतेति उदरेभ्रमतास्वार्थः पुरुषार्थः नजभिलवे भिन्नोदासमिति सम

धर्मसमुच्चये

श्री
भाग
द्वा
५

१८ आच्छिन्ना अपहृता दारा द्रविणानि च येषां ते अष्टिः बीजं ९ । १० ॥ क्षीयमाणेष्विमादिना त्र्यं।
कलौ गतप्राये इति पंचमेनान्वयः क्षीयमाणेषु अल्पप्रमाणेषु १२ दस्युप्रायेषु चौरतुल्येषु चौर्यानृतवृथा

दाक्ष्यं कुटुंबभरणं यशोर्थे धर्मसेवनं एवं प्रजाभिर्दुष्टाभिराकीर्णे क्षितिमंडले ७ ब्रह्मविट्क्षत्रशू
द्राणां यो बली भविता नृपः प्रजा हि लुब्धै राजन्यैर्निर्घृणैर्दस्युधर्मभिः ८ आच्छिन्नदारद्रविणा या
स्यंति गिरिकाननं शाकमूलामिषक्षौद्रफलपुष्पाष्टिभोजनाः ९ अनावृष्ट्या विनंक्ष्यंति दुर्भिक्षकर
पीडिताः शीतवातातपप्रावृड्हिमैरन्योन्यतः प्रजाः १० क्षुत्तृड्भ्यां व्याधिभिश्चैव संतप्स्यंते च चिंत
या त्रिंशद्विंशतिवर्षाणि परमायुः कलौ नृणां ११ क्षीयमाणेषु देहेषु देहिनां कलिदोषतः व
र्णाश्रमवतां धर्मे नष्टे वेदपथे नृणां १२ पाषंडप्रचुरे धर्मे दस्युप्रायेषु राजसु चौर्यानृतवृथाहिंसा
नानावृत्तिषु वै नृषु १३ शूद्रप्रायेषु वर्णेषु छागप्रायासु धेनुषु गृहप्रायेष्वाश्रमेषु यौनप्रायेषु बंधु
षु १४ अणुप्रायास्वोषधीषु शमीप्रायेषु स्थास्नुषु विद्युत्प्रायेषु मेघेषु शून्यप्रायेषु सद्मसु १५

हिंसायाः नानावृत्तयो येषु तेषु १३ । १४ छागप्रायासु अल्पपयस्कासु अणुप्रायास्वल्पासु शमीप्रायेषु निष्फलेषु स्थास्नुषु वृक्षे
षु विद्युत्प्रायेषु अदृष्टवृष्टिषु शून्यप्रायेषु धर्मादिरहितेषु सद्मसु गृहेषु १५ ॥

५

नेषु खरधर्मिष्विति गर्दभसदृशेष्विति कलौ गतप्राये समाप्तप्राये १६ एतस्य प्रवृत्तिनिमित्तमाह चराचरगुरोः श्रीम
तो विष्णोरस्यैव धर्मत्राणायेत गुरुत्वेऽस्य नयाः उपपादनाय अखिलस्य विष्णुसात्मनः कारणस्येति एवंभूतस्य ह
रेर्जन्म साधूनां धर्मत्राणाय प्रयोजनमाह कर्मापनुत्तये साधूनां १७ शम्भलग्राममुख्यस्य प्रधानस्य नाम्ना
विष्णुयशसः ब्राह्मणस्य भवने गृहे प्रादुर्भविष्यतीत्यजातस्यार्थः १८ धर्मत्राणप्रकारमाह अश्वमिति अ

इत्थं कलौ गतप्राये जनेषु खरधर्मिणि धर्मत्राणाय सत्त्वेन भगवानवतरिष्यति १६ चराचरगु
रोर्विष्णोरीश्वरस्याखिलात्मनः धर्मत्राणाय साधूनां जन्म कर्मापनुत्तये १७ शंबलग्राममुख्यस्य
ब्राह्मणस्य महात्मनः भवने विष्णुयशसः कल्किः प्रादुर्भविष्यति १८ अश्वमाशुगमारुह्य देवदत्तं
जगत्पतिः असिनासाधुदमनमष्टैश्वर्यगुणान्वितः १९ विचरन्नाशुना क्षौणीं हयेनाप्रतिम
द्युतिः नृपलिंगछदो दस्यून्कोटिशो निहनिष्यति २० अथ तेषां भविष्यंति मनांसि विशदानि
वै वासुदेवांगरागातिपुण्यगंधानिलस्पृशां २१

श्वमिति असाधवो दमंते ये तेनमश्वमारुह्य असिना
दस्यून्कोटिशो निहनिष्यतीत्यन्वयः असाधुदमनः इति पाठे कल्किविशेषणं १९ नृपवेषधारिणः
आशुना शीघ्रगामिना हयेन क्षोणीं भूमौ विचरन् अणिमाद्यष्टैश्वर्याणि गुणाश्च सर्वे कल्याणादयः तैरा
न्वितः नृपलिंगछदः राजवेषच्छन्नान् २० तेनसपुण्यः कृतयुगप्रवृत्तिप्रकारमाह अथेति सार्धेरुक्त्वा २१

श्री
भाग
टी
९

6

तेषां पौरजानपदानां मनांसि विशदानि भविष्यंति तदैतेनः श्रीवासुदेवस्य कल्केरंगरागेण चंदनादिना
अतिपुण्यगंधोऽनिलस्तत्स्पर्शेनेति तथा तेषां स्थविष्ठः स्थूलः २२ कृतयुगप्रवृत्तिमाह प्रजासूतिः संततिः २३
तदवतारकालोपलक्षणमाह तिष्यः पुष्यो नाम नक्षत्रं अयमर्थः सूर्यचंद्रबृहस्पतीनां एकराशौ पुष्यनक्षत्रे
योगः तत्कृतं कृतयुगं भविष्यतीति यद्यपि च प्रतिद्वादशाब्दं कर्कराशौ बृहस्पतौ वर्तमाने हि अमाव
स्यायां तेषां त्रयाणामपि पुष्ययोगः संभविष्यति तथापि तेषां च त्रयाणामपि सह प्रवेशोऽत्र विवक्षितः ।

पौरजानपदानां वै हतेष्वखिलदस्युषु तेषां प्रजाविसर्गश्च स्थविष्ठः संभविष्यति वासुदेवे भगव
ति सत्वमूर्त्तौ हृदि स्थिते २२ यदावतीर्णो भगवान्कल्किर्धर्मपतिर्हरिः कृतं भविष्यति तदा प्रजा
सूतिश्च सात्विकी २३ यदा चंद्रश्च सूर्यश्च तथा तिष्यबृहस्पती एकराशौ समेष्यंति तदा भवति
तत्कृतं २४ येऽतीता वर्तमाना ये भविष्यंति च पार्थिवाः ते त उद्देशतः प्रोक्ता वंशीयाः सोमसूर्य
योः २५ आरभ्य भवतो जन्म यावन्नंदाभिषेचनं एतद्वर्षसहस्रं तु शतं पंचदशोत्तरं २६ ॥

मेष्यंतीति वचनाद्दोषो नास्तीत्यर्थः २४ एवं नवमस्कंधप्रारभ्यानुक्रांतं वंशद्वयं ते मनोर्वंशद्वयं तन्निग
मयति उद्देशतः संक्षेपतः २५ कलियुगावांतरविशेषं वक्तुमाह वर्षसहस्रं पंचदशोत्तरं शतं चेति
कथंचिद्विलंबमानानां संक्षेपो वा ततः परीक्षितो नंदपर्यंतं द्वादशभूतानां वर्षाणां सार्द्धसहस्रं भवति या
तः परीक्षित्समकाले मागधो मार्जारिमारभ्य रिपुंजयांता विंशती राजानः सहस्रं संवत्सरं भोक्ष्यंतीति उ
क्तं नवमस्कंधे बार्हद्रथभूपाला भाव्याः सहस्रसंवत्सरमिति ततः परं प्रद्योतना अष्टत्रिंशोत्तरं ।
शिशुनागाश्च षष्ट्युत्तरशतत्रयं भोक्ष्यंति पृथिवीमित्येवमुक्तत्वात् २६ ॥

९

कुलेः पत्रत्रिंशद्विचतिरूपयितेकालनाम्नोपलक्षणमाह २२ प्रथमवर्षेः प्रागग्रपाककराकार्येतास्यममकं
समर्षिमंडले तत्रकिंचिदुत्तरेतेषामग्रस्थानीयोमरीचिः ततः पश्चात्सनत्कुमारांकन्यकायांवसिष्ठः सभार्यः
ततः पश्चाद्दक्षिणतुत्तरेतेषांमूलस्थानीयोंगिराः ततः पश्चाद्वत्सम्पुलस्त्यश्चउत्तरशाखे अत्रिः ततोदक्षिणा
तः पुलस्त्यः पुलस्त्यस्मिन्नतः पुलहः ततउत्तरतः क्रतुः एवंस्थितेतेषांमध्येयौपूर्वौउदयसमयेप्रथमा
पूर्वदिनौपुलहक्रतुसंज्ञौ तयोस्तुमध्येनयोसौदक्षिणोत्तररेखायांमध्येस्मिन्नक्षत्रेदृश्यते तत्रसमदेशावस्थिते सप्तर्षिमण्डले

सप्तर्षीणांतुयौपूर्वौदृश्येतेउदितौदिवि तयोस्तुमध्येनक्षत्रंदृश्यतेयत्समंनिशि २७ तेनैतेऋ
षयोयुक्तास्तिष्ठंत्यब्दशतंनृणां तेत्वदीयेद्विजाःकालेअधुनाचाश्रितामघाः २८ विष्णोर्भगवतो
भानुःकृष्णाख्योसौदिवंगतः तदाविशत्कलिर्लोकंपापेयद्रमतेजनः २९ यावत्सपादपद्माभ्यां
स्पृशन्नास्तेरमापतिः तावत्कलिर्वैपृथिवींपराक्रांतुंनचाशकत् ३०

रिष्टनक्षत्रेषुयद्यस्मात्समेनक्षत्रंदृश्यते तेनतथैवयुक्ताःनृणामब्दशतंतिष्ठंति तेत्वद्द्विजाः त्वदीयेकालेअधु
नामघाश्रितावर्तंते २८ तेषामघास्ववर्तमानेषुसत्सु यदाविष्णोःभानुःभातीतिभानुः सूर्यस्तद्वान्
कृष्णाख्यःदिवंवैकुण्ठंगतः तदाकलियुगमविशत् यद्यस्मिन्युगेजनःपापेरमते त्रिकलियुगस्यलक्ष
णं २९ ननुश्रीकृष्णसमस्थितिर्यावत्तावत्तेमाणिपिमंधात्रूपेणकलिःप्रविष्टएवासीत सत्यंतथापिनाप्रवर्तेस्मपरा

कमीनामवृद्धिमाह पत्रकांतप्रथमविंदं
५८

श्री भाग द्वा ८

मूलोयथोक्तएवकलिप्रवेशकालइत्याह यदेति द्वादशाब्दशतात्मकइति दिव्येनमानेनसंध्यांशा।
भ्यांसहयोद्वादशाब्दशतात्मकः सकलिः तदासंध्यामतिक्रम्यप्रविष्टइत्यर्थः ३१ कलेःप्रवेशकालमु
क्त्वातस्यकलेर्वृद्धिकालमाह यदेति तदाप्रद्योततदाप्रभृतिवृद्धिंयास्यति तदासाति प्रतिवृद्धिंगमिष्यती
त्यर्थः ३२ ननुयदाकलेर्लिंगमुपलब्धंतदैवप्रविष्टइतियुक्तं ततःपूर्वमेवप्रवेशः ततःपरंवृद्धिरित्यत्र।

यदादेवर्षयःसप्तमघासुविचरंतिहि तदाप्रवृत्तस्तुकलिर्द्वादशाब्दशतात्मकः ३१ यदाम।
घाभ्योयास्यन्तिपूर्वाषाढांमहर्षयः तदानंदात्प्रभृत्येषकलिर्वृद्धिंगमिष्यति ३२ यस्मिन्कृष्णो
दिवंयातस्तस्मिन्नेवतदाहनि प्रतिपन्नंकलियुगमितिप्राहुःपुराविदः ३३ दिव्याब्दानांसह।
स्रांतेचतुर्थेतुपुनःकृते भविष्यतितदानृणांमनआत्मप्रकाशकं ३४ इत्येषमानवोवंशोयथा
संख्यायतेभुवि तथाविट्शूद्रविप्राणांतास्ताज्ञेयायुगेयुगे ३५

किंप्रमाणंतत्राह य स्मिन्निति प्रतिपन्नंप्रविष्टमि
तिज्ञात्वा पुराविदः पूर्वेपण्डिताः ३३ कलेरनंतरंकृतयुगप्रवेशमाह चतुर्थेकलौप्रवेशानंतरंदिव्यमि
तेसांशेनापिसहस्रांतेतदन्तेइत्यर्थः कृतयुगप्रवेशचिह्नमाह यदानृणांमनआत्मप्रकाशकंभविष्यतीति ३४
राजवंशोक्तिंनिगमयन्नितरेषांवंशानतिदिशति यथायथामनुकुलीवागस्याभिस्तास्ताश्चवंश्याःचे

श्रीधरी टीका ८

एतत्कीर्तनस्य वैराग्योपयोगित्वमाह एतेषामिति नाममात्रं लिंगं ज्ञापकं येषां तेषां कथामात्रेणैवावशिष्टानां कीर्तिरेव स्थिता न तु स्वरूपं पुत्रादयो वा ३५ कलावुच्छिन्नयोर्वंशयोर्बीजात्पुनः प्रवृत्तिप्रकारमाह देवापिः सोमवंशजः मरुश्च सूर्यवंशजः कलापग्रामे नाम्नि योगिनामाश्रमे प्रसिद्धे ३६ इममेव प्रकारं प्रतिचतुर्युगं प्रदर्शयति

एतेषां नामलिंगानां पुरुषाणां महात्मनां। कथामात्रावशिष्टानां कीर्तिरेव स्थिता भुवि ३५ देवापिः शंतनोर्भ्राता मरुश्चेक्ष्वाकुवंशजः। कलापग्राम आसाते महायोगबलान्वितौ ३६ ताविहैत्य कलेरन्ते वासुदेवानुशिक्षितौ। वर्णाश्रमयुतं धर्मं पूर्ववत्प्रथयिष्यतः ३७ कृतं त्रेता द्वापरं च कलिश्चेति चतुर्युगं। अनेन क्रमयोगेन भुवि प्राणिषु वर्तते ३८ राजन्नेते मया प्रोक्ता नरदेवास्तथापरे। भूमौ ममत्वं कृत्वान्ते हित्वेमां निधनं गताः ३९ कृमिविड्भस्मसंज्ञान्ते राज्ञो नाम्नोऽपि यस्य च। भूतध्रुक्तत्कृते स्वार्थं किं वेद निरयो यतः ४०

ति ३७ ३८ एतेषां नामलिंगानामित्या दियुक्तं न त्वसंपंचयति राजन्नेते इति पंचभिः ३९ ममत्वं कृत्वा ते ममत्वेन यच्चितं भूतद्रोहेण देहं तन्निंदयति राज्ञो नाम्नो राजेति नाम यस्य तस्यापि कृमिविड्भस्मेति संज्ञा अन्ते विष्यति तत्कृते तदर्थं यो भूतध्रुक् भूतद्रोही भवति स किं स्वार्थं वेद न वेद अपेक्षायां देहे त्वन्ते भूतद्रोहे विशिनष्टि यतो भूतद्रोहान्निरयो भवति ४०

ममताप्रकारं प्रपंचयति सेयमखंडा भूः पूर्वैर्नैः पुरुषैः धृता ममतो इत्यादौ ममत्वं वा ममतो ममत्वाद्देः कथं स्यादि
तेवं ४१ उभौ महीकायं च ग्रस्ते नेमसते ४२ अपसंहरति येयइति ते सर्वे च कथा सक्रियमाणा सकथा मा
त्राः कृताः ४३ इति श्रीभागवतार्थे द्वादशस्कंधे द्वितीयोध्यायः २ तृतीये भूमिगीतैः स्मरणं तदोषादि वर्ण्यते कः।

कथं सेयमखंडा भूः पूर्वैर्मे पुरुषैर्धृताः मत्पुत्रस्य च पौत्रस्य मत्पूर्वा वंशजस्य वा ४१ तेजोबन्नमयं का
यं गृहीत्वात्मतयाबुधाः महीं ममतया चोभौ हित्वांते दर्शनं गताः ४२ ये ये भूपतयो राजन्भुंजंति भुव
मोजसा कालेन ते कृताः सर्वे कथामात्राः कथासु च ४३ इति श्रीभागवते महापुराणे द्वादशस्कंधे।
वंशानुकीर्तनेनाम द्वितीयोध्यायः २ शुक उवाच दृष्ट्वात्मनि जये व्यग्रान्नृपान्हसति भूरियं अहो मां वि
जिगीषंति मृत्योः क्रीडनका नृपाः १ काम एष नरेंद्राणां मोघः स्याद्विदुषामपि येन फेनोपमे पिंडे ये।
तिविश्रम्भिता नृपाः २

मपि विकारजातं वदंतो वेदाः त्वामेव सर्वकारणं परमार्थभूतं प्रतिपादयंतीत्यर्थः इंद्रादिवाक्यैर्वेदवाक्या
नामपि तत्परत्वं न भवति यथा त्वयि वदंति ब्रह्मस्वरूपमेवं ऋषयो मंत्राश्च बृहत्स्वरूपं प्रतिपादयंति ॥१५॥

132

त्वमेवसर्वेविगमगोचर इति मत्वा स्वरूपमादर्शयति इतित्वेति त्वमेवसर्वकारणत्वेनपरमार्थ इति कृत्वा भोः
त्र्यधिपते त्रिगुणमायामयीनर्तकीनर्तक सूरयो विवेकिनः तवाखिललोकमलक्षपणकथामृताब्धिं सकल
जनवृजिननिरसनहेतुकीर्तिस्वधासिंधुमवगाह्य निषेव्य पतंतीति तपांसि पापानि दुःखानि वा जहुः त्य-
क्तवंतः त्वदीयकथामात्रेण यदा पापत्यागस्तदा किमुत वक्तव्यं ये पुनः स्वधामविधुताशयकालगुणाः स्वधा-
म्ना स्वरूपस्फुरणेन विधुताः त्यक्ताः आशयगुणाः अंतःकरणधर्माः कालगुणा जरादयश्च यैस्ते तथा हे पर

इति तव सूरयस्त्र्यधिपतेऽखिललोकमलक्षपणकथामृताब्धिमवगाह्य तपांसि जहुः किमुत पुनः
स्वधामविधुताशयकालगुणाः परम भजंति ये पदमजस्रसुखानुभवम् १ ॥

म तवाऽजस्रसुखानुभवं स्वानंदानुभवं पदं स्वरूपं भजंति सेवंते तथाभूताः दुःखानि त्यजंतीति यथा-
पुष्करपलाशे आपो न श्लिष्यंति एवमेवैवंविदि तस्मापंकर्म न श्लिष्यति न कर्मणा लिप्यते पा-
पकेनातः स्वकृतदुष्कृते विधुनुते एवं वाव न तपति किमहं साधु नाकरवं किमहं पापमकरवमित्यादि-
श्रुतेः सकलदेवगणोदितसद्गुणैः त्वमिति सर्वमनीषिजनारताः त्वयि सभद्रगुणश्रवणादिभिः तव प-
दस्मरणेन गतक्लमाः १ ॥

श्री भाग टी १०

असुर्यानामतेलोकाअंधेनतमसावृताः तांस्तेप्रेत्याभिगच्छंतियेकेचात्महनोजनाः तथा नोचेदवेदीमहतीर्विन
ष्टिरित्याद्याः श्रुतयः एवंज्ञोकोक्तोभयविधभजनदोषानिर्दिश्य दृतयइवेति असुभृतोजनायदितेनुविधाःअ
नुवर्तिनोभक्ताइतियावत् तर्हिश्वसंतिजीवंति सफलजीविनोभवंति इतरथातुदृतयइव भस्त्राइव वृथाश्वस
न्त्यर्थः तत्रभक्तानामपि कामादिफलमस्त्येव नकारयकारणानुग्राहकत्वेनजीवनहेतोस्तवाःभजनेन कु।
तद्धानांतदपिन सिद्ध्येदित्याशयेनाह महदहमादयइति महदहंकारश्चादिर्येषांते यदनुग्रहतः यस्यानुप्रवेशा।
तलब्धसामर्थ्याःसंतः अंडमिदं समसृजन्सृष्टिरूपंतत्सृष्टवंतः तत्रपंचापिकोशान् अन्नमयादीनाविश्यतत्तदाकारः।
सन् यश्चतनयते सचेतनत्याह पुरुषविधइति पुरुषस्यान्नमयादेः विधेव विधा आकारोयस्य तनुचिदेकरसस्यकथं

दृतयइवश्वसंत्यसुभृतोयदितेनुविधामहदहमादयोंडमसृजन्यदनुग्रहतः पुरुषविधोन्वयोत्रचरमोन्न।
मयादिषुयः सदसतः परंत्वमथयदेष्ववशेषमृतम् १७

तत्तदाकारतेति तत्राह अन्वयोत्रेति अत्रएष्वन्नमयादिषु अन्वेतीत्यन्वयः अनुस्यूततदाकारतेति एवंतर्हिसमत्वमः
संगत्वंचकथंसंगच्छते तत्राह चरमोन्नमयादिषुयइति अन्नमयादिषुपंचसुकोशेषु उपदिश्यमानेषु यश्चरमःब्रह्म
प्रतिष्ठापुच्छंब्रह्मेत्येवमुक्तः सत्यमितिसंबंधः ननुतथाप्यन्नमयादिषु अन्वितत्वे असंगत्वाद्यनिर्वृत्ति तत्राह सदसतः
परंत्वमथयदेष्ववशेषमृतमिति सदसतःस्थूलसूक्ष्मादन्नमयादेःपरंत्वमतिरिक्तं तत्साक्षिभूतं अशेषे अवशिष्यते।
तेइत्यवशेषं अबाध्यं अतएवऋतंसत्यं तर्हिकिमर्थमेतेऽन्नमयादयःउक्ताः शाखाचंद्रवत् शुद्धस्वरूपलक्षणा।
र्थं तथाचसवाएषपुरुषोन्नरसमयः तस्येदमेवशिरः इत्यादिनास्थूलसूक्ष्मक्रमेण पंचकोशानुपदिश्य तस्यपुच्छ

१२८

एवं तावत्सर्वात्मके श्रीपरमेश्वरे सर्वश्रुतिसमन्वयेन तज्ज्ञानीयत्वमुक्त्वा अथ भक्तिनिरूप्यावत्तदेवस्थानोक्तः।
म इदानीमनवगाह्यमहिमेति प्रथमं तावदुपास्यस्थानं ब्रह्मपुरमुपासनस्य दहरं ब्रह्मेति शार्कराक्षाः उपासते ह्य।
दयं ब्रह्म ताण्ड्यः ब्रह्मस्वेवताः ऊर्ध्वं नयेदिति मूर्धपर्यन्तं छिरोऽथ यततच्छिरो भवत् तच्छिरसः शिरस्त्वमिति याज्ञाः।
श्रुतयो विदधतीत्याह् उदरमुपासत इति ऋषिवर्त्म ऋषीणां संप्रदायमार्गेषु ये कूर्परे स्थिताः ते उदरं ब्रह्म।
ब्रह्म माणिक्यक यं ब्रह्मोपासते ध्यायंति शार्कराक्षा इति श्रुतिपदस्य प्रतिपदं कूर्परे स्थपति कूर्परे शार्कराः य।
नो विद्यते कृत्स्नश्रुतिषु येषां ते तनः पिहितेरुदरः स्थूलरुदरे इत्यावत् उदरस्य हृदयोपि तथा स्थूलता।
त् यद्वा कूर्परे समत्वे सूक्ष्मरूपाश्रयार्थः तथा हृदयस्थं सूक्ष्ममेवालक्ष्य तस्मै वेदाय प्रथममुदरमुपा।
उदरमुपासते तत्र ऋषिवर्त्म सं कूर्परे स्थिताः परिसमपठंति हृदयमारुणयो दहरम् ततउदरादनंतरं
यथा मे शिरः परमं पुनरिह यत्स्वमेव तन पतंति कृतांतमुखे ११

सत इत्यभावः आरुणयः स्तामानाहृदयस्थं दहरं सूक्ष्ममेवोपासते हृदयविशेषणं परिसमरपठंति मा।
तं प्रसरणाद्स्थानमित्यर्थः विशेषणस्य फलमाह ततइति ततो हृदयात् ब्रह्मनेन यथा मउपलब्धिस्थानं
सुषुम्णाख्यं परमं श्रेष्ठं ज्योतिर्मयं शिरोमूर्धानं प्रति उद्गात् उदसर्पत उदरस्थे हृदयस्थं च ब्रह्म परमेशि
उद्गात् मूलाधारादारभ्य हृदयमध्यात् ब्रह्मरंध्रपर्यंतमित्यर्थः कथंभूतं धाम यत्समेत्य प्राप्य पुन
नरे देहकृतांतमुखे न पतंति तत्थाश्रुतिः शतं चैका च हृदयस्य नाड्यः तासां मूर्धानमभिनिःसृतैका तयो।
र्ध्वमायन्नमृतत्वमेति विष्वङ्ङन्या उत्क्रमणे भवंति उदराद्विप्रयः प्रसाविति तो श्रुतिवर्त्मभिः इति सूक्ष्म

श्री
भाग
टी
१३९

137

नन्वमी महीध्रस्यापि तर्हि जीववद्बद्धदेहलद्यादिसंबंधे तरतमप्रविष्टस्य च तारतम्ये केनचिद्विशेषेणोपास्यत्वमिति
मामाशंक्योपरिहरंत्यः एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा सर्वाध्यक्षः सर्वभूताधिवासः सा-
क्षी चेता केवलो निर्गुणश्च इत्याद्याः श्रुतयः स्तुवन्ति इत्याह स्वकृतेति स्वयं कृतासु उच्चनीचमध्यमासु योनिषु
अभिव्यक्तिस्थानेषु कार्येषु देहादिषु हेतुतया उपादानतया प्रागेव विद्यमानत्वेन पश्चात्प्रवेशासम्भवाद्विशन्नि-
व वर्तमानः तरतमतो न्यूनाधिकाभावेन च कास्सि प्रभाससे स्वकृता योनीरनुकरोतीति स्वकृतानुकृतिः अन-

स्वकृतविचित्रयोनिषु विशन्निव हेतुतया तरतमतश्चकास्स्यनलवत्स्वकृतानुकृतिः
अथ वितथास्वमूष्ववितथं तव धाम समं विरजधियोऽन्वयन्त्यभिविपण्यव एकरसम् ॥ १९ ॥

लवत् अग्निर्यथा स्वतः तारतम्यहीनोपि काष्ठानुसारेण तथा तथा च कास्ति न तु अथातो वितथासु
मिथ्यासु अमूषु योनिषु अवितथं सत्यं यतः सममविशेषं अतः सत्यं तव धाम स्वरूपं विरजधियः अनु अयं-
ति नानात्वेन इत्यैक्यरूपेण अनुवदन्तः अभिविपण्यव इति अभितो विगतव्यवहाराः पणो व्यवहार इत्यस्य रूपं
पण्यविति ऐहिकामुष्मिककर्मफलरहिताः इत्यर्थः अविशेषत्वादेवैकरसं सन्मात्रं अतस्त्वोपाधिकृततारत-
म्याभावादथवा ऐश्वर्यस्योपात्तमित्यर्थः स्वनिर्मितेषु कार्येषु तारतम्यविवर्जितं सर्वानुस्यूतं सन्मात्रं भगवत्त्वं भा-

१
रामः
१३९

अपिच कृतंक्रियमाणं क्वास्यात्‌ भगवतोदृष्टागुणाधिकृतं दोषप्रसंगइति यतोविद्याकामकर्मभिः संसा
तोजीवस्यापि श्रीभगवद्भावेलक्षणायावोधयेत्स्यः तंदोषंनिषेधयंति सयश्चायंपुरुषेयश्चासावादित्ये।
स एकइत्याद्यास्तत्त्वमसीत्याद्याः श्रुतयः नत्वकृतार्थस्यात्मनः श्रुतिरियमीश्वरत्वेनक्रियते नहितेनतत्स्यो।
स्यात्तद्बोध्यते तेनगृह्यते यतः अत्र यस्यदेवेपराभक्तिर्यथादेवेतथागुरौ तस्यैतेकथिताह्यर्थाः प्रकाशंतेमहा
त्मनः इत्याद्याः श्रुतयः कृतावतारस्य श्रीभगवतः चरणभजनमुपायंवदंतीत्याह स्वकृतपुरेष्विति स्वकर्मोपार्जि
तेषुपुरेष्वमीषुभोक्तृत्वेनवर्तमानंपुरुषं अखिलशक्तिधृतःसर्वशक्त्याश्रयस्य पूर्णस्यतवांशकृतंवदंति अंशा।
श्वांशः कृतःस्वकृतः त्वद्रूपंवदंतीत्यर्थः नतुकार्यकारणकसंघातस्यकृतएवंभूतत्वे तत्राह अबहिः अंतरसंवर

स्वकृतपुरेष्वमीष्वबहिरंतरसंवरणंतवपुरुषंवदंत्यखिलशक्तिधृतोंशकृतं इतिनृगतिंविविच्यकवयो
निगमावपनंभवतउपासतेंघ्रिमभवंभुविविश्वसिताः २०

णमिति बहिः कार्ये अंतरेकारणे वस्तुतस्तदावरणशून्यं तयोरसत्वादित्यर्थः इत्येवंनृगतिं नृजीवस्यगतिंत
त्वंविविच्यविशोध्यकवयः अन्यथेदंनप्राप्यते इतिज्ञात्वेतः निगमावपनं निगमोक्तकर्मणामासमर्पणात्‌ उप्या।
तेऽस्मिन्निगमावपनेतेवे दृष्टवीजसंताने सर्वंकर्मार्पणविषयमित्यर्थः यत्रार्पितानिकर्माणिमुक्तिफलंभवंति।
तंभवतोंघ्रिमभवंभवनिवर्तकंसंसारनिवर्तकं विश्वसिताः कृतविश्वासाः उपासते श्रवेनवंदनादिभिः सेवंते।
भुवीतिमर्त्यलोके इदमेवोचितमितिदर्शयति तदंशस्यममैवाज्ञानंमायाकृतंवेयनंतदंघ्रिसेवामात्रेणयाते

श्री

भक्तिरस्वरूपमिति वचनमनुचितमिव मन्वानो भक्तिं गुरूकरोति दुरवगमेति भोईश्वर दुर्बोधं यदात्मतत्वं
तस्य निगमाय प्रकाशनाय आविष्कृतमूर्तेस्तव चरितमहामृताब्धिपरिवर्तपरिश्रमणाः चरितमेव महामृता-
ब्धिः तस्मिन्परिवर्तो वगाहः तेन परिश्रमणाः परिः वर्जनार्थः श्रमणं श्रमः गतश्रमाः इत्यर्थः अपवर्गमपि ना-
केचित्परिलषंति नेच्छंति कुतोन्यत केचिदित्येवंभूताः भक्तिरसिका विरला इति दर्शयति न केवलमन्यत्रेच्छ-

दुरवगमात्मतत्वनिगमाय तवात्ततनोश्चरितमहामृताब्धिपरिवर्तपरिश्रमणाः न
परिलषंति केचिदपवर्गमपीश्वर ते चरणसरोजहंसकुलसंगविसृष्टगृहाः २१

ति किं तर्हि तेनैव सुखपूर्णाः संतः पूर्वसिद्धं गृहादिसुखमपि उपेक्षंते इत्याह तव चरणसरोजे हंसाः परमहंसा-
णां ये भक्ताः तेषां कुलं तेन संगः तेन विसृष्टा गृहाः तैः ते तथा अनेन श्रवणकीर्तने दर्शिते श्रुतिश्च मुक्तेरप्या-
धिक्यं भक्तेर्दर्शयति यं सर्वे देवा नमंति मुमुक्षवो ब्रह्मवादिनश्चेति व्याख्यानसर्वैस्तैर्भाष्यकृद्भिः मुक्ता अपि लीला-
या विग्रहं कृत्वा भजंतीति तत्कथामृतपाथोधौ विहरंतो महामुदः कुर्वंति कृतिनः केचिच्चतुर्वर्गं तृणोपमम् २१

अत्रात्मस्वरूपं पश्यंति न तं पश्यंति केचन ततो विद्यायथायस्मात् ज्ञानान्न्ययुक्ताकर्मेतरं बभूव नीहारेणावृता।
जल्पा चासुतृप उक्थशासश्चरंतीत्याद्याः श्रुतयः अन्नकोशं मोनगाहात्मनीश्वरे रतिमुपदिशंतीत्याह तदेव
पश्यमिति तदेवं पश्यं तदेवं वर्तितं तस्मै वोपयिकमिदं कलापं कौशुष्ठिध्यो लीयते इति कलापं शरीरं आत्मस
ह्रुप्रियवत् आत्माच संलग्नतद्वदति स्वाधीनतया वर्त्ततइत्यर्थः तथात्वपि उन्मुखे विहिते प्रिये आत्मनि च।

तदेवं पश्यं कलापमिदमात्मसहप्रियवच्चरंति तयोन्मुखेन विहिते प्रियआत्मनि
च नवनरमंत्यहो असदुपासनयात्महनो यदनुशयाभ्रमेत्सुरुभयेकशरीरभृतः २२

अपार्थे च कारः एवंभूतेष्वपि वनग्रहो कष्ट नरमंतिन सख्याहिताभजंतेति असदुपासनयादेहाद्युपलाल
नेन आत्मह्नः प्रमादिनः कृतः यदनुशयाः यस्य असदुपासनायां अनुशयो वासनायेषां ते कशरीरभृतः सं।
तः उरुभये संसारे भ्रमंति परिवर्तते अतः आत्महनः तिभावः नयात्मनि जगात्माये मनमनो रमताम् इह कदा।
ममेदृशं जन्म मानुष्यं संभविष्यति २२॥

श्री भाग दशे १५॥

इदानीमात्मारामोद्देश्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यश्चेत्याद्याः श्रुतयो निदिध्यासनाङ्गत्वेनोपदिशन्तीत्याह निभृतमरुदिति मरुत्प्राणाः मनश्चाक्षाणि इन्द्रियाणि च निभृतानि संयमितानि यैस्ते च ते दृढयोगयुंजेन इति दृढयोगयुजः ते तथाभूता मुनयो यत्परं हृदि यत् तत्त्वमुपासते तदेवारयोपि तव स्मरणाद्ययुः स्त्रियोपि कामतः उरगेन्द्रदेहसदृशयोः भुजदण्डयोः विषक्ताधीर्यासां ताः परिच्छिन्नदृष्टयः समदृशः सममपरिच्छिन्नं त्वा पश्यन्तो वयं

निभृतमरुन्मनोक्षदृढयोगयुजो हृदि यन्मुनय उपासते तदरयोपि ययुः स्मरणात् । स्त्रिय उरगेन्द्रभोगभुजदण्डविषक्तधियो वयमपि ते समाः समदृशोङ्घ्रिसरोजसुधाः २४

श्रुत्यभिमानिन्यो देवता अपि ते समा एव कृपाविषयतया अङ्घ्रिसरोजसुधाः अङ्घ्रिसरोजं सुधां धारयन्त्य अयं भावः एवम्भूतस्तव चरणस्मरणानुभावः यतो नित्यं त्वां ध्यानेन मुनय उपासते याश्च वयं त्वां समं पश्यामः याश्च स्त्रियः कामतः परिच्छिन्नं ध्यायन्ति ये च द्वेषेण सर्वानपि तांस्त्वामेव प्रापयन्तीति निजचरणस्मरणं प्रेम्णा तव देवा। स्तदुर्लभं यथाकथंचिन्नृदेहे मम भूयादिति भावः २४ ॥

१५॥

तदेवं प्रपंचस्य सत्वे साधकं नास्तीत्युक्तं इदानीं सृष्टिप्रलयश्रुतयो यतो वा इमानि भूतानि जायंते इत्याद्यास्तल्लब्धानुमानं प्रमाणमित्याह नयदिदमिति यद्यस्मादिदं विश्वं सृष्टेः पूर्वं नासीत् सदेव सौम्येदमग्र आसीत् आत्मा वा इदमेवाग्र आसीदित्यादिश्रुतेः नचैव निधनात्प्रलयादनु अनंतरं भविष्यत् न भविष्यति नासदासीन्नो सदासीत्तदानीमित्यादिश्रुतेः अतः कारणात् अंतरा मध्ये एकरसे केवले त्वयि मृषा मिथ्यारूपमेव विभातीति मिथ्यात्वं निश्चितं यत एवं अत उपमीयते द्रविणजातिविकल्पपथैः द्रविणजातीनां द्रव्यमात्राणां मृल्लोहकाष्ठायसरूपाणां विकल्पा भेदाः घटकुंडलादयः तेषां पंथा मार्गाः प्रकाराः तै रूपमीयते सदृशतया निरूप्यते।

न यदिदमग्र आस न भविष्यदतो निधनादनुमितमंतरा त्वयि विभाति मृषैकरसे अत उपमीयते द्र।
विणजातिविकल्पपथैर्वितथमनोविलासमृतमित्यवयंत्यबुधाः २५ ॥

यथा तत्र कार्यकारणयोर्मध्ये कार्यस्य नामधेयमात्रता कारणं मृदादि एव तत्सत्यं तथा प्रत्राकाशादीनां नाममात्रता त्वत्स्वरूपं एव सत्यं निरूप्यते इत्यर्थः तथा च श्रुतिः वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यमिति यथा सौम्यैकेन मृत्पिंडेन विज्ञातेन सर्वं मृण्मयं विज्ञातं स्यात् तथैकेन लोहमणिना सर्वं लोहमयं विज्ञातं स्यात् यथा एकेन नखनिकृंतनेन सर्वं कार्ष्णायसमित्यादि तस्मात्सत्वे प्रमाणाभावादसत्वे प्रमाणस्य विद्यमानत्वात् वितथं मनोविलासमृतं सत्यमिति ये अवयंति जानंति ते अबुधा अतत्वज्ञाः अत्रैवं प्रयोगाः विवादाध्यासितमसत् आद्यंतयोरविद्यमानत्वात् विकारित्वात् शुक्तिरजतादिवत् अनात्मवस्त्विति प्रकृतं।

श्री
भाग
टी
१४८

ननु च यदि सर्वं वो नाम न नास्मैव न चासन्नात्ते न चैतन्मम संबंधयोपि नर्हि किमपराद्धं जीवेन यतोयं संसरति किं
च बहुगुणएव मीश्वरस्य यतो नित्यमुक्तः किं विषयं वक्र्मकोटश्चप्रपेत्तायां जीवेश्वरविशेषं द्वासुपर्णा सयुजा स
खाया समानं वृक्षं परिषस्वजाते तयोरेकः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति यतोमेकोलोहितशुक्ल
कृष्णामित्यामायावच्चीत्याह सयदजयेति सजीवोयस्मात् अजयामायया अजामविद्यामनुशयीत आ
लिंगेत ततो गुणांश्च देहेंद्रियादीन् जुषन् सेवमानः आत्मनयाऽध्यस्यन् तदनु तदनंतरं सरूपतां तद्धर्मयो
गंच जुषन् अपेतभगः पिहितानंदादिगुणः सन् मृत्युं संसारं भजति प्राप्नोति तद्विषयमेव वक्र्मकोटश्च इति भा

सयदजयात्वजामनुशयीतगुणांश्चजुषन्भजतिसरूपतांतदनुमृत्युमपेतभगः त्वमुतजहा
सितामहिरिवत्वचमात्तभगोमहसिमहीयसेऽष्टगुणितेऽपरिमेयभगः २९ ॥

वः त्वमुत त्वंतु तदाश्रितां अजां मायां न न वसा मथ्येवास्ति कथं त्यागात्स्यादह अहिरिवत्वचमिति आत्तभा
वः यथाभुजगमः स्वगातमपि कंचुकं गुणबुद्ध्या नाभिमन्यते तथा त्वमजां न हि निरंतरमाह्लादिसंवितका
मपेत्वहेदयते रजत्याकृत्यमिति नामपेतसेइति कुतएतन्नदाह आत्तभगो नित्यप्राप्तैश्वर्यः महसि परमैश्वर्ये
अष्टगुणिते अणिमाद्यष्टविभूतिसहिते महीयसे पूज्यसे विराजसे कथंभूतः अपरिमेयभगः अपरिमिते
श्वर्यः न त्वस्येषामिव देशकालादिपरिच्छिन्नं नवाष्टगुणितमैश्वर्यं अपितु परिपूर्णस्वरूपानंदपिरवात् अपरि
मितमित्यर्थः नचैतनवक्तीवण्णोगनगनाकालस्वभावादिभिर्भावान्सवरजस्तमोगुणमयानुन्मीलयंतीवहू

१४८

यतोवाचोनिवर्तंतेअप्राप्यमनसासह कोअद्धाइहवेद कइहप्रावोचत् कुतआयाता कुतइयंविसृष्टिः अर्वाग्दे
वाअस्यविसर्जनेन अथाकोवेदयतआबभूव अनेजदेकंमनसोजवीयोनैनंदेवा आप्नुवन्पूर्वमर्षत् यद्वा
वतोन्यानत्येतितिष्ठत्तस्मिन्नपोमातरिश्वादधातीत्याद्याः श्रुतयः भगवंतंत्वेतु नैवंवदंत्योभक्तिमेवोररीकुर्व
तीत्याह कइहन्ववेदेति नव अद्योभवत इत्यनुगतिमग्रसरं पूर्वसिद्धंत्वां अवरजन्मलयः अर्वाचीनोत्पत्ति
नाशवान् कोनुप्रमाता वेदजानाति ईश्वरस्यपूर्वसिद्धत्वस्यचार्वाचीनत्वेप्रमाणंवदन् ज्ञानकारणमा
ह यतउदगादिति यतः त्वत्तः ऋषिर्ब्रह्मा उदगात् उत्पन्नः यं ब्रह्माणमनु उभये अध्यात्मिकाधिदैवि
कादिदेवगणाउत्पन्नाः ततोप्यर्वाचीनाः सर्वे यदात्वंभवान्सर्वमेवानुकृष्यउपसंहृत्य शयीत तर्हितदा अ

कइहनुवेदबतावरजन्मलयोग्रसरंयतउदगादृषिर्यमनुदेवगणाउभये तर्हिनसन्नचासदुभयंनच
कालजवः किमपिनतत्रशास्त्रमवकृष्यशयीतयदा २४ ॥

तुशास्त्रपिनांजीवानांज्ञानसाधनंनास्ति यतस्तदानसन्स्थूलंआकाशादि नचासत्सूक्ष्मंमहदादि नचोभयं
सदसदात्मकंशरीरं नचकालजवः तत्रनिमित्तभूतंकालवैषम्यं एवंसतितत्रतदानकिमपि इंद्रियप्राणा
द्यपि नवज्ञापकंशास्त्रमपि अयमभिप्रायः अर्वाक्सृष्टिगतानांदेहाद्युपाधिकृतांतरायेण कालवशेनमा
लिनसत्वानांनतावद्भगवज्ज्ञानसामर्थ्यं तथाचश्रुतिः नतंविदाथयइमाजजानान्यद्युष्माकमंतरंबभूवेत्या
द्या यदात्वप्रलयसमयेवदंतरमस्ति तदापिसाधनाभावान्नभगवज्ज्ञानं अतस्त्वदेकशरणतया श्रवणकी
र्तनादिभिः भक्तिरेवसम्यकरोति क्वाहंबुद्ध्यादिसंरुद्धः क्वचभूमन्महत्तव दीनबंधोदयासिंधोभक्तिमेनृहरेदिश।

श्री
भाग
स्तो
१४२

143

२ ऽन्तोपि ज्ञानेन कर्ममेव उपदिशन्नामपि भ्रमबाहुल्यादित्याह नतिष्ठन्तीति अस्तनोजगतः जतिं इत्यर्थः यैवैशे-
षिकाद्यो वदन्ति स एव ब्रह्मणोऽनस्यन्ति ये वणलो नलाद्यः अनपर्वक विंशतिप्रकारस्तत्त्वस्य नाशमोक्षो वा
इति ये नैयायिकसांख्यादयः आत्मनि भिन्नं भेदं ये च मीमांसकाः विषणोकर्मफलव्यवहारमत्ते स्मर्वं स्मरन्ति ।
ते सर्वे अहृष्यितैः आरोपितैः अमीभिर्बोधभिर्षीन्ति ततनन्दृष्ट्या सदेव सौम्येदमग्र आसीत् वैल्येवसतब्रह्माप्येति ।
अतो यथायथा शोचन्ति मृत्युमानः अविद्यायामन्तरे वर्तमानाः स्वयं धीराः पण्डितंमन्यमानाः जंघन्यमाना परियन्ति मूढाः
अंधेनैव नीयमाना यथान्धाः एकमेवाद्वितीयं ब्रह्म एक दावह्न्या चैव दृश्यते जलचंद्रवदित्यादिश्रुतिविरोधात्

न तिष्ठन्ते स्वतो मूर्तिमन्तां ब्रह्मणि ये च भिदां विषणां मृतं स्वरं स्मपदिशन्ति तत्राहृष्यितैः त्रि-
गुणमयैः प्रमातृभिर्भिदा स्वाद्बोधकृतानात्रयिनन्ततः परत्र सम्भवेद्बोधरसे २८ ॥

किंच वस्तुतः पुरुषस्य त्रिगुणमयत्वे सर्वमिदं स्यादित्यन्ते ततनन्दत्वात्याह त्रिगुणमयैः प्रमातृभिर्भिदा स्वाद्दा-
बोधकृतानत्वत्वीति त्रिगुणमयः प्रमातृन्यनेन देवता यामिदाउपलक्षणमेतद्विद्यादिः सा यस्मात् व्यविषयो-
ऽबोधकृता तद्विषयात्ताननिवृत्तेऽभिनिर्विकिमज्ञानमस्ति वस्तुनः पुंसि नैवेत्यत आह ततश्च बोधात्पर-
त्र परे अर्थस्य बोधरसे ज्ञानत्वेन एव यतवत् अबोधेन भवेत् न संभवतीत्यर्थः मिथ्यातर्कैस्तर्ककर्कशैरितम-
हावादान्यकारणेन भ्रान्त्यमलंदमतेरमंदमद्दिमंस्वज्ञानवन्मोक्ष्कुट श्रीमन्नाथवामनत्रिनयन श्रीशंकरा ।

नत्रपंचमत्रोमयते यदिच्छत्रिगुणमयः पुरुषो न भवति नहीदं प्रपंचजातं पुरुषस्य पृथग्व्यालीकं स्यात्
कथं तर्हि तयोः सत्वेन प्रतीतिः अत आह सदिव मन इति मनः मनोमात्रमिदं विलसितं त्रिवृत् त्रिगुणात्मकं
प्रपंचजातमसदेव सदिव विभाति कथमिति चेत्तत्राह त्वयीति त्वयि अधिष्ठानसत्तया सद्वत्प्रतीयत इत्यर्थः
न केवलमिदं कारणमेव किं तु आमनुजात् मनुजः पुरुषः अभिव्यक्ताकारः पुरुषमभिव्याप्येति पुरुषस्या
पि पृथक्त्वेन प्रतीतिः मनोमात्रविलसितेत्यर्थः तथा च श्रुतिः असतोऽधि मनोऽसृज्यत मनः प्रजापतिमसृजत।
प्रजापतिः प्रजा असृजत तद्वा इदं मनस्येव परमं प्रतिष्ठितं यदिदं किंचेति नत्वात्मविदस्तमपि विश्वं सदेव

सदिव मनस्त्रिवृत्त्वयि विभात्यसदामनुजात्सदभिमृशंत्यशेषमिदमात्मतयात्मविदः नहि विकृतिं
त्यजंति कनकस्य तदात्मतया स्वकृतमनुप्रविष्टमिदमात्मतयावसितं २४

स्फुरति अतः कथमसत्स्यात् अत आह सदभिमृशंतीति आत्मविदस्तु अशेषमिदं भोक्तृभोग्यात्मकं विश्वा
त्मतयैव सदभिमृशंति सदिति जानंति आत्मकार्यत्वात् न पृथगित्यर्थः तथाहि यदुपादानकं यत्कार्यं भव
ति तत्तेनैव रूपेण प्रतीयते उपादीयते वेति लोकाचारेण दर्शयति नहि विकृतिमिति कनकस्य विकृतिं कुं
डलादि कनकार्थिनो न हि त्यजंति अत्र हेतुः तदात्मतया कनकरूपत्वेनेत्यर्थः अतः स्वकृतमिदं विश्वमनुप्र
विष्टं च पुरुषमात्मतयैवावसितं निश्चितं यस्मात्ततः सदाभाति तन्मात्रेण असत्स्वतः सदाभासं जगत्स्वसिद्धमावे।

श्री
भाग
दशी
१४४

नत्वसंसरंतानसमंतेनचलंते तेदत्तानालिकिंचन मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति इत्यादिश्रुतिभिरेव भू।
तस्य भगवतः प्रतिपादनात् तानस्यकरमेवेति कृतभक्त्याश्रुत्याह तव परि ये चरंतीति तवेति कं मत्प्रियभक्ता
ये परिचरंति छंदांस्यनुवर्तंत इत्यर्थः इति यद्वा हेतुत्वाव्यवधानमदोषः केन रूपेण अखिलसत्वनिकेततया अखिला।
नि सत्वानि निकेताः स्थानानि यस्य तत्तथा तस्य भावस्तत्ता तया सर्वभूतावासतयेत्यर्थः उत अपि अविगणय्य निर।
ऋत्यत एव निर्ऋतेः मृत्योः शिरः मूर्धानं पदा पादेनाक्रमंति मृत्योर्मूर्ध्नि पदं दधतीत्यर्थः मुख्येन इत्यर्थः ये तु
विमुखाः अभक्ताः तान् गिरा वाचा पशूनिव विबुधानपि विद्वांसोपि परिवयसे बध्नासि कृतसत्वयि सौहृदाः कु।

तव परि ये चरंत्यखिलसत्वनिकेततया त उत पदाक्रमंत्यविगणय्य शिरो निर्ऋतेः परिवय
से पशूनिव गिरा विबुधानपि तांस्त्वयि कृतसौहृदाः खलु पुनंति न ये विमुखाः २७ ॥

ते सौहृदं सुहृदस्य भावः प्रेम येषां ते खलु निश्चितं पुनंति पवित्रयंति आत्मानमन्यानपि इति शेषः ते तरं तथा।
च श्रुतिः यस्य वाक्ं तिर्नाम्रामित्राणामिति तस्य देवा वा तस्या नाम भिः दामभिः सर्वे सितममिति स्मृतमिति अथ म।
त्रियाथः सत्यमेवं भूतमात्मानं श्रुतयः प्रतिपादयंति तत्र च ययापि वस्तुनो प्रतीतत्वात् अपरोक्षमेवज्ञानं उत्पद्य
ते तथाप्यसंभावनाविपरीतभावनातिरस्कृतत्वात् मलिनचित्तेषु परोक्षमिव भवतीति तापरोक्षसंसारभ्रम
निवृत्तिसमर्थं श्रीभगवत्परिचर्ययात सम्यगमलचित्तानां तत्प्रसादेन तल्लब्धापरोक्षज्ञानानामपत्नत एवाक र
कलितो मोक्ष इति तथा च श्रुतयः देहांते देवः परं ब्रह्मतारकं व्याचष्टे यमेवैष वृणुते तेन लभ्यः यस्य देवे परा

नन्वयथाखिलसत्वनिकेतनेन श्रीभगवतः सेव्यत्वमुच्यते तर्हि तत्करणसंबंधात् कर्तृत्वभोक्तृत्वशमसमेकं ।
तावत्स्वतःस्वत्वामिति चेन्न हि जीवानामपि तत्स्वत्वमिति केन विशेषेण पुनः सेव्यसेवकत्वमिति इत्याशं
काप्याह इदं नः अपाणिपादो जवनो गृहीता पश्यत्यचक्षुः स शृणोत्यकर्णः स वेत्ति विश्वं न च तस्य वेत्ता ।
हृत्यग्रश्रुहृषपुराणे इत्याद्याः श्रुतयः स्फुरन्ति अत आह त्वमकरण इति करणसंबंधरहित एव अखिलकारक-
शक्तिधरः अखिलानां प्राणिनां यानि कारकाणि इन्द्रियाणि तेषां शक्तीर्धारयति प्रवर्तयतीति तथा अतः
स्वराट् यः स्वेनैव राजते दीप्यते न त्विन्द्रियैः तत्सिद्धत्वात् न शङ्केन्द्रियापेक्षा इत्यर्थः अतस्त्वयि बलिमुद्वहन्ती
ति श्रेष्ठाः कुर्वन्तीति अजया अविद्यया मदन्ति नास्तया हता इत्यर्थः अनिमिषा देवा इन्द्रादयः तद्भृत्याः विश्वसृजो

त्वमकरणः स्वराडखिलकारकशक्तिधरः तव बलिमुद्वहन्ति समदन्त्यजयाऽनिमिषाः वर्षभुजो ।
ऽखिलक्षितिपतेरिव विश्वसृजो विदधति यत्र ये त्वधिकृता भवतश्चकिताः ॥ २८ ॥

ब्रह्मादयोऽपि यथा मण्डलीका एव किंकराः स्वामिनं सेवन्ते तथा विधायकादेवादयः त्वामेवेति लोकाः किं
समदन्ति वमनुष्येष्टं नैवेद्यं कव्यादिलक्षणं बलिं भक्त्या येति प्रचरन्तीत्यर्थः वर्षभुजोऽखिलक्षितिपतेरिवेति यथा
यथा वर्षभुजः खंडमंडलपतयः अखिलक्षितिपतेः महामंडलेश्वरस्य सम्राजः बलिमुद्वहन्ति तद्वदिति
कथं च बलिं वहन्तीत्यत आह विदधति यत्र ये त्वधिकृता भवतश्चकिता इति ततो भीताः यस्मिन्कर्मणि ये नियु
क्तास्तेत्तत्कुर्वन्तीति तद्दत्तापालनमेव बलिवहनमित्यर्थः तथा च श्रुतिः भीषास्माद्वातः पवते भीषोदेति
सूर्यः भीषास्मादग्निश्चेन्द्रश्च मृत्युर्धावति पञ्चम इति अनिन्द्रियोऽपि यो देवः सर्वकारकशक्तिधृक् सर्वज्ञः सर्व

तदेवं कारणप्रवर्तकमीश्वरं कारणपरतंत्रतानवगाहनमप्रतीत्युक्तं न केवलमिदं पदेवकारणं ततउत्पन्नत्वेनापित
स्मिंस्तत्रत्वादिति वदंति यथाग्नेः क्षुद्राविस्फुलिंगाव्युच्चरंति एवमेवास्मादात्मनः सर्वे प्राणाः सर्वे लोकाः सर्वे।
देवाः सर्वाणि भूतानि सर्व एव आत्मानः व्युच्चरंति इत्यादिश्रुतयश्चाहुः स्थिरचरजातयः इति देविशुक तिमर्मु।
क पदिनव सृजत्यामायया विहरोविहारः क्रीडा भवतीति तदा स्थिरचरजातयः स्थिरास्सराश्चराश्च जातयः
जात्यालिंगितादेहायेषांते जीवाः स्युः भवेयुः कथंभूतस्य ततोजाताः परस्यांशस्य दूरेवर्तमानस्य स्मर्थः का
र्यं विहारः उदीक्षया ईक्षालेशेन तत्समयिलीनानां कथं जन्मस्यात् तत्राह उभयनिमित्तयुक्त इति ईक्षयैवो।

स्थिरचरजातयः स्युरजयोत्थनिमित्तयुजो विहर उदीक्षया यदि परस्य विमुक्त ततः न हि प
रमस्य कश्चिदपरो न परश्च भवेद्वियत इवापदस्य तव शून्यतुलां दधतः ३२ ॥

स्यात्तिस्त्राविर्भूतानि निमित्तानि कर्माणि तद्युक्तानि लिंगशरीराणि वा तैर्युज्यंते इति तथा ते तर्हि किं नि।
मित्तेनैव न देहक्रमेण तदीहा एव भवतां न तथैवैषम्याभावात् विषमसृष्टेरयोगादित्याह परमस्येति न व
परमस्येतनमस्योत्कृष्टस्य कार्यकारणकस्य वियत इव आकाशसदृशस्य समस्येत्यर्थः कश्चिदपरः स्वीयः परः
अस्वीयश्च न भवति न संभवतीत्यर्थः असद्वा इदमग्र आसीत् ततो वै सदजायत इत्यादिश्रुत्या शून्यपूर्वकत्वा
भिप्रायेणेतेन तदर्थं पुनर्विशिनष्टि शून्यतुलां दधतः तदेव सामर्थ्यं दर्शयितुं विशिनष्टि अपदस्येति न पदं
इत्यस्थानं तस्य वाङ्मनसोर्योगोचरस्येत्यर्थः तदीक्षणवशात् भमायावोधितकर्मभिः जाताः संसारे जनाः।

एवं तावत्परमात्मनस्सकाशादविद्याकृतकार्योपाधयः तदंशा एव जीवा जाताः संसरन्तो भवन्तीत्युक्तं तत्रैका
द्यविद्यात्वाज्जीवस्याप्येकत्वादेकस्य मोक्षे सर्वमुक्तिप्रसंगः अथवा नानाविद्यास्तर्हि तस्यामेवांशान्तरेण सं
सारानपगमाद्विनिर्मोक्षः स्यादिति केवलेन वस्तुत एव चतनानात्मानः तत्र च तेषामण्वादेहव्यापित्वे तत्स्य
त् देहपरिमाणत्वे च मध्यमपरिमाणतां सावयवत्वेनानित्यत्वं स्यात् अतः सर्वगतो नित्यश्चेति केचनमन्य
न्ते तत्र तत्रावद्युक्तदोषप्रसंगः अविद्याभेदेन तद्धि किं भेदेन वा बद्धमुक्तव्यवस्थासंभवात् ईश्वरस्य तत्तत्केना
ऽंशेन संसारांशे केनांशेन संसारशं केत्युक्तं प्रसिद्धं चात्मैकत्वं सर्वश्रुतिषु किं च इदं पदमेतदर्थमित्यादिप्रमाण
मपि नप्रवृत्तं स्यात् अपरिमिता इति अपरिमिता वस्तुत एवानेताः ध्रुवाते तेन च रूपेण नित्याः सर्वगताश्च तत्र
अपरिमिता ध्रुवास्तत्र येते सर्वगतास्तर्हि ते पाप्मना नित्यमो ध्रुवतेन तथा अत्र निश्चयत्वमयं तद
विमुक्तनित्यत्वं भवेत्समत्त्वानन्तोऽयदमं तमन्तरुष्टतया २१
भूतो जीवा यदि स्युः तर्हि तेषामसमत्वात् साम्यत्वानवस्थानं निष्कृत्वा हेतुवदोऽस्थिर नियमः नियमत्वं यातः
स्यात् पुनरयात्वचनेन कथं यत्नमयं उपाधितो यद्विकारस्य यज्जीवास्त्वे अत्र निर्णातमतत्तस्य विकारस्य
नियंतनियामकं भवेत् अविमुक्तकारणतयाऽपरिमितस्य किं तत् समसमस्तूपेण किं च यत्तत्स्वहेतुः तायते
वेदत्वतामित्येतदिति अतएवाद सनताननंतायदमतमिति ज्ञानीभूतवदतायदमनम् अविज्ञानप्रायं अविष
यत्वात् तथा च श्रुतिः यस्यामतं तस्य मतं मतं यस्य न वेद सः अविज्ञातं विजानतां विज्ञातमविजानतां अत्र वचनेनैव श्रावा
व सदत्र संसीवभवेत्यादिः किं च मतस्य तानस्य रूपतयादोषप्रवणात् तथा च श्रुतिः यदिमं समसवेदान दद

ननु यदि च परमात्मनो जीवा जायन्ते इति निर्दियंतं नियम्यभाव उच्यते तथा सति जीवानामनित्यत्वप्रसंगो न इति।
दितेकृतनाशाकृताभ्यागमप्रसंगः स्यात् किं च तदा मोक्षो नाम जीवस्य स्वरूपहानिरेव स्यात् नैवेवमुक्ते स्व
प्रकाशानंदात्मनो विद्याकृतावरणनिवृत्तिमात्रस्य मोक्षत्वाभ्युपगमात् हि मायाशक्त्योपाधिजन्मनैव जन्म जीवा
नामुच्यते न स्वतो ऽतदुद्भवस्मात् न चातदुद्भव इति ननु किं प्रकृतौ जीवरूपेणोद्भवः स्यात् पुरुषस्य वा उभयोर्वा आद्ये
जीवानां जन्मापत्तिः द्वितीये पुरुषस्य विकारित्वप्रसंगः अत एव वक्तव्यं तृतीये इत्याशयेनोक्तं प्रकृतिपुरुषयो
रुद्भवो न चातदुद्भव इति पुंस्यानन्तशक्तित्वादपीत्याह अजयोरिति तथा च श्रुतिः अजामेकां लोहितशुक्ल।

न चातदुद्भवः प्रकृतिपुरुषयोरजयोरुभययुजा भवं सम्भूतो जलबुद्बुदवत् ॥

कृष्णां बह्वीः प्रजां जनयन्तीं स्वसरूपां अजो ह्येको जुषमाणो ऽनुशेते जहात्येनां भुक्तभोगामजो ऽन्यः उभययुजाद्भ।
वं भवति उभयं वस्तु युज्यते इति उभययुक् संबंधं परस्परावभासमिति यावत् तेन सम्भूतः प्राणाद्युपाधयो जीवा
जायन्त इत्यर्थः जलबुद्बुदवदिति यथा केवलेनानिलेन जलेन वा जलबुद्बुदा न भवन्ति किन्तु मिलिताभ्यां तद्वत्
तत्र च यथानिलो निमित्तं जलमुपादानमेवमत्रापि प्रकृतिर्निमित्तं पुरुषो ऽपादानं तस्माद्वा एतस्मादात्मनः सर्वे प्रा
णाः सर्वे लोकाः सर्वे देवाः सर्वाणि भूतानि सर्व एव आत्मनो व्युच्चरन्तीत्यादिश्रुतिभ्यश्चेतनाचेतनप्रपञ्चस्य परमा।
त्मोपादानत्वश्रवणात् ॥

नचविकारित्वंपरिणामात्वंगीकारात् केचित्तुनःपरिणाममंगीकृत्यात्मनोविकारमपियाविपरीतंनिमि
त्तोपादानभावमिच्छंति सर्वथानावमृक्तिपुरुषैक्याद्वतीतिसिद्धं नटेकमेवाद्वितीयंब्रह्म सजातीयकामा
विनाशीवा सजीवमात्मेत्यादिश्रुतिबलात्तत्व्यतिरिक्तवर्णानांजीवानामौपाधिकमेवजन्मनतत्त्वतःसोपिचंउ
पाधिलयेनपरमात्मनिप्रलयेपिश्यमाणाद्विपितव्याणत्वंतत्त्वेत्याह नपिवंतीति कारणात्मनितत्रमेजीवाःतं
नइतिनवास्तवंजन्मविविधनामगुणैरनेकप्रकारकार्योपाधिभिःसहलिस्ःलीनावभूयः तवत्तमिप्रलय
योर्मधुन्यशेषरसाइवलीयंते यथामधुनिसकलकुसुमरसाविशेषतोनुपलक्ष्यमाणाअपिसामान्येनोपा
लक्ष्यंते एवंप्राणिनोविशेषमात्रलयात्कारणस्याविद्यमानत्वात् सामान्यतोवर्तंते मुक्तौनकारणस्यापिल

नपिबंतिमतंतोविविधनामगुणैःपरमेसवितर्वार्णवेमधुनिलिल्युरशेषरसाः २५

यात् नपिपरमात्मनिनिरुपाधौसरितइवार्णवेलीयंतेइतिविवेकः तथाचश्रुतयः यथेमानामधुनिमधुकृ
तोनितिष्ठंतिनानात्ययानांवृक्षाणांरसान्समवहारमेकतांगमयंति तेयथातत्रविवेकंलभंते अमुष्याहंवृक्ष
स्यरसोस्मीत्येवंखलुसौम्येमाःप्रजाःसतिसंपद्यनविदुःसतिसंपद्यामहइति यथानद्यःस्यंदमानाःसमुद्रेस्तंग
च्छंतिनामरूपेविहाय तथाविद्वान्नामरूपाद्विमुक्तःपरात्परंपुरुषमुपैतिदिव्यमित्याद्याः यस्मिन्नुदितलयमपि
यत्तानिविश्वलयादौजीवोपेतेगुरुककरुणयाकेवलात्माववोधे सत्येनोतेसवजनतिमहत्तासिंधुवत्सिंधुमध्ये
मध्येचिन्नेत्रिभुवनगुरुभावयेनंदसिंदम् २६

श्री
भाग
उत्री
४८०

147

एवं तावद्भीपरमेश्वरानीवानायंते नष्टशेनवक्रमांगिकुर्वंति पुनस्तत्रलीयंते इति संसारचक्रभ्रमणमुक्तं रघा।
नीतत्रिवृत्तये परीत्यभूतानि परीत्यलोकान परीत्य सर्वाः प्रदिशो दिशश्च उपस्थाय प्रथमजामृतस्य आत्मनात्मा
नमभिसंविवेश इत्याद्या भगवदनुवृत्तिं विदधतोस्याह नृषु तवेति नृषु जीवेषु अमीषु तव मायया भ्रममुक्त्वा।
लक्षणं अवगम्य ज्ञात्वा सुधियः भृशं त्वयि अभवे भवनिवर्तके भावं स्वभावं अनुवृत्तिं दधति कुर्वंति अवप्रभवं।
अन्वनुप्रभवो यस्मिंस्ते अभवे ततः किमत आह कथमिति अनुवर्ततां तामेव शरणं भजतां भयं संसारभयं।

नृषु तव मायया भ्रमममीष्ववगत्य भृशं त्वयि सुधियोऽभवे दधति भावमनुप्रभवम्। क
थमनुवर्ततां भवभयं तव यद्भ्रुकुटिः सृजति मुहुस्त्रिणेमिरभवच्छरणेषु भयं ३५

कथं भवेत् न कथंचिदपीत्यर्थः कुतो यद्यस्मात्तव भ्रुकुटिः भ्रूभंगरूपः त्रिनेमिः त्रीः नेमयः ऋतवो वत्सराः शी
तोष्णवर्षकाला यस्य संवत्सरात्मकस्य कालस्य सः अभवच्छरणेषु न भवान् शरणं येषां तेषु भयं
जन्ममरणादिलक्षणं सृजति करोति अत एवंभूतसंसारमाकलय्य वितर्क्य तन्निवृत्तये सुधियः त्वयि भा
वं दधतीति संसारचक्रक्रकचे विदीर्णं मदीर्णं नानाभवतापतप्तं कथंचिदापन्नमिदं प्रपन्नं मामुद्धरस्वामिन्नृ।
हरेत्र लोके ३५ ॥

सर्वभावनिभावो मनोनियमे सति भवति सोपि गुरुप्रसादादिति गुरुपसदनं विदधाति तद्विज्ञानार्थं स-
गुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठं आचार्यवान्पुरुषो वेद तेषान्तकौशलमतिशयतेया योक्ता
न्यैनैव स्तुतानायश्रेष्ठेम्नायाः श्रुतयश्चस्मात् विजितानि हृषीकाणि इन्द्रियाणि वायुः प्राणश्च यैस्तैरपि अदान्त
मनस्तुरंगं अदान्तमदमितं मन एव तुरंगाः इदंमवसाम्यान् येयं तं नियंतुं यतंति श्रयतंते तेअनिलोले अतिचंच
ले गुरोश्चरणं समवहायानास्थित्वेनउपायं विंदंति छिद्रपं लोलमुपायविदः संतः व्यसनशतान्विताः वह्वय

विजितहृषीकवायुभिरदान्तमनस्तुरंगं य इह यतंति यंतुमतिलोलमुपायविदः । व्य
सनशतान्विताः समवहाय गुरोश्चरणं वणिज इवाज संत्यकृतकर्णधरा जलधौ ॥ ३९ ॥

सनानुकूलाः इह संसारसमुद्रेसंतिनिविष्टंति दुःखमेव प्राप्नुवंतीत्यर्थः हे अज न प्रकृतकर्णधारा अस्वीकृतनावि-
काः वणिजो यथा तद्वत् उक्तं च नृदेहमाद्यं सुलभं सुदुर्लभं प्लवं सुकल्पं गुरुकर्णधारम् मयानुकूलेन नभ
स्वतेरितं पुमान्भवाब्धिं न तरेत्स आत्महा इति प्राकृतैः संस्कृतैश्चैव गद्यपद्याक्षरैस्तथा देशभाषादिभिः शि-
ष्यं बोधयेत्स गुरुः स्मृतः गुरुणोपदर्शितभवज्जनस्वात्मानुभूतो सत एव मनो निश्चलं भवति नान्यथेति भावः
यदापरानंदगुरो भवत्पदे पदं मनो मे भगवंल्लभेत तदा निरस्ताखिलसाधनश्रमः श्रयेय सौख्यं भवतः कृपातः ॥ ३९ ॥

परेस्यलोकान्कर्मचोदितान्ब्राह्मणोनिर्वेदमायात् नास्त्यकृतःकृतेनतथा यदासर्वेप्रमुच्यंतेकामायेस्यहृ
दिश्रिताः अथमर्त्योमृतोभवत्यत्रब्रह्मसमश्नुते इत्याद्यैर्वैराग्यसंयोगंविदधीत्स्वादृशजनेनेति आत्मादेहः धामस्था
नंगृहं असवःप्राणाः स्वजनादिभिः किं सर्वरसे सर्वरसाःस्वरूपाणि विद्यंते यस्मिंस्तस्मिंस्त्वयि परमानंदे एतस्यैवा
नंदस्यान्यानि भूतानि मात्रामुपजीवंतीति श्रुतेः अयतस्त्वां सेवमानस्य पुंसः आत्मनि सति नृणां मनुष्याणां त

स्वजनसुतात्मदारधनधामपरासुरथैः त्वयि सति किं नृणां श्रयत आत्मनि सर्वरसे इति।
सदजानतां मिथुनतो रतये चरतां सुखयति को न्विह स्वविहते स्वनिरस्तभगे ३१

द्यैरेतैः किं क उपयोग इति सत्त्वं परमार्थं स्वमजानतां अत एव मिथुनतः स्त्रियागृहिण्या मिथुनीभूय रता
ये मायासुखाय चरतां प्रवर्तमानानां कर्माणि विषण्णो अजानतः चरतः पुरुषान् को वा अर्थः सुखयति आनंदय।
ति न कोपीत्यर्थः इहसंसारे कथंभूते स्वविहते स्वत एव नश्वरे स्वनिरस्तभगे स्वत एव गतसारे पाठांतरे को।
न्विह स्वेनांहि शोषणाद्व्यं अत स्वजनमेवाचिन्तमिमर्थः भजतां हि भवान् साक्षात्परमानंदविग्रहः आत्मैवा।

एवं गुरूपदेशेन तत्तन्मतानां सारासारविवेकेन च सर्वतो निर्विघ्नदेव महत्संगोपपत्तिभिः सम्यगवगाह्यंति
ते तीर्थसदनानि मुनयः पर्यटन्तीति मतं तत्र इत्यादिष्वनर्थमाह तेउ केवलत्वाणा ऋषयो विमदा निरहंकाराः यतो
भवत्पदांबुजहृदः भवतः पदांबुजं हृदि येषां ते अतः स्वयमेवाघभिदंघ्रिजलं येषां ते उतापि तथाविधा अपि।
पुरूणि बहूनि तीर्थानि सदनानि देवागाराणि तान्येवोपासते सेवंते प्रायस्तत्रैव महत्संगो भवति अथवा पुरुष्यपि।
कंस्थीभावङ्ग्नलत्वाणपुण्यं येषां तानि च पुरवः महान्तस्तथर्थः तेषां सदनानि प्राप्यमान् यथाहामरसिंहः।

भुवि पुरुपुण्यतीर्थसदनान्यृषयो विमदाः त उत भवत्पदांबुजहृदोऽघभिदंघ्रिजलाः
दधति सकृन्मनस्त्वयि य आत्मनि नित्यसुखे न पुनरुपासते पुरुषसारहरावसथा
न् २८

निपानागमयोस्तीर्थमृषिजुष्टे जले गुराविति न पुनः पुरुषसारहरावसथानुपासते पुरुषाणां सारविवेकस्थै।
र्यधैर्यत्वमाशांतिप्रमुखं हरंतीति तथा तेषु वते अवसथा गृहाः तान् न चैतेषां गृहादिभवकर्मन्नितसुखाभावे।
त्याह दधति सकृन्मनस्त्वयि य आत्मनि नित्यसुखे इति सकृदपि त्वयि ये मनो दधति तेऽपि गृहादावासक्ता न भ
वंति किं पुनरेवंभूतस्त्वर्थः मुंचत्रगतदद्रः सनिशं त्वामेव संवितन्वंतः संतिष्ठतो यतो गतमदास्तत्ताना आश्रमा
नावहत निमंतन्मलपंक नाहि गलितत्वसुख्यामतस्तोतः संभवमस्तनो नरहरेन स्वामदेहेरभूत् १८

श्री
भाग
वृत्ती
५५२

तत्वाशायस्य क्रियार्थत्वाहानर्थक्यमदर्थानां तदुक्तानां क्रियार्थेन घमत्वपरत्व इति तत्र तत्रैव मिलिताया वाकेद्यस्य।
क्रियापरत्वाभिधानादुपनिषद्वाक्यानि तदेव युक्तं यथोक्तं तत्र वार्तिककृता एतेनकेवलार्थकत्वप्रतिपादनेनोप
निषदां नैराकांक्ष्यमाम्नातमिति तथैकमेवाद्वितीयं ब्रह्म विज्ञानमानंदं ब्रह्मतत्त्वमसीत्येवं तद्विपरीतात्वप्र
तिपादनात् न ह्यद्वितीयपरमानंदरूपस्य कर्मांगत्वं युज्यते ब्रह्ममननं चैतद्वार्तिककृतः कथं सर्वत्रैवर्द्विविज्ञाने
संस्कारत्वेन तन्मन्यते एतंरोंचात्मविज्ञानादन्यत्रैव यथार्थतामिति नैवोक्तत्वात् एतदर्थमेव मननादयमनुनयः
पर्यटनोमन्के तत्त्वावहे तस्य सम्यग्भवेदप्येवं तदेवतन्न संभवनीति प्रश्नोत्तराभ्यां मननेन तत्त्वावधारणाश्रका।
स्मात् सन्नरूपमिति इदं विश्वं धर्मि सदिति साध्योधर्मः सत्तत्त्वं तत्वात् देहोदयपुरं तत्त्वं तन्मदात्मकमेवरश्चेय

सन्नरूपमन्यितं स्मदिति चेत्तत्र तत्र केव्हत्वं व्यभिचरतिक्कचक्षुकचभृषानन्त थोऽभयगुक् ॥

थाकृतकाद्यस्वेदंकुरलादित्तदात्मकं तदहंति तत्र घटदिसदभेदः साध्यतेत्तत्र अपादानत्वनिर्देशेन भेदस्यनोत्त।
विरुद्धो हेत्वाभिव्याह तत्र तत्केद्रत्वमिति तत्तत्वाभेदं साधयामः किंतत्तदुपपन्नत्वेन केड्ला द्विवद्वे दृष्टतिषेधयामः
तत्राभेदएवस्यादिति चेदित्याशंक्यानैकांतिकत्वेन दूषयति व्यभिचरतिक्कचेति पितृपुत्रादिषुमृहरपरस्थसा।
दिषुवत्तथा दर्शनादिति भावः ननु तदुपपन्नत्वेनामतदुपादानत्वेनत्वतत्रिमिनत्वमतो नानैकांतिकत्वमित्याशंक्य
दूषयति स्रकचभूषेति गुणोपादानस्यापि फणिनो न गुणत्वं किंत्वमिथ्यात्वं अन्यथांकुरलादिवद्वाध्यतः प्रसंगा
त् अतः पुनरप्यनैकांतिकत्वमेवेतिभावः ननु तत्र न केवलं गुणमात्रं फणिनउपादानं किंतु विद्याप्युक्तं तथापू।
तस्यावस्तुत्वात् फणिनो मिथ्यात्व मित्याशंक्य तत्स्यमवाधोतिदूषयति ततथोभयपुत्रिति प्रथमस्य वःअग्राह्यवि

ननु मा भूदयं तेन देवतन्नाम्नएवं च सत्यमसंदेहं नेतो वक्तं साधयामः तथाहि सदिदमर्थक्रियाकारित्वात् न यदेवं न तत्
देवं यथा शुक्तिरजतमिति तत्राह व्यवहृतये विकल्पः कल्पितः इति व्यवहाराय यो विकल्पो भ्रमः कल्पितः स्तु पूर्ववा।
कूटकार्षापणादिनापि क्वचित् व्यवहारदर्शनात् न चैकत्र सत्तोऽन्यत्रारोपो भ्रमः प्रसिद्धः अत्यन्तासतः कथं प्रपं।
च भ्रमः स्यात् सतोवा नाऽद्वैतसिद्धिः उक्तं च श्रद्धैः अयमस्य तैलपुष्पं न मम सत्कथमवस्तु ति प्रत्ययानामनाकम।
ध्यारोप्येत वा नैवेति तत्राह अंधपरम्परयेति अंधपरम्परया यो विकल्पः कल्पितः अयं भावः संस्कारजन्यो भ्रमः
संस्कारश्च सिद्धये पूर्वप्रतीतिमात्रमपेक्षते न वस्तुसत्त्वं प्रतीतौ सत्यां वस्तुसत्यताभावेन भ्रमव्यतिरेकादर्शनात्
अतो नादित्वात्पूर्वपूर्वभ्रमहेतुः स्यान्न तो न च स्वारोपो भविष्यतीत्यन्धपरम्परान्यायेन तेन व्यवहारः सेत्स्यतीत्यर्थः।

व्यवहृतये विकल्पः कल्पितोऽन्धपरम्परयाभ्रमयति भारती नरकवृत्तिभिः [illegible]नशेन ३१

योजनकोटिरिति ननु प्रत्यक्षद्वैचानुमोक्ष्ययाजिनः स्वकृतं भवति अयं पामरो मम मतान्यभ्रमरत्यादिभिः
कर्मफलस्य नित्यत्वश्रुतिपाठत्वाद्वसनेन च घटते न हि नित्यं वस्तु प्रसह्य भवति तस्मात् वेदप्रतिपादितत्वात् द्वैतं
सद्वेत्याशंक्याह भ्रमयतीति इह भावन तेन व भारती वेदलक्षणा उरुवृत्तिभिर्बह्वीभिः गौणलक्षणादिवृ
त्तिभिः उपयजनानकर्मसु श्रद्धाभरक्रान्तमंदमतीन्भ्रमयति मोहयति अयं भावः न हि वेदः कर्मफलस्य नित्या।
त्वमभिप्रैति किं तु लक्षणया प्राशस्त्यमात्रं विध्येकवाक्यत्वात् अन्यथा वाक्यभेदप्रसंगात् न यदस्कं मजितो।
लोकः क्षीयते इति न्यायोपबृंहितश्रुत्यंतरविरोधाच्च अतः कर्मजन्यमपवर्गादि इदं भ्रममात्रमित्यतो नैव तस्मा
द्धा एतस्मादात्मन आकाशः संभूत इत्यादीनामन्यपरत्वदर्शितं भवति उक्तं भवतः सतो विश्वं न सत्त्वे व सर्वं

श्री भाग दशे ५८

पवेनावत्तुत्क्रमायलकर्टेवेनये श्रीभगवंतंभजंतितेमृत्युंतरंति इतरेमंसृत्यंनीत्युत्कं इत्यानोगेयवद्भिः संगंपरित्यज्य
श्रीभगवन्मार्गे प्रवृत्ता प्रतिकथं विदंतर्वानाशिनः कामाजमृत्युंतितेश्रीभगवंतंनप्राप्नुवंतिनचेदस्वांवलंभंते
केवलंक्रपयोनीवेवप्राप्नुवंतीति नानशोचन् कामानकामयते मन्यमानःस्वकर्मभिर्जायतेतत्रतत्रेत्याशंक्या।
त्पर्थमाह यदीति न समुद्धरंतीति हे भगवान्ये यतयो हृदिस्थिताः कामजटाः कामसजटाः मूलानि वासनाः या
दि न समुद्धरंति नोत्पादयंति तेषामसतां भवान्हृदिगतोपि दुरधिगमो दुष्प्रापः कथमस्मृतकंठमणिः ना
त्स्यः स यथा कंठे वर्तमानोप्यस्मृतस्तेन न प्राप्तमस्वभवति तद्वदिति न केवलमेतावत् किंत्वसुतृपयोगिनां।

यदि न समुद्धरंति यतयो हृदि कामजटा दुरधिगमोसतां हृदिगतोस्मृतकंठमणिः असु
तृपयोगिनामुभयथाप्यसुखं भगवन्ननपगतांतकादनधिरूढपदाद्भवतः ५८ ॥

तो इंद्रियतर्पणपराणां योगक्ष्यस्तानुभयतोप्यसुखं इहामुत्र च दुःखमेवेत्यर्थः अनपगतांतकात् अनि
वृत्तान्मृत्योः लोकान्तरायतनात्वेनातिक्रांतात् भोगवैभवप्राकस्मभयान्म इहैतावत्तुःखं भवतः ईश्वरात्स्वतुःखं
कथंभूतात् अनधिरूढपदात् अनधिरूढपदं स्वरूपं यस्य तस्मात् तत्स्वरूपप्राप्त्यभावादविद्यावद्विषयत्वेन प्राप्त
तिरूपमोतिक्रमनिवंधनं रहं दुरूपनरकप्राप्तमेव दुःखप्राप्त्यसुखमित्यर्थः दंभन्यासमिषेणाविवित्पियं भोगेका।
चितानारं समुद्धहंतमदर्शितं विरचितो योगक्रमेण फलं यातनालं चितमस्तमस्तननानास्मान्नासमर्हं दीना।

[illegible] ५८

150

नवर्ण्यतेनेकिमपिकृत्यमस्तिप्रारब्धमेवसर्वोपभोगेनाक्षिप्यते अतःकिमितिदृष्याग्राह्यते उभयतोप्यस्माव
मपि शृणुतेच एषनित्योमहिमाब्राह्मणस्य नकर्मणावर्धतेनोकनीयानित्यादिश्रुतेः त्वदवगमीनिदेसगुण
गुणोऽस्यर्थेपुकृ त्वदवगमीनवेत्तिनवान् भवदुत्थयोःशुभाशुभयोःप्राचीनपुण्यपापकर्मणोःफलभूतान् गुण
विगुणान्वयान् सुखदुःखसंबंधान् नवेत्ति नानुसंधत्ते तर्हितदानींदेहभृतांदेहाभिमानिनांप्रवृत्तिनिवृत्तिका
रीः गिरःविधिनिषेधलक्षणानवेत्ति विगतदेहाभिमानतयाकार्याभावान्ननियुज्यतइत्यर्थः एवंचेत्तत् य

त्वदवगमीनवेत्तिभवदुत्थशुभाशुभयोर्गुणविगुणान्वयांस्तर्हिदेहभृतांचगिरः अनु
युगमन्वहंसगुणगीतपरम्परयाश्रवणभृतोयतस्त्वमपवर्गगतिर्मनुजैः ४१

तःकारणात् मनुजैस्त्वदहमनुदिनंश्रवणभृतःश्रवणेनचेतसिधृतस्त्वं तेषामपवर्गगतिः अपवर्गोद्रूपगतिःभ
वसि कथंश्रवणभृतःअनुयुगंप्रतियुगंयागीतपरम्पराउपशमसंततिःतयामन्त्रप्रदायानुसारेणेत्यर्थःएतदुक्तं
भवति येतावत्त्वत्तानिनःनतेषांकर्माधिकारशंकापि येचानवरतंत्वत्कथाश्रवणादिनिष्ठास्तेषामपिआसा
त्तभवत्स्वरूपानाविर्भावाःइतरेषांनयोगक्षेमनामिष्टिफललाभललनलालसानामनुभवतोप्यस्मावेवमिति श्रवणमेनवा
मेदिशमापवस्मात्नियतत्वस्वाभाव्यसंगमःश्रवणवर्णनभावमप्यापिवानिहिभवानियथाविधिकिंकरः ४१

श्री
भाग
उत्ती
१५।

नरकगामी न वेत्ति सचेद्दुःखेन च विधिनिषेधाविमुक्तं न तु न च कथम् अवगन्तुं शक्यं तु स्वर्गम् अनवलोक्य नानाइत्येवा।
मावशंक्य सत्यमेवान्वगात्स्यमहिम्नो वाङ्मनसागोचरत्वाद्विषयत्वेनैवात्तान मिलितदृशोयत यद्दृश्यं गाणिदिवो
यदवोक्तृष्टियायदं नगयावाशयिवीश्मेयद्भूतं भवच्च भविष्यच्चेत्यादिश्रुतिप्रतिपादितमपरिमितादिमानमित्या।
द्र गुणत्रयष्वेति देवभावेस्त्वेतेगुणत्रयं स्वर्गादिलोकपतयो ब्रह्मादयोपि न प्रापुः तत्कुतः यदं तव हृत्त तत्कि।
मपिवेन भवसि आत्मो गुणत्रयो न पशुरिति यत यस्मात् न मयात्मनो ज्ञेन याभीति कुतः तद्धि सर्वं तत्तासर्वशक्तिता।
वाप्तत्वात् अनेन यातात्मना भावेन नहि शविषाण न्यायेन सर्वं त्वं तदप्राप्तिर्वा शक्तिर्वै भवेन्निदं इति अनेन तवमेवाद् य
दनेति यस्मात् वां तमपश्येन त्र्यम्बकोमावरुणाऽज्ञगोनरदक्षगणमतावर्णपुक्ताः एते निवयाः ब्रह्माद्यसमूहा वोति

गुणत्रयं पवतेन पशुं तम नेनैयोनिं मृषिपद्य तं गंड निवयानेत्रमावरुणाः स्वरवरनो सिवा
निवयसा सद्यत्सुखं यः तपादिफलं समत्विरसनेनेन भवन्नियत्नाः ४२

परिभ्रमंति वयसा कालचक्रेण वदिर सोव सदैकदैव ननतपर्ययेणादि येस्मादेवं अतः स्तुतयः तपःफलेति
तास्पृष्टवसति ननसाद्यातृ इति अयमेतावान् इति सगुणस्य गुणाः नेत्यात निर्गुणस्यागोचरत्वात् कथं तदर्थः।
परार्थेतात्पर्यमिति ननु विधिसुखवाक्ये भवद्यनियमः परार्थस्यैव वाक्यार्थत्वमिति निषेधसुखेन नायं निय।
मस्मात् अन विरसनेनेति अत्यटेव नहिहिंसाद्यो अविदितादस्मत्पर्माद्यस्मात्पर्मोदाम नाशास्तात्कृतनात अस्य ल
मनस्विमार्गप्रकारेण लक्षणपावननमसीमादयः पर्यवसंति नववाक्ये निषेधैः सूक्ष्ममेव तात्पर्यत इति अतो भव
त्रियत्नाः भवतितपायनिपत्न समासमियो सोनाः तथा न हि निरवधिनिषेधः संभवति अतो वधिभूतेनापि फलत्नीमर्षयेः।

४३ ४४ ब्रह्मलाक्षपादेति ब्रह्मैव वक्तव्यमिवाद्यनन्तपाप्ममतिसेव्यते इति तथा ब्रह्मपुत्रेति वा ४५ पूर्णः कृतकृत्य श्रुतधरः श्रुतमर्थमनतिधारयतीति तथाभूतः वीरव्रतो नैष्ठिकः ४६ नमः इति श्रीकृष्णावतारतया श्रीनारायण।

श्रीभगवानुवाच इत्येतद्ब्रह्मणः पुत्रा आश्रुत्यात्मानुशासनं सनन्दनमथो नर्चुः सिद्धा ज्ञात्वात्मनो गतिं ४३ इत्यशेषसमाम्नायपुराणोपनिषद्रसः समुद्धृतः पूर्वजातैर्व्योमयानैर्महात्मभिः ४४ त्वं चैतद्ब्रह्मदायाद श्रद्धयात्मानुशासनं धारयंश्चर गां कामं कामानां भर्जनं नृणां ४५ शुक उवाच एवं स ऋषिणा दिष्टं गृहीत्वा श्रद्धयात्मवान् पूर्णः श्रुतधरो राजन्नाह वीरव्रतो मुनिः ४६ नारद उवाच नमस्तस्मै भगवते कृष्णायामलकीर्तये यो धत्ते सर्वभूतानामभवायोशतीः कलाः ४७ शुक उवाच इत्याद्यमृषिमानम्य तच्छिष्यांश्च महात्मनः ततोऽगादाश्रमं साक्षात्पितुर्द्वैपायनस्य मे ४८ सभाजितो भगवता कृतासनपरिग्रहः तस्मै तद्वर्णयामास नारायणमुखाच्छ्रुतं ४९ इत्येतद्वर्णितं राजन्यन्नः प्रश्नः कृतस्त्वया यथा।
ब्रह्मण्यनिर्देश्ये निर्गुणेऽपि मनश्चरेत् ५०

णो नमः इति उक्तं च अंशोंऽशकलाः पुंसः कृष्णस्तु भगवान्स्वयमिति ४७ साक्षात्पितुरिति योनिसम्बन्धं विना जनकस्याग्निमथनादरण्यां सरेकस्य विदारण्यौ रेतःप्रतिममन्थ व्यासः तदेव ततउक्तं शुकः इति हि वदन्ति ४८ ४९ ५० ॥

श्री भाग उटी १५२

समस्तवेदस्तुत्यर्थं संगृह्यानुस्मारयति योस्योत्प्रेक्षक इति योस्य विश्वस्योत्प्रेक्षकः एवमिदमस्तु शासितो समस्तपुरु-
षार्थसिद्धये सृष्टिस्थितिप्रलयान्प्रापणीयमिमालोचकः इत्यर्थः अनेन निमित्तत्वमुक्तं एवमालोच्यास्यादिमध्यनि-
धनेष्वादिसर्गमध्यपालने निधनमेतः एतेषु कर्मसु यो वर्तते अनेनोपादानत्वमुक्तं ननु प्रकृतिपुरुषयोः उपादान-
त्वनिमित्तत्वे प्रसिद्धे सत्यं तयोरपि तत्प्रयोज्यत्वात् मूलकारणं स एवेत्याह योऽव्यक्तजीवेश्वर इति प्रवेशनियमनेद-
र्शयति पूर्वोक्तप्रकारेणेदं सृष्ट्वा यदर्थमिदं सृष्टं तेन तं ऋषिणा सह कार्यं प्रदर्शितं दर्शनात् ऋषिर्जीवस्तेन सहा-
नुप्रविष्टः पुरः शरीराणि तस्य भोगायतनानि चक्रे ताः पुरः शास्ति तस्य भोगं ददत्परिपालयति उपासकस्य कैवल्य-

योऽस्योत्प्रेक्षक आदिमध्यनिधने योऽव्यक्तजीवेश्वरो यः सृष्ट्वेदमनुप्रविश्य ऋषिणा चक्रे पुरः शास्ति ताः यं
सम्पद्य जहात्यजामनुशयी सुप्तः कुलायं यथा तं कैवल्यनिरस्तयोनिमभयं ध्यायेदजस्रं हरिं ॥५०॥ इति श्री-
भागवते दशमस्कंधे सप्ताशीतितमोऽध्यायः ८७

रूपो भवतीत्याह यं सम्पद्येति यं सम्पद्य संप्राप्य अनुशयी अत्वन्तु-
देऽवस्थाणमूलेशेते इति तथा स जीवः अजां मायां कार्यकारणलक्षणामविद्यां त्यजति ननु ब्रह्म संपद्य स्थायिनो
व तत्त्वं संबंधो इत्यपेक्षयाह सुप्तः कुलायं यथेति अयं भावः यथा सुप्तः शरीरं न मन्यते पश्यति तत् ननु किं विशेषपती-
ति तं ध्यायेदिति मत्त समनन्तरं ध्यायेत् किं विशिष्टमत आह अभयं न भयं यस्मात् भयनिवर्तकमित्यर्थः कुत एतत् कैव-
ल्यनिरस्तयोनि कैवल्येन तु स्वरूपावस्थानेन निरस्तो निरस्कृता योनिर्मूलाकारणं माया येन तं सर्वश्रुतिशि-
रोरत्ननीराजितपदाम्बुजं भोगयोगप्रदं वंदे माधवं कर्मनिम्रयो ॥ इति श्रीभावार्थे दशमस्कंधे सप्ताशीतितमो ॥

= ८७ ... १५२

श्रद्धायां श्रीनिति तमेव विष्णुभक्तः कैवल्यमश्नुते ततो वासुदेवभक्तस्तु विभूतिमिति कल्पते श्रीहरिभजतां मुक्तिरेव
मुक्तं अभयं ध्यायेदनस्तं श्रीहरिमिति तत्र शंकते देवासुरेति अशिवमस्वधीरितभोगं भोक्तारो भोगिनः लक्ष्म्याः
पतिं सर्वभोगयुक्तं १ २ अत्रोपसंहारेन नाम्ना सः त्रैविध्यात्त्रिलिंगः त्रिलिंगत्वमाह वैकारिक इति अहमहंका

राजोवाच देवासुरमनुष्येषु ये भजंत्यशिवं शिवं प्रायस्ते धनिनो भोजा न तु लक्ष्म्याः पतिं हरिं १ ए
तद्वेदितुमिछामः संदेहोत्र महान्हि नः विरुद्धशीलयोः प्रभ्वोर्विरुद्धा भजतां गतिः २ श्रीशुक उवाच
शिवः शक्तियुतः शश्वत्त्रिलिंगो गुणसंवृतः वैकारिकस्तैजसश्च तामसश्चेत्यहं त्रिधा ३ ततो वि
कारा अभवन्षोडशामीषु कंचन उपधावन्विभूतीनां सर्वासामश्नुते गतिं ४ ॥

रः ३ विकारा मन इंद्रियभूतरूपाः षोडशेति इंद्रियदेवानामभेदविवक्षया कंचनेति यत्किंचिद्विकारोपाधि
भजन्नुपाध्यनुपाध्यनुरूपाणां विभूतीनां स्वरूपं प्राप्नोतीति ४ ॥

उपद्रष्टा साक्षी सन् यतः सर्वं हि कर्म सर्वं पश्यति अतः प्रकृतेः परः इति अत एव तत्त्वं वस्तुतो गुणसंबंधं रूपद्रष्टृ
मिद्ध्यते तद्धर्मा योगायोगाभ्यां विविच्यते इति विविच्य गुणाः सत्त्वादयः शान्तघोरमूढाः स्वभावतः चलवि
स्वशिवानां च गुणानां यत्र स्वरूपेणं नातिभेदो भवेद्दोषगुणात्मैर्विद्वांसः सत्त्वस्य शान्त्यात्मनो जातविषादेविदे
प्रमूढत्वे रजस्तमोगुणाभ्यां तु भवंती चलत्वरूढयोः गुणयोः प्रमदेनाभूयः तद्देशानां च भिन्नता अतः समग्रदृश

दृशिर्दिनिर्गुणः साक्षात्पुरुषः प्रकृतेः परः स सर्वदृगुपद्रष्टा तं भजन् निर्गुणो भवेत् ॥ निद्रेने ष्ट
मेधेषु राजा पुष्कमयितामरः स्तृ भगवतो यत्तो न एकदिदमच्युते ९ ॥

त्वस्य विस्तरमोक्षकरी मतिः अंशांशतो भूति देवस्य प्रधानं हृम यो स्वतः अंशत स्तारतम्येन ब्रह्मरुद्रादि सेवि
तो विभूतयो भवत्यैव शन्ते मो तोप्यन्तेशतः इदमेकाभिप्रायेणतः वत्तवोच्यते श्रेयांसि तत्र खलु सत्त्वतनो नृ
णां स्युरिति तथा सत्त्वं पश्य प्रियमूर्तिरिति तथा अपाणां मेकभावानां योनपश्यति वे भिदामिति मतेमय्यच्यु
ते तेपि भिदामन्वापिचते नेत्यादि एवं सति न किंचित् स्वस्तं न मम तनद्भक्तानां तु कलदमावमिति ॥ २

१ यस्मादहमनुगृह्णामीत्यस्यार्थः यो विषयान्पश्यति निर्दीवुरूपि कर्थं चिद्धियमानेष्वसज्जते क्लिश्यति च त
स्य विषयापहार एवानुग्रह इति तथा श्रुतत्वेभृवादीनामैश्वर्यं विरोधात् अथवा प्रथमविभूतीः कामनानुरू
पाः दत्वा पश्चाद्विषयभोगावसाने तस्य निर्वेदमुत्पाद्य हरिश्चाम्यपरमानुग्रहं कर्त्तुमिति तदुक्तं भगवतैव तत्र

स प्राह भगवान्प्रीतः शुश्रूषवे प्रभुः नृणां निःश्रेयसार्थाय योऽवतीर्णो यदोः कुले ७ श्रीभग
वानुवाच यस्यादहमनुगृह्णामि हरिष्ये तद्धनं शनैः ततोऽधनं त्यजन्त्यस्य स्वजना दुःखदुःखितम् ८
स यदा वितथोद्योगो निर्विण्णः स्याद्धनेहया मत्परैः कृतमैत्रस्य करिष्ये मदनुग्रहं ९ तद्ब्रह्म परमं सू
क्ष्मं चिन्मात्रं सदनन्तकं अतो मां सुदुराराध्यं हित्वान्यान्भजते जनः १० ततस्त आशुतोषेभ्यो लब्धराज्य
श्रियोद्धताः मत्ताः प्रमत्ता वरदान्विस्मयन्त्यवजानते ११ ऋषिरुवाच शापप्रसादयोरीशा ब्रह्मवि
ष्णुशिवादयः सद्यः शापप्रसादोऽङ्ग शिवो ब्रह्मा न चाच्युतः १२

मध्यावेशितधियां कामः कामाय कल्पत इति दुःखदुःखितमिव प्रतीयमानमित्यर्थः ८ स पुनर्वेधूना
मायहेण धनेहया प्रवृत्तोऽपि मदनुग्रहेण यदा विफलोद्योगो निर्विण्णः स्यात्तदा मदनुग्रहमिति मत्परास्साधा
रणमनुग्रहं ९ तमेवाह तद्ब्रह्मेति ततः पश्चादपि मोक्षमरोचयन् अयोर्ध्वा सन्तोऽन्यानाश्रयन्तीत्यर्थः १० ११ एतदेव

श्री
भाग
उत्त
१५४

१२ शाकुनेः पुत्रः १४ १५ स संकटं कैलासमात्मनं पुरपालनं च १६ स मां सेवन्त ह्रक्षत्रिति १७ अहं स्वक्ते तमुपतः
१८ मूर्तिमानग्निरिव देदीप्यमानः वयमप्यनाय थाकं चितुः खेन दत्त कामं वारयामः न दद्दिति स चोपस्कृताकृ

अत्रैवोदाहरंतीममितिहासं पुरातनं वृकासुराय गिरिशो वरं दत्वाप संकटं १४ वृको नामासुरः पुत्रः
शकुनेः पथि नारदं दृष्ट्वाशुतोषं पप्रच्छ देवेषु त्रिषु दुर्मतिः १५ स आह देवं गिरिशमुपधावाशु सिध्यसि
योल्पाभ्यां गुणदोषाभ्यामाशु तुष्यति कुप्यति १६ दशास्यबाणयोस्तुष्टः स्तुवतोर्वंदिनोरिव ऐश्वर्य
मतुलं दत्वा तत आप स संकटं १७ इत्यादिष्टस्तमसुर उपाधावत्स्वगात्रतः केदार आत्मक्रव्येण जुह्वा
नोग्निमुखं हरम् १८ देवोपलब्धिमप्राप्य निर्वेदात्सप्तमेहनि शिरोवृश्चत्सुधितिना तत्तीर्थक्लिन्न
मूर्धजं १९ तदा महाकारुणिकः स धूर्जटिर्यथा वयं चाग्निरिवोत्थितोनलात् निगृह्य दोर्भ्यां भुजयो
न्यवारयत्तत्स्पर्शनाद्भूय उपस्कृताकृतिः २० तमाह चांगालमलं वृणीष्व मे यथाभिकामं वितरामि ते
वरं प्रीयेय तोयेन नृणां प्रपद्यतामहो त्वयात्मा भृशमर्द्यते वृथा २१ देवं स वव्रे पापीयान्वरं भूतभयाव
हं यस्य यस्य करं शीर्ष्णि धास्ये स म्रियतामिति २२

तिः परिपूर्णदेहोभवत् न्यवारयच्च १९ एवमादेव यतो येन केनापि भजनांशी ततः स्यां तयानदे दोहृथापी।

श्रीहरिः
१५४

दातमनर्हमपिदन्नवान्सर्वोयतीरमिव २२ २३ उपसृष्टः प्रवृगतः उद्गाद्ब्रवयावत उदयन्नतः २४ वैकुं
ठनहीपम २५ २६ तथातातृग्व्यसतेयस्तं व्यजितार्दनोरुः खदृतो हरतएवदृष्ट्वा मेखलादिभिरूपल।

तच्छ्रुत्वा भगवान्रुद्रो दुर्मना इव भारत उमितिशब्दसंसक्तमिदं देहेरमृतं यथा २५ इत्युक्तः सोसुरो नूनं
गौरीहरणलालसः सतद्वरपरीक्षार्थं शंभोर्मूर्धि किलासुरः स्वहस्तं धातुमारेभे सोबिभ्यत्स्वकृता
च्छिवः २२ तेनोपसृष्टः संत्रस्तः पलायावत्सवेपथुः यावदंतं दिवो भूमेः काष्ठानामुदगादुदक् २४
अजानंतः प्रतिविधिं तूष्णीमासन्सुरेश्वराः ततो वैकुंठमगमद्भास्वरं तमसः परं २५ यत्र नारायणः
साक्षान्न्यासिनां परमागतिः शांतानां न्यस्तदंडानां यतो नावर्तते गतः २६ तं तथा व्यसनं दृष्ट्वा भगा
वान्वृजिनार्दनः दूरात्प्रत्युदियाद्भूत्वा वटुको योगमायया २७ मेखलाजिनदंडाक्षैस्तेजसाग्निरिव।
ज्वलन् अभिवादयामास च तं कुशपाणिर्विनीतवत् २८ श्रीभगवानुवाच शाकुनेय भवान्व्यक्तं।
श्रांतः किं दूरमागतः क्षणं विश्रम्यतां पुंस आत्मायं सर्वकामधुक् २९ ॥

ऽतितोयं प्रसद्य तान्समन्वमागतः २२ २८ व्यक्तं निष्पितं किं किमर्थं आत्मादेवः सर्वपुरुषार्थदेतः प्रनोमा
पीडयेति २९ ॥

श्री
भाग
३टी
१५५

प्रायशः पुंभिर्धृतैर्भवान्स्वार्थान्समीहते स्वार्थयितुमिच्छति २९।३०।३१।३२। यद्यथावक्तावदिष्यति ३३ चित्रै।

यद्वि नः श्रवणायालं युष्मद्व्यवसितं विभो भण्यतां प्रायशः पुंभिर्धृतैः स्वार्थान्समीहते २९ सूत उ।
वाच एवं भगवता पृष्टो वचसामृतवर्षिणा गतक्लमोऽब्रवीत्तस्मै यथा पूर्वमनुष्ठितं ३० श्रीभगवानुवा
च एवं चेत्तर्हि तद्वाक्यं न वयं श्रद्दधीमहि यो दक्षशापात्पैशाच्यं प्राप्तः प्रेतपिशाचराट् यदि वस्तत्र
विश्रंभो दानवेंद्र जगद्गुरौ तर्ह्यंगाशु स्वशिरसि हस्तं न्यस्य प्रतीयतां ३२ यद्यसत्यं वचः शंभोः कथं
चिद्दानवर्षभ तदैनं जह्यसद्वाचं न यद्वक्तानृतं पुनः ३३ इत्थं भगवतश्चित्रैः वचोभिः स सुपेशलैः भि
न्नधीर्विस्मृतः शीर्ष्णि स्वहस्तं कुमतिर्न्यधात् ३४ अथापतद्भिन्नशिरा वज्राहत इव क्षणात् जयशब्दो नमः
शब्दः साधुशब्दोऽभवद्दिवि ३५ मुमुचुः पुष्पवर्षाणि हते पापे वृकासुरे देवर्षिपितृगंधर्वा मोचितः।
संकटाच्छिवः ३६ मुक्तं गिरिशमभ्याह भगवान्पुरुषोत्तमः अहो देव महादेव पापोयं स्वेन पाप्मना
३७ हतः को नु महत्स्वीश जंतुर्वै कृतकिल्बिषः क्षेमी स्यात्किमु विश्वेशे कृतागस्को जगद्गुरौ ३८

भीमकैः सुपेशलैरतिस्निग्धैः भिन्नधीर्भ्रांतिमतिः ३४।३५।३६।३७। किमु वक्तव्यं विश्वेशे तस्मिन्कृतागाः कृतापराधः।

१५५

अव्याकृतशापाद्द्वन्द्वतः वाङ्मनसागोचरशक्तिसमुद्रस्य गिरित्रमोक्षं शिवमोचनरूपं चरित्रं संसृतिमिलं नारूपचित्रैः ४० इति श्रीभावार्थदीपिकायां दशमस्कंधेऽष्टाशीतितमोऽध्यायः ८८ नवाशीतितमे देवः को।

य एवमव्याकृतशापाद्द्वन्द्वतः परस्य साक्षात्परमात्मनो हरेः गिरित्रमोक्षं कथयेच्छृणोति वा विमुच्यते संसृतिभिस्तथारिभिः ४० इति श्रीभागवते दशमस्कंधेऽष्टाशीतितमोऽध्यायः ८८ शुक उवाच सरस्वत्यास्तटे राजन्नृषयः सत्रमासत वितर्कः समभूत्तेषां त्रिष्वधीशेषु को महान् १ तस्य जिज्ञासया ते वै भृगुं ब्रह्मसुतं नृप तज्ज्ञप्त्यै प्रेषयामासुः सोऽभ्यगाद्ब्रह्मणः सभां २ न तस्मै प्रह्वणं स्तोत्रं चक्रे सत्वपरीक्षया तस्मै चुक्रोध भगवान्प्रज्वलन्स्वेन तेजसा ३ स आत्मन्युत्थितं मन्युमात्मजायात्मना प्रभुः अशीशमद्यथा वह्निं स्वयोन्या वारिणात्मभूः ४ ततः कैलासमगमत्स तं देवो महेश्वरः परिरब्धुं समारेभे उत्थाय भ्रातरं यथा ५

महानिति संशये परीक्षाविशेषात्तत्कर्षं मुनिभ्यो वर्णयन्भृगुः इतिहासांतरमाह । २ ३ स्वयोन्या स्वस्यैव रूपांतरेणाभिव्यक्तिस्थानेन स्वकार्येणात्मर्थः तेन यथा कश्चिद्वह्निं शामयति तथा स्वकार्येण पुत्रेणाभिमित्तेन क्रो।

श्री
भाग
उत्त
१५९

६ ७ ८ ९ १० ११ तीर्थकारिणा तीर्थनेमिनेन १२ १३ तन्मन्द्रया गम्भीरया गिरा तर्पितः तूष्णीं बभूवेति शेषः।

नैछत्त्वमस्युत्पथग इति देवश्चुकोप ह शूलमुद्यम्य तं हन्तुमारेभे तिग्मलोचनः ६ पतित्वा पादयोर्देवी
सान्त्वयामास तं गिरा अथो जगाम वैकुण्ठं यत्र देवो जनार्दनः ७ शयानं श्रिय उत्सङ्गे पदा वक्षस्यताडय
त् ततउत्थाय भगवान्सह लक्ष्म्या सतां गतिः ८ स्वतल्पादवरुह्याथ ननाम शिरसा मुनिं आह ते स्वा
गतं ब्रह्मन्निषीदात्रासने क्षणं ९ अजानतामागतान्वः क्षन्तुमर्हथ नः प्रभो अतीव कोमलौ तात चरणौ
ते महामुने १० इत्युक्त्वा विप्रचरणौ मर्दयन्स्वेन पाणिना पुनीहि सहलोकं मां लोकपालांश्च मद्ग
तान् ११ पादोदकेन भगवंस्तीर्थानां तीर्थकारिणा १२ अद्याहं भगवँल्लक्ष्म्या आसमेकान्तभाजनं व
त्स्यत्युरसि मे भूतिर्भवत्पादहतांहसः १३ शुक उवाच एवं ब्रुवति वैकुण्ठे भृगुस्तन्मन्द्रया गिरा निर्वृतस्त
र्पितस्तूष्णीं भक्त्युत्कण्ठोऽश्रुलोचनः १४ पुनः सत्रमाव्रज्य मुनीनां ब्रह्मवादिनां स्वानुभूतमशेषेण।
राजन्भृगुरवर्णयत् १५ तन्निशम्याथ मुनयो विस्मिता छिन्नसंशयाः भूयांसं श्रद्दधुर्विष्णुं यतः शान्ति
र्यतोऽभयं १६

घः १४ १५ विस्मिताः परापरनिरपेक्षेऽपि निर्विकारत्वेन भूयांसं श्रद्दधुः महत्त्वमेनं निश्चितवन्तः १६ ॥

१५९

यतो यस्मिन्वैराग्यं च तदन्वितं यमिति पाठे तज्ज्ञानं विष्णुमेव दृष्टुं विषयात्मकमाशङ्क्य ततोपि समानेत्याहा-
गतानां सार्थं वैराग्यं ततो विषयाणां मध्ये लवणादिव्यतिरेकेणापि वृत्तिः द्वितीयं यथाहुस्तावपि मनस्विरागः ।
शैथिल्येन वा बाह्येन्द्रियैरेव विषयसेवि[illegible]तोयं तत्राण्येहासीनेव[illegible] यथाहुः वैराग्यमाश्रयत मानसेन्तं ।

धर्मः साक्षाद्यतो ज्ञानं वैराग्यं च तदन्वितं । ऐश्वर्यं चाष्टधा यस्माद्यशश्चात्ममलापहं ॥ १७ ॥ मुनीनां न्यस्त-
दण्डानां शान्तानां समचेतसां । अकिंचनानां साधूनां यमाहुः परमां गतिं ॥ १८ ॥ सत्वं यस्य प्रिया मूर्तिर्ब्रा-
ह्मणास्त्विष्टदेवता । भजन्त्यनाशिषः शान्ता यं वा निपुणबुद्धयः ॥ १९ ॥ त्रिविधाकृतयस्तस्य राक्षसा अ-
सुराः सुराः । गुणिन्या मायया सृष्टाः सत्वं तत्तीर्थसाधनं ॥ २० ॥ शुक उवाच एवं सारस्वता विप्रा नृणां संश-
यनुत्तये । पुरुषस्य पदाम्भोजसेवया तद्गतिं गताः ॥ २१ ॥ सूत उवाच इत्येतन्मुनितनयास्यपद्मगन्धपीयूषं ।
भवभयभित्परस्य पुंसः सुश्लोकं श्रवणपुटैः पिबत्यभीक्ष्णं पान्थोऽध्वभ्रमणपरिश्रमं जहाति ॥ २२ ॥

कश्चिद्विरागो व्यतिरेकसंज्ञः पक्वैन्द्रियाणां[illegible]दिशामो ... तस्यापि भावस्त्ववशीकृतात्मेति १७ १८ १९ यस्म-
भगवत एव यद्यपि त्रिविधाकृतयः तथापि तन्मध्ये सत्वमेव तीर्थसाधनं पुरुषार्थहेतुः २० इत्थं निश्चिन्वन्सरस्वतीती-
र्थवासिनो विप्राः हरिसेवया मुक्तिं प्राप्ता इति २१ व्यासनन्दनस्य मुखपद्मादुद्गतं गन्धयुक्तं पीयूषं तत्त्वं हरेः प्रश-
स्तं यशो यः संसारी सेवते स मुक्तो भवतीति २२

स चोक्तलक्षणो भगवान्कृपयैव निदर्शयितुमाख्यानांतरमाह २३ २४ २५ २६ ब्रह्मद्विषस्तादिकां तां गाथां
वाक्यं मध्ये न कश्चिद्दोषः यतो राजदोषेण प्रजा म्रियंते यत्तिवारंवारं चुक्रोशेत्यर्थः २७ २८ किंस्विदिति किं

शुक उवाच एकदाद्वारवत्यां तु द्विजपत्न्याः कुमारकः जातमात्रो भुवं स्पृष्ट्वा ममार किल भारत २३ वि
प्रो गृहीत्वा मृतकं राजद्वार्युपधाय सः इदं प्रोवाच विलपन्नातुरो दीनमानसः २४ ब्रह्मद्विषः शठधियो
लुब्धस्य विषयात्मनः क्षत्रबंधोः कर्मदोषात्पंचत्वं मे गतोऽर्भकः २५ हिंसाविहारं नृपतिं दुःशीलमजि
तेंद्रियं प्रजा भजंत्यः सीदंति दरिद्रा नित्यदुःखिताः २६ एवं द्वितीयं विप्रर्षिस्तृतीयं त्वेवमेव च विसृज्य
स नृपद्वारि तां गाथां समगायत २७ तामर्जुन उपश्रुत्य कर्हिचित्केशवांतिके परेते नवमे बाले ब्राह्म
णं समभाषत २८ किंस्विद्ब्रह्मंस्त्वन्निवासे इह नास्ति धनुर्धरः राजन्यबंधुरेते वै ब्राह्मणाः सत्रमासते ।
२९ धनदारात्मजापृक्ता यत्र शोचंति ब्राह्मणाः ते वै राजन्यवेषेण नटा जीवंत्यसुंभराः ३० ॥

मर्थं वृथा रोदिषि यतस्त्वन्निवासे धनुर्धरमात्रोऽपि न तथैव पुरः पितामहि ब्राह्मणा पैतृकाः एतेन सत्रयागे इव
स्थिता ब्राह्मणा भवितुमर्हंतीत्यर्थः २९ तदेवाह धनादिभिरपृक्ता वियुक्ता यत्र येषु जीवत्सु शोचंति केव
लं जीविकां संपादयंति ३०

हतकल्मषः स्वयमग्निप्रवेशेन दैन्यलक्षणविलापश्रवणपातकान्मुक्तो भवेयमित्यर्थः अहं हतकल्मषश्चेदिति वा
३१ ३२ न श्रद्दध्महे न संप्रतीमः ३३ ३४ ३५ एवं श्रीछ्रिवादैर्विस्रंभितो विश्वासं प्रापितः निशामयन् स्मरन्नेव

अहं प्रजां वां भगवन् रक्षिष्ये दीनयोरिह अनिस्तीर्णप्रतिज्ञोऽग्निं प्रवेक्ष्ये हतकल्मषः ३१ ब्राह्मण उ
वाच संकर्षणो वासुदेवः प्रद्युम्नो धन्विनां वरः अनिरुद्धोऽप्रतिरथो न त्रातुं शक्नुवन्ति यत् ३२ तत्क
थं नु भवान् कर्म दुष्करं जगदीश्वरैः त्वं चिकीर्षसि बालिश्यात् तन्न श्रद्दध्महे वयं ३३ अर्जुन उवाच नाहं
संकर्षणो ब्रह्मन् न कृष्णः कार्ष्णिरेव च अहं वै फाल्गुनो नाम गाण्डीवं यस्य वै धनुः ३४ मावमंस्था मम ब्रह्मन्
वीर्यं त्र्यंबकतोषणं मृत्युं विजित्य प्रधने आनेष्ये ते प्रजाः प्रभो ३५ एवं विस्रंभितो विप्रः फाल्गुनेन
परंतप जगाम स्वगृहं प्रीतः पार्थवीर्यं निशामयन् ३६ प्रसूतिकाले संप्राप्ते भार्याया द्विजसत्तमः ।
पाहि पाहि प्रजां मृत्योरित्याहार्जुनमातुरः ३७ स उपस्पृश्य शुच्यंभो नमस्कृत्य महेश्वरं दिव्यान्यस्त्रा
णि च संस्मृत्य सज्यं गांडीवमाददे ३८ न्यरुणत् सूतिकागारं शरैर्नानास्त्रयोजितैः तिर्यगूर्ध्वमधः पा
र्थश्चकार शरपंजरं ३९

न. ३६ ३७ ब्राह्मणोपेतकत्वेन कृष्णावाज्ञायो महेश्वरेण मस्कृत्य ३८ न्यरुणत् आवृतवान् नदेवाहति
यंगूर्ध्वमिति ३९ ॥

श्री
भाग
दशी
१५८

प्रदर्शनमापेदे देहेनाविशिष्टस्तथा ४० ४१ ४२ ४३ ४४ ४५ अश्रुकोवारितः उपपन्निभिः प्रतिषेधं कुर्वता

ततः कुमारः संजातो विप्रपत्न्या रुदन्मुहुः सद्योऽदर्शनमापेदे सशरीरो विहायसा ४० तदाह विप्रो विजयं विनिन्दन्कृष्णसन्निधौ मौढ्यं पश्यत मे योऽहं श्रद्दधे क्लीबकत्थनं ४१ न प्रद्युम्नो नानिरुद्धो न रामो न च केशवः यस्य शेकुः परित्रातुं कोऽन्यस्तदविनेश्वरः ४२ धिगर्जुनं मृषावादं धिगात्मश्लाघिनो धनुः दैवोपसृष्टं यो मौढ्यादानिनीषति दुर्मतिः ४३ एवं शपति विप्रर्षौ विद्यामास्थाय फाल्गुनः ययौ संयमनीमाशु यत्रास्ते भगवान्यमः ४४ विप्रापत्यमचक्षाणस्तत ऐन्द्रीमगात्पुरीं आग्नेयीं नैरृतीं सौम्यां याम्यां वारुणीमथ रसातलं नाकपृष्ठं धिष्ण्यान्यन्यान्युदायुधः ४५ ततोऽलब्ध्वा द्विजसुतमनिस्तीर्णप्रतिश्रुतः अग्निं विविक्षुः कृष्णेन प्रत्युक्तः प्रतिषेधता ४६ दर्शये द्विजसूनूंस्ते मावज्ञात्मानमात्मना ये ते नः कीर्तिं विपुलां मनुष्याः स्थापयिष्यन्ति ४७ इति सम्भाष्य भगवानर्जुनेन सहेश्वरः दिव्यं स्वरथमास्थाय प्रतीचीं दिशमाविशत् ४८ ॥

४९ मावज्ञत्वं जानीहि ये ते नः एव मनुष्याः कीर्तिं स्थापयिष्यन्ति निश्चलां करिष्यन्ति पादान्तेऽरत्नं केशो भगाभयाद्वारान्तमिति ४७ ४८ ॥

१५८

सप्तसप्तसं स्थागिरयो ये च द्वीपेषु तान् ॥४९॥५०॥५१॥ कृतमितिकृतपरिणामितृणं नालोकाभावमात्रं ॥५२॥ चक्रा-
नुपथेन च क्रमनुगतस्तोरणेन तमः परं तस्मात्तमसः परे ह्येव वर्तमाने परं ज्योतिर्भातं ज्योतिः सप्तसप्तवातेषामुपाग्न ।
प्रसन्नीसूपगताडितालः श्रीविलाणीनेत्रेम्यमीलयद्विति ॥५३॥ एतेन तउच्छलं नोदृष्टं तोमहातल मेघोभूषणं यस्यतन न

सप्तद्वीपान्सप्तसिंधून्सप्तसप्तगिरीनथ लोकालोकं तथातीत्य विवेश सुमहत्तमः ॥४९॥ ततोऽश्वाः शैब्यसु-
ग्रीवमेघपुष्पबलाहकाः तमसि भ्रष्टगतयो बभूवुर्भरतर्षभ ॥५०॥ तान्दृष्ट्वा भगवान्कृष्णो महायोगेश्व-
रो हरिः सहस्रादित्यसंकाशं स्वचक्रं प्राहिणोत्प्रभुः ॥५१॥ तमः स घोरं गहनं कृतं सद्विधा रथद्रुतिन
रेणारोचिषा मनोजवैर्विविशे सदृशं तेनगुणाच्युतो तामसभीमं यथा चमूः ॥५२॥ द्वारेण चक्रानुपथेन
तत्तमः परं परं ज्योतिरनेन पारं सप्तसुवातं प्रसमीक्ष्य फाल्गुनः प्रताडितालोपि दृश्ये हि तेजोयुग्म ॥५३॥
ततः प्रविष्टः सलिलं नभस्वतावलीयसेजन्महद्दूर्मिभिभीषणं तत्राद्भुतं वै भवनं द्युमत्तमं भ्राजन्मणि ।
स्तंभसहस्रशोभितं ॥५४॥ तस्मिन्महाभीमममन्तमद्भुतं सहस्रमूर्धं स्फणामणिद्युतिभिः विभ्राजमानं ।
नेत्रद्विगुणोल्बणोल्बणं सिताचलाभं शितिकंठजिह्वं ॥५५॥

तत्सलिले भवनं महाकालपुरं द्युमत्तमं द्युतिमत्स्पष्टं ॥५४॥ सहस्रं मूर्ध्नि भवाः फणाः तासु मणयः तेषां द्युति-
भिः द्विसहस्रनेत्रं स्फटिकगिरिसंकाशं शितिकंठजिह्वं कंठाश्च जिह्वाश्च शातयो नीलाः कंठजिह्वा यस्य तं ॥५५॥

श्री
भाग
उ॰
५५२

तद्भोगसुखासनं तस्यानंतस्य भोगो देहः सुखकरमासनं यस्य तम ५४ महांतो मणिव्राता येषु तेषां किरीटकुंड-
लानां प्रभया परिक्षिप्ताः सर्वतः स्फुरंतः सहस्रपरिमिताः कुंतला यस्य तं ५५ कीर्त्यजया कीर्तिसहितयाऽजया।

ददर्श तद्भोगसुखासनं विभुं महानुभावं पुरुषोत्तमोत्तमं सांद्रांबुदाभं सुपिशंगवाससं प्रसन्नवक्त्रं कम-
लायतेक्षणं ५४ महामणिव्रातकिरीटकुंडलत्विषा परिक्षिप्तसहस्रकुंतलं प्रलंबचार्वष्टभुजं सकौ-
स्तुभं श्रीवत्सलक्ष्मं वनमालयावृतं ५५ सुनंदनंदप्रमुखैः स्वपार्षदैश्चक्रादिभिर्मूर्तिधरैर्निजायुधैः।
पुष्ट्या श्रिया कीर्त्यजयाखिलर्द्धिभिर्निषेव्यमाणं परमेष्ठिनां पतिं ५६ ववंद आत्मानमनंतमच्युतो जि-
ष्णुश्च तद्दर्शनजातसाध्वसः तावाह भूमा परमेष्ठिनां प्रभुर्बद्धांजली सस्मितमूर्जया गिरा ५७ द्विजात्मजा मे युवयोर्दिदृक्षुणा मयोपनीता भुवि धर्मगुप्तये कलावतीर्णाववनेर्भरासुरान्हत्वेह भूयस्त्वरयेतमं-
तिके ५८ पूर्णकामावपि युवां नरनारायणावृषी धर्ममाचरतां स्थित्यै ऋषभौ लोकसंग्रहं ५९ ॥

याऽखिलर्द्धिभिरणिमादिविभूतिभिर्मूर्तिधराभिः ५६ ऊर्जयाऽऊर्जितया ५७ मे कलावतीर्णाविति संबोध-
नं शीघ्रं मेंतिकं मत्सकाशं इतः प्रागाच्छतं ५८ इदं तु भारतयुद्धात्पूर्वमेव कृतमपि श्रेष्ठकथनप्रस्तावेनात्रोक्तम ५९
रामाय नमः ॥

६२ ६३ ६४ ६५ ६६ ६७ इतिश्रीभावार्थे दशमस्कंधे नवाशीतितमोऽध्यायः ८९ चरमेतुपुनःप्रोक्तोकृष्णस्य

इत्यादिष्टौभगवतातौकृष्णौपरमेष्ठिना ओमित्यानम्यभूमानमादायद्विजदारकान् ६२ न्यवर्ततांस्व
कंधामसंप्रहृष्टौयथागतं विप्रायददतुःपुत्रान्यथारूपंतथावयः ६३ निशाम्यवैष्णवंधामपार्थःपर
मविस्मितः यत्किंचित्पौरुषंपुंसांमेनेकृष्णानुकंपितं ६४ इतीदृशान्यनेकानिवीर्याणीहप्रदर्श
यन् बुभुजेविषयान्ग्राम्यानीजेचात्यूर्जितैर्मखैः ६५ प्रववर्षाखिलान्कामान्प्रजासुब्राह्मणादिषु
यथाकालंयथैवेंद्रोभगवान्श्रैष्ठ्यमास्थितः ६६ हत्वानृपानधर्मिष्ठान्घातयित्वार्जुनादिभिः अंज
सावर्तयामासधर्मंधर्मसुतादिभिः ६७ इतिश्रीभागवतेमहापुराणेदशमस्कंधेनवाशीतितमोऽध्या
यः ८९ शुकउवाच सुखंस्वपुर्यांनिवसन्द्वारकायांश्रियःपतिः सर्वसंपत्समृद्धायांजुष्टायांवृष्णिपुं
गवैः १ स्त्रीभिश्चोत्तमवेषाभिर्नवयौवनकांतिभिः कंदुकादिभिर्हर्म्येषुक्रीडंतीभिस्तडिद्द्युभिः २

लीलाःसमासतःयदुवंशप्रसंगेनानामानंत्यंसवकारणंश्रीकृष्णस्यविभूतिंसमासेनदर्शयति सर्वसंपद्भिः
समृद्धायांविशिष्टायां १ २

श्री
भाग
दटी
९०

३ ४ श्रियः षोडशसहस्रपत्नीनामेकवल्लभः सन् तासां गेहेषु रेमे इत्यन्वयः ५ गेहविशेषणं प्रोत्फुल्लेति ६
तथा ह्रदिनीषु अंभो विगाह्य विजहार महानुदयो वैभवं यस्य सः योषितां कुचकुंकुमैर्लिप्तांगः यतस्ताभिः परि।

नित्यं संकुलमार्गायां मदच्युद्भिर्मतंगजैः स्वलंकृतैर्भटैरश्वै रथैश्च कनकोज्वलैः २ उद्यानोपवनाढ्या।
यां पुष्पितद्रुमराजिषु निर्विशद्भृंगविहगैर्नादितायां समंततः ३ रेमे षोडशसाहस्रपत्नीनामेकवल्ल।
भः तावद्विचित्ररूपोसौ तद्गेहेषु महर्द्धिषु ४ प्रोत्फुल्लोत्पलकल्हारकुमुदांभोजरेणुभिः वासितामल।
तोयेषु कूजद्द्विजकुलेषु च ५ विजहार विगाह्यांभो ह्रदिनीषु महोदयः कुचकुंकुमलिप्तांगः परिरब्धश्च
योषितां ६ उपगीयमानो गंधर्वैर्मृदंगपणवानकान् वादयद्भिर्मुदा वीणां सूतमागधवंदिभिः ७ सि
च्यमानोच्युतस्ताभिर्हसंतीभिः स्म रेचकैः प्रतिसिंचन्विचिक्रीडे यक्षीभिर्यक्षराडिव ८ ताः क्लिन्नवस्त्रविवृ
तोरुकुचप्रदेशाः सिंचंत्य उद्धृतबृहत्कबरप्रसूनाः कांतं स्म रेचकजिहीर्षयोपगूह्य जातस्मरोत्सवलस
द्वदना विरेजुः ९

रब्धः ७ सूतमागधवंदिभिश्चोपगीयमानः ८ ९ ताः क्लिन्नवस्त्राः अत एव विवृता ऊरू कुचप्रदेशाश्च यासां सिंचंत्यः उद्धृ
तानि विस्रस्तानि बृहत्कबरेभ्यः प्रसूनानि यासां ताः जातस्मरेण यदुत्सवः तेन लसंति वदनानि यासां ताः १०॥

९०

168

तासां ललनेभ्यः विषयित्वनकं कमासन्नपयस्सः क्रीडायाश्च भिषंगो लाभिनिवेशेन धुतः कंपितः कं नलहृदं दवं यो या
स्यसः ॥ ११ ॥ १२ मुकुंदैकधियः समाहितात्मवल्लभमधियः समः पुनस्तमेव शेवितः यः सः तदेवयथा भवति तथा पा
निवाक्यानि कृत्वः तानि मे मनो गदतः शृणु इत्यर्थः ॥ १४ ॥ ईश्वरः श्रीकृष्णः स पितित्वेन निद्रां भंगां कृत्वेनो विलपसि

कृष्णस्तत्र तल्लनविषयित्वनकं कमस्तत्क्रीडाभिषंगायुतकं नलहृदं दवं यः सिंचन्मुहुर्युवतिभिः प्रतिषिच्य।
मानो रेमे करेणुभिरिव भपतिः परीतः ॥ ११ ॥ नटानां नर्तकीनां च गीतवाद्योपबृंहितो क्रीडालेकारवा।
सांसिक्तं सोदात्तस्य चाश्रियः ॥ १२ ॥ कृष्णस्यैवं विहरतो गत्यालापेक्षितस्मितैः नर्मक्ष्वेलिपरिष्वंगैः स्त्रीणां।
किल हृता धियः ॥ १३ ॥ ऊचुर्मुकुंदैकधियो गिर उन्मत्तवज्जडम्। चिंतयंत्योरविंदाक्षं तानि मे गदतः शृणु ॥ १४ ॥
महिष्य ऊचुः कुररि विलपसि त्वं वीतनिद्रा न शेषे स्वपिति जगति रात्र्यामीश्वरो गुप्तबोधः वयमिव सखि।
कच्चिद्गाढनिर्भिन्नचेता नलिननयनहासोदारलीलेक्षितेन ॥ १५ ॥

न शेषे न स्वपिषि स्वपतामित्यर्थः अथवा नाथपराधस्तवापि यस्मात्त्वयैनाहुः नलिननयनस्य हासेन सहितं यद्दारय।
लीलेक्षितं तेन कश्चिद्गाढं निर्भिन्नचेतास्त्वमसि ॥ १५ ॥ ॥

श्री
भाग
उत्त
१६१

नक्रंशाचौग्रदष्टबंधुःसती गोरवीषि किंचनेतावत अपितु वयमिव स्पृहयसे १६ अलब्धनिद्रः महानिष्टुत सेक्रो
शसि किंचास्माभिः शामांदशां तमपिगतोसि अहोकष्टं यथा वयं संभोगेन मुकुंदापहृत कुचकुंकुमादिलांछ
नाः तथा त्वमप्यपहृत श्रीकौस्तुभादिलांछनो लक्ष्यसे १७ मुकुंदगादितानि रहस्यानि विस्मृत्य तदेक चिंतनया

नेत्रे निमीलयसि नक्रमदष्टबंधुःत्वंरोरवीषि करुणं वत चक्रवाकि दास्यं गता वयमिवाच्युतपादजुष्टां
किंवा स्रजं स्पृहयसे कबरेण वोढुं १६ भोभोः सदा निष्टनसे उदन्वन्नलब्धनिद्रोपिगतप्रजागरः किं
वा मुकुंदापहृतात्मलांछनः प्राप्तां दशां त्वं च गतो दुरत्ययां १७ त्वं यक्ष्मणा बलवतासि गृहीत इंदो
क्षीणस्तमो न निजदीधितिभिः क्षिणोषि कच्चिन्मुकुंदगदितानि यथा वयं त्वं विस्मृत्य भोः स्थगितगीरुपल
क्ष्यसे नः १८ किं त्वाचरितमस्माभिर्मलयानिल तेप्रियं गोविंदापांगनिर्भिन्ने हृदीरयसि नः स्मरम् १९
मेघ श्रीमंस्त्वमसि दयितो यादवेंद्रस्य नूनं श्रीवत्सांकं वयमिव भवान्ध्यायति प्रेमबद्धः अत्युत्कंठः शब
लहृदयोस्मद्विधो बाष्पधाराः स्मृत्वा स्मृत्वा विसृजसि मुहुर्दुःखदस्तत्प्रसंगः २०॥

कच्चित्त्वं हितपाषिवयमिवस्थगितगीः ननु वाक् देहेवा न स्तब्धेवोपलक्ष्यसे १६ अपि या वरणेविना स्मरो
दीरणेन व्याजनेन मलयानिलस्य तथा नु चितमित्यर्थः १९ अतनपादिदुन्ना सामायेन यादवेंद्रस्य नूनं दयि
तः स्यात्वमसि अतः भवांस्तं ध्यायति ध्यानलिंगान्याहुः अत्युत्कंठश्चादि अहो किमिति वयमिव न त्वमेकेन अन्यतो

भा० उ० १६१

हे कोकिल प्रियतमवाणस्य श्रीकृष्णस्य पदानीव पदानि शब्दान् त्वं भाषसे मृतान् संजीवयन्तीति तथा तथा गिरा।
वल्लितकंठ रमणीयकंठ मे कथय किं तव प्रियं करवाणीति ॥२१॥ हे ललितपवन त्वं न चलसि नवदलसि च अतो नूनं
महान्तमर्थं चिन्तयसि वनतटे अपि किं यथा वयं तत्त्वैर्विपन्नैः कामयामहे तथा त्वं स्ववनवल्लैः पुंगवो ढुंका।

प्रियतमवपदानि भाषसे मृतजीवककल्पानि या गिराः करवाणि किं मे यत् ते प्रियं वद मे वल्लितकंठ कोकि
ल २१ न चलसि नवदलस्य दारवृन्दे ललितपवन चिन्तयसे महान्तमर्थं अपि वनतटे वनेद्र नाम्नि वयमिव।
कामयसे तत्त्वैर्विपन्नैः २२ पुष्पवृन्दाः कर्षिता नवनीतसिंधुपत्न्याः संप्रत्यपास्तकमलश्रियः पदभर्तुः।
न तव हृदयं यदुपतेः प्रणयावलोकमप्राप्य मधुहृदयाः पुष्पकर्षिताः स्म २३

मयेमे ऽभिमिति चेन्नहि त्वं तत्त्वशोभवसीति भावः २२ भोः सिंधुपत्न्यो नद्यः संप्रति यूयं सिंधुर्मे च पुनरमृत
तृष्णाशुष्का ज्ञातं दयति वनाद्दोकत्वं अतः पुष्पनोद्भवा यासां ताः अपगतकमलशोभाः कृशाश्च वयं यथा
प्रियतमस्य भर्तुर्मे यदुपतेः स्मप्रसिद्धं २३ ॥

श्री
भाग
१०टी
१६२

ततो वागतं दृष्टं हृतं कल्पयित्वाहुः नो स्मान्स्वनितंबाद्दासेयः कंचबलसौहृदः स्मरति स्मतैवमां प्रस्थापितवा
निति वेदतत्याहुः द्दतौ दृष्टत्वस्य हृतकस्माद्वयं तं भजामः अतो तर्हि तमिदालापयत्राकारय उग्रमिति याह
तत्पुनराहुः अस्मात्वं च पितापकाकिनी रमते स प्रियमिति तत्स्मृतेन तमेवालापय सावैकनिष्ठा कथं पतिर्ह
तं शाकयते इति वेदतत्याहुः स्त्रियः ज्ञाना वेकवचनं अस्मास्वस्तीषु मध्ये किं सैवैकनिष्ठा न तु वयमित्यर्थः पा

दृष्टस्यागतमास्यतां पिवप्यो वृद्धांगश्रीरेः कथां हृतं तां तवि[illegible]यामकश्चिदनितः स्वस्मां स्नउक्तं पु
रा किं वा तस्य बलसौहृदः स्मरतितं कस्माद्वनामोवयं तौ द्दालापयं कामदं प्रियमस्तं सैवैकनिष्ठाः
स्त्रियः २४ शुक उवाच इति दृशेन भावेन कृष्णस्ये योगेश्वरेश्वरे क्रियमाणेन माधव्यो लेभिरे परमां
गतिं २५ श्रुतमात्रोपियः हीणंप्रसह्यात्कर्षते मनः उरुगायोरुगीतोवापश्यंतीनां कुतः पुनः २६

हांतरेव तौ दृष्टमयुतदृष्टमथुरमालाननमात्रेयस्यतं अकामदमरति प्रदं प्रियमृते कस्माद्वयं भजामः किंतस्यता
हृतास्मतीपुनः पुनः सैव भजत यतोस्मात्सृशोमानिन्यः स्त्रियः एकनिष्ठा एकैवस्वस्यमानसिद्धौ निष्ठा यासामि
ति २४ २५ श्रीकृष्णस्यैवंभूतो भावो नातिविचित्रमित्याह उरुभिर्गायैर्गीतैरुरुधा गीतो वा येः केश्चिदपि गीतै
र्यथा कथंचिदपि गीतो वेत्यर्थः २६ ॥

२१ पदेस्थाने २८ २९ रुक्मिणीप्रमुखाह्यष्टावुदाहृताः ३० एवमष्टोत्तरशताधिकषोडशसहस्रमहिषी।
णांपुत्राणकलत्रमशीतिसहस्रैकषष्टिसहस्राणिभवंति ३१ ३२ प्रतिकृष्णेति ततःपुत्राणांमध्येसमदशैव॥

याःसंपर्यचरन्प्रेमणापादसंवाहनादिभिः जगद्गुरुंभर्तृबुद्ध्यातासांकिंवर्ण्यतेतपः २७ एवंवेदोदितंक
र्मत्यनुतिष्ठन्सतांगतिः गृहंधर्मार्थकामानांमुहुश्चादर्शयत्पदं २८ आस्थितस्यपरंधर्मंकृष्णस्यगृहमे
धिनां आसन्षोडशसाहस्रंमहिष्यश्चशताधिकाः २९ तासांस्त्रीरत्नभूतानामष्टौयाःप्रागुदाहृताः रु।
क्मिणीप्रमुखाराजंस्तत्पुत्राश्चानुपूर्वशः ३० एकैकस्यांदशदशकृष्णोऽजीजनदात्मजान् यावत्यआ।
त्मनोभार्याअमोघगतीश्वरः ३१ तेषामुद्दामवीर्याणामष्टादशमहारथाः आसन्नुदारयशसस्तेषांना।
मानिमेशृणु ३२ प्रद्युम्नश्चानिरुद्धश्चदीप्तिमान्भानुरेवच सांबोमधुर्बृहद्भानुश्चित्रभानुर्वृकोऽरुणः ३३
पुष्करोवेदबाहुश्चश्रुतदेवःसुनंदनः चित्रबाहुर्विरूपश्चकविर्न्यग्रोधएवच ३४

याःअथवानिरुद्धनामापिपुत्रएवकश्चित् ३३ ३४ ॥

३५ ३६ ३७ ३८ ३९ ४० सहस्राणामपरिमितानां कुमाराणां मितत्वाय यदा प्रत्येकं बहूनध्यापयन्तामाचार्याः।
णामियं संख्या न तदपि श्रुतिमात्रेण न तु सम्यग्ज्ञाताय तेन तदा कुमाराणामेव संख्या कर्तुं न शक्यते कुतः पुनः सर्वयाद-

एतेषामपि राजेन्द्र तनुजानां मधुद्विषः प्रद्युम्न आसीत्प्रथमः पितृवद्रुक्मिणीसुतः ३४ स रुक्मिणो दुहि-
तरमुपयेमे महारथः तस्मात्सुतोऽनिरुद्धोऽभून्नागायुतबलान्वितः ३५ स चापि रुक्मिणः पौत्रीं दौहित्रो
जगृहे ततः वज्रस्तस्याभवद्यस्तु मौसलादवशेषितः ३६ प्रतिबाहुरभूत्तस्मात्सुबाहुस्तस्य चात्मजः सु-
बाहोः शान्तसेनोऽभूच्छतसेनस्तु तत्सुतः ३७ न ह्येतस्मिन्कुले जाता अधना अबहुप्रजाः अल्पायुषोऽ-
ल्पवीर्याश्च अब्रह्मण्याश्च जज्ञिरे ३८ यदुवंशप्रसूतानां पुंसां विख्यातकर्मणां संख्यानं शक्यते कर्तुम-
पि वर्षायुतैरपि ४० तिस्रः कोट्यः सहस्राणामष्टाशीतिशतानि च आसन्यदुकुलाचार्याः कुमाराणा-
मिति श्रुतिः ४१ संख्यानं यादवानां कः करिष्यति महात्मनां यत्रायुतानामयुतलक्षेणास्ते स आहुकः
४२ देवासुराहवहता दैतेया ये सुदारुणाः ते चोत्पन्ना मनुष्येषु प्रजा दृप्ता बबाधिरे ४३ तन्निग्रहाय ह-
रिणा प्रोक्ता देवा यदोः कुले अवतीर्णाः कुलशतं तेषामेकाधिकं नृप ४४ ॥

वानामिति ४१ ४२ ते चोत्पन्ना इति प्रत्येकं बहुभी रूपैरिति ज्ञातव्यम् ४३ एवमपि यदुकुलेऽपि देवा इति तथा चोक्तं
सहस्रशः समुद्भूता देवा यदुकुले त्वयि इति ४४ ॥

४४ ४५ ४६ तस्मात्कृष्णकीर्तेः सर्वोत्तमत्वं कृष्णस्य सर्वदेवोत्तमत्वेन विचित्रमित्याह तीर्थमिति इतः पूर्वं।
स्वःसरिदेव सर्वतोऽधिकं तीर्थमित्यासीत् इदानीं यदुषु यदजनि जातं श्रीकृष्णकीर्तिरूपं यतः स्वःसरिदपि यत्पाद
शौचं तीर्थं नृपोनं न्यूनं चक्रे स्वयमेव सर्वतीर्थोपरि विराजते इत्यर्थः श्रीकृष्णस्य विद्विषः स्निग्धाश्च तत्सायुज्यं
प्रापुरिति अपि न चित्रं तस्य परमकारुणिकत्वात् तथा च इदं न चित्रं किं तत् अजिताः केचिदप्यप्राप्या परा सर्वतः परि

तेषां प्रमाणो भगवान्प्रभुत्वेनाभवद्धरिः ये चानुवर्तिनस्तस्य ववृधुः सर्वयादवाः ४५ शय्यासनाटना।
लापक्रीडास्नानाशनादिषु न विदुः सन्तमात्मानं वृष्णयः कृष्णचेतसः ४६ तीर्थं चक्रे नृपोनं यदज।
नि यदुषु स्वःसरित्पादशौचं विद्विट्स्निग्धाः स्वरूपं ययुरजितपरा श्रीर्यदर्थेऽन्ययत्नः यन्नामामंगल।
घ्नं श्रुतमथ गदितं यत्कृतो गोत्रधर्मः कृष्णस्यैतन्न चित्रं क्षितिभरहरणं कालचक्रायुधस्य ४७

पूर्णा श्रीः कृष्णस्यैव नान्यस्येति तदेवाह यदर्थमन्येषां ब्रह्मादीनां यत्न इति तन्निरपेक्षं तमेव लक्ष्मीः अय।
ते इति विचित्रमेवेति चेत् नहि परममंगलनामधेयत्वात् तदेवाह यन्नामेति तदपि नानुस्मरणापेक्षमित्या।
ह श्रुतमनुगदितमिति सर्वधर्माश्रयत्वादपीत्याह यत्कृतो गोत्रधर्म इति गोत्रेषु वृष्णिवंशेषु धर्मो यत्कृतः
येन प्रवर्तितः तस्य क्षितिभरहरणं न चित्रमित्याह कृष्णस्यैतदिति कालचक्रायुधस्येति सर्वसंहारकालस्य
नेः विशेषतो दुरंतप्रभावचक्रायुधस्य किं पदेन तदित्यर्थः ४७॥

श्री
भाग
दशी
१६४

164

यएवंभूतःश्लोकस्यः अतःसएवसर्वोत्तमस्तस्मात् जनानांजीवानांयोनिवासआश्रयः तेषुनिवसन्अंतर्यामित
यातथासत्क्रमोजयति देवक्यांजन्मेतिवादमात्रंयस्यसः यदुवराःपरिषत्सभासेवकरूपायस्य स्वकामात्रेणानि
रसनसमर्थोपिक्रीडार्थंदोर्भिरधर्ममस्यतिपन् स्थिरचरवृजिनघ्नः अधिकारिविशेषानपेक्षकत्वेन अतएवा

जयतिजननिवासोदेवकीजन्मवादोयदुवरपरिष
त्स्वैर्दोर्भिरस्यन्नधर्मं स्थिरचरवृजिनघ्नःसुस्मितश्री
मुखेनव्रजपुरवनितानांवर्धयन्कामदेवं ४८

वृंदावनतरुलतादीनांसंसारदुःखहर्त्ता तथाविलासवैदग्ध्यानपेक्षंव्रजवनितानांपुरवनितानांचसुस्मि
तेनश्रीमतामुखेनैवकामदेवंवर्धयन् काम्यतेइतिकामस्यासौदीव्यतिविजिगीषतिसंसारमितिदेवस्त
ं भोगद्वारामोक्षप्रदमित्यर्थः ४८

तत्कार्यविशेषैः स्वीकृतमत्स्यकूर्मादिनानामूर्तिविशेषस्ययदूत्तमस्यातः परमस्यतदनुरूपाण्यनुकारीणि।
कर्मकषणानिकर्माणियःशृणुयादित्यर्थः ४९ श्रीमत्याःकथायाःश्रवणकीर्तनयुक्तयाचिंतयासेवयै।
तयाः तुष्टात्तदेकनिष्ठत्वेनतस्यधामलोकमेति लोकत्वेपिकालाप्राकलितत्वमित्याह दुस्तरेति दुर्लभ।

इत्थंपरस्यनिजवर्त्मरिरक्षयात्तलीलातनोस्तदनुरूपविडंबनानि कर्माणि।
कर्मकषणानियदूत्तमस्यश्रूयादमुष्यपदयोरनुवृत्तिमिछन् ४९ मर्त्यस्तया
नुसवमेधितयामुकुंदश्रीमत्कथाश्रवणकीर्तनचिंतयैति तद्धामदुस्तरकृ।
तांतजवापवर्गंग्रामाद्वनंक्षितिभुजोपिययुर्यदर्थाः ५० इतिश्रीभागवतेमहा
पुराणेदशमस्कंधेनवतितमोध्यायः ९० ॥

पुरुषार्थत्वमाहग्रामादिति ५० इतिश्रीभावार्थदीपिकायांदशमस्कंधेनवतितमोध्यायः ९० समाप्तश्चा
यंश्रीदशमस्कंधः शुभमस्तुसर्वजगतां ॥

165

नृशंसं क्रूरं हे दुरवग्रह स्वच्छंद तव पादमूलं भक्ताः सेवितवतीरस्मान् भजस्व मा त्यजेति ॥ ३१ ॥ अपि च यदुक्तं भर्तुः
शुश्रूषणं स्त्रीणां परो धर्म इत्यादि तत्राहुः यत्पत्यपत्येत्यादि त्वया धर्मविदेति सोपहासं एवमेतत् उपदेशानामुपदेष्टवि-
धेयत्वण्येवास्तु उपदेशपदे त्वयीशे इति हेतुः ईशा इति विविदिषावाक्येन सर्वोपदेशानामीशपरत्वावगमादिति भा-
वः ईशत्वे हेतुः आत्मा किल भवानिति भोगस्य सर्वस्य भोक्ता आत्मैवेशा इति अतः श्रेष्ठो बंधुश्च भवानिति ।
सर्वे बंधुप्रकरणीयत्वय्येवास्तित्यर्थः अथवा धर्मोपदेशानोपदेस्थाने उपदेशपदे धर्मोपदेशदृष्टरि त्वयि ।

गोप्यऊचुः मैवं विभोर्हति भवान्गदितुं नृशंसं संत्यज्य सर्वविषयांस्तव पादमूले भक्ता भजस्व दुर-
वग्रह मा त्यजास्मान् देवो यथादिपुरुषो भजते मुमुक्षून् ॥ ३१ ॥ यत्पत्यपत्यसुहृदामनुवृत्तिरंग स्त्री-
णां स्वधर्म इति धर्मविदा त्वयोक्तं अस्त्वेवमेतदुपदेशपदे त्वयीशे प्रेष्ठो भवांस्तनुभृतां किल बंधुरा-
त्मा ॥ ३२ ॥

सति अस्माकं च धर्मे निवृत्तास्मानासहसतीषु त्वया धर्मविदा यदुक्तं एवमेतदस्तु न त्वं धर्मोप-
देष्टा किं तु भवानात्मेति अथवा यदुक्तं एतदुपदेशपदे तज्ज्ञोचरे शुरुषेस्तु नाम त्वयि तु ईशे स्वामिनि सति
एवं काक्वान्ते वा इत्यर्थः यतस्तनुभृतां त्वमात्मा स्वरूपमिति यद्वा यदुक्तं पत्यादिशुश्रूषणं धर्म इति एव-
मेतत्त्वय्येवास्तु कुतः उपदेशपदे शुश्रूषणीयत्वेनोपदिश्यमानानां पत्यादीनामुपदेश्यपदत्वात् कुतः ईशेन
हीश्वरसंधिष्ठानं विना कोऽपि पत्यादिर्नामास्तीति अन्यत्समानमलमतिविस्तरेण ॥ ३२ ॥

123

एतत्सदाचारेण गृह्यते यः प्रार्थयति कुर्वन्तीति कुशलाः शास्त्रनिपुणाः त्वयि रतिं कुर्वन्ति तथाच शास्त्रं किं
प्रजया करिष्यामो येषां नोऽयमात्मा लोक इत्यादि २२ किंच प्रतियातेति यदुक्तं तदेशाकयं त्वया विना दीनाम
यदुत तत्रत्याः विशन्तीति यदस्माकं विना मत्तावन्तं कालं सुखेन गृहेषु निविशन्ति अधितिष्ठन्ति तत्र तथापा
स्तनं कपात्र पिपीशो गृहदुकूलानि निर्विशन्तस्तावपि तथा पदलौ सुखेन सत्त्वात्मना नयन्ति वा २४ अतो गेहेषु।

कुर्वन्ति हि त्वयि रतिं कुशलाः स्व आत्मन्नित्यप्रिये पतिसुतादिभिरार्तिदैः किं तन्नः प्रसीद वरदेश्वर मा
स्म छिंद्या आशां धृतां त्वयि चिरादरविंदनेत्र २३ चित्तं सुखेन भवतापहृतं गृहेषु यन्निर्विशत्युत करा
वपि गृह्यकृत्ये पादौ पदं न चलतस्तव पादमूलाद्यामः कथं व्रजमथो करवाम किं वा २४ सिंचां
ग नस्त्वदधरामृतपूरकेण हासावलोककलगीतजहृच्छयाग्निं नोचेद्वयं विरहजाग्न्युपयुक्तदेहा
ध्यानेन याम पदयोः पदवीं सखे ते २५

स्म मः अस्माकं तव अधरामृतपूरकेण तवैव हासेन हसितेन अवलोकितेन कलगीतेन च जातो यो हृ
च्छयाग्निः कामाग्निस्तं सिंच नोचेद्यत्तावत एकोऽग्निः तथापि तव विरहाग्निनि ध्यानेयोग्निसेन च उपयुक्तदेहाद्य
शरीरा योगिन इव तेन तव पदवीमंतिकं ध्यानेन याम प्राप्नुम २५

नवरूपनीनेवोपगच्छत नयवैनमग्निं सिंचेयुरिति चेत्तन्नाहः यदीति हे कृशांगि हि नाहं दम्भेन नवपादन्तलमस्या
त्मस्पृहवस्मोवयं तन्मभृतिनहि नादाम्भ्यामस्यसमत्वस्यात्वमपिनपारयामो न शक्नुमः कथंभूतं नवपादन
लमरमायाः लक्ष्म्याः दनदाणां दैनान्नवंदनवस्रवा नदोपक्कविदेवनसर्वदा अरुण्यजनाः प्रियायस्यवात
स्यव अरुण्यजनप्रियत्वाद्दाण्येक्कविदपि यद्धिकाम्यायम्याद्वशेन अस्मात्त्वस्पृहवस्योवयं नत्वनवयाश्रभि
रमितामाथ्रानेदिताः समः नदारम्भ्यामसमत्वं स्यात्त्वमपिनपारयामः तच्छास्त्रेपनयोनरोचेनरतिभावः २९

यदीवृत्तात्वं नवपादनतलं रमायाद नदणांक्किविदरुण्यजनप्रियस्य अस्मादृतं तत्प्रभृतिनोम्यसमत्व
मंत्रः स्यातेव्वयाभिरमितावनपारयामः २९ श्रीयं स्मदोवृत्तरात्नं स्वकमेनलस्यालयापिवत्सिप
दंकिलभूमत्वं यस्याः स्ववीक्षणाकृते स्मरश्यामस्त्वद्धृदयं च नवपादरजः अपत्राः ३० नत्रःश।
मौदहनिनादनैनेच्छिमूलेशामाविसृज्य वसतोस्त्वडपाशनाशाः नत्सदरस्मितनिरीक्षणनीलका
मतमानमनापुरुषभूषणदेवदास ३१

नमाद सौभाग्यं ततिविज्ञमिमा हृः श्रीरिति श्रीलक्ष्मीः वत्सि
अस्मापत्नस्यानेलआपि तलस्यासपत्नासद नवपदांवुनरजः कामयतेस्म भूत्वेः सवैतं हमितिसो।
भाग्यातिरोकोक्तिः यस्याः लक्ष्म्याः स्ववीक्षणाकृतेश्रीराम्सानोखिलोकयवेनदर्थमम्यांत्रसादीनान
योभिः प्रयासः तदहंजस्त्वद्धृदयमपि प्रपन्नारति ३० देहनिनादेनतडः खदतः तडुपासतेनवद्जनपव प्राणा
यासांनाः वयं वसतीर्गृहाणि हन्यो गिनश्ववत्समीपं प्रापाः नवमदरांस्मितविहसितं नत्रिरीक्षणेनय

श्री भाग० पू० १२४

124

ननु गृहस्थानस्मान् विहाय ममदास्यं किमिति प्रार्थ्यते तत्राहुः वीक्ष्येति अलकावृतमुखं केशान्तैरावृतं मुखं
तथा कुण्डलयोः श्रीर्ययोः ते गण्डस्थले यस्मिंस्तत् अधरयोः सुधा यस्मिंस्तच्च तच्च तव मुखं वीक्ष्य दत्ताभयं भुजदण्ड
युगं च वक्षःस्थितया श्रिया एकमेव रमणं रतिजनकं तेषां द्वयं वीक्ष्य दास्य एव भवाम इति ३९ ननु नग।
स्मिन्नसौ धर्मस्मिस्मकं तत्राहुः का स्त्रीति अङ्ग हे कृष्ण कलानि पदानि यस्मिंस्तत् आयतं दीर्घं मूर्च्छितं स्व।

वीक्ष्यालकावृतमुखं तव कुण्डलश्रीगण्डस्थलाधरसुधं हसितावलोकं दत्ताभयं च भुजदण्डयुगं वि
लोक्य वक्षः श्रियैकरमणं च भवाम दास्यः ३९ का स्त्र्यङ्ग ते कलपदामृतवेणुगीतसंमोहितार्यच
रितान्न चलेत्त्रिलोक्यां त्रैलोक्यसौभगमिदं च निरीक्ष्य रूपं यद्गोद्विजद्रुममृगाः पुलकान्यबिभ्रन् ४०

ग्रामभेदस्तेन पाठान्तरे कलपदामृतमयं वेणुगीतं तेन संमोहिता का वा स्त्री आर्यचरितात् निजधर्मा।
न्न नीधर्मान्न चलेत् यन्मोहिताः पुरुषा अपि विचलिताः किं च त्रैलोक्यसौभगमिदं रूपं निरीक्ष्य स्थावरा योऽपि
हृष्टा अपि पतिता अपि द्रुमा अपि मृगादयोऽपि पुलकानि यत् बिभ्रत् अबिभ्रन् तथा अनेकशाखाप्रवणामात्रेण
पितावत् निजधर्मत्यागो युक्तः किं पुनः स्त्रीसदन्नभवेनेति भावः ४० ॥

१२४

व्यक्तं निश्चितं ४१ विक्रीडितं पारवश्यप्रलापितं गोपीरहसि रमतरमयामास ४२ प्रियस्वेदाणोनोल्कुल्लानि मुखो
निधासोताभिः उदारहासस्वहिताम्नतेषु कृतंदक्रस्समवहीपितिर्यस्यसः प्राणोकस्मद्भः ४३ ४४ ४५ वाहुप्रसारस्य

व्यक्तं भवान्व्रजजनार्तिहरोभिजातो देवो यथादिपुरुषः सुरलोकगोप्ता तन्नोनिधेहि करपंकजमार्तबंधो
तप्तस्तनेषु च शिरःसु च किंकरीणां ४१ शुक उवाच इतिविक्लवितं तासां श्रुत्वा योगेश्वरेश्वरः प्रहस्य स
दयं गोपीरात्मारामोप्यरीरमत ४२ ताभिः समेताभिरुदारचेष्टितः प्रियेक्षणोत्फुल्लमुखीभिरच्युतः।
उदारहासद्विजकुंददीधितिर्व्यरोचतैणांक इवोडुभिर्वृतः ४३ उपगीयमान उद्गायन्वनिताशतयूथपः
मालां बिभ्रद्वैजयंतीं विचरन्मंडयन्वने ४४ नद्याः पुलिनमाविश्य गोपीभिर्हिमवालुकं रेमे तत्तरला
नंदी कुमुदामोदवायुना ४५ बाहुप्रसारपरिरंभकरालकोरुनीवीस्तनालभननर्मनखाग्रपातैः क्ष्वे।
ल्यावलोकहसितैर्व्रजसुंदरीणामुत्तंभयन्रतिपतिं रमयांचकार ४६ एवं भगवतः कृष्णाल्लब्धमाना
महात्मनः आत्मानं मेनिरे स्त्रीणां मानिन्योभ्यधिकं भुवि ४७

परिरंभणकरादीनामालभनं स्पर्शस्तनमंपविदामस्तनाबाग्रपातस्तैः क्ष्वेल्याक्रीडया वस्त्रवलोकेर्हसितैस्त।
कामतामांपुष्टीपयन तारमयामास ४६ महात्मनो विस्मक विमानगंभीर विनादा ४७ ॥

तत्सौभगमदं सौभाग्येन मदं मत्स्वाधीनत्वाभिमानं मानं गर्वं च केशवः कश्च ईशश्च केशौ तौ वशयतीति तथा सः ४८
इति श्रीभावार्थे दशमस्कंधे एकोनत्रिंशोऽध्यायः २९ त्रिंशे विरहसंतप्तगोपीभिः कृष्णमार्गणं उन्मत्तवद्वनि
यत्तद्भ्रमंतीभिर्वने वने प्रपञ्च्यते १ गत्या च अनुरागेण स्मितेन च नाभ्यां विभ्रमेक्षितैर्नानाविधविलासैरि
ईक्षितानि तैश्च मनोरमा आलापाश्च विहाराः क्रीडाश्च विक्रमो गमनं च विभ्रमाश्च अन्ये विलासाः तैश्च रमापतेर्ग

तासां तत्सौभगमदं वीक्ष्य मानं च केशवः प्रशमाय प्रसादाय तत्रैवांतरधीयत ४८ इति श्रीभागवते
महापुराणे दशमस्कंधे एकोनत्रिंशोऽध्यायः २९ शुक उवाच अंतर्हिते भगवति सहसैव व्रजांगनाः
अतप्यंस्तमचक्षाणाः करिण्य इव यूथपं १ गत्यानुरागस्मितविभ्रमेक्षितैर्मनोरमालापविहारविभ्र
मैः आक्षिप्तचित्ताः प्रमदा रमापतेस्तास्ता विचेष्टा जगृहुस्तदात्मिकाः २ गतिस्मितप्रेक्षणभाषणादि
षु प्रियाः प्रियस्य प्रतिरूढमूर्तयः असावहं त्वित्यबलास्तदात्मिका न्यवेदिषुः कृष्णविहारविभ्रमाः ३

ताभिस्ताभिराक्षिप्तानि चित्तानि यासां ताः अत एव तदात्मिकाः यासां ताः तास्ता विविधाश्चेष्टा जगृहुः
तदनुकरणेनाक्रीडन् २ किंच गतिस्मितेति प्रियस्य गत्यादिषु प्रतिरूढा आविष्टा मूर्तयो यासां ताः अत
कृष्णविहारविभ्रमाः कृष्णस्येव विहारविभ्रमाः क्रीडाविलासाः यासां ताः अहमेव कृष्ण इति परस्परं निवेदि
तवत्यः ३ ॥

किंच गायंत्य इति संहता मिलिताः विचिक्युः मृगयांचक्रुः उन्मत्तकत्वमाह वनस्पतीन्पप्रच्छुः भूतेष्वंतरंम
ध्ये संतं पुरुषं वहिश्च संतमिति ४ नम्रपंचयोतलवभिः तत्र महत्वादेते पश्येयुरित्याशया प्रथममश्वत्थादीन पृच्छंति।
दृष्ट इति प्रेमहासविलासितैरवलोकनैर्नोस्माकं मनो हृत्वा कौरवगतः वः युष्माभिः किं दृष्ट इति ५ महांतः पु।
ष्पैः स्तैर्वहूपकारिणामेति कुरवकादीन पृच्छंति कच्चिदिति हे कुरवकादयः दर्पहरं स्मितं यस्य सः इतो गतः।

गायंत्य उच्चैरमुमेव संहता विचिक्युरुन्मत्तकवद्वनाद्वनं पप्रच्छुराकाशवदंतरं वहिर्भूतेषु संतं पुरुषं।
वनस्पतीन ४ दृष्टो वः कच्चिदश्वत्थ प्लक्ष न्यग्रोध नो मनः नंदसूनुर्गतो हृत्वा प्रेमहासावलोकनैः ५
कच्चित्कुरवकाशोकनागपुन्नागचम्पकाः रामानुजो मानिनीनां गतो दर्पहरस्मितः ६ कच्चित्तुलसि
कल्याणि गोविंदचरणप्रिये सह त्वालिकुलैर्विभ्रद्दृष्टस्तेति प्रियोच्युतः ७ मालत्यदर्शि वः कच्चिन्मल्लि
के जाति यूथिके प्रीतिं वो जनयन्यातः करस्पर्शेन माधवः ८

कच्चिद्दृष्ट इति ६ अलिकुलैः सह त्वां विभ्रत तवाति प्रियस्त्वया किं दृष्ट इति ७ गुणातिरेकेपि नम्रत्वादि।
माः पशोर्वुरिति पृच्छंति मालतीति हे मालि मल्लिके जाति यूथिके वः युष्माभिः किमदर्शि दृष्टः करस्पर्शेन वः
प्रीतिं जनयन किं यात इति अत्र मालतीनामाद्यवांतरविशेषाद्बहुत्वम् ८

श्री
भाग
टी
१२८

फलादिभिः सर्वप्राणिनां संतर्पकाः पतेषु पश्येयुरिति चूतादीन् पृच्छंति हे चूतादयः हे येऽन्ये च परार्थभविकाः प
रार्थमेव भवो जन्म येषां ते यमुनोपकूलाः तस्याः कूलसमीपवर्तमानाः तीर्थवासिनः इत्यर्थः ते भवंतः रा
हितात्मनां शून्यचेतसां नः कृष्णपदवीं कृष्णमार्गं शंसंतु कथयंतु ९ हे क्षिति क्षिते बत त्वया किं तपः कृतं वा
केशवांघ्रिस्पर्शोत्सवा केशवस्यांघ्रिस्पर्शनोत्सवो यस्यास्तया उत्तोंगरुहैरुत्पुलकिता रोमांचिता विभा

चूतप्रियालपनसासनकोविदारजंब्वर्कबिल्वबकुलाम्रकदंबनीपाः येऽन्ये परार्थभविका यमुनो
पकूलाः शंसंतु कृष्णपदवीं रहितात्मनां नः ९ किं ते कृतं क्षिति तपो बत केशवांघ्रिस्पर्शोत्सवोत्पु
लकितांगरुहैर्विभासि अप्यंघ्रिसंभव उरुक्रमविक्रमाद्वा आहो वराहवपुषः परिरंभणेन १०

सि शोभसे तत्र विशेषं पृच्छंति अपि किमयमुत्सवोऽङ्घ्रिसंभवोऽधुनातनैकदेशांघ्रिस्पर्शसंभूतः यद्वा तेना
वत किंतु उरुक्रमविक्रमात्पूर्वमेव त्रिविक्रमस्य पदा सर्वाक्रममाणात् अहो अथवा तेनावदेव अपि तु ।
ततोऽपि पूर्वं वराहस्य वपुषः परिरंभणेनेति अतस्त्वया नूनं दृष्टस्तं दर्शयेति १०

१२८

126

दृशोरेणाद्धिंप्रसरंतः प्रतिकूलस्पर्शनेसंभाव्याह अपीति हे सखि एणपत्नि अपि किमुपगतः समीपं गतः गात्रैः संदर्शैर्धवलवाहूद्धतिभिः प्रियया सहेति यद्वक्तं तत्र द्योतकं कांता या अंगसंगोद्भूतकुचकुंकुमेन रंजिताया: कुंदकुसुमस्रजो गंधः कुलपतेः श्रीकृष्णस्य वाति आगच्छति ॥ फलभरेणानतानां लक्ष्मणैर्वृक्षाणां प्रणतेः कृष्णस्य प्रणामानां इति मत्ताप्रियया सहितस्य गतिविलासं संभावयंतः पृच्छंति बाहुमिति तुलसिकाया अलिकुलैस्तदामोदमत्तान्वै

अप्येणपत्न्युपगतः प्रिययेह गात्रैस्तन्वन्दृशां सखि सुनिर्वृतिमच्युतो वः कांतांगसंगकुचकुंकुमरंजितायाः कुंदस्रजः कुलपतेरिह वाति गंधः ॥ बाहुं प्रियांस उपधाय गृहीतपद्मो रामानुजस्तुलसिकालिकुलैर्मदांधैः अन्वीयमान इह वस्तरवः प्रणामं किं वाभिनंदति चरन्प्रणयावलोकैः ॥१२॥ पृच्छतेमा लता बाहूनप्याश्लिष्टा वनस्पतेः नूनं तत्करजस्पृष्टा बिभ्रत्युत्पुलकान्यहो ॥१३॥ इत्युन्मत्तवचो गोप्यः कृष्णान्वेषणकातरा लीला भगवतस्तास्ता ह्यनुचक्रुस्तदात्मिकाः ॥१४॥

अन्वीयमानोऽनुगम्यमान इह चरन्निति ॥१२॥ काश्चिदाहुः हे सख्य इमा लताः कृष्णेन संगता नूनमत इमाः पृच्छत ना नु स्वपतिसंगतौ तत्संगतिं तु वृक्षा वनस्पतेः पत्युर्बाहूनाश्लिष्टा अपि अहो भाग्यं नूनं तन्नखैः स्पृष्टाः यतः उत्पुलका निबिभ्रति न हि स्वपतिसंगतौ ईदृक्पुलकसंभव इति भावः उन्मत्तकवत्पृच्छति सति स्वपंचिति ॥१३॥ इदानीं रमापते लीलाविचेष्टा जगृहुस्तदात्मिका इति यदुक्तं तत्प्रपंचयति इतीति उन्मत्तवचो गोप्य उन्मत्तवचस्वता गोप्यः कृष्ण

कस्याश्चिदित्यादिचतुर्भिः श्लोकैरनुकरणं प्रपञ्च्यते तत्तच्चतुर्भिर्लक्ष्यपत्वं प्रत्येकेनानुकरणमिति विवेकः पूतनायन्त्याः पूतनावदाचरन्त्याः कृष्णवदाचरन्ती काचित् स्तनमपिबत् तोकायित्वा तोकवदात्मानं कृत्वा शकटायन्तीं शकटवदाचरन्तीं पदाहन् ॥ १५ ॥ दैत्यायित्वा दैत्यवत्तृणावर्तवदात्मानं कृत्वा एका कृष्णार्भभावनां ।

कस्याश्चित्पूतनायन्त्याः कृष्णायन्त्यपिबत्स्तनं तोकायित्वा रुदत्यन्या पदाहन्शकटायतीं ॥ १५ ॥ दैत्यायित्वा जहारान्यामेकां कृष्णार्भभावनां रिङ्गयामास काप्यङ्घ्री कर्षन्ती घोषनिःस्वनैः ॥ १६ ॥ कृष्णरामायिते द्वे तु गोपायन्त्यश्च काश्चन वत्सायतीं हन्ति चान्या तत्रैका तु बकायतीं ॥ १७ ॥ आहूय दूरगा यद्वत्कृष्णस्तमनुकुर्वती वेणुं क्वणन्तीं क्रीडन्तीमन्याः शंसन्ति साध्विति ॥ १८ ॥ कस्याञ्चित्स्वभुजं न्यस्य चलन्त्याहापरा ननु कृष्णोऽहं पश्यत गतिं ललितामिति तन्मनाः ॥ १९ ॥ मा भैष्ट वातवर्षाभ्यां तत्त्राणं विहितं मया इत्युक्त्वैकेन हस्तेन यतन्त्युन्निदधेऽम्बरं ॥ २० ॥

कृष्णस्यार्भभावमर्भत्वं भावयति निनाय तामन्या जहार ॥ १६ ॥ १७ ॥ दूरगाः दूरे वर्तमाना गाः यद्वत् यथा कृष्णस्तथाऽऽहूय तं कृष्णमनुकुर्वती अनुवर्तिनी तामिति पाठः अन्याः साधु साध्विति प्रशंसन्ति ॥ १८ ॥ तस्मिन् श्रीकृष्णे मनो यासां ताः ॥ १९ ॥ यतन्ती प्रयत्नं कुर्वतीति उपवर्षं उन्नीय वस्त्रं उन्निदधे ऊर्ध्वं धृतवती ॥ २० ॥

२१ पिदधं निमीलयत २२ सद्दृक्षणनयनं आस्यं पिधाय सदृकृवणालीतिवा भीतिविडंववनं भयानुकरणं। भजे २३ एवं पुनरपि वृंदावने लतालतां सुख्य सेष्टं च्छेभ्यः वनोद्देशे वनप्रदेशे अवलतनु प्रपश्यत २४ २५ सु ष्टकानि संमिश्याणि २६ तेनकृसेन अंसेन्यस्तः प्रकोष्ठ यस्याः करेणोः हस्तिन्याः २७ सद्दृ:पकांतस्याने।

प्राकृतैकापदाक्रम्य शिरस्याहापयानप दुष्टाद्दे गच्छनातोद्दे खिलालोनवद्दंडधृत २१ तत्रैकोवाच हे गोपा दावाग्निं पश्यतोल्बणं वत्से आशु पिदध्वं वो वियास्ये तेमममेज्जसा २२ वद्दान्ययास्त्वनाकाविन्न वीतचापलूचले भीताद्दृक्रियया संभ्रमेणभीतिविडंवनं २३ एवं कृसे पृच्छमानावृंदावनलतास्त रूनं आचदतेन वनोद्देशे पदानि परमात्मनः २४ पदानि व्यक्तमेतानि नदस्नूनोर्महात्मनः लक्ष्यंते हि ध्वजांभोजवज्रांकुशयवादिभिः २५ तैस्तैः पदैस्तत्पदवीमन्विछन्त्योग्रतोवलाः वध्वाः पदैः सुपृक्तानि विलोक्यातः समब्रुवन् २६ कस्याः पदानि चैतानि यातायानंदसूनुना अंसेन्यस्तप्रकोष्ठायाः करेणोः करिणायथा २७ अनयाराधितोनूनंभगवान्हरिरीश्वरः यन्नोविहायगोविंदः प्रीतोयामनयद्रहः धन्याअहोअमीआल्योगोविंदांघ्र्यब्जरेणवः यान्ब्रह्मेशौरमादेवीदधुर्मूर्ध्न्यघनुत्तये २८

२९ हे आल्यः सख्यः अहो धन्याः अतिपुण्याः गोविंदांघ्र्यब्जरेणवः तच्चेदेवः यानिति अस्माभिरप्येतद्दृश्वभिषे।

श्री
भाग
दशमी
१२८

अन्याश्चाहुः तस्या इति गोपीनां सर्वस्वं अयं भावः यदि तस्याः पदानि संपृक्तानि न भवेयुः तानि लोठुः स्वं कुर्वती
ति ३१ तत्संपृक्तात् केवलं कुसुमपादत्वेनैव विविचन्ति तस्मात् दृष्ट्वाश्मरमन्त समन्तात् तदा हृष्टा शोकत्रयेण ला
लसन्त इति खिद्यन्ते सुजाते सुकुमारे अंघ्रितले यस्यास्तां उन्निन्ये स्कन्धमारोपितवान् ३० नवद्देतमाह इमानीति

तस्या अमूनि नः क्षोभं कुर्वन्त्युच्चैः पदानि यत् यैकापहृत्य गोपीनां रहो भुङ्क्तेऽच्युताधरं ३१ नालसंते
पदान्यत्र तस्या नूनं तृणांकुरैः खिद्यत्सुजातांघ्रितलामुन्निन्ये प्रेयसीं प्रियः ३२ इमान्यधिकमग्नानि प
दानि वहतो वधूं गोप्यः पश्यत कृष्णस्य भाराक्रान्तस्य कामिनः ३३ अत्रावरोपिता कान्ता पुष्पहेतोः
महात्मना अत्र प्रसूनावचयः प्रियार्थे प्रेयसा कृतः ३४ प्रपदाक्रमण एते पश्यतासकले पदे केश
प्रसादनं त्वत्र कामिन्याः कामिना कृतं तानि चूडयता कान्तामुपविष्टमिह ध्रुवं ३५

वि

अतिभारेण निमग्नानि ३२ ३३ प्रपदाभ्यां पदाग्राभ्यामाक्रमणं यो ताणी संमर्दनं ययोः अत एव असकले प।
दे पश्यतेति तस्याः कुसुमान्वेतृ उपविष्टायाश्चिह्नं दृष्ट्वाहुः केशप्रसादनमिति कान्तामधिकृत्य तानि
प्रसूनानि चूडयता चूडानुकारेण बध्नता इह ध्रुवमुपविष्टं ३४ ॥

रेमे रम्यादिप्रकोक्तिः आत्मरतः स्वतस्तुष्टः आत्मारामः स्वक्रीडः अखण्डितः स्त्रीविभ्रमैरनाकृष्टोपि तथा चेत्किं-
मिति रेमे तत्राह कामिनामिति ३५ ३६ स्त्रीणां दुरात्मतामाह सा चेति द्वाभ्यां कामो यान मागामन स्मायन्तेया स्मं

त्वन्य

रेमे तया चात्मरत आत्मारामोप्यखण्डितः कामिनां दर्शयन्दैन्यं स्त्रीणां चैव दुरात्मतां ३५ इत्येवं दर्श-
यन्त्यस्ताश्चेरुर्गोप्यो विचेतसः यां गोपीमनयत्कृष्णो विहायान्याः स्त्रियो वने ३६ सा च मेने तदात्मानं
वरिष्ठं सर्वयोषितां हित्वा गोपीः कामयाना मामसौ भजते प्रियः ३७ ततो गत्वा वनोद्देशं दृप्ता केशव-
मब्रवीत् न पारयेहं चलितुं नय मां यत्र ते मनः ३८ एवमुक्तः प्रियामाह स्कंध आरुह्यतामिति तत-
श्चांतर्दधे कृष्णः सा वधूरन्वतप्यत ३९ हा नाथ रमण प्रेष्ठ क्वासि क्वासि महाभुज दास्यास्ते कृपणाया
मे सखे दर्शय सन्निधिं ४० अन्विच्छंत्यो भगवतो मार्गं गोप्योविदूरतः ददृशुः प्रियविश्लेषमोहितां दुः-
खितां सखीं ४१

ताः गोपीर्हित्वा मां भजत इति हेतोरात्मानं वरिष्ठं मेने इति ३७ ३८ कामिनां दैन्यं दर्शयति एवमुक्त इति आखे-
डितत्वमाह ततश्चेति तस्याः स्कंधारोहणयाचनायामंतर्द्धानस्यार्थः ३९ अनुतापमाह हा नाथेति ४० अन्विच्छं-
त्यो मृगयमाणाः अविदूरतः समीपे ४१ ॥

श्री
भाग
टी
४४

१२९

॥४२॥ ततस्तया परित्यक्ताः कृष्णान्वेषणाय वनमाविशन् ततो हरेरन्वेषणान्निवृत्ताः ॥४३॥ आत्मा शरीरं एवं नमः
शाखा अपि आगाराणि न सस्मरुः स्वगृहाश्चैव सस्मरुर्वं तदात्मिकाः स एव आत्मा यासां तास्तन्मयात्मिकाः ॥४४॥
किं तदेवै यत्र श्रीकृष्णेन संगतिरासीत् तदेव कालिंद्याः पुलिनमागत्य कृष्णं भावयंति ध्यायंतीति तथाताः कृष्ण
स्यागमनं कांक्षितं यासां ता मिलिताः सत्यः कृष्णमेव जगुरिति ॥४५॥ इति श्रीभावार्थे दशमस्कंधे त्रिंशोध्यायः ३०
एकत्रिंशे निराशास्ताः पुनः पुलिनमागताः कृष्णमेवानुगायंत्यः प्रार्थयंते तदागमं जयतीति हे दयित तेन
त्वया कथितमाकर्ण्य मानशान्तिं समाधवान् ब्रवमाने च द्वितीयात्मा विस्मयं परमं ययुः ॥४२॥ ततो विशाल
नेत्रं दृष्ट्वा त्वायावद्विभाव्यते तमः प्रविष्टमालक्ष्य ततो निवृत्ते हरेः ॥४३॥ तन्मनस्कास्तदालापास्तद्वि
चेष्टास्तदात्मिकाः तद्गुणानेव गायंत्यो नात्मागाराणि सस्मरुः ॥४४॥ पुनः पुलिनमागत्य कालिंद्याः
कृष्णभावनाः समवेता जगुः कृष्णं तदागमनकांक्षिताः ॥४५॥ इति श्रीभागवते दशमस्कंधे त्रिंशोध्या
यः ३० गोप्य ऊचुः जयति तेधिकं जन्मना व्रजः श्रयत इंदिरा शश्वदत्र हि दयित दृश्यतां दिक्षु तावका।
न्मना व्रजः अधिकं यथा भवति तथा जयति उत्कर्षेण वर्तते यस्मात्तव जन्मतस्तस्मात् इंदिरा लक्ष्मीः अत्र व्रजे शश्व
यते व्रजमलंकृत्य वर्तते एवं व्रजे सर्वस्मिन्मोदमाने अत्र त्वतावकाः त्वदीया गोपीजनाः त्वयि त्वदर्थमेव का
यं विहृतास वः प्राणा यस्ते त्वां विचिन्वते अतस्त्वया दृश्यतां प्रसन्नीभूय नाशमिति यद्वा अस्माभिर्भवा
न् दृश्यतां यद्वा एवं त्वया दृश्यतामेतद्विचिंत्य तेजयति अत्र स्वतंत्राणां बहूनां वक्तृत्वादपाधांदू रिति सा

तत्रविचिन्वंतु ममकिमिति चेत्तत्राहुः शरदिति शरदुदाशये शरत्कालीने सरसि साधुजातं सम्यग्जातं सत्सरसि जं सरसिजं विकसितं पद्मं तस्योदरे गर्भे या श्रीस्तां मुष्णाति हरतीति तथा तया दृशा नेत्रेण हे सुरतनाथ संभोगपते वरद अशुल्कदासिका मूल्यादासीर्नः निघ्नतो मारयतस्ते तव तया क्रियमाणः इह लोके अवधो वधो न भवति किं किं शस्त्रैरेव वधो वधः किं दृशा वधो वधो न भवति किंतु भवत्येव अतस्त्वदृशापहृतप्राणास्मा पंणाय त्वया दृश्यतामिति भावः त्वया दृश्यतामिति यथासंभवं सर्वत्र वाक्यशेषः २ किं च वयं त्वया मुहुर्मुहुः कृ

शरदुदाशये साधुजातसत्सरसिजोदरश्रीमुषा दृशा सुरतनाथ तेऽशुल्कदासिका वरद निघ्नतो नेह किं वधः २ विषजलाप्ययाद्व्यालराक्षसाद्वर्षमारुताद्वैद्युतानलात् वृषमयात्मजाद्विश्वतोभयादृषभ ते वयं रक्षिता मुहुः ३ ॥

पयारक्षिता किमितीदानीं दृशा मन्मथं प्रेष्यतो हतानयसीत्याहुः विषेति हे ऋषभ श्रेष्ठ विषमयाज्जलाप्यया द्योनाशस्तस्मात् तथा व्यालराक्षसादघासुरात् वर्षमारुतात् इंद्रकृतातिवृष्टिसहितात् वायोः वैद्युतानलादशनिपाता त् वृषोरिष्टस्तस्मात् मयात्मजाद्व्योमात् विश्वतः अन्यस्मादपि सर्वतो भयाच्च कालियदमनादिकाले रक्षिता किमिदानीमुपेक्षस इति भावः ३ ॥

श्री
भाग
सूटी
४

130

श्रपिच विश्वपालनायावतीर्णोस्य तव भक्तोपेक्षायां तमनुचितेत्याशयेनाहुः नखल्विति हे सखे भवान् खलु निश्चि
तं यशोदासुतो न भवसि किं तर्हि सर्वेषां प्राणिनां बुद्धिसाक्षी ननु स कथं कृष्णो भवसि तत्राहुः विखनसा ब्रह्मणा विश्वपाल
लनाय प्रार्थितः सन् सात्वतां कुले उदीयिवानुदितोसि ४ तस्मात्त्वत्कान्तानामस्माकमेतत्प्रार्थनाचातुर्यं संप्राप्त
यत्राहुः विरचितेत्यभयमित्यादि हे वृष्णिधुर्य संसृतेर्भयात् ते चरणमीयुषां शरणं प्राप्तानां प्राणिनां विर।
चितं दत्तमभयं येन तत्तथा हे कान्त कामदं वरदं तथा श्रियः करगृहीतं तं तथा तद्वत्करसरोरुहं नः शिर।

न खलु गोपिकानंदनो भवानखिलदेहिनामंतरात्मदृक् विखनसार्थितो विश्वगुप्तये सख उदेयिवान्सा
त्वतां कुले ४ विरचिताभयं वृष्णिधुर्य ते शरणमीयुषां संसृतेर्भयात् करसरोरुहं कांत कामदं शिरसि
धेहि नः श्रीकरग्रहं ५ व्रजजनार्तिहन्वीर योषितां निजजनस्मयध्वंसनस्मित भज सखे भवत्किंकरीः
स्म नो जलरुहाननं चारु दर्शय ६ प्रणतदेहिनां पापकर्षणं तृणचरानुगं श्रीनिकेतनं फणिफणार्पि
तं ते पदांबुजं कृणु कुचेषु नः कृन्धि हृच्छयं ७ ॥

सि धेहि अर्पय ५ हे व्रजजनार्तिहन् हे वीर निजजनानां
यः स्मयो गर्वस्तस्य ध्वंसकं नाशकं स्मितं यस्य हे तथाभूत सखे भवत्किंकरीर्नोस्मान् भजस्व आश्रय स्मेति निश्चि
तं प्रथमं तावज्जलरुहाननं चारु योषितां नो दर्शय ६ अविशेषेण प्रणतानां देहिनां पापकर्षणं पापहन्तृ तृण
चरान्पशूनप्यनुगच्छतीति कृपयेति तथा सौभाग्येन श्रियो निकेतनं वीर्यातिरेकेण फणिनः कालियस्य फणास्व
र्पितं ते पदांबुजं नः कुचेषु कृणु कुरु किमर्थं हृच्छयं कामं कृन्धि छिन्धि ७ ॥

१०

हे पुष्करेक्षण तवैव मधुरया गिरा वल्गूनि वाक्यानि यस्यां तया बुधानां मनोज्ञया हृद्यया गंभीरयेत्यर्थः मु।
ह्यतीरिमा नो विधिकरीः किंकरीः अधरशीधुना अधरामृतेन आप्याययस्व संजीवयेति ८ किंच अस्माकं त्वद्वि
रहेण शममेव मरणं किंतु त्वत्कथामृतं पाययद्भिः सद्भिर्निवर्तितमित्याहुः तवेति कथैवामृतं स्वदेत
तप्तजीवनं प्रसिद्धामृतादुत्कर्षमाहुः कविभिः ब्रह्मविद्भिरपीडितं स्तुतं देवभोग्यं त्वमृतं तैस्तुच्छीकृतं ।

मधुरया गिरा वल्गुवाक्यया बुधमनोज्ञया पुष्करेक्षण विधिकरीरिमा वीर मुह्यतीरधरशीधुना।
प्याययस्व नः ८ तव कथामृतं तप्तजीवनं कविभिरीडितं कल्मषापहं श्रवणमंगलं श्रीमदातता।
तं भुवि गृणंति ते भूरिदा जनाः ९ ॥

किंच कल्मषापहं कामकर्मनिरसनं तत्त्वमृतं नैवंभूतं किंच श्रवणमंगलं श्रवणमात्रेण मंगलप्र
दं तत्त्वनुष्ठानापेक्षं किंच श्रीमत सुशांतं तत्तु मादकं आततं यथा भवति तथा भुवि ये गृणंति निरूपयं।
ति ते जनाः भूरिदाः बहुप्रदातारः जीवितं ददतीत्यर्थः यद्वा एवंभूतं त्वत्कथामृतं ये भुवि गृणंति ते भूरि।
दाः पूर्वजन्मसु खलु बहु दत्तवंतः सुकृतिन इत्यर्थः एतदुक्तं भवति सर्वत्र ये कथामृतं केवलं गृणंति तेपिता।
वद्धन्याः किं पुनर्ये त्वां पश्यंति अतः प्रार्थयामहे त्वया दर्शनं दीयतामिति ९ ॥

श्री
भाग
टी
१३

नवनीते मत्कथायाश्च वर्णनैव निवृत्ता भवत्यः किं महूर्षीनेन तद्विनाद्यभितविभावयं तत्रापि शान्तिन विदामः इत्याहुः रहसि संविदिति हे प्रिय कुहक कपट त्वत्संविस्संकेतनमर्माणि ॥ १० ॥ किंच तवपि वयमतिप्रेमार्द्रं विना त्वे पुनरस्मासु केनदत्तना कपटमात्रसीत्याहुः श्रीकृष्णेन वलसीति हे नाथ कान्त यद्यदा व्रजाच्चलसि पशून् चारयन् तदा नलिनसुन्दरं कोमलं तव पदं शिलैः कणिशैः तृणैरंकुरैश्च सीदति क्लिश्यते इति नो मनः ॥

प्रहसितं प्रियप्रेमवीक्षणं विहरणं च ते ध्यानमंगलं रहसि संविदो या हृदिस्पृशः कुहक नो मनः क्षोभयंति हि ॥ १० ॥ चलसि यद्व्रजाच्चारयन्पशून्नलिनसुंदरं नाथ ते पदं शिलतृणांकुरैः सीदतीति नः कलिलतां मनः कांत गच्छति ॥ ११ ॥ दिनपरिक्षये नीलकुंतलैर्वनरुहाननं बिभ्रदावृतं घनरजस्वलं दर्शयन्मुहुर्मनसि नः स्मरं वीर यच्छसि ॥ १२ ॥

कलिलतामस्वास्थ्यं गच्छति प्राप्नोतीति एवंभूता वयं दुःखशंकितविभावयं ॥ ततः दिनपरिक्षये सायंकाले नीलकुन्तलैरावृतं घनरजस्वलं गोरजः कुण्ठितं धूम्रं वनरुहाननं मल्लिकुलमालापरागकुण्ठितपद्मतुल्यमाननं बिभ्रत् तच्च त्वं मुहुर्मुहुर्दर्शयन् नो मनसि केवलं स्मरं यच्छसि अर्पयसि न तु संगं ददासीति कपट इति भावः ॥ १२ ॥

१३

यतोऽधुना कपटं विहायैवं कुर्विति प्रार्थयते श्लोकद्वयेन प्रणतकामदमिति हे स्वाधिदेव हेरमण पद्मने-
त्रार्चितं श्रीपादद्वयं ध्यानमात्रेणापद्विवर्तकं शंतमं च मे वा समर्पय पित्स्वत्वतमं तव चरणपंकजं कामा-
नापयेत तेन स्तनेद्वयं र्पयेति ॥१२॥ अपि च देवीर ते ऽधरामृतं नोऽस्माकं वितर देहि कथंभूतमधरामृतं स्वा-
नितेन लालितेन वेणुना सुष्ठु चुंबितमिति नादामृतवासितमिति भावः इतररागविस्मारणं नृणामितरेषु
सार्वभौमादिष्विन्द्रियविषयरागोऽभिळक्षां विस्मारयति विलोपयतीति तथा तत ॥१३॥ किं च तवाननमपि न ददर्शनेन ।

प्रणतकामदं पद्मजार्चितं धरणिमण्डनं ध्येयमापदि । चरणपंकजं शंतमं च ते रमण नः स्तनेष्व-
र्पयाधिहन् ॥१३॥ सुरतवर्धनं शोकनाशनं स्वरितवेणुना सुष्ठु चुंबितं । इतररागविस्मारणं नृणां
वितर वीर नस्तेऽधरामृतं ॥१४॥ अटति यद्भवानह्नि काननं त्रुटिर्युगायते त्वामपश्यतां । कुटिलकुन्त-
लं श्रीमुखं च ते जड उदीक्षतां पक्ष्मकृद्दृशां ॥१५॥

दुःखं दर्शनेन च स्वत्वं दृष्ट्वा सर्वसंगपरित्यागेन यतय इव वयं त्वामुपागताः तेन कथमस्मांस्त्यक्तुमुत्सहसे ।
इति सकरुणमूचुः अटतीति द्वयेन यत् यदा भवान् काननं वृन्दावनं प्रति दिवा अटति गच्छति तदा त्वा-
मपश्यतामस्माकं त्रुटिः क्षणोऽपि युगवद्भवति एवमदर्शने दुःखमुक्तं पुनः सायं विहितोऽपि तेन वक्त्री-
मन्मुखं उदीक्षमाणानां तेषां दृशां पक्ष्मकृद्ब्रह्मा जडो मन्द एव निमेषमात्रमप्यंतरमसह्यमिति दर्शने

श्री
भाग
टी
१३२

तस्मात् हे अच्युत पतीन् सुतान् अन्वयान् संबंधिनः भ्रातृबांधवांश्चातिविलंघ्य ते तव समीपमागता वयं का
थंभूतस्य तव गतिविदः अस्मदागमनं गीतेन गतीर्वा जानतः गतिविदो वयं वा तवोद्गीतेन उच्चैर्गीतेन मोहि
ताः हे कितव शठ एवंभूता योषितो निशि स्वयमागताः ताः त्वदन्यः कस्त्यजेत् न कोपीत्यर्थः १६ अतस्त्वया त्य
क्तानामस्माकं प्राकृतत्वद्दर्शननिदानस्य हृद्रोगस्य त्वत्संग एव चिकित्सा कर्तव्या इत्याहुर्द्वयेन रहसीति श्रियो

पतिसुतान्वयभ्रातृबांधवानतिविलंघ्य तेऽन्त्यच्युतागताः गतिविदस्तवोद्गीतमोहिताः कितव यो
षितः कस्त्यजेन्निशि १६ रहसि संविदं हृच्छयोदयं प्रहसिताननं प्रेमवीक्षणं बृहदुरः श्रियो वी
क्ष्य धाम ते मुहुरतिस्पृहा मुह्यते मनः १७ व्रजवनौकसां व्यक्तिरंग ते वृजिनहंत्र्यलं विश्वमंगलं त्य
ज मनाक् च नस्त्वत्स्पृहात्मनां स्वजनहृद्रुजां यन्निषूदनं १८

धाम ते बृहद्विशालं उरश्च वीक्ष्य नोऽतिस्पृहा भवति तया च मुहुर्मुहुर्मनो मुह्यति १७ तव व्यक्तिरभिव्य
क्तिः व्रजवनौकसां सर्वेषामविशेषेण वृजिनहंत्री दुःखनिरसनी विश्वमंगलं सर्वमंगलरूपा च अतस्त्वत्स्पृ
हात्मनां त्वत्स्पृहाक्रांतमनसां नः मनाक् ईषत् तत् किमपि त्यज मुंच कार्पण्यमकुर्वन् देहीत्यर्थः किं तत् स्व
जनहृद्रोगाणां यन्निषूदनं नाशकं निवर्तकमौषधं यत् त्वमेव वेत्सीति गूढाभिप्रायं १८ ॥

१३२

प्रतिषेधमधर्षितात्वहं त्वग्राहुः यदिति हे प्रिय यत्ते तव सुकुमारं पादाब्जं कठिनेषु कुचेषु संमर्दनशंकिताः शनैः
शनैर्दधीमहि धारयेम तेन तेनाटवीमटसि गच्छसि न यसीति पादे प पूत्वा काचिदस्मो वा आत्मानमेव न
यसि शामयसि ननु तः तत्पदांबुजं वा कूर्पादिभिः सूक्ष्मपाषाणादिभिः किं स्विन्न व्यथते कथं न कथं न नाम
व्यथेतेति भवानेवायुर्जीवनं यासां तासां नो धीर्भ्रमति मुह्यतीति ॥१९॥ इति श्रीभावार्थदीपिकायां दशमस्कं

यत्ते सुजातचरणांबुरुहं स्तनेषु भीताः शनैः प्रिय दधीमहि कर्कशेषु तेनाटवीमटसि तद्व्यथते न
किंस्वित्कूर्पादिभिर्भ्रमति धीर्भवदायुषां नः ॥१९॥ इति श्रीभागवते महापुराणे दशमस्कंधे एक
त्रिंशोऽध्यायः ॥३१॥ श्रीशुक उवाच इति गोप्यः प्रगायंत्यः प्रलपंत्यश्च चित्रधा रुरुदुः सुस्वरं राजन्कृष्ण
दर्शनलालसाः ॥१॥

५:

धे एकत्रिंशोऽध्यायः ॥३१॥ द्वात्रिंशे विरहालापविक्लिन्नहृदयो हरिः तत्राविर्भूय गोपीस्ताः सांत्वयामास।
मानयन् स्वप्रेमामृतकल्लोलविह्वलीकृतचेतसः सदयं नेदयन् गोपीः कृष्णस्तोऽनेदनेदन इति गोप्य इ।
ति इत्येवं प्रभृति विचित्रधा अनेकधा सुस्वरमुच्चैः कृष्णदर्शनलालसा निःस्पृहायासांताः ॥१॥

साक्षान्मन्मथमन्मथः जगन्मोहनस्य कामस्यापि मनस्संभूतः कामः साक्षात्तस्यापि मोहकः इत्यर्थः २ तन्वः
करचरणादयः ३ अंजलिना संहतहस्तद्वयेन ४ ५ भ्रुकुटिमाबध्य कुटिलीकृत्य प्रेमसंरंभेण प्रणयकोपा

तासामाविरभूच्छौरिः स्मयमानमुखांबुजः पीतांबरधरः स्रग्वी साक्षान्मन्मथमन्मथः २ तं विलो-
क्यागतं प्रेष्ठं प्रीत्युत्फुल्लदृशोऽबलाः उत्तस्थुर्युगपत्सर्वास्तन्वः प्राणमिवागतं ३ काचित्करांबुजं
शौरेर्जगृहेंजलिना मुदा काचिद्दधार तद्बाहुमंसे चंदनभूषितं ४ काचिदंजलिनागृह्णात्तन्वी तां-
बूलचर्वितं एका तदंघ्रिकमलं संतप्ता स्तनयोरधात् ५ एका भ्रुकुटिमाबध्य प्रेमसंरंभविह्वला घ्नं-
तीवैक्षत्कटाक्षेपैः संदष्टदशनच्छदा ६ अपरानिमिषद्दृग्भ्यां जुषाणा तन्मुखांबुजं आपीतमपि ना-
तृप्यत्संतस्तच्चरणं यथा ७ तं काचिन्नेत्ररंध्रेण हृदि कृत्वा निमील्य च पुलकांग्युपगुह्यास्ते योगी-
वानंदसंप्लुता ८ ॥

वेशेन विह्वला विवशा दष्टाधरोष्ठा कटाक्षैः कटाक्षाः तैरेव आक्षेपाः परिभवास्तैस्ताडयंतीव पश्यति स्म ६ अ-
निमिषंतीभ्यां दृग्भ्यामापीतमपि सम्यग्दृष्टमपि पुनः पुनर्जुषाणा नातृप्यत् ७ हृदि कृत्वा उपगुह्य आस्ते
इत्यर्थः ८ ॥

प्राप्तमीश्वरं प्राप्य यथा मुमुक्षवो जनाः तापं संसारजं तापं यद्वा प्राप्ते ब्रह्मत्वं प्राप्य यथा संसारिणः यद्वा
प्राप्ते मोक्षं प्राप्य यथा विश्वतैजसप्राज्ञावस्था जीवाः ४२ पुरुषः परमात्मा शक्तिभिः सत्वादिभिर्यथा यद्वा उपा
सकः पुरुषो ज्ञानवीर्यबलादिभिः यद्वा पुरुषोनुशायी प्रत्यवेथी प्रकृत्या गुणादिभिर्वृतो यथा विरोचतेतट

सर्वास्ताः केशवालोकपरमोत्सवनिर्वृताः जहुर्विरहजं तापं प्राज्ञं प्राप्य यथा जनाः ४२ ताभि
र्विधूतशोकाभिर्भगवानच्युतो वृतः व्यरोचताधिकं तात पुरुषः शक्तिभिर्यथा ४३ तासमादा
य कालिन्द्या निर्विश्य पुलिनं विभुः विकसत्कुन्दमन्दारसुरभ्यनिलषट्पदं ॥ शरच्चन्द्रांशुसन्दो
हध्वस्तदोषातमः शिवं कृष्णाया हस्ततरलाचितकोमलवालुकं ४५ ॥

त ४४ विकसितकुन्दमन्दारैः सुरभिर्योनिलस्तस्मात् षट्पदा यस्मिन् ॥ शरच्चन्द्रांशूनां संदोहैः ध्वस्तं दो
षातमः रात्रिगतं तमो यस्मिन् तत् अतः शिवं सुखकरं हस्ततरलैः तरलैः रञ्जिता ग्रास्तु नारविता को
मलावालुका यस्मिन् एवंभूतं पुलिनं ताः समादाय निर्विश्य तत्र ताभिर्वृतोधिकं व्यरोचते निष्टवेणाग्

= ४ ?

श्री
भाग
द० टी
१२५

तास्व मनोरथानां अंतं ययुः पूर्णकामा बभूवुः श्रुतयो यथेति श्रुत्यर्थः यथा कर्मकांडे श्रुतयः परमेश्व-
रमपश्यंत्यस्तत्कर्मानुवेधेन पूर्णा इव भवंति ज्ञानकांडे तु परमेश्वरं दृष्ट्वा तदानंदपूर्णाः कामानुवेधेन द-
तिनद्धत आप्तकामा अपि प्रेम्णा तमभजन्निर्वाद सौरीति अचीक्लृपन् एवयामासुः आत्मबंधवे तस्यामि-
त्रे १३ गोपीसभागतस्ताभिः संपूजितः सन् चकास शुशुभे त्रैलोक्ये या लक्ष्मीः शोभा तस्या एकपदं वपुर्दे ।

तद्दर्शनाह्लादविधूतहृद्रुजो मनोरथांतं श्रुतयो यथा ययुः स्वैरुत्तरीयैः कुचकुंकुमांकितैरची-
क्लृपन्नासनमात्मबंधवे १३ तत्रोपविष्टो भगवान्स ईश्वरो योगेश्वरांतर्हृदि कल्पितासनः चकास
गोपीपरिषद्गतोर्चितस्त्रैलोक्यलक्ष्म्येकपदं वपुर्दधत् १४ सभाजयित्वा तमनंगदीपनं सहासा-
लीलेक्षणविभ्रमभ्रुवा संस्पर्शनेनांककृतांघ्रिहस्तयोः संस्तुत्य ईषत्कुपिता बभाषिरे १५ गोप्य
ऊचुः भजतोनुभजंत्येक एक एतद्विपर्ययं नोभयांश्च भजंत्येक एतन्नो ब्रूहि साधु भोः १६ ॥

ध्याने तद्वपुर्दधत् दर्शयन् १४ सहासलीलेक्षणेन विभ्रमो विलासो यस्यां तया भ्रुवा उपलक्षिताः संस्प-
र्शनेन संमर्दनेन १५ ततो भगवता कृतं तत्तानतद्वचनेनैवापादयितुं कामा गूढाभिप्राया लोकदृष्टांतमि-
व पृच्छंति भजत इति भजतः प्राणिनः अनु प्रेतरे के विद्वज्जनानुसारेण भजंति केचिदेतद्विपर्ययं यथा-
भवति तथा तद्भजनानपेक्षमभजतोपि भजंति अन्ये तु नोभयानीति १६ ॥

१२५

विदित्वाभिप्रायमुत्तरमाह मिथ इति हे सख्यः उपकारस्य प्रत्युपकारतया ये मिथो भजन्ति ते स्वं न भजन्ति किं त्वा
त्मानमेव कुतः हि यस्मात्स्वार्थ एकान्त उद्यमो येषां ते तत्र च न सौहृदं अतो न सखायः न च धर्मो दृष्टोद्देशाद्ग्रा
मदिच्छादिभजनवदित्यर्थः १७ ये त्वभजतो भजन्तीति ते हि द्विविधाः करुणाः स्निग्धाश्च तत्र तद्यथाक्रमं तथा।

श्रीभगवानुवाच मिथो भजन्ति ये सख्युः स्वार्थैकान्तोद्यमा हि ते न तत्र सौहृदं धर्मः स्वार्थार्थं तद्धि
नान्यथा १७ भजन्त्यभजतो ये वै करुणाः पितरो यथा धर्मो निरपवादोऽत्र सौहृदं च सुमध्यमाः।
१८ भजतोऽपि न वै केचिद्भजन्त्यभजतः कुतः आत्मारामा ह्याप्तकामा अकृतज्ञा गुरुद्रुहः १९

र्मकामौ भवतः तस्मादाह भजन्त्यभजत इति १८ तृतीयप्रश्नस्योत्तरं भजतोपीति प्रथमार्थः ते च चतुर्विधाः प्र
के आत्मारामाः अपराभृष्टाः केचिदाप्तकामाः विषयदर्शनेपि पूर्णकामत्वेन भोगेच्छारहिताः अन्ये अकृ
तज्ञाः संमूढाः अन्ये तु गुरुद्रुहः प्रतिकूलाः सपितायस्य पोषकस्तिन्याया उपकर्तारो गुरवस्तेभ्यो द्रु

श्री
भाग
पुटी
सप

135

पुरुषः परमको हि गतमात्मानं मन्वानः प्रतिसंक्रोधैः परस्परं गूढस्मितमुखीरित्यादि नाहमिति हे सख्यः प्र
हेतेषां मध्ये न कोपि किंतु परमकारुणिकः परमसुहृच्च कथममीषां भजतामनुवृत्तिमिह न येनेरतरां तारथ्या
नप्रवृत्त्यर्थं नानुभजामि एतन्मदृष्टांतमाह यथेति नस्यधनमेव विचिंतयानिभृतः पूर्णो भ्रमतीति यावत् ।
वेदाश्च धर्माः धर्मोपनीताश्च स्वाः ज्ञातयश्च तेषां त्यागात् अस्मत्त्यागिप्रायाय पितेवेत् २१ एवं मदर्थो ज्झि

नाहं तु सख्यो भजतोपि जंतून्भजाम्यमीषामनुवृत्तिवृत्तये यथाधनो लब्धधने विनष्टे तच्चिंतयान्यं
निभृतो न वेद २० एवं मदर्थोज्झितलोकवेदस्वानां हि वो मय्यनुवृत्तये बलाः मयापरोक्षं भजता
तिरोहितं मासूयितुं मार्हथ तत्प्रियं प्रियाः २१

नलोकवेदस्वानामद् र्थेउज्झिताः लोकाः पुत्राद्युक्तधर्मीत्
एतान् वेदाश्च धर्माः धर्मोपनीतास्तथा स्वाः ज्ञातयश्च तेषां त्यागात् यामिस्तासां वो युष्माकं परोक्षं मद्दर्शो
नं यथा भवति तथा भजतालोक्य मत्कृमालापान् शृण्वतैव तिरोहितं ज्ञात्वा न शक्तितं तत्तस्मात् हे अबलाः
हे प्रियाः मां मासूयितुं दोषारोपणार्हं यूयं मार्हथ न योग्याः स्थ २१ ॥

ष्यात्वामिदं परमार्थेन तु भगवानेवमाह नेति निरवद्यसंयुजां निरवद्या संयुक् संयोगो यासां तासां वः विबु
धायुषापि चिरकालेनापि स्वीयं साधुकृत्यं प्रत्युपकारं कर्तुं न पारये न शक्नोमि कथंभूतानां या माभजन्
दुर्जरा अजराः याः गृहशृंखलाः ताः संवृश्च्य निःशेषं छित्वा मामाभजन् तासां मच्चित्तं बहुप्रेमयुक्तं ता
यानैकनिष्ठं तस्माद्वो युष्माकमेव साधुना साधुकृत्येन तत् युष्मत्साधुकृत्यं प्रतियातु प्रतिकृतं भवतु यु

न पारयेऽहं निरवद्यसंयुजां स्वसाधुकृत्यं विबुधायुषापि वः या माभजन्दुर्जरगेहशृंखलाः संवृश्च्य
तद्वः प्रतियातु साधुना २२ इति श्रीभागवते दशमस्कंधे द्वात्रिंशोऽध्यायः ३२ श्रीशुक उवाच इत्थं भ
गवतो गोप्यः श्रुत्वा वाचः सुपेशलाः जहुर्विरहजं तापं तदंगोपचिताशिषः १ तत्रारभत गो-
विंदो रासक्रीडामनुव्रतैः स्त्रीरत्नैरन्वितः प्रीतैरन्योन्याबद्धबाहुभिः २ ॥

अनन्योपशीलेन च ममानृण्यं न तु मत्कृतप्रत्युपकारेणेत्यर्थः २२ इति श्रीभावार्थे दशमस्कंधे द्वात्रिंशो-
ध्यायः ३२ त्रयस्त्रिंशे ततो गोपीमंडलमध्यगो हरिः प्रियाभिस्ता रमयामास ह्लादिनीवनकेलिभिः तन्मदं
श्रंगादेरानंतरं पद्यात्तस्य भगवतो गतनवपुषा करचरणाद्यवयवैरुपचिताः समृद्धा आशिषो यासां ताः १
रासक्रीडां रासो नाम बहुनर्तकीयुक्तो नृत्यविशेषः तां क्रीडां अन्योन्याबद्धाः संग्रथिता बाहवो येषां तैः सह २

श्री
भाग
पूर्व
१२९

130

तत्राद्भुतमभिप्रायेणाह दर्शयति रासोत्सव इत्यर्धचतुष्टयाधिकेन सार्धेन तासां मंडलरूपेणावस्थितानां
द्वयोर्द्वयोर्मध्ये प्रविष्टेन तेनैव कंठे गृहीतानामुभयतश्चालिंगितानां कथंभूतेन यं सर्वाः स्त्रियः स्वस्वनि-
कटे मामेवाश्लिष्टवानिति मन्येरन् तेन तदर्थं द्वयोर्द्वयोर्मध्ये प्रविष्टेनेत्यर्थः नन्वेकस्य कथं तथा प्रवेशः

रासोत्सवः संप्रवृत्तो गोपीमंडलमंडितः योगेश्वरेण कृष्णेन तासां मध्ये द्वयोर्द्वयोः प्रविष्टेन गृही-
तानां कंठे स्वनिकटं स्त्रियः ३ यं मन्येरन्नभस्तावद्विमानशतसंकुलं दिवौकसां सदाराणामौ-
त्सुक्यापहृतात्मनां ४ ततो दुंदुभयो नेदुर्निपेतुः पुष्पवृष्टयः जगुर्गंधर्वपतयः सस्त्रीकास्त-
द्यशोऽमलं ५ वलयानां नूपुराणां किंकिणीनां च योषितां सप्रियाणामभूच्छब्दस्तुमुलो रास-
मंडले ६

सर्वसन्निहितत्वं वा कुतः स्वैकनिकटत्वाभिमानस्तासामित्यत आह योगेश्वरेणेति अचिन्त्यशक्तिनेत्य-
र्थः ३ तावत्तत्क्षणमेव परस्परौत्सुक्यापहृतमनसां सस्त्रीकाणां देवानां विमानशतैः संकीर्णं नभो बभू-
व ४ ५ सप्रियाणां कृष्णसहितानां तुमुलः संकीर्णः ६ ॥

१२९

महामरकतो नीलमणिरिव हैमानां मणीनां मध्ये ताभिः स्वर्णवर्णाभिराश्लिष्टाभिः शुशुभे गोपीरूपाभिः
प्रायेणाविनैव मध्यपदाहूतिमेकवचनं ७ स यथा ताभिः शुशुभे तथा ताश्च पीतेन विशेन तिचारा पादन्यासैरि
ति भुजविधुतिभिः करचालनैर्भ्रम्यमाणैर्मध्यैः वलद्भिः कुचैश्च पटैश्चोत्तरीयवस्त्रैः गंडलोलैः गंडेषु कपोले
षु लोलैश्चंचलैः कुंडलैः स्विद्यन्मुख्यः स्विद्यंते स्वेदमुद्गिरंति मुखानि यासां ताः कवरीषु रशनासु च ग्रंथयो या।

तत्रानिशं शुशुभे ताभिर्भगवान्देवकीसुतः मध्ये मणीनां हैमानां महामरकतो यथा ७ पादन्यासै
र्भुजविधुतिभिः सस्मितैर्भ्रूविलासैर्भ्रश्यन्मध्यैश्चलकुचपटैः कुंडलैर्गंडलोलैः स्विद्यन्मुख्यः कवर
रशनाग्रंथयः कृष्णवधो गायंत्यस्तं तडित इव ता मेघचक्रे विरेजुः ८ उच्चैर्जगुर्नृत्यमाना रक्तकं
ठो रतिप्रियाः कृष्णाभिमर्शमुदिता यद्गीतेनेदमावृतं ९ ॥

स्रस्ताः तेषु ताः स्ववाः ग्रंथयः शिथिलग्रंथयस्ताः सर्वाः तत्र नानामूर्तिः श्रीकृष्णो मेघचक्र इव तास्तव
कृविधा तडित इव स्विद्यत्नपारइव गीतं गर्जितमिव चेति यथासंभवमूह्यं ८ नृत्यमाना नृत्यंत्यः रक्तकंठ्यः
नानारागैरनुरंजितकंठाः कृष्णस्याभिमर्शेन संस्पर्शेन मुदिताः हृष्टं विश्वं ९

मुकुंदेन सह स्वरजातीः षड्जादिस्वरालापगातीः स्वमिश्रिताः कृत्वा उन्नीता अभिरसंकीर्णाः पीनपयोधरेन संमा
निनातन्नात्मन्नयनमेव ध्रुवं ध्रुवालापेन तालविशेषं कृत्वा उन्निन्ये उन्नीतभवती ॥८॥ एवं नृत्यगीतादिना श्रीकृ
ष्ण संमानितानां तासाम् मनसि श्रीनिविलसितं स्मरमादकारिविहितं स्मर्यते निशिथिलीभावं शमानिवलया

काश्चित्समं मुकुंदेन स्वरजातीरमिश्रिताः उन्निन्ये पूजितातेन प्रीयता साधु साधिति तदेव ध्रुव
मुन्निन्ये तस्यै मानं च बहूदात् ॥१०॥ काश्चिद्रासपरिश्रान्ता पार्श्वस्थस्य गदाभृतः जग्राह बाहुना
स्कंधं श्लथद्वलयमल्लिका ॥११॥ तत्रैकांसगतं बाहुं कृष्णस्योत्पलसौरभम् चंदनालिप्तमाघ्राय
हृष्टरोमा चुचुंब ह ॥१२॥ कस्याश्चिन्नाट्यविक्षिप्तकुंडलत्विषिमंडितं गंडं गंडे संदधत्या अदात्तांबू
लचर्वितं ॥१३॥ नृत्यती गायती काचित्कूजन्नूपुरमेखला पार्श्वस्थाच्युतहस्ताब्जं श्रांताधात्स्तनयोः
शिवं ॥१४॥

निमल्लिकास्रग्यस्याः सा ॥११॥ उत्पलस्य सौरभमिव सौरभं यस्य तं बाहुं ॥१२॥ नाट्येन नृत्येन विक्षिप्तयोश्चंच
लयोः कुंडलयोस्त्विषिः प्रभा तया मंडितं गंडे कपोले तथाभूते स्वगंडे संदधत्याः संयोजयंत्याः तांबूल
चर्वितं चुचुंब तत् ॥१३॥ कूजंती नूपुरे मेखला च यस्याः सा ॥१४॥

एवमस्माप्रपि गोप्यो यथायूथं नानाविभ्रमैर्विजह्रु रिमाह गोप्य इति १५ तत्र वाद्यकेषु गायकेषु च सत्सु के
षु गोपर्वे किन्नरादिषु रसावेशेन मुत्येन नृत्यवाद्याभ्यामेव वाद्यादिसंपन्निदर्शयन् एतत्संभ्रममाह कर्णोत्प
लेति कर्णोत्पलैश्च अलकविटं कैरलंकृतैः कपोलैश्च घर्मैश्च वक्त्रेषु श्रीः शोभा यासां ताः घोषाः
किंकिण्यः वलयनूपुरघोषैर्वाद्यैर्वादित्रैः स्वकेशेभ्यः स्रस्ताः स्रजो यासां ताः एतेन तालगतिसंतुष्टाः के ।

गोप्यो लब्ध्वाच्युतं कांतं श्रिय एकांतवल्लभं गृहीतकंठ्यस्तद्दोर्भ्यां गायंत्यस्तं विजह्रिरे १५ कर्णो
त्पलालकविटंककपोलघर्मवक्त्रश्रियो वलयनूपुरघोषवाद्यैः गोप्यः समं भगवता ननृतुः स्वके
शस्रस्तस्रजो भ्रमरगायकरासगोष्ठ्यां १६ एवं परिष्वंगकराभिमर्शस्निग्धेक्षणोद्दामविलासहा
सैः रेमे रमेशो व्रजसुंदरीभिर्यथार्भकः स्वप्रतिबिंबविभ्रमः १७ ॥

श्राः देवाः सशिरःकंपं पादेषु पुष्पवृष्टिमिवाकुर्वंत्रित्यन्वये दितं भगवता सह ननृतुः भ्रमरा एव गायकाः।
यस्यां रासक्रीडासभायां १६ यथा गोप्यो नानाविभ्रमैर्भगवता सह विजह्रुः एवं भगवानपि स्वविलासैर्लीला
भिः सहरेमेत्याह एवमिति तद्विलासाननुभूतस्यैव तत्रोदाहरणेन यथार्भक इति स्वप्रतिविंबैर्विभ्रमः क्रीडा
यस्य स एव अनेनैव दर्शितं लीपमेव सर्वकलाकौशलं सौगंध्यलावण्यमाधुर्यादिगुणानुसंवाद्यताभिः सह

रेमे यथार्भकः स्वप्रतिबिंबेनेति वा ॥ १७ ॥

138

तास्तुभगवद्विलासेनकृतार्थाबभूवुरित्याह तदंगेति तस्यांगसंगेनप्रकृष्टामुत्प्रीतिस्तयाकुलान्यवशानीं-
द्रियाणियासांताः विस्रस्तबंधनान्केशादीन अंजसाप्रतिव्यूढुं यथापूर्वं धर्तुं नालंनसमर्थाबभूवुः विस्र-
स्तामालाआभरणानिचयासांताः १८ नकेवलंतापवाकुलेंद्रियाः किंतद्दृष्टारोपीत्याह कृष्णविक्रीडित-
मिति किंच शशांकश्चेति अनेनेतत्सूचितं शशांकेनविस्मितेनगतौविस्मृतायां ततःप्राकृताःसर्वे

तदंगसंगप्रमुदाकुलेंद्रियाःकेशान्दुकूलंकुचपट्टिकांच नांजःप्रतिव्योढुमलंव्रजस्त्रियो।
विस्रस्तमाल्याभरणाःकुरूद्वह १८ कृष्णविक्रीडितंवीक्ष्यमुमुहुःखेचरस्त्रियः कामार्दिताः
शशांकश्चसगणोविस्मितोऽभवत् १९ कृत्वातावंतमात्मानंयावतीर्व्रजयोषितः रेमेसभगवां-
स्ताभिरात्मारामोपिलीलया २० तासामतिविहारेणश्रांतानांवदनानिसः प्रामृजत्करुणः
प्रेम्णाशंतमेनांगपाणिना २१

पिग्रहाःतत्रतत्रैवतस्थुःततश्चापि दीर्घासारात्रिर्बभूवयथासर्वेविजह्रुरि-
ति १९ किंचकृत्वेति अयंभावःकात्यायनिमहामायेमहायोगिन्यधीश्वरि नंदगोपसुतंदेविपतिंमे
कुरुतेनमइत्येवंप्रत्येकंताभिःप्रार्थितत्वात् भगवतापि यातावलाव्रजंसिद्धामयेमारंस्यथक्षपाइति त-
थैवप्रतिश्रुतत्वात्तावंतमात्मानंकृत्वारेमेइति यावतीःयावत्यः २० कृपातिशयमाह तासामिति

ततोतिहृष्टानां गोपीनां चरितमाह गोप्य इति स्फुरतां स्वर्णकुंडलानां कुंतलानां च त्विषा गंडेषु या श्रीस्त-
या सुधितेनामृतायितेन हासमधुरेन निरीक्षणेन च ऋषभस्य पत्युः कृष्णस्य मानं दधत्यः पूजां कुर्वत्यः ता-
त्कर्माणि जगुः तस्य कररुहैर्नखैः स्पर्शेन प्रमोदो यासां ताः ॥२१॥ अथ जलकेलिमाह ताभिरिति तासां मे-

गोप्यः स्फुरत्पुरटकुंडलकुंतलत्विड्गंडश्रिया सुधितहासनिरीक्षणेन मानं दधत्य ऋषभस्य जगुः ।
कृतानि पुण्यानि तत्कररुहस्पर्शप्रमोदाः ॥२१॥ ताभिर्युतः श्रममपोहितुमंगसंगघृष्टस्रजः स कु-
चकुंकुमरंजितायाः गंधर्वपालिभिरनुद्रुत आविशद्वाः श्रांतो गजीभिरिभराडिव भिन्नसेतुः ॥२२॥
सोंभस्यलं युवतिभिः परिषिच्यमानः प्रेम्णेक्षितः प्रहसतीभिरितस्ततोंग वैमानिकैः कुसुमवर्षि-
भिरीड्यमानो रेमे स्वयं स्वरतिरत्र गजेंद्रलीलः ॥२३॥

गासंगेन घृष्टा संमर्दिता या स्रक् तस्याः अतएव तासां कुचकुंकुमेन रंजितायाः संबंधिभिः गंधर्वपालिभिः गं-
धर्वपा गंधर्वपतयः स्वगायंतो येऽलयस्तैरनुद्रुतः अनुगतः सः कृष्णः वाः उदकं आविशत् भिन्नसेतुः विदा-
रितवप्रः स्वयं चातिक्रांतलोकवेदमर्यादः ॥२२॥ स्वरतिः आत्मारामोपि व्रजगोपीमंडले अंभसि वा स्थलेन

श्री
भाग
सटी
३४

वनक्रीडां दर्शयति तत इति यमुनाया उपवने जलस्थलप्रसूनानां गंधो यस्मिन् तेनानिलेन जुष्टा दिक्तटानि यस्मिन् यद्वा दिशास्तटं च स्थलं च यस्मिंस्तस्मिन् वने भृंगाणां प्रमदानां च गणैरावृ। तः २४ रासक्रीडां निगमयति एवमिति सत्यकामः सत्यसंकल्पः अनुरागिस्त्रीकदंबस्यः एवं सर्वाः नि।

ततश्च कृष्णोपवने जलस्थलप्रसूनगंधानिलजुष्टदिक्तटे चचार भृंगप्रमदागणावृतो यथा मदच्युद्द्विरदः करेणुभिः २४ एवं शशांकांशुविराजिता निशाः स सत्यकामोऽनुरताबलागण। णः सिषेव आत्मन्यवरुद्धसौरतः सर्वाः शरत्काव्यकथारसाश्रयाः २५ राजोवाच संस्थापनाय धर्मस्य प्रशमायेतरस्य च अवतीर्णो हि भगवानंशेन जगदीश्वरः २६

शाः सेवितवान् शरत्काव्यकथारसाश्रयाः शारदिभवाः काव्येषु कथ्यमाना ये रसास्तेषामाश्रयभू। ता निशाः यद्वा निशा इति द्वितीयान्तं संयोगे शृंगाररसाश्रयाः शारदि प्रसिद्धाः काव्येषु याः कथा। ताः सिषेवे इति एवमप्यात्मन्येवावरुद्धः सौरतः चरमधातुर्न तु स्खलितो यस्येति कामजयोक्तिः २५

२ १३४

प्रतीपंप्रतिकूलंअधर्ममित्यर्थः आचरत्कृतवान् नचेदमधर्ममात्रंकेवलंजनप्रतारणादिवत् किंतुमहाद्
त्यमित्याह परदाराभिमर्शनमिति २८ आप्तकामस्यतादृशमधर्मंशंकितेन यद्येवंकामाभावात्रिदितंकेना
भिप्रायेणकृतवान्निर्निष्कृष्ठति आप्तकामइति २९ परमेश्वरैकैमनुष्यन्यायेनपरिहर्तुंसामान्यतोमहतां
तमाह धर्मव्यतिक्रमइति साहसंचरंष्टंप्रजापतेरिंद्रसोमविश्वामित्रादीनां नच्चतेषांतेजस्विनांदोषायतत्।

सकथंधर्मसेतूनांवक्ताकर्ताभिरक्षिता प्रतीपमाचरद्ब्रह्मन्परदाराभिमर्शनं २८ आप्तकामोयदु।
पतिःकृतवान्वैजुगुप्सितं किमभिप्रायएतन्नःसंशयंछिंधिसुव्रत २९ श्रीशुकउवाच धर्मव्यतिक्र।
मोदृष्टईश्वराणांचसाहसं तेजीयसांनदोषायवह्नेःसर्वभुजोयथा ३० नैतत्समाचरेज्जातुमनसा
पिह्यनीश्वरः विनश्यत्याचरन्मौढ्याद्यथारुद्रोब्धिजंविषं ३१ ईश्वराणांवचःसत्यंतथैवाचरितंक्वचि
त् तेषांयत्स्ववचोयुक्तंबुद्धिमांस्तत्समाचरेत् ३२

भवतीति ३० तर्हियद्यदाचरतिश्रेष्ठइतिन्यायेनान्योपिएवंकुर्यादित्याशंक्याह नैतदिति अनीश्वरोदेहादि
परतंत्रः यथारुद्रव्यतिरिक्तोविषंभक्षयन्विनश्यत्येव ३१ कथंतर्हिसदाचारस्यप्रामाण्यमतआह।
ईश्वराणामिति तेषांवचःसत्यंअतस्तदुक्तमाचरेदेव आचरितंतुक्वचित्सत्यं अतःस्ववचोयुक्तंतेषांस्ववच।

ननुतर्हितेपिकिमेवंस्वाह्समाचरंतितत्राह कुशलेति प्रारब्धकर्मक्षपणमात्रमेवतेषांकृत्यंनादित्य
र्थः ३३ प्रस्तुतमाह किमुतेति कुशलाकुशलान्वयोनविद्यतइतिकिंपुनर्वक्तव्यमित्यर्थः ३४ एतदेव
स्फुटीकरोति यस्यपादपंकजपरागस्यनिषेवणेनतृप्ताः यद्वा यस्यपादपंकजपरागेनिषेवायेषांते।

कुशलाचरितेनैषामिहस्वार्थोनविद्यते विपर्ययेणवानर्थोनिरहंकारिणांप्रभो ३३ किमुता
खिलसत्वानांतिर्यङ्मर्त्यदिवौकसां ईशितुश्चेशितव्यानांकुशलाकुशलान्वयः ३४ यत्पादपंक
जपरागनिषेवतृप्तायोगप्रभावविधुताखिलकर्मबंधाः स्वैरंचरंतिमुनयोपिननह्यमानास्तस्ये
च्छयात्तवपुषःकुतएवबंधः ३५ गोपीनांतत्पतीनांचसर्वेषामेवदेहिनां योंतश्चरतिसोध्यक्षः
क्रीडनेनेहदेहभाक् ३६

तथातेचतेनतृप्ताश्चेतिभक्ताइत्यर्थः तथाप्यात्मनितनश्चनननह्यमानाः बंधनंप्राप्नुवंतः परदारत्वंगोपीना
मंगीकृत्यपरिहरति ३५ इदानींभगवतःसर्वान्तर्यामिणःपरदारसेवानामनकाचिदित्याह गोपीनामि
ति योंतश्चरति सध्यक्षोबुद्ध्यादिसाक्षी सएवक्रीडनेनेहदेहभाक् नतुस्मरादितल्पः येनदोषःस्यादि

नन्वेवंचेदाप्तकामस्यकिमिदंतेकृतः प्रवृत्तिनिमित्तमाह अनुग्रहायेति शृंगाररसाकृष्टचेतसोतिवहिर्मुखा।
नपिस्वपरान्कर्तुमितिभावः ३६ नन्वन्येषांमिथ्याचारत्वचेष्टितमेवनिवर्तितंतत्राह नासूयन्निति एवंभूते
ष्वसूयाभावेनत्वाकृष्णतः पापान्नियारइतिभावः ३७ ब्रह्मरात्रेब्रह्मलेमुहूर्ते उपावृत्तेसमाप्ते ३८ भगवतःकामवि
जयरूपरासक्रीडाश्रवणादेःकामविजयमेवफलमाह विक्रीडितमिति अचिरेणधीरःसन् हृद्रोगंका

अनुग्रहायभक्तानांमानुषंदेहमाश्रितः भजतेतादृशीःक्रीडायाःश्रुत्वातत्परोभवेत् ३६ नासूय
न्खलुकृष्णायमोहितास्तस्यमायया मन्यमानाःस्वपार्श्वस्थान्स्वान्स्वान्दारान्व्रजौकसः ३७ ब्रह्म
रात्रउपावृत्तेवासुदेवानुमोदिताः अनिच्छंत्योययुर्गोप्यःस्वगृहान्भगवत्प्रियाः ३८ विक्रीडितंव्र
जवधूभिरिदंचविष्णोःश्रद्धान्वितोनुशृणुयादथवर्णयेद्यः भक्तिंपरांभगवतिप्रतिलभ्यकामंहृ
द्रोगमाश्वपहिनोत्यचिरेणधीरः ३९ इतिश्रीभागवतेमहापुराणेदशमस्कंधेत्रयस्त्रिंशोध्यायः ३३

ममाश्वपहिनोतिपरित्यजतीति सेयंश्रीपरमानंदसेविश्रीधरनिर्मिता श्रीभागवतभावार्थदीपिका
दशमाख्यया ३३ इतिश्रीभावार्थेदशमस्कंधेत्रयस्त्रिंशोध्यायः ३३ चतुस्त्रिंशेहिनागस्थंनंदंहरिरमूमुचत् वि
द्याध्रंचांगिरसःशापाच्छंखचूडंयथावधीत् गतोपदेशतःकामंकिंकरीकृतकामतः अन्वशहयान्वशंनिमे

श्री
भाग
पूर्वे
।५।

141

तदेवं कामानुग्रहकृतेन कामं तत्रयं प्रतिपाद्य तथैव विद्याधरजन्मश्रीनिपातविञ्चं तस्य संगंदर्शयति एक
देति १ २ गावः गाः मधु मधुरं मधवन्नं मधुनाससहितमन्नं देवः शिवः ३ जलमात्रं प्राश्य उपोषिताः तो।

शुक उवाच एकदा देवयात्रायां गोपाला जातकौतुकाः अनोभिरनडुद्युक्तैः प्रययुस्तेम्बिकावनं १
तत्र स्नात्वा सरस्वत्यां देवं पशुपतिं विभुं आनर्चुरर्हणैर्भक्त्या देवीं च नृपतेम्बिकां २ गावो हिर
ण्यं वासांसि मधु मध्वन्नमादृताः ब्राह्मणेभ्यो ददुः सर्वे देवो नः प्रीयतामिति ३ ऊषुः सरस्वती
तीरे जलं प्राश्य यतव्रताः रजनीं तां महाभागा नंदसुनंदकादयः ४ कश्चिन्महानहिस्तस्मिन्वि
पिनेतिबुभुक्षितः यदृच्छयागतो नंदं शयानमुरगोग्रसीत् ५ स चुक्रोशाहिना ग्रस्तः कृष्ण कृष्ण
महानयं सर्पो मां ग्रसते तात प्रपन्नं परिमोचय ६ तस्य चाक्रंदितं श्रुत्वा गोपालाः सहसोत्थिताः
ग्रस्तं च दृष्ट्वा विभ्रांताः सर्पं विव्यधुरुल्मुकैः ७ अलातैर्दह्यमानोपि नामुंचत्तमुरंगमः तमस्पृशत्
पदाभ्येत्य भगवान्सात्वतां पतिः ८

निशां तत्र ऊषुः न्यवसन् ४ महान् हिरण्यगात्रः उरगः उरसा गच्छतीति सलक्षितः।
तमुरुकं मग्रसीत् जग्राह ५ ६ विव्यधुस्ताडयामासुः उल्मुकैर्ज्वलितकाष्ठैः ७ अलातैस्तैरेवोल्मुकैः ८॥५॥

विद्याधरेन्द्रविविनेर्चिते ९ गोपेन्द्रात्मनरैश्वर्यप्रकाशयितसविद्यानिवतमस्कृत् दीप्यमानेनवपुषासमवा।
स्थिते १० यः परयाशोभयाप्रकाशानेसभवान्कइति ॥ ११ प्राहसंउपहसितवानस्मिप्रलब्धैरूपदर्सितैर्म।

सद्यैभगवतः श्रीमत्पादस्पर्शहताशुभः भेजेसर्पवपुर्हित्वारूपंविद्याधरार्चितं ९ तमपृच्छद्धृषीके।
शः प्रणतंसमवस्थितं दीप्यमानेनवपुषापुरुषंहेममालिनं १० कोभवान्परयालक्ष्म्यारोचतेद्भु
तदर्शनः कथंजुगुप्सितामेतांगतिंवाप्रापितोवशः ॥ सर्पउवाच अहंविद्याधरःकश्चित्सुदर्शनइति
श्रुतः श्रियास्वरूपसंपत्त्याविमानेनाचरन्दिशः १२ ऋषीन्विरूपानंगिरसः प्राहसंरूपदर्पितः तैरि।
मांप्रापितोयोनिंप्रलब्धैः स्वेनपाप्मना १३ शापोमेनुग्रहायैवकृतस्तैः करुणात्मभिः यदहंलोक
गुरुणापादस्पृष्टोहताशुभः १४ तंत्वाहंभवभीतानांप्रपन्नानांभयापहं आपृच्छेशापनिर्मुक्तःपाद
स्पर्शादमीवहन् १५ प्रपन्नोस्मिमहायोगिन्महापुरुषसत्पते अनुजानीहिमांदेवसर्वलोकेश्व।
रेश्वर १६ ॥

दीर्घेनैवपायेननिर्मितेन १२ यद्यतः शापात् लोकगुरुणात्रैलोक्यनाथेन १४ आपृच्छेस्वंलोकंगं।
तुमनुज्ञांयाचे अमीवहनदुःखनाशक १५ १६ ॥

श्री
भाग
पुली
१४२

142

१७ १८ १९ श्रीहृदेहं निहत्यैवं प्रागमद्वं स्वदर्शने तद्द्रुमादिनैकः ससःशोविह्वुडमताडयत् तन्मसंगमाह
कदाचिदिति २० विरजौ वरावित विरजसी निर्मलेयुवेरेयथोत्तो २१ किंच निशाप्रवेशं सत्कुर्वतो।

वल्लदेशहिमकोदकमयसेकृत दर्शनात् यत्रामगृहणत्राविलातत्र्योनृणात्मानमेवच सद्यः
पुनातिकिंभूयस्तस्य स्पृष्टः पदाहिते १७ इतिनत्ताप्यदाशार्हं परिक्रम्याभिवंद्यच स्वदर्शनोदि
वंयातः कृष्णाद्रेहस्वमोचितः १८ निशाम्यकृष्णस्यतदात्मवैभवंव्रजौकसोविस्मितचेतसस्ता।
नः समाप्यतस्मिन्नियमंपुनर्व्रजंनृपोपाययुस्तत्कथयंतआदृताः १९ कदाचिदथगोविंदोरा।
मश्चाद्भुतविक्रमः विजह्रतुर्वनेरात्र्यांमध्यगौव्रजयोषितो २० उपगीयमानौललितंस्त्रीजनैर्व
द्धसौहृदैः स्वलंकृतानुलिप्तांगौस्रग्विणौविरजोवरौ २१ निशामुखंमानयंतावुदितोडुपता
रकं मल्लिकागंधमत्तालिजुष्टंकुमुदवायुना २२ जगतुःसर्वभूतानांमनःश्रवणमंगलं तौ
कल्पयंतौयुगपत्स्वरमंडलमूर्छितं २३

उदितउडुपस्तारकाश्चयस्मिंस्तत् मल्लिकागंधेनमत्तायेअलयस्तैर्जुष्टं सेवितं २२ ध्वनिवाहनात् द्वेधायुगप
त्कल्पयंतौ मग्नकामपितौस्वरमंडलमूर्छितंयुगपत्कल्पयंतौमनःश्रवणयोमंगलंयथाभवतितथा।

मूर्छितान्सख्यौतलीनविना संमस्तुष्टादुगूलं यस्मान्नमात्मानं देहं सस्मा: केशोभ्य: सत्नोयस्यतेच नाना
विदन् २४ २५ निरीक्षनो निरीक्षमाणयो: नौनाथौ पश्यतेकालयामास यथात्मेरयामास २६ दस्युनाख्याते

गोप्यस्तत्रैव माकर्ण्य मूर्छितानाविद्रूप संमदगूलमात्मानं सखलकेशाख्यंततः २४ एवं वि।
क्रोडतो: स्वैरं गायतो: संभ्रमनवन् शांखचूडइति ख्यातो धनदानुचरोभ्यगात् २५ तयोर्निरीक्षतो
राजंस्तत्राथं प्रमदाजनं क्रोशंतं कालयामास दिश्युदीच्यामशंकितः २६ क्रोशंतं कृष्णरामेति।
विलोक्य स्वपरिग्रहं यथा गा दस्युना ग्रस्ता भ्रातरावन्वधावतां २७ माभैष्टेत्यभयारावौ सालद्
स्तौ न रक्षिनौ आसेदतुस्तं तरसा त्वरितं गुह्यकाधमं २८ सवीक्ष्य तावनुप्राप्तौ कालमृत्यूइवोद्वि
जन् विसृज्य स्त्रीजनं मूढः प्राद्रवज्जीवितेच्छया २९ तमन्वधावद्गोविंदो यत्रयत्र सधावति जिही
र्षुस्तच्छिरोरत्नं तस्थौ रक्षन्स्त्रियो बलः ३० अविदूर इवाभ्येत्य शिरस्तस्य दुरात्मनः जहार मुष्टिनै।

वांगसह चूडामणिं विभुः ३१

ण। २७ माभैष्टभयं माप्नुवतेत्यभयवाचौ २८ २९ ३०: शिरसा सह चूडामणिं जहारेत्यर्थः ३१। एम:

श्री
भाग
टी
१०

143

३२ इति श्रीभावार्थदीपिकायां दशमस्कंधे चतुस्त्रिंशोऽध्यायः ३४ पंचत्रिंशे वने याते कृष्णे गोकुलयोषितः युग्मश्लो-
काभिर्गीतेन तद्ध्यानापनीयंते एवं रात्रिषु कृष्णेन सह रमभिरमितानां दिवा तद्विरहितानामनुगीतेन नि-
नाय प्रकारमाह गोप्य इति दुःखेन कृच्छ्रेण वामबाहुकृतवामकपोल इत्यादीनि द्वादशयुग्मानीति १
हे गोप्यः वामबाहोर्मूले वा कृतोऽर्पितो वामकपोलो येन सः वल्गिते नर्तिते भ्रुवौ येन स वल्गितभ्रुः मु-

शंखचूडं निहत्यैवं मणिमादाय भास्वरं अग्रजायाददात्प्रीत्या पश्यंतीनां च योषितां ३२ इति
श्रीभागवते दशमस्कंधे चतुस्त्रिंशोऽध्यायः ३४ श्रीशुक उवाच गोप्यः कृष्णे वनं याते तमनुद्रुतचे-
तसः कृष्णलीलाः प्रगायंत्यो निन्युर्दुःखेन वासरान् १ गोप्य ऊचुः वामबाहुकृतवामकपो-
लो वल्गितभ्रुरधरार्पितवेणुं कोमलांगुलिभिराश्रितमार्गं गोप्य ईरयति यत्र मुकुंदः २ व्योम-
यानवनिताः सह सिद्धैर्विस्मितास्तदुपधार्य सलज्जाः काममार्गणसमर्पितचित्ताः कश्मलं

कुंदः अधरेऽर्पिते वेणौ कोमलाभिरंगुलीभिराश्रिता मार्गाः सप्तस्वरच्छिद्रस्थानानि यस्य तं यत्र यदा ईरयति
वादयति २ तदा व्योमयानानां सिद्धानां वनिताः सिद्धैः स्वपतिभिः सह वर्तमाना अपि तद्वेणुरवमुप-
धार्याकर्ण्य प्रथमं विस्मिताः ततः काममार्गणेभ्यः समर्पितानि चित्तानि याभिस्ताः ततस्तद्वशा अभवन् त-
स्माच्च सलज्जाः सत्यः कश्मलं मोहं ययुः अपस्मृता विस्रस्ता नीव्यो याभिरिति एतत् एवंभूतस्य

दंतैर्देशवलाः रदं चित्रं स्पृष्टेन हारद्वासः हारवद्विशदो हासो यस्य सः यद्वा वेणुवादनप्रयोगवदनेन सहदंतो
हारेषु स्फुरन् हासो यस्य हारवद्धावदतः स्मितशोभमानो हासो यस्य सः यद्वा हारगणो हासश्च विशदाः सूर्तिर्य
स्मिन्स तथा स्मितेन उरसि स्थिरा विद्युदिव लक्ष्मीर्यस्य सः यद्दियतकान्तनवेणुनादितवेणुर्भवति ४ तदा च
नेयेहूषा गावश्च वेणुवाद्येनहृतानि चेतांसि येषां ते अभ्यान् हयान् दंतैर्दष्टाः कवलाग्रा मार्थः तेषु प्राप्तता

दंतचित्रमवलाः स्पृष्टेनेदं हारवद्वास उरसि स्थिरविद्युत् नंदसूनुमयमार्तेननानातनर्महेयदिकृति
तवेणुः ४ इत्यशेषेवजनहृषा मृगा गावा वेणुवाद्यहृतचेतसः आरात् दंतदष्टकवलाधृतकर्णाः
निद्रितालिखितचित्रमिवासन् ५ वर्हिणः स्तवकधातुपलाशैर्वद्धमल्लपरिवर्हविडंबः कर्हि
चित्सवलआलि सगोपैर्गाः समाह्वयति यत्र मुकुंदः ६ ॥

मुकुंदिताः कर्णायैस्ते निद्रितास्वलिखितचित्रमिवचास्मन् अतिवर्त्तमानिरहासमिदमतिचित्रमित्यर्थः ५
किंच प्रचेतनाः सरसि तिस्मन्रतीवविचित्रमित्याह वर्हिआलिसवि वर्हिणोमयूरस्तवकामयूरपिच्छाः धा
तवो गैरिकाद्यः पलाशानि पल्लवाश्च तैर्वद्धश्चासौ मल्लानां परिवर्हः परिकरस्तेविडंवपतिकरोतिर
ति तथा मुकुंदो गोपैः सह वेणुनेमपरितनं प्रज्ञापितानयं यत्र यदागाः समाह्वयति ६ ॥

श्री
भाग
दश
१५४

तर्हि तदा तन्नवंशध्वनिश्रवणाद्गलितीनानीनं यस्य पदांबुजरजः स्पृहयंत्यश्च भग्नगतयः सरितो वैति ।
स्मिन् वयमिव ना अबहुपुण्याः यतो न प्राप्नुवंति केवलं प्रेमणा वेपिताः कम्पिता भुजास्तरंगा या
सां ताः स्तिमिता निश्चला आपो यासां ताः गोप्योपि एवंविधं कृष्णं स्मृत्वा लोचनयोः स्तिमितजला भवं ।
तीति ७ स्थावरेष्वति विचेष्टश्पनस्माह अनुचरैर्गोपैर्देवादिभिर्वा भगवानां वाकं आदिपूरुषश्च

तर्हि भग्नगतयः सरितो वै तत्पदांबुजरजोनिलनीतं स्पृहयतीर्वयमिवाबहुपुण्याः प्रेमवेपि
तभुजाः स्तिमितापः ७ अनुचरैः समनुवर्णितवीर्य आदिपूरुष इवाचलभूतिः वनचरो गि
रितटेषु चरंतीर्वेणुनाह्वयति गाः स यदा हि ८ वनलतास्तरव आत्मनि विष्णुं व्यंजयंत्य इव पुष्प
फलाढ्याः प्रणतभारविटपा मधुधाराः प्रेमहृष्टतनवः ससृजुः स्म ९

ति अचलभूतिः निश्चलश्रीः वेणुनाननुत्राम्नागावेन ८ तदा पुष्पणाभारेण विटपाः शाखा यासां
ता वनगतालताः स्वस्मिन् लिंगप्रकाशमानं सूचयंत्य इव मधुधाराः प्रववृषुः स्रवेति विस्मये तरवश्च ।
तथानम्रतीनामपि नन्देवानंद इति भावः एतानि विष्णुभक्तिलक्षणानि ९ ॥

१५४

144

किंच सरसिकमलवनेषु विहरतां पत्तिणामपि मनस्त्राकर्षणं तद्गीतं पुनरन्येषामित्याहुः दृशानीयति
लक इति दृशानीयस्तिलको यस्य दृशनीयानां संदराणां मध्ये मुख्य इति वा वनमालास्त्र्या दिव्यगंधात
सीतस्याः मधुना मत्तैरलिकुलैः अलचुरुद्यैः अभीष्टमनुकूलं गीतं आदिशन आदेशेन गृह्णन यदिष्य
रमेपितवेणुर्भवति ७ तदियमरसिसारसाः हंसाः अन्येचविहंगाः श्रुतेणागीतेन स्यन्नचेतसः पन्न।

दृशानीयतिलकोवनमालीदिव्यगंधतुलसीमधुमत्तैः अलिकुलैरनुगीतमभीष्टमादिशन्यदि।
संपितवेणुः ७ सरसिसारसहंसविहंगाश्चारुगीतहृतचेतसएत्य हरिमुपासततेयतवि
तादृतमीलितदृशोधृतमौनाः ॥ सहबलःस्रगवतंसविलासःसानुषुक्षितिभृतोव्रजदेव्यः
हर्षयन्हिवेणुरवेणजातहर्षउपरंभतिविश्वं ९

ततआगत्यहरिमुपासतअभजत तत्समीपेउपविश्य वा हंतेतिविषादे ॥ मेघोपिहरिंसेवतइत्याहुः
सहबलइति भोव्रजदेव्योगोप्यः सहबलः सरामःकुसुमः स्रग्भिर्निर्मिताभ्यामवतंसाभ्यांकर्णभूषणा
भ्यांविलासोयस्य यद्वा मुक्ताफलस्रगापीडेनविलासोयस्येति क्षितिभृतःसानुषुगिरेःस्थलेषुवर्तमा
नःस्वयंजातहर्षोविश्वंहर्षयन यदावेणुरवेणोपरंभतिनिनादयतिनादेनापूरयतीत्यर्थः ९ ॥

श्री
भाग
पुटी
१५५

145

तद्दामबद्धः श्रीकृष्णस्यातिक्रमणशंकितं चेतो यस्य सः न पुनः रूपवितो याति न चोच्चैर्गर्जति किं तर्हि ।
व्यवस्थितः सन् वेणुरवमनु मंदं मंदं गर्जतीति किं च सुहृदं विष्णातिद्रगणादिमात्यात् सख्युः श्रीकृष्णस्य
तेसुमनोभिरभ्यवर्षत् अत एव पुष्पैर्दैवैः क्रियमाणं कुसुमवर्षं मेघे कल्पयितोक्ते न धारो वा कुसुमसमतः ।
याकल्पितः स एव वा देवनादृष्टो ऽभ्यवर्षदिति अनातपादातपात्त्राणत इति शतपत्रेणच्छत्रेण च्छायया
करोतीति ॥ १३ ॥ अपि च महदतेनदास्यर्थंमिस्याद्दः विविधेति द्वे सति यशोदे तव सुतो नानागोपक्रीडा

महदतिक्रमणशंकितचेता मंदमंदमनुगर्जति मेघः सुहृदमभ्यवर्षत्सुमनोभिश्छायया ।
च विदधत्स्वातपत्रम् ॥ १३ ॥ विविधगोपचरणेषु विदग्धो वेणुवाद्य उरुधा निजशिक्षाः तव सुतः
सति यदाधरविंबे दत्तवेणुरनयत्स्वरजातीः ॥ १४ ॥ सवनशस्तदुपधार्य सुरेशाः शक्रशर्वपर
मेष्ठिपुरोगाः कवय आनतकंधरचित्ताः कश्मलं ययुरनिश्चिततत्वाः ॥ १५ ॥

सविदग्धो निपुणो वेणुवाद्य विधयेति जैवशिक्षा या सतः स्वोष्ठे निनानत्र्यन्तः श्रुता उत्यर्थः
स्वरजातीः निषादर्षभादिस्वरालापभेदान् अनयत् उन्नीतवान् ॥ १४ ॥ ततस्ताः स्वरजातीः सवनशः ।
मंद्रमध्यमतारभेदेन यत्नो गीतधैर्यविरागाननस्तत्रानननाकंधराचितं च येषां ते उपधार्य सम्यगाक
र्ण्य कवयः कोविदा अपि ते न निश्चितं तत्वं नादैरूपं यैस्ते कश्मलं मोहं ययुरिति ॥ १५ ॥

१५५

अस्माकं न मोदे किं ब्रूमः स्माहुः निजपदाब्जदलैरिति ध्वजादीनि विचित्राणि ललामानि चिह्नानि येषां तैः निजानि पदान्येवाब्जदलानि तैर्व्रजभुवः खुरतोदं खुरक्रमणव्यथां शमयन् वर्ष्मणा धुर्यो गजस्तद्वद्गतिर्य। स्म सकृत्क्षोभादितवेणुः सन्नयद्व्रजति ॥१६॥ तेन निमित्तेन सविलासवीक्षणेनार्पितो मनोभववेगः या।

निजपदाब्जदलैर्ध्वजवज्रनीरजाङ्कुशविचित्रललामैः व्रजभुवः शमयन्खुरतोदं वर्ष्मधुर्यगति
रीरितवेणुः ॥१६॥ व्रजति तेन वयं सविलासवीक्षणार्पितमनोभववेगाः कुजगतिं गमिता न वि
दामः कश्मलेन कवरं वसनं वा ॥१७॥ मणिधरः क्वचिदागणयन्गा मालया दयितगन्धतुलस्याः।
प्रणयिनोऽनुचरस्य कदांसे प्रक्षिपन्भुजमगायत यत्र ॥१८॥

वयं कुजा वृक्षास्तेषां गतिं गमिताः सम्मोमोहेन न विदामः कवरं वासनं वेति ॥१७॥ किंच मणिधरो मणी
न्ग्रथिता न गोगणार्थं धारयतीति मणिधरः क्वचिद्देशे मणिभिरास्मं नाम्नां गाः गणयन् तथा दयितगन्धा
या तुलस्या तुलस्या मालया सह वर्तमानः प्रणयिनः प्रियस्यानुचरस्यांसे भुजं प्रक्षिपन् यत्र कदाचिद्गायत ॥१८॥

नदा कृष्णेन वेणुरवेणैवं विनाम्यपद्मनानि विमानियासांनाः कृष्णस्यद्विणास्य गृहिण्येषो भार्योः गुणगणां
णांगेगुणस्य शुद्धं कृष्णस्य मनुगानस्य श्राव्यनाः कृष्णमेवाल्पस्तनपल्लासन नमवर्तनारुत्थेः ऊनोघनो विशुक्का
गृहाशायाभिलाः गोपिकाश्चताश्रपिपस्त्यैवमेवाल्पासमतेति ॥१९॥ तदेवं वृन्दावनप्रदेशेषु क्रीडितमथाद्दे
गोधनानि पराहूनस्य यमुनायां क्रीडनस्तस्य सौभाग्यमनुवर्णयंति ॥ कुंददामकृतकौतकवेषइत्यादि गो।
पीनामुत्तस्य वायकुं दटामभिः कृतः कौतकेनोत्सवेन वेषो लंकारो येन सः देवगन्धर्वयशो देववन्तः प्रवोने।

कृष्णेन वेणुरवेणैवं चिन्तचिनाः कृष्णमल्पसन्तकृष्णगृहि एवः गुणगणार्णामनुगानस्य द्विरिणो गो।
पिकाश्च विमुक्तगृहाशाः ॥१९॥ कुंददामकृतकौतकवेषो गोपगोधनवृतो यमुनायां नंदसूनुर
नघेन तव वत्सो नर्मदः प्रणयिणां विजहार ॥२०॥ मंदवायुरुपवात्यनुकूलं मानयन्मलयजस्पर्शो।
न वंदिनस्तमुपदेवगणाये वाद्यगीतबलिभिः परिवव्रुः ॥२१॥ सदैवं व्रह्माः कथयंत्यः
दसूनुः कृष्णः यद्वा
काश्चिन्नववनस्थानि काश्चिद्वंदसूनुरिति वाहुः नर्मदो हर्षदः सन्यदा विजहार क्रीडति स्म ॥२०॥ तदा मलयज
स्पर्शेन तस्यैव सुरभिः शीतमृदुः स्पर्शो लेनैनं कृष्णं मानयन् अनुकूलं यथा नथोपवानि वीजयति यद्वा म
लयजो दक्षिणो वायुः यद्वा मलयजस्य कृष्णस्य न वांगेनुलिम स्पस्पर्शेन मानयत्रिति किंच वंदिनश्च वन्दा
वकाः सेनो गंधर्वादिगणाः वाद्यगीतपुष्पवर्षादिभिः परिवव्रुः परितः उपासत ॥२१॥

धे

प्रथयाथांतमालोकाल्लुञ्छनैः परस्परमूचुः वत्सल इति व्रजस्य गवां च यद्वा वत्सेतिवद्बालो गवामनुकम्पा
नामस्माकमित्यर्थः वत्सलो हितकृत् कृतः यद्यस्मात् गावः अगंथरत्नी तिमोवृर्णतोहाटकाः वद्धशोरत् ।
मानस्योपलक्षणमेतत् वृद्धैर्ब्रह्मादिभिः पथिसर्वैर्वंद्यमानचरण इत्यर्थः सायंशीघ्रमागंतुं नंदयतीत्यर्थः
उपोह्य एकीकृत्य गीतमुक्तो वेणुर्येन सः २२ अथमधुकरापिकांस्यानेत्राभ्यां हर्षमूत्रयन् उच्चैः प्रापयन् ।

वत्सलो व्रजगवां यदगध्रो वंद्यमानचरणः पथिवृद्धैः कृत्स्नगोधनमुपोह्य दिनांते गीतवेणुरनुगे
डितकीर्तिः २२ उत्सवं श्रमरुचापि दृशीनामुन्नयन् खुररजश्छुरितस्रक् दित्सयैति सुहृदाशि
षएष देवकीजठरभूरुडुराजः २२ मदविघूर्णितलोचन ईषन्मानदः स्वसुहृदां वनमाली ब
दरपांडुवदनो मृदुगंडं मंडयन्कनककुंडललक्ष्म्या २४

खुररजोभिश्छुरिता स्रग्

मा: स्वजनोयस्य सः सुहृदाम् ।
स्माकमाशिषो मनोरथस्य दित्सया दातुमिच्छया देवक्या जठरे भवतीति तथा स एव उडुराजश्चन्द्र इति द्वेतवे
न स्रपयतीति २२ श्रान्तिसंभ्रमेण काश्चित्समीपमायांतं कथयंति ईषन्मदेन विघूर्णिते विह्वलितलोच
नेयस्य सः बदरपांडुवदनः ईषत्पक्वबदरवत्पांडुवदनं यस्य सः प्रवहन् कनककुंडलयोर्लक्ष्म्या कोमलमृदुको
मलोगंडो यस्मिन् स्वहृद्वदनं मंडयन् कोमलं गंडस्थलं शोभयन्नित्यर्थः २४ ॥

श्री भाग दशं १५८

147

यदुपतिर्देवकीजठरभूरिति प्रागयं वसुदेवस्य क्वचिज्ज्ञातस्तवात्मजः इत्यादिगर्गवाक्यप्रसिद्धोक्तं यद्वा। स एव उदेष्यति वास्मान् तत्कालेऽनिवर्त्तताकांक्षिहृदं तीति गजेंद्रगतिः चेद्दृश्वषसत्रवक्रो व्रजस्यावामस्माक मनंते दिनतापं च श्रामयन्नुपयाति समीपमायातीति ३५ एवं विरहदुःखेनापि वृन्दावनौकसां लीलापवा। गायंत्यः तस्मिंश्चित्तेनैव नीविते यासां ताः तस्मिन्नेव मनः संकल्परूपं यासां ताः प्रतीतमहानंदयद्वा उत्सवो

यदुपतिर्द्विरदराजविहारो यामिनीपतिरिवैष दिनांते मुदितवक्त्र उपयाति दुरंतं मोचयन्व्रजगवां दिनतापं २५ श्रीशुक उवाच एवं व्रजस्त्रियो राजन्कृष्णलीलानुगायतीः रेमिरेऽहःसु तच्चित्ता। स्तन्मनस्का महोदयाः २६ इति श्रीभागवते दशमस्कंधे वृंदावनक्रीडायां गोपीकागीतं नाम पंचत्रिंशोऽध्यायः ३५ ॥

यासां ताः अहःसु अपि रेमिरे २६ इति श्रीभावार्थदीपिकायां दशमस्कंधे पंचत्रिंशोऽध्यायः ३५ षट्। त्रिंशे निहते रिष्टे नारदेनाथ बलाच्युतौ वसुदेवसुतौ ज्ञात्वा कंसोऽक्रूरमथादिशत् गोपीरामानदायानं शोकं बहू दूरे निहतमसः अहन्गोपीमहानंदासदे षट्त्रिंशके १ ॥

१८

एवं देवगंधर्वादिगीतनृत्तवाद्यकृतसम्मवर्षादिभिः कृष्णं प्रशंसत्सु परमोत्सवे वर्तमाने तद्विरुद्धार्थम्
न राधिकार्यमशक्तः तर्हि तदा वृषभाकृतिरसुरो गोष्ठमागतः तं वर्णयति सार्धत्रयेण महीमिति ककुत्का-
यो यस्य सः खुरैर्विदारितां महीं कंपयन् १ रंभमाणः वृषभजातिशब्दं कुर्वन् विलिखन् विदारयन् उद्य-

श्रीशुक उवाच अथ तर्ह्यागतो गोष्ठमरिष्टो वृषभासुरः महीं महाककुत्कायः कंपयन्खुरविक्षतां ।
रंभमाणः खरतरं पदा च विलिखन्महीं उद्यम्य पुच्छं वप्राणि विषाणाग्रेण चोद्धरन् २ यस्य निर्ह्रा-
दितेनांग निष्ठुरेण गवां नृणां पतंत्यकालतो गर्भाः स्रवंति स्म भयेन च ३ निर्विशंति घना यस्य कक-
द्यचलशंकया तं तीक्ष्णशृंगमुद्वीक्ष्य गोप्यो गोपाश्च तत्रसुः ४ पशवो दुद्रुवुर्भीता राजन्संत्य-
ज्य गोकुलं कृष्णकृष्णेति ते सर्वे गोविंदं शरणं ययुः ५ भगवानपि तद्वीक्ष्य गोकुलं भयविद्रुतं माभै-
ष्टेति गिराश्वास्य वृषासुरमुपाह्वयत् ६

पुच्छमूर्ध्वं कृत्वा वप्राणि तटान् उत्क्षिपन् किंचित्किंचित् शकृत् मुंचन् ईषदीषत्पुरीषं मुंचन् तथा मूत्रयन्स्त-
ब्धलोचनः २ यस्य ध्वनिना गवां नारीणां च गर्भाः पतंति स्रवंति च तत्र प्राक्तनयोः गर्भावस्थयोः पातः ।
पंचमषष्ठयोः स्रावः पश्चादुत्तरयोः स्रुतिः स्यादिति गर्भस्य कीर्तिते विभागः ३ ककुदि अचलशृंगे ४ कृष्णकृष्ण

५५

हरि

श्री
भाग
पुरी
१४८

148

१ इत्येवं वदन्नुग्रास्फोटकरतलेन वाहूमाहत्य तेन तलशब्देन कोपयन् भुजाभोगं भुजाभुजः सएव भोगः सर्पदेहस्तं सर्पाकारं भुजं सख्युः स्कंधे निधायेति भयाभावो दर्शितः समर्थः स्वयमच्युतः अन्यान्दुष्टान्हरतीति हरिः ८ उपनाह्यध्वंगच्छता पुच्छेन भ्रमंतो मेघा यस्मिन्सः ९ अग्रन्यस्तं विषाणाग्रं येन सः स्तब्धे असृ

गोपालैः पशुभिर्मन्द त्रासितैः किमसत्तम बलदर्पहाहं दुष्टानां त्वद्विधानां दुरात्मनां ७ इत्यास्फो।
टाच्युतोरिष्टं तलशब्देन कोपयन् सख्युरंसे भुजाभोगं प्रसार्यावस्थितो हरिः ८ सोप्येवं कोपितो।
रिष्टः खुरेणावनिमुल्लिखन् उद्यत्पुच्छभ्रमन्मेघः क्रुद्धः कृष्णमुपाद्रवत् ९ अग्रन्यस्तविषाणाग्रः
स्तब्धासृग्लोचनोच्युतं कटाक्षिप्याद्रवत्तूर्णमिंद्रमुक्तोशनिर्यथा १० गृहीत्वा शृंगयोस्तं वा अष्टा
दश पदानि सः प्रत्यपोवाह भगवान्गजः प्रतिगजं यथा ११ सोपविद्धो भगवता पुनरुत्थाय सत्वरं।
रः आपतत्स्विन्नसर्वांगो निःश्वसन्क्रोधमूर्छितः १२ तमापतंतं स निगृह्य शृंगयोः पदा समाक्रम्य नि
पात्य भूतले निपीडयामास यथार्द्रमंबरं कृत्वा विषाणेन जघान सोपतत् १३

कस्य लोचने यस्य सः कटाक्षिप्य कटाक्षेण तिर्यक् निरीक्ष्य १० प्रत्यपोवाह प्रतिलोमं प्रणुनोद ११ अपवि
द्धः प्रक्षिप्तः आपतत् कृष्णं प्रत्याद्रवत् स्विन्नानि स्वेदयुक्तानि सर्वांगानि यस्य सः क्रोधमूर्छितः क्रोधे।
न व्याप्तः १२ कृत्वा विषाणं वमाक्षते नैव जघान स च आपतत् १३ ॥

१४८

मूत्रशकृत मूत्रेण शकृता च एकवद्भावः तदुभयं समुत्सृजन् त्रिपर्यस्तः पादाभ्यां विपतितस्तनमालयन्नवस्थिते
क्षणाः प्रचलितनेत्रः कृच्छ्रं कष्टं जगाम प्राप च निनदतः मृत्योः स्वयं निवासं जगाम यद्वा कृच्छ्रं यथा भवति।
तथा मृतः इति वा ॥ नयनोत्सवः नयनानां मूर्तिमानुत्सवः ॥ कामं ब्रजेऽवसन्नेनं कृष्णमेत्य गतस्मृति।
नारदः स्मारयामास कंसं हृतगिरं वन तदाह प्रविष्टइति देवदर्शनो देवर्षिः यद्वा एवं कृतेन एवं भविष्यं।

प्रसवमन्यमूत्रशकृत्स्वमुत्सृजन् विपर्यस्तपादाननवस्थितेक्षणाः जगाम कृच्छ्रं निधनं ततः स्वयं पुष्पैः
किरन्तो हर्षमीडिरे ग्राः ॥ एवं कृष्णमिनंदन्नाक्ष्यमानः स्वज्ञातिभिः विवेश गोष्ठं सबलो गोपी
नीनयनोत्सवः ॥ प्रविष्टे निहिते देवेन कृष्णेनाद्भुतकर्मणा कंसायाथाह भगवान्नारदो देवद-
र्शनः ॥ यशोदायाः सुतां कन्यां देवक्याः कृष्णमेव च रामं च रोहिणीपुत्रं वसुदेवेन विभ्यता न्य-
स्तौ स्वमित्रे नंदे वै याभ्यां ते पुरुषा हताः ॥

नीतिस्यादाद देवदर्शन स्वानेयस्य सः ॥ प्रागेनैव नाद देवेनोक्तमाह यशोदाया इति देवक्या अष्टमगर्भत्वे-
न प्रसिद्धां कन्यां यशोदायाः सुतामाह यशोदायाः सुतत्वेन प्रसिद्धं कृष्णं देवक्याः सुतमाह रोहिणीपुत्रं राम-
व देवक्याः सप्तमं सुतमाह यद्वा नंदसुतत्वेन प्रसिद्धं रामं च वसुदेवभार्यायाः रोहिण्याः पुत्रमाह नन्वसौ
देवसुतो वेत्त कथं ब्रजं गतौ तत्राह वसुदेवेनेति ॥

१८ निवारितस्तिष्ठन्नेव वसुदेवेनोपलायितौ भ्रातोवध्यत्वमितिमद्वंवदतानारदेननिवारितइति १९ २० २१

निशम्यतद्भोजपतिःकोपात्प्रचलितेंद्रियः निशातमसिमादत्तवसुदेवजिघांसया १८ निवारितो
नारदेनतत्सुतौमृत्युमात्मनः ज्ञात्वालोहमयैःपाशैर्बबंधसहभार्यया १९ प्रतियातेतुदेवर्षौकंस
आभाष्यकेशिनं प्रेषयामासहन्येतांभवतारामकेशवौ २० ततोमुष्टिकचाणूरशलतोशल
कादिकान् अमात्यान्हस्तिपांश्चैवसमाहूयाहभोजराट् २१ भोभोनिशम्यतामेतद्वीरचाणूर
मुष्टिक नंदव्रजेकिलासातेसुतावानकदुंदुभेः २२ रामकृष्णौततोमह्यंमृत्युःकिलनिदर्शितः
भवद्भ्यामिहसंप्राप्तौहन्येतांमल्ललीलया २३ मंचाःक्रियंतांविविधामल्लरंगपरिश्रिताः
पौराजानपदाःसर्वेपश्यंतुस्वैरसंयुगम् २४ महामात्रत्वयाभद्ररंगद्वार्युपनीयतां द्विपःकुवलया
पीडोजहितेनममाहितौ २५

मल

२२ मह्यंममनिदर्शितःविधात्रानारदेनवा व्रजेगोनमुदितौनावाद भवद्भ्यामिति २३ मंचाःउत्तुंगास्तंभा
दिरचितस्थानानि २४ अहितौशत्रू २५ ॥

मीरुषेवरदाय ॥ प्रार्थ्यंतंत्वमर्थमिहांतमेवजानानातीमर्थ्यंतेचततः ॥ दानपतेप्रक्रमैत्वंमित्रक्रमंतंनयाक्रि
यतांनतोऽन्यप्राहततःस्तात्सोहितंतमम्बनविघतइति ॥ स्त्रार्थंहृत्वयोदिनादिशास्यं ॥ अनेनाःतिमनो

आरभ्यतांधनुर्यागप्रतर्दयोयथाविधिः विशसंतपम्बुलेपान्भूतगणनायमीदृषे ॥ इत्याता॥
प्यार्थतेचतप्राहूययदुपुंगवं गृहीत्वापाणिनापाणिंततोक्रूरमुवाचह ॥ केसउवाच भोभोदान
पतेमह्यंक्रियतांमैत्रमादृतः नान्यस्त्वत्तोहितंतमोविघतेभोजवृष्णिषु ॥ अतस्त्वामाश्रितं सो
म्यकार्यगौरवसाधनं यथेंद्रोविष्णुमाश्रित्यस्वार्थमध्यगमद्विभुः ॥ गच्छनंदव्रजंतत्रसुतावान
कदुंदुभेः आसाते नविद्वानेनरथेनानयमाचिरं ॥ निसृष्टःकिलमेमृत्युर्देवैर्वैकुंठसंश्रियैः ना
वानयसमंगोपैःनंदाद्यैःसाभ्युपायनैः ॥ घातयिष्यइहानीतौकालकल्पेनहस्तिना यदिमुक्तौ
ततोमल्लैर्घातयेवैद्युतोपमैः ॥ तयोर्निहतयोस्तप्तान्वसुदेवपुरोगमान तद्बंधून्निहनिष्यामिवृ
ष्णिभोजदशार्हकान ॥

हृष्णारथेन ॥ तोमेमृत्युनितरांसुहृष्टःवैकुंठसंश्रियैर्विसृष्टसंश्रयैर्देवैः ॥ किंतन्नसभाद् ज्ञानयिष्यइति
कालकल्पेनमत्तवलेन वैद्युतोपमैरशनितुल्यैः ॥ ॥ ॥

३४ नष्टकंटकान् नष्टशत्रुः नन्वकतिपयसत्त्वहृयेन नष्टकंटकाः कथं स्याम अत आह जरासंधेयप्रभृति ३५ ३६ उष्ट्रं चेति तत्स्य स्वस्ति ३७ मनीषितं विचारितं सम्यक् स्वावद्यमरणे तन्मार्जने नष्टाप्येनाज्ञानभिनिवेशेन कार्ये इ-ति भावः स्वावद्यमाह सिद्ध्यसिद्ध्योरिति ३८ पुरुषकारस्य व्यभिचारमाह मनोरथानिति ३९ ४० इति श्री।

उग्रसेनं च पितरं स्थविरं राज्यकामुकं तद्भ्रातरं देवकं च ये चान्ये विद्विषो मम ३५ ततश्चैषा मही मित्र भवित्री नष्टकंटका जरासंधो मम गुरुर्द्विविदो दयितः सखा ३६ शंबरो नरको बाणो मय्येव। कृतसौहृदाः तैरहं सुरपक्षीयान् हत्वा भोक्ष्ये महीं नृपान् ३७ एतज्ज्ञात्वानय क्षिप्रं रामकृष्णाविहा-र्भकौ धनुर्मखनिरीक्षार्थं द्रष्टुं यदुपुरश्रियं ३८ अक्रूर उवाच राजन्मनीषितं सध्र्यक् तव स्वावद्य-मार्जनं सिद्ध्यसिद्ध्योः समं कुर्याद्दैवं हि फलभावनं ३९ मनोरथान्करोत्युच्चैर्जनो दैवहतानपि यु-ज्यते हर्षशोकाभ्यां तथाप्याज्ञां करोमि ते ४० एवमादिश्य चाक्रूरं मंत्रिणश्च विसृज्य सः प्रविवे-श गृहं कंसस्तथाक्रूरः स्वमालयं ४१ इति श्रीभागवते दशमस्कंधे षट्त्रिंशोऽध्यायः ३६ ॥

भावार्थे दशमस्कंधे षट्त्रिंशोऽध्यायः ३६ सप्तत्रिंशे हते केशिव्योम्नि वृत्तो भाविकर्मभिः नारदेन स्तुतः क्रीड-न्व्योमासुरमथावधीत् वृषवेषासुरवधं हत्केशिनं हयवेषिणं कंसप्राणासमं हत्वा कंसं व्यसमिवाकरोत्।

केशीतिति प्रथमश्लोकेनयएवंभूतः केशीत्वनुयतंभगावानुपाह्वयदितितृतीयश्लोकेनान्वयः महाहयः
सन्महीं निर्जरयन् श्लथयन् विदारयन्नित्यर्थः सटाभिः केसरैरवधूतानीतस्ततः क्षिप्तान्यभ्राणि विमानानि
च तैः संकीर्णं नभः कुर्वन् हेषितेन स्वशब्देन भीषितमखिलं विश्वं येन सः ॥१॥ तद्धेषितैस्तैरतिनिष्ठुरैर्हे।
षितैः वालैः पुच्छलोमभिर्विघूर्णिताः परिभ्रामिता अम्बुदा येन तं आत्मानं संग्रामार्थमात्मानं कृसं अग्रणीः श्री।

शुक उवाच केशी तु कंसप्रहितः खुरैर्महीं महाहयो निर्जरयन्मनोजवः सटावधूताभ्रविमानसं-
कुलं कुर्वन्नभो हेषितभीषिताखिलः ॥१॥ करालनेत्रो विकटास्यकोटरो बृहद्गलो नीलमहाम्बुदोपमः
दुराशयः कंसहितं चिकीर्षुर्व्रजं स नन्दस्य जगाम कम्पयन् ॥२॥ तं त्रासयन्तं भगवान्स्वगोकुलं तद्धे।
षितैर्वालविघूर्णिताम्बुदं आत्मानमाजौ मृगयन्तमग्रणीरुपाह्वयत्स व्यनदन्मृगेन्द्रवत् ॥३॥ स तं नि-
शाम्याभिमुखो मुखेन खं पिबन्निवाभ्यद्रवदत्यमर्षणः जघान पद्भ्यामरविन्दलोचनं दुरासदश्चण्डजवो दुरत्ययः ॥४॥

इतो निर्गतः सन् उपाह्वयत् स्वसमीपमानयाव ॥२॥ स च केशी तन्निशाम्य मृगेन्द्र इव नादमकरोत् इति पूर्वेणैवा-
न्वयः ततः स केशी तं कृष्णं दृष्ट्वा मुखेन खं पिबन्निव मुखं व्यादाय विवृत्याभिमुखमभ्यागाम किं च अत्यमर्ष-
णो निरूपितोऽन्येन असहमानो वा पद्भ्यां पश्चात्पद्भ्यां जघान दुरासदो मैरभिभवितुमशक्यः दुरत्ययः उल्लङ्घितुमशक्यः सन्

श्री
भाग
टी
॥

151

तदनन्तरं च पित्रा तं च दन्तनाग्रप्रसारितयोः पादयोर्हस्ताभ्यां गृहीत्वा परिविष्य भ्रामयित्वा धनुः शातं तेरेवि
देपश्चावस्थितः तथैवस्थितो बभूव ५ व्यादाय मुखं विप्रसार्य वेगेन हरिं प्रसादयन् सोपि हरिर्दमन उग्नरं मखं
भञ्जं मुखे प्रवेशयामास तन्निर्भयत्वे दृष्टान्तः यथोरगो बिले इति ४ ततः किं तदाह देतानि चर्वेणापभाव

तदं च पित्रा तमस्यो वक्त्रो कृष्णाय गृह्य दोर्भ्यां परिविष्य पादयोः सावतमुक्तस्य धनुः शातं तेरयथोऽसं
तार्दस्ततोऽव्यवस्थितः ५ स लब्धसंज्ञः पुनरुत्थितो कृष्णाय व्यादाय केशी नरसापनहरिं सोप्यस्य वक्त्रे भु
जमुत्तरं स्मयन्प्रवेशयामास यथोरगो बिले ६ दंतानि पेतुर्भगवद्भुजस्पृशस्ते केशिनस्तप्तमयः स्पृ
शो यथा बाहुश्च तद्देहगतो महात्मनो यथामयः संववृधे उपेक्षितः ७ समेधमानेन स कृष्णबाहुना
तानिरुद्धवायुश्चरणांश्च विक्षिपन् प्रस्विन्नगात्रः परिवृत्तलोचनः पपात लेण्डं विसृजन्क्षितौ व्यसुः
तदेहतः कर्कटिकाफलोपमाद्व्यसोरपाकृष्य भुजं महाभुजः अविस्मितोऽयत्नहतारिरुत्स्मयैः प्र
सूनवर्षैर्दिविजैरभिष्टुतः ८

दंतं स्पृशंतीति तथा तेव्यादानेन येवृताः शयो लोहं स्पृशंतीति तप्तायः स्पृशः यद्वा त
प्तमयो तितन्मलोहादि स्पृशंतो यथैति आमयो तलाद्वं ७ लेण्डं पुरीषं विसृजन् त्यजन् ८ कर्कटिकाफ
लेदृष्पक्वे सार्धं ते विदीर्णं भवति तद्वद्विदीर्णात्देहाद्गतप्राणात् विस्मितो गर्वरहितः अयत्नेन हतोरिर्येन

स्कं १०

॥

कंसाय कृष्णमादिश्य तदूहस्यादि पृष्टैः कंसवधानादि कृष्णस्य कार्यमावेदयन्नुति तत्राह देवर्षिरित्यादि
ना नचायं सूचकः किंच सर्वसस्यादित्याह भागवतप्रवर इति १० अप्रस्तुतस्य वैरिणां कंसे सूचितवानिति
माशंक्यीत्याह कृष्णकृष्णेत्यादिना अयंभावः त्वमीश्वरो भूभारदैत्यसंहारायावतीर्णोसि अतस्तदनुरू
पाचरणेन विश्वं परिपालयेति न तत्वपिता वहुयशोकैवनात्तीत्याह अप्रमेयात्मन् अपरिछिन्नस्वरूप।
योगेशाश्चर्यचिंत्यप्रभाव जगदीश्वर विश्वनियंतः वासुदेव सर्वभूतेषु वर्तमान अखिलावास सर्वस्याश्रय।

देवर्षिरुपसंगम्य भागवतप्रवरो नृप कृष्णमक्लिष्टकर्माणं रहस्येदमभाषत १० कृष्णकृष्णाप्र।
मेयात्मन्योगेश जगदीश्वर वासुदेवाखिलावास सात्वतांप्रवर प्रभो ११ त्वमात्मा सर्वभूतानां।
मेकोज्योतिरिवैधसां गूढोगुहाशयः साक्षी महापुरुषईश्वरः १२

सत्वतांप्रवरश्रेष्ठ प्रभोसर्वशक्ते ११ कथमेवंरूपोहमिति चेत्तत्राह त्वमात्मेति नहि त्वंजीववत्
परिछिन्नः किं तु सर्वभूतानामंतरेव एकोनुस्यूत आत्मा अंतरनुस्यूतत्वे दृष्टांतः एधसां काष्ठानामंत।
र्ज्योतिरिवेति नित्यं भूतेषु स्थितोपि नेति दृश्यसइत्याह गूढ इति अत्रहेतुः गुहाशयः बुद्धेरप्यंतरः किंच सा
क्षी न हि साक्षी दृश्यत इत्यर्थः अपि च महापुरुषः अतः परिछिन्नमतिभिर्न ज्ञायस इत्यर्थः न हि सर्वान्तरे
किं प्रमाणमत आह ईश्वर इति नहीश्वरं विना परतंत्राणां जीवानां प्रवृत्तिर्घटत इत्यर्थः १२ ॥

श्री
भाग
टी
५५२

15

ननु श्रमीश्वरः सन्नस्त्वं मीषितव्यमित्येतदेवकृतः अत आह आत्मनेति साधनांतरनिरपेक्ष एवआ-
त्माश्रयः स्वतंत्रः मायया शक्त्या भवान् गुणान् ससृजे सृष्टवान् तैः स्वसृष्टैर्गुणैरिदं विश्वं सृजसि अत्सि संह-
रसि अवसि पालयसि ननु सृष्ट्यादिविक्रियाः षट्कारकसाध्यैव दृष्टा अत आह सत्यसंकल्प इति नहि।
संकल्पैकसाध्यैव हि साधनापेक्षेति भावः अतस्त्वमीश्वर इत्युपसंहारः ॥१३॥ अवतीर्णमाह सत्वमिति भूधर।

आत्मनात्माश्रयः पूर्वं मायया ससृजे गुणान्। तैरिदं सत्यसंकल्पः सृजस्यत्स्यवसीश्वरः ॥१३॥ स त्वं
भूधरभूतानां दैत्यप्रमथरक्षसां अवतीर्णो विनाशाय साधूनां रक्षणाय च ॥१४॥ दिष्ट्या ते निहतो दै-
त्यो लीलयायं हयाकृतिः यस्य हेषितसंत्रस्तास्त्यजंत्यनिमिषा दिवं ॥१५॥ चाणूरं मुष्टिकं चैव मल्लान-
न्यांश्च हस्तिनं कंसं च निहतं द्रक्ष्ये परश्वोऽहनि ते विभो ॥१६॥ तस्यानु शंखयवनमुराणां नरकस्य च।
पारिजातापहरणमिंद्रस्य च पराजयं ॥१७॥

भूतानां भुवं धरंतीति भूधरा राजानस्तद्रूपाणां ॥१४॥१५॥ परश्वोऽहनीति अद्यैवाक्रूर आगमिष्यतीति श्वो मथु-
रां गतानां सि परश्वश्चाणूरादीन् तथा निहतान् द्रक्ष्यामीति सिद्धवन्निर्देशो विज्ञापनप्रकारः ॥१६॥ तस्यानंतरं
शंखयवनादीनां शंखः पंचजनः वधं द्रक्ष्यामीति शेषः भाविनि निर्देशमात्रमेतत् ततानंतर्यं विवक्षितं ॥१७॥

१८ भार्यया जांबवत्या सह स्वधामतः महाकालपुरात् १९ २० द्वारकामावसन् द्वारकायां वसन् कर्त्ता करिष्यसी
ति २१ अमुष्य विश्वस्य भूभारस्य वा २२ एवं विज्ञाप्य तमभिवंदते भगवंतं नमस्यति द्वयेन विशुद्धविज्ञानघनमिति
केवलज्ञानैकमूर्त्तिं अत एव स्वसंस्थया स्वरूपसम्यक्स्थित्यैव परमानंदरूपया समाप्ता आप्ताः सर्वेऽर्था येन

उद्वाहं वीरकन्यानां वीर्यशुल्कादिलक्षणं नृगस्य मोक्षणं शापाद्द्वारकायां जगत्पते १७ स्यमंतकस्य
च मणेरादानं सह भार्यया मृतपुत्रप्रदानं च ब्राह्मणस्य स्वधामतः १८ पौंड्रकस्य वधं पश्चात् काशि
पुर्याश्च दीपनं दंतवक्रस्य निधनं चैद्यस्य च महाक्रतौ १९ यानि चान्यानि वीर्याणि द्वारकामावसन् भ
वान् कर्त्ता द्रक्ष्याम्यहं तानि गेयानि कविभिर्भुवि २० अथ ते कालरूपस्य क्षपयिष्णोरमुष्य वै अक्षौ
हिणीनां निधनं द्रक्ष्याम्यर्जुनसारथेः २१ विशुद्धविज्ञानघनं स्वसंस्थया समाप्तसर्वार्थममोघवांछि
तं स्वतेजसा नित्यनिवृत्तमायागुणप्रवाहं भगवंतमीमहि २२

तं आप्तकामत्वेनाकामस्य संकल्पमात्राद् अमोघवांछितमिति ननु वांछावत्त्वे हि ग्लानिर्दुर्निवारा संसृतिरत आ
ह स्वतेजसेति चिच्छक्त्या नित्यनिवृत्तो मायाकार्यरूपो गुणप्रवाहो यस्मात्तं अतो भगवंतं निरतिशयैश्वर्यमी
महि शरणं व्रजेमेति २२ ॥

श्री
भाग
पूरी
१५३

153

ननु त्रिकालज्ञस्त्वं कथं मत्प्रपंचं न जानासि जानासि चेत्कथं मम गुणप्रवाहं प्रब्रवीषि तत्राह त्वामिति ईश्व
रमनन्यस्ववशापितारं स्वाश्रयं स्वस्य स्वावशेषस्य स्वात्ममायया आत्माधीनया मायया विनिर्मिता अशेषवि
शेषा महदाद्याः यावद्रूपा वा कल्पना येन तं धुर्यं श्रेष्ठं नतोस्मि २४।२५।२६ पालैरेव केशिवधानंतरं नारदो

त्वामीश्वरं स्वाश्रयमात्ममायया विनिर्मिताशेषविशेषकल्पनं क्रीडार्थमद्यात्तमनुष्यविग्रहं न।
तोस्मि धुर्यं यदुवृष्णिसात्वतां २४ शुक उवाच एवं यदुपतिं कृष्णं भागवतप्रवरो मुनिः प्रणिपत्या
भ्यनुज्ञातो ययौ तद्दर्शनोत्सवः २५ भगवानपि गोविंदो हत्वा केशिनमाहवे पशूनपालयत्पालैः
प्रीतैर्व्रजसुखावहः २६ एकदा ते पशून्पालाश्चारयंतोद्रिसानुषु चक्रुर्निलायनक्रीडाश्चोरपा
लापदेशतः २७ तत्रासन्कतिचिच्चोराः पालाश्च कतिचिन्नृप मेषायिताश्च तत्रैके विजह्रुरकु
तोभयाः २८ मयपुत्रो महामायो व्योमो गोपालवेषधृक् मेषायितानपोवाह प्रायश्चोरायितो
बहून् २९

क्रमंगीकृत्य पुनस्तत्रैव पशूंश्चारयता व्योमो हत नः यद्वा व्योमवधः पूर्वमेव प्रवृत्तोपि वे।
मथारिवधप्रसंगात्तद्वोच्यते इति द्रष्टव्यं केचित्तु नः शंखचूडवधात्पूर्वमेव पठंति तत्राह एकदेति २७

२८ मेषवदाचरितास्तान् स्वयं चोरवदाचरितः सन् प्रायोवाह अपकृष्य निनाय २९

१५२

पिदध्येच्छादितवान् ३० शरणदः आश्रयप्रदः हरिः सिंह इव ३१ ३२ पशुमारं पशुमारो यथा भवति तथा मृतिः
स्थाः स्त्रियन्त्यर्थः ३३ सुरैर्गोपैः स्तूयमानः परिवेष्टमानो वैकैर्दैवैरिति ३४ इति श्रीभावार्थे दशमस्कंधे सप्तत्रिंशो-
ऽध्यायः ३७ अष्टत्रिंशे यथाध्याये अक्रूरो गोकुलं गतः तथैव रामकृष्णाभ्यां गृहं नीतो नास्त्व सत्कृतः प्रातः केशिवधोद्

गिरिदर्यां विनिक्षिप्य नीतं नीतं महासुरः शिलया पिदधे द्वारं चतुःपंचावशेषिताः ३० तस्य तत्कर्म
विज्ञाय कृष्णः शरणदः सतां गोपान्नयंतं जग्राह वृकं हरिरिवौजसा ३१ स निजं रूपमास्थाय गिरींद्रस-
दृशं बली इच्छन्विमोक्तुमात्मानं नाशक्नोद्ग्रहणातुरः ३२ तं निगृह्याच्युतो दोर्भ्यां पातयित्वा महीतले
पश्यतां दिवि देवानां पशुमारममारयत् ३३ गुहापिधानं निर्भिद्य गोपान्निःसार्य कृच्छ्रतः स्तूयमानः
सुरैर्गोपैः प्रविवेश स्वगोकुलं ३४ इति श्रीभागवते दशमस्कंधे सप्तत्रिंशोऽध्यायः ३७ श्रीशुक उवाच अ-
क्रूरोपि च तां रात्रिं मधुपुर्यां महामतिः उषित्वा रथमास्थाय प्रययौ नंदगोकुलं १ ॥

ह्रादशांनिर्गतिमुक्तौ ततो व्योमे हतेऽक्रूरः सायं गोकुलमागमत् तदेवं नारदेन कंसवधादिकार्ये विज्ञापि-
ते श्रीकृष्णो मथुरां गंतव्यतो वर्त्तते तदाक्रूरोपि गोकुलमगादित्याह अक्रूरोपीति अपीति संभावनायां १

श्री
भाग
टी
१५४

15A

२ अपिसंभावनायांअर्हन्तेयोग्याय ३ स्वस्यकुलस्यदर्शनेःसंभवमाशंक्यपुनःसंभावयति ममैतदि।
तिहृदयेन विषयात्मनःविषयाविष्टचित्तस्य शूद्राज्जन्मयस्यतस्यब्रह्मकीर्तनंवेदोच्चारणंयथेति ४ अथ
वामैवंकिंतुअथमिस्यतीवसापिममतनस्यादेव कृतह्यमतआह ध्रियमाणःकालनयेति अयंभावः
यथानयाद्ध्रियमाणानांतृणादीनांकिंचिल्लदाचिन्नश्यति तथाकर्मवशेनकालेनध्रियमाणानांजीवा।

गच्छन्थिमहाभागोभावयंत्रुणेनवाणे भक्तिंपराम्पगात एवमेतद्विंतयन् २ किंमयाचरितंभ
द्रंकिंतमेपरमेतपः किंवाथाप्यर्हतेदत्तंयद्दत्ताम्यवकेशवे ३ ममैतदुर्लभंमन्येउत्तमश्लोक।
दर्शनं विषयात्मनोयथाब्रह्मकीर्तनेषुद्रजन्मनः ४ मैवंममाधमस्यापिस्यादेवाच्युतदर्शनंध्रि
यमाणःकालनयाकचिन्नरातिकश्चन ५ ममायमंगलेनष्टेफलवांश्चेवमेभवः यत्रमस्यभाव
तोयोगिध्येयांघ्रिपंकजं ६ कंसावतीयाकृतमेत्यनुग्रहंदृष्ट्वांघ्रिपद्मंशद्धितोमुनीदरैः कृतावा।
नारस्यदुरत्ययंतमःपूर्वंतरन्त्यन्नवलेमंड्लविषा ७

तामपिकश्चिन्नरेदितिसं भवतीति ५ अतोलयाश।
हसैवममामंगलेध्रुवंलब्धमेवेतिनायते भवोजन्मचसफलंजातमितियतः यतोनमस्करिष्यामि ६
अमंगलानांपापानांचकांतरमाह कंसरति वनेत्याह्वये अतिखलःकंसोपिममात्यंतमनुग्रहं कृतवान् य
तोऽस्मनाशद्भितोहरेरंघ्रिपद्मंद्रक्ष्यामीति पूर्वंसर्वपापादयतमःसंसारमततरन्तीर्णाः ७॥ १५४

ग्रंथिपर्यं विभावयति यदिति आलादिभिर्वर्णितमितिपरमैश्वर्यमात् प्रियावेति सौभाग्यातिशयं मुनि
भिर्भक्तिसहितैरितिपरमपुरुषार्थत्वं गोचारणायेति कृपालुत्वं यद्गोपिकानामितिप्रेममात्रसुलभत्वं ९
मनोरथान्तरं करोति द्रक्ष्यामीति शोभमानौ कपोलौ नासिका च यस्मिंस्तत् स्मितसहितोवलोको यस्मि
न् स्फुरणकं नवलोचने यस्मिन् तत्तच्च मुखं गुडालकावृतं वक्रकेशावृतं तदानीमेव शुभसूचकं दृष्टुं

यदर्चितं ब्रह्मशिवादिभिः सुरैः श्रियाच देव्या मुनिभिः ससात्वतैः गोचारणायानुचरैश्चरद्वने।
यद्गोपिकानां कुचकुंकुमांकितं ८ द्रक्ष्यामि नूनं सुकपोलनासिकं स्मितावलोकारुणकंजलो
चनं मुखं मुकुंदस्य गुडालकावृतं प्रदक्षिणं मे प्रचरंति वै मृगाः ९ अप्यद्य विष्णोर्मनुजत्वमीयुषो
भारावताराय भुवो निजेच्छया लावण्यधाम्नो भवितोपलंभनं मह्यं न नस्यात्फलमंजसा दृशः १०

तिलक्षणत्वात् प्रदक्षिणमिति ९ पुनरप्यस्य स्थितिं मनयति अप्यद्येति ईयुषः प्राप्तवतः लावण्यस्य धाम्नः आ
श्रयः तस्य विष्णोः यद्वा विष्णोर्लावण्ययुक्तं गृहीतं वपुः तस्योपलंभनं दर्शनं मे भवितं भविष्यति अपि या
घेवेस्यात् तर्हि मह्यं मम दृशोर्लोचनयोः साफल्यं न नस्यादिति अपि वस्यादेव तदर्थः १० ॥

यद्वृत्तिलेनेति चतुर्भिः । ऊलकं तत्रैवंशंकानवकाशाद्दिवदेवकर्तृत्वभोक्तृत्वादिधर्मैस्तत्रतत्रप्रतीयमानस्य
कथं विरक्तत्वमितीयमाशंकां श्लोकत्रयेणापाकुर्वन्नेव चतुर्थेन तत्रमदुःखत्यागमीतिमनोरथं करोति तथा
हि यद्वृत्तिलेनेति ईक्षणमात्रकर्तृत्वमसत्सतोः कार्यकारणयोरीतिना ईक्षणमात्रेणाकर्तृत्वमिदं दर्शितो
हंकारदीनः तथाप्ययापासन्नमाभिरादिभ्रमः तमः स्वात्मानंततो भिदाभ्रमः भेदः ततो भ्रमः अभिनिवेशादि
अपायानाश्रयपंक्तुनासमयाद्योयस्मिन्नः ऊलनवाद स्वेनेनसाविरुद्धतया नित्यस्वरूपसाक्षात्कारेण ता-
ध्यापिस्वमायया स्वधीनया मायया नदीनयानस्वेवेतयाप्राणानुवर्धीभिः सह्वितेन आत्मन आत्मनिरस्वस्मित्रे

यद्वृत्तिलाहं हितोपि सत्तत्तोः स्वेनेनसापासत्तमोभिदाभ्रमः स्वमायया आत्मन्रचितैस्तदीक्षया प्रा-
णाक्षधीभिः सदनेष्वभीयते ॥ ११ ॥ यस्मिन्विलासीव हि भिः स्वमंगलैर्वाचो विमिथ्यागुणकर्मजन्म-
भिः प्राणेति शुंभंति पुनंति वै जगायास्तद्विरक्ताः शवशोभना मताः ॥ १२ ॥

वरविवेनीवेः सदनेषु हंदावननंदुगोपीगृहेषु वलीलया कर्माणि कुर्वन् सक्तवदभीयते आभिमा-
विनप्रतीयते ॥ ननु सर्वथाहंकारादिरहितस्यात्मारामस्य लीलापि कुतः इत्याशंक्य परानुग्रहार्थे-
वासाशंकायेनाह अखिलानि अखिलस्य वा अमीवानि पापानि येनेत्याह विलासीवहानितेः तथा स्वमंग-
लैः शोभनानि मंगलानि यैः सः गुणाः करुणादयः कर्माणि जन्मानि च तेविमिश्राणि युक्ता वाचः ना-
गाम्याणेतिजीवयंति शुंभंति शोभयंति पुनंति पवित्रयंति अतिरेकमाह यास्तिने विरक्ता रहिता वाचः

155

किलेति मन्ये सत्स्वयं रविनोत्सितत्वर्णं शुभयर्माम्यालयतामममरवर्याणां ह्यवकर्तो सन् अवतीर्णाः यद्यथाः ॥
त्रैलोक्ये एकमेव कान्तं दृशिः दृष्टिं तद्दतां महत्त्वामृत्सवो यस्मात् यद्वा महानुत्सव एव अतएव श्रिया ईक्षितमा
म्पदमेवं रूपं श्रीमूर्तिं दृष्ट्वा नेतमीक्ष्यं द्रष्टुमामीति अथवेति उदयतः प्रभातसमयाः सुदर्शनाः शुभदर्शनाः ह्यवे

सर्वावतीर्णाः किल सातनालये त्वमेतपालामरवर्यशर्मकृत । यशो वितन्वन्‌ जगतस्त्रैलोक्यगायं ।
तिदेवाद्यदर्शोऽघमंगालं ॥ तंतव घनंतमहत्तां गतिगुरुं त्रैलोक्यकान्तं दृशिमत्महोत्सवं रूपं दृष्ट्वा ।
नेक्षिय श्रुमिनास्पदं द्रष्टुमम्यस्नुष सः सुदर्शनाः ॥ अथावतीर्णाः सपदीश यो रक्ष्या लब्धयानव्द्व ।
सोऽस्मरणात्स्वलब्धये धियाधूतयोगिभिरप्यदं ध्रुवं नमस्याम्यांच सलीन्वनोकसः ॥ अप्ययंत्रि
मूलेपतितस्य मे विभुः श्रीरस्यथास्य त्रिजगद्धस्तपंकजं दत्ताभयं कालभुजंगदंष्ट्रा प्रोद्धृतिनां नोश
रणोषितानुणां ॥

प्रभातारजनीतिशुभसंस्थवकावभूवुरित्यर्थः ॥ किंच अथदर्शनानन्तरं सपदि तत्क्षणमेव यथा द्रवती
र्णाः सन् अथानपुरुषयोगमक्षुस्मयोऽस्मरणं योगिभिरप्यात्मलाभाय केवलं धिया धूतं साक्षाद्दृष्टं नमस्या
मि श्राभ्यांसहसुरनयोः सावीनो यांश्च नमस्यामीति ॥ किंच अपीति अथास्यतयास्यतिनहिभावयतिद ।

श्री
भाग
मूली
१५८

158

बलिनानावस्त्रत्रयपरिमितमूल्यानसमयेनस्पष्टत्वेऽदृष्टं निर्दिष्टं कौशिकरंहसनेनापि गोवर्धनोद्धरणाद
नेनरंजनस्याभिषेकसमयेषु नोऽर्जुनवलाघस्यकरउत्कंठेऽनमितितनजवं स्वमूल्यांसमारभयानिवर्तके सका
मानामभ्युदयपदं चेत्स्वकं अनुक्रान्तोपरमस्यवेदं चेत्याद यद्वा वाशव्दोवितर्के विहारे रासक्रीडायां सौगं
धिकस्यगंधरवगंधोयस्मनत्सौगंधिकगंधि ।७ एवं परमानुग्रहं संभाविपुनरप्यसंभवमाशंक्य परिहरति
नमयीति यद्यप्यदृकं सेवनप्रहितोऽनन्तस्यहूतः तथापिमयिप्रारियमितिवुद्धिं वडपेक्ष्यतिनकारप्यतीय

ममदृष्टान्त्रंयत्रनिधायकौशिकस्तथावलिस्थापनयात्रयेदत्तो यद्वाविदारे वत्तयोषितां अमंस्पर्शेन
सौगंधिकगंध्यपानुदन ।८ नमपुष्पेष्वस्येविवृद्धिमच्युतः केसस्यहूतः प्रहितोपि विषहृद्रू यो।
तर्वेदिस्थितसपत्नीहितं देवतां इवत्यमलेनचलक्षा ।९ पुष्पंचिमूलेवहितं कृतांजलिमामी।
दितासस्मिनसोहूयाहृशा मयपपधसममलकिल्विषोवोढामदंदीनविपाकऊर्जितम ।१०

यः यतोविश्वधृक् सर्वज्ञो तोममचेन सौनस्यवदिस्थयदीहितं चेष्टितमेतनय ःदेवत्तः श्रेनयीमीतिनयत्ताने
नेत्तने यद्येभावः चेनमेवदिवेवकं समनवने तेश्रेन स्वकूम सोमेवतदेतद सौहृदिहिष्यानानातीति यद्वापत
स्वजगतश्रेहितमिति ।१२ श्रीपर्यटिश्रेष्ठिमूलेचरणोपांतेऽवहितं संयतं सेष्टकं कृपामृतेनाद्रेयाहृशा मामी
दितः निदस्तानितदहिंसपयेवविनष्टाखिलकल्मषः समपरां मुदं वोढा प्राप्स्यामीति ।१३ ॥

१५८

प्रथमं परिरप्स्यते आलिंगिष्यति यदा तदैव मे आत्मा देहः तीर्थीक्रियते अतिपवित्रीकरिष्यते उच्छसिति
शिथिलीभविष्यतीति अत्र हेतुः ॥२१॥ उरुश्रवास्ततेति तदा जन्मभृतः सफलजन्मानः वयं अस्मत्प्रयत्नस्यैव
न भवतीत्याह महीयसेति महीयसा श्लाघ्यीकृतेन यो नादृतस्तस्य धिक् अमुष्य जन्म तत् ॥२२॥ ननु सुहृदादिषु
परिष्वंगसंपश्यादयो जीवधर्माः कथमीश्वरे संगच्छंते इत्याशंक्याह न तस्येति दयितः प्रियः तद्विपरीतोऽप्रि

सुहृत्तमं ज्ञातिमनन्यदैवतं दोर्भ्यां बृहद्भ्यां परिरप्स्यतेऽथ मां आत्मा हि तीर्थीक्रियते तदैव मे बं-
धश्च कर्मात्मक उच्छसित्यतः ॥२१॥ लब्ध्वांगसंगं प्रणतं कृतांजलिं मां वक्ष्यतेऽक्रूर ततेत्युरुश्रवाः तदा
वयं जन्मभृतो महीयसा नैवादृतो यो धिगमुष्य जन्म तत् ॥२२॥ न तस्य कश्चिद्दयितः सुहृत्तमो न चा-
प्रियो द्वेष्य उपेक्ष्य एव वा तथापि भक्तान्भजते यथा तथा सुरद्रुमो यद्वदुपाश्रितोऽर्थदः ॥२३॥ किंचा-
ग्रजो मावनतं यदूत्तमः स्मयन्परिष्वज्य गृहीतमंजलौ गृहं प्रवेश्याप्तसमस्तसत्कृतं संप्रक्ष्यते कंस-
कृतं स्वबंधुषु

यः सुहृत्तमो हितः तद्विपरीतो द्वेष्यः एतत्सर्वव्यतिरिक्त उपेक्ष्य इति सत्यं तथापि भक्तान्भजते तत्र यथा
विभक्तान्भजते तत्र यथा येन भक्तास्तांस्तथैव भजते ये यथा मां प्रपद्यंते तांस्तथैव भजाम्यहं इति भगवद्वा-
क्यात् अविषमत्वेपि भक्तेभ्य एव फलं ददातीत्यत्र दृष्टान्तः यद्वत्सुरद्रुम इति ॥२३॥ अग्रजः श्रीरामः यो मया
श्रेंजलिः करिष्यते तस्मिन्नेव गृहीतं मां आप्तानि समस्तानि सर्वाणि सत्कृतानि यत्र तं मां ॥२४॥

जो

सत्समागममपि न वेद तथापि रथेन प्राप इति २४ अखिलैर्लोकपालैः किरीटेषु जुष्टाश्च अमलाः पादरेणवो य-
स्य तस्य क्षितिकौतुकानि क्षितेरलंकाररूपाणि २५ तद्दर्शनेन य आह्लादस्तेन विवृद्धः संभ्रमो यस्य सः प्रे-
म्णा ऊर्ध्वानि रोमाणि यस्य सः अश्रूणां कलाभिर्लेशैराकुले ईक्षणे यस्य सः अवस्कंद्य अवरुह्य तेषु पदेषु अचेष्ट-
त अलुठत अहो प्रभोर्नारायणस्यामून्यंघ्रिरजांसि इति दुर्लभतां भावयन् २६ ननु किमर्थमेवमलुठत्।

इति संचिंतयन्कृष्णं श्वफल्कतनयोऽध्वनि रथेन गोकुलं प्राप्तः सूर्यश्चास्तगिरिं नृप २४ पदानि त-
स्याखिललोकपालकिरीटजुष्टामलपादरेणोः ददर्श गोष्ठे क्षितिकौतुकानि विलक्षितान्यब्जय-
वांकुशाद्यैः २५ तद्दर्शनाह्लादविवृद्धसंभ्रमः प्रेम्णोर्ध्वरोमाश्रुकलाकुलेक्षणः रथादवस्कंद्य स ते-
ष्वचेष्टत प्रभोरमून्यंघ्रिरजांस्यहो इति २६ देहंभृतामियानर्थो हित्वा दंभं भयं शुचं संदेशाद्यो हरेर्लिंग-
दर्शनश्रवणादिभिः २७ ददर्श कृष्णं रामं च व्रजे गोदोहनं गतौ पीतनीलांबरधरौ शरदंबुरुहेक्षणौ २८

नास्तीत्येवमर्थं दंभफलोद्देशादित्यत आह देहंभृतामिति देहभाजामेतावानेव पुरुषार्थः कंसस्य संदेशा-
दारभ्य हरेर्लिंगदर्शनश्रवणादिभिर्योऽयमक्रूरस्य वृत्तः इति संदेशाद्यो योऽयं स्वार्थः स यावानक्रूरस्य
जात इति वा २७ ततः कृष्णं रामं च ददर्श गावो दुह्यंते यस्मिन्निति गोदोहनं तत्स्थानं गतौ प्राप्तौ २८

२९ अनुक्रोशोनुकंपा तेनसहितंस्मितंस्मितयुक्तमीक्षणंययोस्तौ ३० उदाररुचिराक्रीडाययोस्तौस्रग्वि-
णौरत्नस्रग्भिरलंकृतौ ३१ प्रधानभूतौपुरुषौप्रकृतिपुरुषात्मकौवा अतः आद्यौतदपि अतःजगा-
द्धेतू अतएवजगत्पती विपरीतौवाचतुर्णांपदानांद्वंद्वेतत्समासः जगत्यर्थेपृथिव्याभारापनयनाय

किशोरौश्यामलश्वेतौश्रीनिकेतौबृहद्भुजौ सुमुखौसुन्दरवरौबालद्विरदविक्रमौ २९ ध्वजव-
ज्रांकुशांभोजैश्चिह्नितैरंघ्रिभिर्व्रजं शोभयंतौमहात्मानौसानुक्रोशस्मितेक्षणौ ३० उदाररुचि-
रक्रीडौस्रग्विणौवनमालिनौ पुण्यगंधानुलिप्तांगौस्नातौविरजवाससौ ३१ प्रधानपुरुषावा-
द्यौजगद्धेतूजगत्पती अवतीर्णौजगत्यर्थेस्वांशेनबलकेशवौ ३२ दिशोवितिमिराराजन्कुर्वाणौ
प्रभयास्वया यथामारकतःशैलोरौप्यश्चकनकाचितौ ३३ रथात्तूर्णमवप्लुत्यसोक्रूरःस्नेहवि-
ह्वलः पपातचरणोपान्तेदंडवद्रामकृष्णयोः ३४ भगवद्दर्शनाह्लादबाष्पपर्याकुलेक्षणः पुल-
कांचितांगऔत्कंठ्यात्स्वाख्यानेनाशकन्नृप ३५

स्वांशेनमूर्तिभेदेनबलकेशवौस तौअवतीर्णौ ३२ स्वप्र-
भयाविगततिमिरादिशःकुर्वाणौ कनकाचितौसुवर्णव्याप्ताविति सालंकारयोःशैलसादृश्यार्थमुक्तं
३३ ३४ भगवद्दर्शनाह्लादेनयद्बाष्पंतेनपर्याकुलेईक्षणेयस्यसः पुलकैराचितेव्याप्तमंगंयस्यसः स्वाख्या-

नेऽक्रूरोहंनमस्करोमीतिकथनेनाशकत् ३५

श्री
भाग
स्कं
१५८

158

प्रतिषेधस्य अक्रूरोयमनेन दृष्टं मा गात इति ज्ञात्वा अंके सद्वहनन सामर्थ्ये प्रीत यद्विवरथांगेन चक्रेणांकितो यः पाणिः तेनाभ्युपाकृष्य तमालिंगितवान् ३६ पाणिं अंजलिरूपेण संहतावेव गृहीत्वा ३७ मधुपर्कं एवार्हणं तस्मै न्यायद्वचितमर्हणमाहरत् ३८ श्रान्तोपसमर्पितवानित्यर्थः ३९ ३९ ४० सत्कृतं सम्मानितं निरनुग्रहे क्रूरे क।

भगवांस्तमभिप्रेत्य रथांगांकितपाणिना परिरेभेभ्युपाकृष्य प्रीतः प्रणतवत्सलः ३६ संकर्ष- णश्च प्रणतमुपागूह्य महामना गृहीत्वा पाणिना पाणी अनयत्सानुजो गृहं ३७ पृष्ट्वाथ स्वाग- तं तस्मै निवेद्य च वरासनं प्रक्षाल्य विधिवत्पादौ मधुपर्कार्हणमाहरत् ३८ निवेद्य गां चातिथये संवाह्य श्रान्तमादृतः अन्नं बहुगुणं मेध्यं श्रद्धयोपाहरद्विभुः ३९ तस्मै भुक्तवते प्रीत्या रामः परम- धर्मवित् मुखवासैर्गंधमाल्यैः परां प्रीतिं व्यधात्पुनः ४० पप्रच्छ सत्कृतं नंदः कथं स्थ निरनुग्रहे कंसे जीवति दाशार्ह सौनपाला इवावयः ४१ योवधीत्स्वस्वसुस्तोकान् क्रोशंत्या असुतृप्खलः किं नु स्वित्तत्प्रजानां वः कुशलं विमृशामहे ४२

कथं केन प्रकारेण स्थ जीवथेत्यर्थः सौनः पशुघाती स एव पालको येषां अवीनां मेषाणां त इव तन्नस्मा इत्या- र्थः ४१ निरनुग्रहत्वमाह योवधीदिति तोकान् तोकानपि अस्मत्पश्यत्स्वेव तर्पयतीति यः असुतृप् खलः ता- स्य प्रजानां हे अक्रूर येषां जीवनमात्रमपि दुर्लभं तेषां वः किं कुर्वन् कुशलं विचारयामीति ४२

१५८

मथुरायां वा वा इत्थं संकृत तस्य एव वाचा परिहृष्टेन स्रग्धेन अध्वपरिश्रमं संसारश्रमे ४४ इति श्रीभावार्थे दशा
मस्कंधे अष्टत्रिंशोध्यायः ३८ नवत्रिंशे पुरीं गन्तुं कृष्णे गोपिकोक्तयः अक्रूरेणाथ कालिंद्यां विश्वलोकस्य दर्श
ने भक्तानां मनोरथाः सम्यग्भवंतीति योनयन्नाह सुखोपविष्ट इति रामकृष्णाभ्यामत्यधिकं मानितः १२३

इत्थं सूनृतया वाचा नंदेन सुसभाजितः अक्रूरः परिपृष्टेन जहावध्वपरिश्रमं ४४ इति श्रीभागवते द
शमस्कंधे अष्टत्रिंशोध्यायः ३८ शुक उवाच सुखोपविष्टः पर्यंके रामकृष्णोरुमानितः लेभे मनोर
थान्सर्वान्पथि यान्स चकार वै १ किमलभ्यं भगवति प्रसन्ने श्रीनिकेतने तथापि तत्परा राजन्न हि वां
छंति किंचन २ सायंतनाशनं कृत्वा भगवान्देवकीसुतः सुहृत्सु वृत्तं कंसस्य पप्रच्छान्यच्चिकीर्षितं
३ श्रीभगवानुवाच तात सौम्यागतः कच्चित्स्वागतं भद्रमस्तु वः अपि स्वज्ञातिबंधूनामनमीवमनाम
यं ४ किं नु नः कुशलं पृच्छे एधमाने कुलामये कंसे मातुलनाम्न्यंग स्वानां नस्तत्प्रजासु च ५

हे तात हे सौम्य किं भवान् आगतः स्वागतं सुखेनागतं स्वज्ञातिबंधूनां सुहृदः ज्ञातयः सपिंडा बंधवोऽसपिं
डाः सर्वे थिन तेषामपि किं अनमीवं अपापमहः त्वमिति यावत् अनामयमारोग्यं ४ एवं प्रश्नेपि समानाति
संगतमाह हे अंग अक्रूर एधेत् एधमाने कुलामये कंसे मातुले इति नामयस्तस्मिन् वः स्वानां ज्ञाती

श्री
भाग
दशे
१५५

अहो अस्मादिति अस्मन्निमित्तं हि जितं दुःखे आर्ययोः निरपराधयोः यद्धेतोः योऽहमेव हेतुस्तस्मात् ९ से
सोऽप्यहानां वो दर्शनेऽयमस्मज्जातं तद्धि स्वाभद्रं ८ माधवो मधोर्वंशजः ९ वहत्वमेव स्वच्छयासन्देशाय।
स्वसः यदर्थं चाणूरादिभिः घातनार्थं अस्मत्कंसस्य जन्मकृत्स्नजन्मस्थानकदुंदुभेः सकाशात् ९ विज्ञ

२२

अहो अस्मद्भूद्भूरि पित्रोर्वृजिनमार्ययोः यद्धेतोः पुत्रमरणं यद्धेतोर्बंधनं तयोः ९ दिष्ट्याद्य दर्श
नं स्वानां मह्यं वः साध्व्यकारि(?) संजातं वर्णये तातानि तत्त्वागमनकारणं ८ इत्युक्तो भगवता सर्वं व।
र्णयामास माधवः वैरानुबंधं यदुषु वसुदेववधोद्यमं १० यत्संदेशो यदर्थं वा दूतः संप्रेषितः स्वयं।
यदुक्तं नारदेनास्य स्वजन्मानकदुंदुभेः ११ श्रुत्वाक्रूरवचः कृष्णो बलश्च परवीरहा प्रहस्य नंदं पितरं
राज्ञा दिष्टं विजज्ञतुः १२ गोपान्समादिशत्सोपि गृह्यतां सर्वगोरसः उपायनानि गृह्णीध्वं युज्यंतां।
शकटानि च ॥ यास्यामः श्वो मधुपुरीं दास्यामो नृपते रसान् द्रक्ष्यामः सुमहत्पर्व यान्ति जानपदाः।
किल एवमाघोषयत्क्षत्रा नंदगोपः स्वगोकुले १३ ॥

ततः विशेषेणत्याययामासतुः १० सोऽपि नंदो गोपान्समादिशत् तदेव दर्शयति गृह्यतां इत्यादिना
गोरसः क्षीरादिः उपायनानि उत्तमवस्तूनि ॥ रसान् दुग्धादीन् शब्दच्छलेन दर्शयति ग्रंथि किं त्वस्य वि।
किं त्वार्थं रसादीन् दास्याम इति सुमहत्पर्व धनुर्महोत्सवः क्षत्रा ग्रामाधिकृतेन आघोषयत्सर्वतो

श्रीकृष्णाय
१५५

ताः कृसैकजीवनाः गोप्यस्तु तदाक्रूरमागतमुपश्रुत्येति ॥१३॥ अथ्यालिंगान्याहपंचभिः काश्चिदिति तेन।
श्रवणेन कृतो हृत्तापः तेन यः श्वासस्तेन म्लाना मुखश्रीर्यासां ताः बभूवुरिति दुकूलानि च वलयानि च केशाग्रं।
थयश्च स्रस्ता दुकूलादयो यासां तथाभूताः काश्चन बभूवुरिति ॥१४॥ तस्यश्रीकृष्णस्यानुध्यानेन निवृत्ताशेषा।

गोप्यस्तास्तदुपश्रुत्य बभूवुर्व्यथिता भृशं रामकृष्णौ पुरीं नेतुमक्रूरं व्रजमागतं ॥१३॥ काश्चित्तत्कृतहृत्ता
पश्वासम्लानमुखश्रियः स्रंसद्दुकूलवलयकेशग्रन्थ्यश्च काश्चन ॥१४॥ अन्याश्च तदनुध्याननिवृत्ताशेषवृ
त्तयः नाभ्यजानन्निमं लोकमात्मलोकं गता इव ॥१५॥ स्मरन्त्यश्चापराः शौरेरनुरागस्मितेरिताः हृदि
स्पृशश्चित्रपदा गिरः सम्मुमुहुः स्त्रियः ॥१६॥ गतिं सुललितां चेष्टां स्निग्धहासावलोकनं शोकापहानि नर्मा
णि प्रोद्दामचरितानि च ॥१७॥ चिन्तयन्त्यो मुकुन्दस्य भीता विरहकातराः समेताः संघशः प्रोचुरश्रुमुख्यो
च्युताशयाः ॥१८॥

स्वत्वादिवृत्तयो यासां ताः इमं लोकं देहमपि न जानन्ति स्म मुक्ता एवेति ॥१५॥ अपराः स्त्रियः शौरेः गिरः स्मरंत्यः
सम्मुमुहुः कथंभूताः गिरः अनुरागेण यत्स्मितं तेन ईरिताः हृदिस्पृशन्तीति तथा हृदिस्पृशः मनोज्ञाः चित्राणि
पदानि यासां ताः ॥१६॥१७॥ विरहेण कातरा विह्वलाः अच्युते आशय श्चित्तं यासां ताः ॥१८॥

श्री
भाग
पूर्वी
१९

कृत्स्नसंगतिं विधाय विघटयती विधाता तं प्रत्येकमाक्रोशन्त्य आहुः अहो इति मैत्र्या हितचरणेन प्रणयेन स्नेहेन च अकृतार्थान् शाम्भोगानपि नानाविधुने विदितियोजयसि तस्मात्त्वदया बालिशोपितमित्याहुः अपार्थकमिति १९ विगर्हितं चलवेदं कर्मेत्याहुः यस्त्वमिति शोकमपनुदती निशोकापनोदः स चासौ स्मितलेशश्च गूढहासस्तेन सुन्दरं एवंविधं मुकुन्दस्य वक्त्रं सकृत्प्रदर्शय पुनस्तस्य पारोक्ष्यं दृश्यलोकं करोषि अस्तत्त्वत्कृतं कर्म अस्मासु नियमित्यर्थः २० किंवदमापदादिविनातिक्रूरत्वमित्याहुः क्रूरस्त्वमिति नलक्रूरोऽहरतिना।

गोप्य ऊचुः अहो विधातस्तव न क्वचिद्दया संयोज्य मैत्र्या प्रणयेन देहिनः तांश्चाकृतार्थान् वियुनङ्क्ष्यपार्थकं विचेष्टितं तेऽर्भकचेष्टितं यथा १९ यस्त्वं प्रदर्श्यासितकुन्तलावृतं मुकुन्दवक्त्रं सुकपोलमुन्नसं शोकापनोदस्मितलेशसुन्दरं करोषि पारोक्ष्यमसाधु ते कृतम् २० क्रूरस्त्वमक्रूरसमाख्यया स्म नश्चक्षुर्हि दत्तं हरसे बताज्ञवत् येनैकदेशेऽखिलसर्गसौष्ठवं त्वदीयमद्राक्ष्म वयं मधुद्विषः २१

हरसीति च दत्तमाहुः अक्रूरसमाख्ययेति न ह्येवं कर्तुमन्यः प्रभवस्ततो नामान्तरेण स्तुवन्नमेवागतोऽसि न त्वक्रूरस्त्वं हरासि नयुष्मत्स्वरूपं निचेतन येन त्वया दत्तेन चक्षुषा मधुद्विषएकदेशे नेत्रवक्त्रादौ त्वदीयं समग्रं सृष्टिनैपुण्यमद्राक्ष्म दृष्टवन्तो वयं तच्चक्षुः अयं भावः समाहूतवेदस्य मामभितानमिति अमर्षेणैव क्रूरसंवियोजनया तस्मान्नेयीकरोषीति २१

160

न

१९

विधातारं विहाय परस्य बभूवुः नवंनवमन्नरिति वनविहेलाभंगमस्थिरं सौख्यं देयस्य सः गृहदीर्घिकाय प्रा
सादात न स्थैव दासस्य पगताः ऊनः स्वकृतानवाः नव कृते नैव स्मिता हिना परवशा अपि नोसात समीहिते नवं
नवं प्रियं यस्य सः अनपत्ने निवारयामास इतिभावः ॥ १२ ॥ सेर्ष्यं मूवुः सर्वाङ्गेषु भातेति पुनर्योषितां मधुरानिवासिनी
नां स्त्रीणामाशिषः सन्यावभूवुः यावत्तस्य तेः स्त्रीकृतस्य मुखे पास्यंतीति प्रसादेनानुसृतेति कथं भूतं प्रणयो ।

नवेन्दवः नलाभंग सौख्यदः समीहितेन स्वकृतानवत विहारयोदान्त जनतान्त नवतीर्थतारस
महोपगतानन प्रियः ॥ १२ ॥ सर्वाङ्गभानासरजनीयमाशिषः सन्यावभूवुः परयोषितां ध्रुवं याः संप्रविश्य ।
स सखे विव्रजन्त्यते पाशेन पांगाङ्कलितस्मितासवं ॥ १३ ॥ नासां मुखे द्रामधु मंजुभाषिते गृहीतचित्तः प
रिवालमनस्यपि कथं पुनर्न स्रतिया स्वनेत्रलाग्राम्याः सलज्जस्मितविभ्रमभ्रमत ॥ १४ ॥

नवेत्रीनेतोत्कलितमनं भितंस्मितमेवासवोरसो यस्मिंस्तन पद्माप्रपांगोत्कलितस्मितेनासव वधूपं यन्मुखे
तेनस्वपानं मुख्यमेव संभावयेति ॥ १३ ॥ नक्षिद्विषाणि दिनानि तथा भवनना मनयाष्य सन्मो हार्णुह पितादिभि
स्वपरावर्तितं न्यायाग मिथ्यात्मनाशं तथाह्नः दैवबलाल्लासां मधुवन्मंजुभिर्भाषितैर्वशीकृतचित्तः तथाताः सांसल
ग्रस्मितैर्विभ्रमैर्भ्रमत परवानपिवाष्टिनत्रोपि यदा व्रजेपरे वा यवाः संनिमय्यस्तनया मनसीयोगोपित्राम्या प्रवि

किंच अस्मत्तुल्यस्वभाजनोऽस्यापवादाय भविष्यतीत्याहुः अद्येति तत्र पुरे दाशार्हादीनां दृशोर्दृष्टेर्महानुत्सवो
भविष्यते ये देवकीसुतं द्रक्ष्यंति तत्रया ये चाध्वनि गच्छतं द्रक्ष्यंति तेषामपि दृशो भविष्यतीति यद्वा दृशा इति
द्वितीया येषां दृशो नेत्राणि महोत्सवो भविष्यते प्राप्स्यते ग्रामस्थस्य भवंतदल्पलेपदत्वे तावक्रूरशापं।
त्याहुः मैतद्विधस्येति एवंविधा विधानेकमंदयस्य सः अतएव निष्कृपस्याक्रूरइति नामस्तो भवतं माभू
त अयद्गतः अतीवदारुणः यस्माद्धि प्रियात्प्राणादपि प्रियं श्रीकृष्णं अध्वनः पारमस्मद्गोचरनादतिदूरं।

अद्य ध्रुवं तत्र दृशो भविष्यते दाशार्हभोजान्धकवृष्णिसात्वतां महोत्सवः श्रीरमणं गुणास्पदं द्र
क्ष्यंति ये चाध्वनि देवकीसुतं २५ मैतद्विधस्याकरुणस्य नाम भूदक्रूर इत्येतदतीव दारुणः योऽसा
वनाश्वास्य सुदुःखितं जनं प्रियात्प्रियं नेष्यति पारमध्वनः २६ अनार्द्रधीरेष समास्थितो रथं तमन्व
मी च त्वरयंति दुर्मदाः गोपा अनोभिः स्थविरैरुपेक्षितं दैवं च नोऽद्य प्रतिकूलमीहते २७

नेष्यति २८ अद्यापि गमनं तीव्रमित्याहुः अनार्द्रधीरिति अनार्द्रा कठिना धीर्यस्य सः तावदेष क्रूरोऽस्ति
अमात्रूढः अस्याः विनयमालत्वस्थ विरंस्यापेक्षितं तेन निवारितं वनत्वरयंति किंच दैवं चेति अद्यंभा
वः यद्यस्माकं दैवमनुकूलं भवेन्न हि विघ्नैः कश्चिदेतेषां मध्ये शतिद्वयेनाप्यकस्माद्गमनस्यापातो वा भवेत अ।

मकरंदिकादिपविष्टमात नतदृष्टीति २१

परस्परं मन्त्रं प्रसादमस्मपि तत्राह निवारयाम इति अक्रूरेण न किं करिष्यन्ति निमिषार्धदुस्त्यजान् मु-
कुन्दस्य संगाद्दैवेन ध्वंसितानि वियोजितानि अत एव दीनानि चेतांसि यासां एवंभूतानामस्माकं न मन्येत यदि भयं १८
तत्रापि कारणान्तरं दर्शयं साहसमेवावलम्बनीयमित्याह यस्येत्याद्यः यस्य ललितस्मितवल्गुमंत्रलीलावलो-
कपरिरम्भणैः अनुरागेण नीतानि यस्यां रासगोष्ठ्यां रासक्रीडासभायां नः अस्माभिः क्षणदा रात्रयः क्षणमिव

निवारयामः समुपेत्य माधवं किं नोऽकरिष्यन्कुलवृद्धबान्धवाः। मुकुन्दसंगान्निमिषार्धदुस्त्यजाद्दैवे-
न विध्वंसितदीनचेतसां १८ यस्यानुरागललितस्मितवल्गुमंत्रलीलावलोकपरिरम्भणरासगो-
ष्ठ्यां नीताः स्म नः क्षणमिव क्षणदा विना तं गोप्यः कथं न्वतितरेम तमो दुरन्तं १९ योऽह्नः क्षये व्रज-
मनन्तसखः परीतो गोपैर्विशन्खुररजश्छुरितालकस्रक् वेणुं क्वणन्स्मितकटाक्षनिरीक्षणेन चित्तं
क्षिणोत्यमुमृते नु कथं भवेम २०

नीताः तममुं कृष्णं विना इत्येतेन तमः विरहदुःखं कथं न्वतितरेम न कथं-
चिदपि तरेम १९ किं च योऽह्नां व्रजन तमसोऽतितरं गणं जीवनमेव कथं स्यादित्याह य इति अह्नः क्षये दिना-
वसाने खुररजोभिश्छुरिता धूसरा अलकाः स्रजश्च यस्य स व्रजं विशन् स्मितेन यत्कटाक्षनिरीक्षणेन नश्चि-
त्तं क्षिणोति हरति अमुं कृष्णं विना नाम कथं भवेम जीवेमेति २० ॥

कृष्णेविषक्तानिस्वारोपितानिमानसानियासांताः लज्जांविसृज्यसुस्वरमुच्चैःरुरुदुः क्रन्दमकुर्वन्‌ः अक्रूराके
मर्केसतिमधुसूदनःगोपीभिरनोरुद्यमानः स्वग्रामःस्वपुरंययौ ३१ स्त्रीणामिति तासामनादृत्यकृतमैत्राह्निकः मैत्रं
मित्रदेवत्यंसंध्योपासनंकृतंतेनसआह्निकंयेनसः ३२ अन्वसज्जन्तअन्वगच्छन् ३३ अनुरंजिताः परावृत्तनि

शुकउवाच एवंब्रुवाणाविरहातुराभृशंव्रजस्त्रियःकृष्णविषक्तमानसाः विसृज्यलज्जांरुरुदुःस्म
सुस्वरंगोविंददामोदरमाधवेति ३१ स्त्रीणामेवंरुदंतीनामुदितेसवितर्यथ अक्रूरश्चोदयामा
सकृतमैत्राह्निकोरथं ३२ गोपास्तमन्वसज्जंतनंदाद्याःशकटैस्ततः आदायोपायनंभूरिकुंभान्गो
रससंभृतान् ३३ गोप्यश्चदयितंकृष्णमनुव्रज्यानुरंजिताः प्रत्यादेशंभगवतःकांक्षंत्यश्चावत
स्थिरे ३४ तास्तथातप्यतीर्वीक्ष्यस्वप्रस्थानेयदूत्तमः सांत्वयामाससप्रेमैरायास्यइतिदौत्यकैः
३५ यावदालक्ष्यतेकेतुर्यावद्रेणूरथस्यच अनुप्रस्थापितात्मानोलेख्यानीवोपतस्थिरे ३६।
तानिराशानिववृतुर्गोविंदविनिवर्तने विशोकाअहनीनिन्युर्गायंत्यःप्रियचेष्टितं ३७ भगवान
पिसंप्राप्तोरामाक्रूरयुतोनृप रथेनवायुवेगेनकालिंदीमघनाशिनीं ३८

रीत्याएणदृग्भिः किंचिरादागतैः प्रत्यादेशंप्रत्याख्यानं ३४ तप्यतीःसंतप्यमानाः आयास्यइतिशीघ्रमाग
मिष्यामीतिदूतवाक्यैः ३५ कृष्णमनुप्रस्थापितान्यात्मानिमनांसियाभिस्ताः लेख्यमयपुत्रिकावत्ति।

16²

कृत्वा एणं वेदं समुद्रमुपप्रस्य समीपं गता ४४ शत्रुभ्यः शंकितः सन् रथ्योपरि निवेश्य ४५ ४६ ब्रह्मणायं
शीजपत्रचमर्षणं चकारः ४७ ४८ ४९ ५० सिद्धादिभिस्तूयमानं ५१ सहस्रं शिरांसि यस्य तं सहस्रफणाभृत्।
मौलयो यस्य संतीति नयातं नीलेवरे यस्य तं विस्रवल्कमलकं देवत ५२ श्वेतं शृंगैः शिखरैः श्वेतं कैलासमिव
तत्रोपस्पृश्य पानीयं पीत्वा मिष्टं मणिप्रभं कृत्वा वेदं स्पप्रस्य संमोरथमाविशत ५३ यक्रूरस्तावुपा
मंत्र्य निवेश्य च रथोपरि कालिंदीसलीरमागम्य स्नानं विधिवदाचरत ५४ ह्रदे मौवालोक्य तौ मलावि
लिशंकितवेनसे यक्रूरायदर्शी त्युपमन्यास्वयं व्यदर्शयत ५५ निमज्य तस्मिन्सलिले जपन्ब्रह्मसना
तनं तावेव ददृशेक्रूरो रामकृष्णौ समन्वितौ ५६ तौ रथस्थौ कथमिह सुतावानकदुंदुभेः ता
र्हि स्वित्स्यंदने न स्त इत्युन्मज्य व्यचष्ट सः ५७ तत्रापि च यथा पूर्वमासीनौ पुनरेव सः निमज्य दर्शनं यत्
न्मे मृषा किं सलिले तयोः ५८ भूयस्तत्रापि सोद्राक्षीत्स्तूयमानमहीश्वरम् सिद्धचारणगंधर्वैरसुरै
र्नतकंधरैः ५९ सहस्रशिरसं देवं सहस्रफणमौलिनं नीलांबरं विसश्वेतं शृंगैः श्वेतमिव स्थितं ६०
तस्योत्संगे घनश्यामं पीतकौशेयवाससम् पुरुषं चतुर्भुजं शांतं पद्मपत्रारुणेक्षणं ६१ चारुप्रसन्न
वदनं चारुहासनिरीक्षणं सुभ्रून्नसं चारुकर्णं सुकपोलारुणाधरम् ६२
स्थितं ६८ तस्योत्संगे क्रोडे लीकृतदेहार्थं विलोकयत्यकादृशेन ह्यामाकेन आलयः ६३ शोभते भ्रुवौ यस्य उन्नता
नासिका यस्य ते च तं च शोभनौ कपोलौ यस्य अरुणावधरौ यस्य तं च तं च ६४

१

तं गांवं सौयस्य सः उरःस्थले श्रीर्यस्य तं वलिवल्गुलोदरं वलयः त्रिवलिभिः शोभायमानं तद्वलिव
न नद्युतमलवद्वन प्रत्यग्रदलसदृशमुदरं यस्य तं ४८ कटितटं च श्रोणिश्च करभसदृशानूरू हृदयं च हृ
दयस्य तत् कटितटश्रोणिकरभोरुहृदयं च तेनान्वितं यद्वा हृदृग्भ्यां कटितटश्रोणिभ्यां करभोरुहृदयेन चा

प्रलंबपीवरभुजं तुंगांसोरस्थलश्रियं कंबुकंठं निम्ननाभिं वलिवल्गूदरं ४९ हृदृक्कटि
तटश्रोणिकरभोरुद्वयान्वितं चारुजानुयुगं चारुजंघायुगलसंयुतं ५० तुंगगुल्फारुणन
खज्योतिर्भिर्विभिन्नं तं नवांगुल्यंगुष्ठदलैर्विलसत्पादपंकजं ५१ सन्महार्हमणिव्रातकिरीट
कटकांगदैः कटिसूत्रब्रह्मसूत्रहारनूपुरकुंडलैः ५२ भ्राजमानं पद्मकरं शंखचक्रगदाधरं ।
श्रीवत्सवक्षसं भ्राजत्कौस्तुभं वनमालिनं ५३ सुनंदनंदप्रमुखैः पार्षदैः सनकादिभिः सुरेशै
र्ब्रह्मरुद्राद्यैर्नवभिश्च द्विजोत्तमैः ५४

न्वितं ५० तुंगगावीषदुन्नतौ गुल्फौ अरुणनखज्योतिर्भिर्विभिन्नं तथा
नवाः कोमला अंगुल्यः अंगुष्ठौ च तान्येव दलानि तैश्च विलसत् शोभमानं पादपंकजं यस्य तं ५१ महा
र्हमणिव्रातान्वितैः किरीटादिभिः ५२ ५३ तत्पार्षदैः स्वामीनिकटवर्तमानैः सनकादिभिर्ब्रह्म
नि ब्रह्माद्यैर्महेश्वर इति मरीच्यादिभिर्द्विजोत्तमैः प्रजापतिभिरिति ५४ ॥

श्री
भाग
मूलो
१६३
१६४

163
&
164

१६३
१६४

वसन्तु परिवारः सनन्दनादयः प्रमुखा मुख्या येषां तैः परं दैवतमिति वचोभिः पृथक् पृथक् भावो

भिप्रायो येषां तैः पृथग्भावैः वचोभिरिति वा ५५ विद्याविद्ये जीवानां मुक्तिसंसृतिहेतू मायात्मयोः कारणं प्र

कृतिः दिनीसेवित इलात्मनमात्मः भिरुपाभिरस्मिलिषेवितं ५६ विलोक्य सुभृशं प्रीतः अत्यन्तं सान्द्रो भावे बभू

तः परमेश्वरं दृष्टवानिति ५७ ५८ इति श्रीभावार्थदीपिकायां दशमस्कन्धे एकोनचत्वारिंशोध्यायः ३९ चत्वारिंशे ततोऽक्रू

रः कृष्णमनन्तमीश्वरं प्रणम्य भक्त्या तुष्टाव सगुणागुणभेदतः श्रीकृष्णं प्रणमति नतोस्मीति हेतूनां महतां ।

सनन्दनादनारदवसुप्रमुखैर्भागवतोत्तमैः स्तूयमानं पृथग्भावैर्वचोभिरमलात्मभिः ५५ श्रिया पु

ष्ट्या गिरा कान्त्या कीर्त्या तुष्ट्येलयोर्जया विद्ययाविद्यया शक्त्या मायया च निषेवितं ५६ विलोक्य सु

भृशं प्रीतो भक्त्या परमया युतः हृष्यत्तनूरुहो भावपरिक्लिन्नात्मलोचनः ५७ गिरा गद्गदयास्तौषीत्स

त्वमालम्ब्य सात्वतः प्रणम्य मूर्ध्नावहितः कृताञ्जलिपुटः शनैः ५८ इति श्रीभागवते दशमस्कन्धे एको

नचत्वारिंशोध्यायः ३९ अक्रूर उवाच नतोस्म्यहं त्वाखिलहेतुहेतुं नारायणं पूरुषमाद्यमव्ययं य ।

न्नाभिजातादरविन्दकोशाद्ब्रह्माविरासीद्यत एष लोकः १ भूस्तोयमग्निः पवनः खमादिर्महानजा ।

दिर्मन इन्द्रियाणि सर्वेन्द्रियार्थाः ... लोस्मि नतु त्वमस्मि नत्वमः कृतो मां वा लेनतो स्मि नगादाद्यं पूरुषमव्ययं च प्रजाति नियतमित्यर्थः कृतयतत

मखिलहेतूनां हेतुं सर्वश्रीनारायणो नारहमिति चेत्तत्राह नारायणं त्वां किं नारायण इति मां स्तोषि कारा ।

स्वेतिः सन्मात्रमेवत्याह यन्नाभिजातादिति यतो ब्रह्मणः । अखिलहेतुत्वं प्रपञ्चयति भूरिति खमादिरहंका

श्री
भाग
गृही
१५५

165

तिचेदित्याशंक्य तन्निवेशामायातत्त्वात्मास्थ्येन।

नन्वनित्यस्तुतिः कथं क्रियते नेह मेवाग्यतत्त्वस्य ब्रह्मत्वं तत्त्वं ब्रह्मेति चेदित्याशंक्य ततो आत्मनस्तत्स्वरूपेण विदुः अतात्मतया
न कोपि वेद तथाह नैते ब्रह्मादयः अतो बलात् आदित्ये यो ते आत्मनस्तत्स्वरूपेण विदुः अतात्मतया न तु तत्र अमां मातामां।
तु तेन करणेन गृहीता तद्देवतैः प्रमत्तादिभिर्दृष्टानहात्तदेहदृग्गोचर इति भावः न तु तत्र अमां माताम।
तु जीवस्तत्तास्यतीत्याद्याः तदिति सप्रज्ञो बलात् अपि प्रज्ञायाः गुणैरनुवहद्याहतः गुणातीते तत्स्वरूपेण वे।
न जीवस्तत्तास्यतीत्याद्याः जडत्वादेव जीवस्तु तान् आ
द्यान्यः ऊर्ध्वं तास्यतीति यदा पञ्चत्वादयः आत्मनः स्वरूपेण वस्तु स्वरूपेण च न विदुः जडत्वादेव जीवस्तु तान् आ

वैतत्स्वरूपं विदुरात्मनस्ते ब्रह्मादयो नात्मतया गृहीताः अतो नु वहद्भिः सगुणैरज्ञायाः गुणातीतं वेद न
तत्स्वरूपं २ तद्योगिनो यन्नास्ति ब्रह्म महापुरुषमीश्वरं साध्यात्मं साधिभूतं च साधिदैवं च साधवः ५
तत्स्वरूपं २ तद्योगिनो यन्नास्ति ब्रह्म महापुरुषमीश्वरं

स्मानं वचेति न तत्तत्स्वरूपमिति यथोक्तं हंसगुह्ये देहोऽसवोऽक्षा मनवो भूतमात्रा नात्मानमन्यं च विदुः प
स्मानं वचेति न तत्तत्स्वरूपमिति न तु यदि केपि न जानन्ति कथं तर्हि संसा
रं यत सर्वं प्रमात्वेद गुणांश्च तज्ज्ञो न वेद सर्वज्ञमनन्तमीडे इति २ न तु यदि केपि न जानन्ति कथं तर्हि संसा
र निवृत्तिर्जीवानामित्याशंक्य साक्षाद्भगवदर्पितप्रियेन केनापि मार्गेण भक्ता नो तेन गम्यो भगवानाह तद्योगि।
न इति हैरण्यगर्भादयोध्यात्माधिभूताधिदैवसाहितं महापुरुषं तदेतद्योगिनस्तत्स्वरूपमीश्वरं च यजन्तीति न
तदेवेश्वरं सांख्ययोगावकौ कृत्यौ को ५

१५५

त्रयीमार्गे कर्मज्ञानभेदेन द्वैविध्यमस्तीति त्र्याख्याचेति श्लोकद्वयेन वैतानिकाः कर्मयोगिनः तावेवत्तामेवयजन्तेते ना।
नातेंद्रवरुणवाय्वादीन्यज्ञेनैनतन्मामित्यन्वयः नानाबहुरूपाणीन्द्रादीनि रूपाणि येषांतैः मरुत्सोमाद्याख्ययाना।
मत्तामेवयजन्तेत्यर्थः प्रभावः इन्द्रवरुणादिस्तुक्तेविग्रहादयः सर्वेषामेवप्रकाश्यतेनचसर्वेषु पवहूवः संति
प्रतेनामभेदेननामेवयजन्तेत्यर्थः तथाचश्रुतिः सप्रथमः सक्रतुर्विश्वकर्मा सप्रथमो मित्रावरुणाग्निः स।

त्र्याख्याचविषयाकेचित्तावैवैतानिकाद्विजाः यजन्तेवितनैर्यज्ञैर्नानारूपामराख्यया ५ एकेना।
खिलकर्माणि मत्स्वेनापशामंगनाः तानितेनात्मनयज्ञेनयजन्तिज्ञानविग्रहं ६ अन्येचसंस्कृतात्मा
नो विधिनाभिहितेनते यजन्तितन्मयास्त्वांवैबहुमूर्त्येकमूर्तिकं ७ त्वामेवान्येशिवोक्तेनमार्गेण
शिवरूपिणं बह्वाचार्यविभेदेनभगवन्समुपासते ८

प्रथमोह्रद्रस्मेतिविष्णुविक्रितस्यनामसन्धोऽतरायह विराजद्दोतीति ५ ज्ञानयज्ञेनसमाधिनासांख्ययोगत्रयी।
मार्गोक्ताः ६ वैष्णवशैवमार्गौवाहृद्वयेनाऽस्येवेति संस्कृतात्मानः वैष्णवशैवदीक्षिताः संतः तेनतया
भिहितेनपंचरात्रादिविधिना तन्मयाः तन्मयत्वेनतात्मानंचिंतयन्तः त्वदेकप्रधानाइतिवा वासुदेवसं
कर्षणप्रद्युम्नानिरुद्धभेदेनबहुमूर्तिमपिश्रीनारायणरूपेणैकमूर्तिकंचत्वामेवयजन्ते ७ बह्वाचार्यवि

भेदेति नामशैवपाशुपतादिमार्गाणां ८

160

येऽन्यदेवताभक्तास्तेऽपि त्वामेव यजन्तीत्याह सर्व एवेति हे सर्वदेवमय ननु एते परस्पराधिक्षेपकलहव्याकुलचित्ताः कथमेकमेव यजन्तीत्याशङ्क्याह यद्यप्यन्यधिय इति बुद्धिमात्रभेदो न वस्तुभेद इत्यर्थः ९ तत्सर्वे मार्गास्त्वय्येव पर्यवस्यन्तीति सदृष्टान्तमाह यथेति अद्रेः सकाशात्सर्वतः प्रभवन्ति यासां ताः पुनः पर्जन्येनापूरिताः वहन्त्यो नद्यः सर्वतः सिन्धुमेव विशन्ति यथा तद्वदेता गतयो मार्गास्त्वन्ततस्त्वा-

सर्व एव यजन्ति त्वां सर्वदेवमयेश्वरं ये प्यन्यदेवताभक्ता यद्यप्यन्यधियः प्रभो ९ यथाद्रिप्रभवा नद्यः पर्जन्यापूरिताः प्रभो विशन्ति सर्वतः सिन्धुं तद्वत्त्वां गतयोऽन्ततः १० सत्वं रजस्तम इति भवतः प्रकृतेर्गुणाः तेषु हि प्राकृताः प्रोता आब्रह्मस्थावरादयः ११

मेव विशन्ति १० अन्वयेमाह सत्वमिति भवतः शक्तिर्या प्रकृतिस्तस्याः सत्वादयो गुणाः अतः प्राकृताः प्रकृतौ प्रादुर्भूता इति यत क्रमेणोपाधिलयात्सर्वे त्वामेव विशन्तीति यद्वा भवतः प्रकृतेर्गुणेषु प्रोताः प्रविष्टाः तेषु गुणाः प्राकृताः ब्रह्मादयो भवतस्त्वन्निरिक्ता न सन्तीति अतस्त्वमेव सर्वदेवमय इति ११

ननु भवतः प्रकृतेश्च निबद्धत्वमात्मनापि प्रकृतिसंबंधं ब्रवीषि तत्रस्थतेषां मम च को विशेषः स्यादित्याशंक्य विशेषमाह नमस्तेस्त्विति अविषक्तदृष्टये विलिप्तबुद्धये कुतः सर्वात्मने स्वव्यतिरिक्ताभावाद् अविषक्तदृष्टित्वमित्यर्थः किं च सर्वधियां साक्षित्वात् सर्वबुद्धिसाक्षित्वान्न क्वापि बुद्धिलोप इत्यर्थः इतोन्येषां संसारित्वमाह गुणप्रवाहस्त्विति देवनृतिर्यक्षु च आत्मनो येषां तेषु देवादिशरीराभिमानिष्वित्यर्थः तदविद्ययाकृतोयं गुणप्रवाहः प्रवर्तते

न्नेयं नमस्तेस्त्वविषक्तदृष्टये सर्वात्मने सर्वधियां च साक्षिणे गुणप्रवाहोयमविद्यया कृतः प्रवर्तते देवनृतिर्यगात्मसु ॥२४॥ अग्निर्मुखं तेवनिरंघ्रिरीक्षणं सूर्यो नभो नाभिरथो दिशः श्रुतिः द्यौः कं सुरेंद्रास्तव बाहवोर्णवाः कुक्षिर्मरुत्प्राणबलं प्रकल्पितं ॥२५॥ रोमाणि वृक्षौषधयः शिरोरुहा मेघाः परस्यास्थिनखानि तेद्रयः निमेषणं रात्र्यहनी प्रजापतिर्मेढ्रस्तु वृष्टिस्तव वीर्यमिष्यते ॥२६॥

तो महात्म्यविशेष इत्यर्थः ॥२४॥ सर्वात्मन इत्यनेनोक्तं सगुणं रूपं दर्शयति अग्निर्मुखमिति द्वाभ्यां अग्न्यादीननूद्य ईश्वरावयवत्वं विधीयते योयमग्निः स तव मुखमित्यादिवचनव्यक्त्या ईशत्वोच्यतः मुखे कक्ष्याः सर्वाणींद्रियं कं मूर्धा प्राणानां बलं च तव ॥२५॥ अद्रयः परस्य तेस्थिनखानि ॥२६॥ ॥

श्री
भाग
स्कं ५ टी
१८

167

न केवलमेतावत् किंतु सर्वोऽप्ययं प्रपंचस्तद्रूप एवेति व्यवहारमात्रं प्रपंचस्य विकारात्मत्वादित्याशयेन सम्यक्स्यूतेन स्वेन पृथक् कल्पितेनात्मना क्रियाम्य इत्याह तथेति मय्यात्मनि पुरुषे ये लोकाद्यः संजिहते प्रचलन्ति हेतुमयात्मनि विलिवा कथंभूते त्वयि मनोमये मनः प्रधाने मनोवृत्तिभिर्व्याप्ते रूपतेन यथा यथा बुद्ध्या मनसैवानु दृष्टं स्वमिवात्मनि प्रतीतेः जले यथा जलौकसः स्तम्बशाखादयः यथा चोदुंबरान्तः केशरे मशकाः

तथा मया स्मत्पुरुषे प्रकल्पिता लोकाः सपाला बहुजीवसंकुलाः यथा जले संजिहते जलौकसो ऽप्युदुंबरे वा मशका मनोमये ॥१२॥ यानि यानीह रूपाणि क्रीडनार्थं विभर्षि हि तैरामृष्टशुचो लोका मुदा गायन्ति ते यशः ॥१३॥ नमः कारणमत्स्याय प्रलयाब्धिचराय च हयशीर्ष्णे नमस्तुभ्यं मधुकैटभमृत्यवे ॥१४॥ अकूपाराय बृहते नमो मन्दरधारिणे क्षित्युद्धारविहाराय नमः शूकरमूर्तये ॥१५॥ नमस्तेऽद्भुतसिंहाय साधुलोकभयापह वामनाय नमस्तुभ्यं क्रान्तत्रिभुवनाय च ॥१६॥

परस्परं वार्तानभिज्ञाः एवमनन्तानि ब्रह्माण्डानि त्वयि संचरन्तीत्यर्थः ॥१२॥ तस्मादेवंभूतं तव स्वरूपं दुरवगाहमिति त्वदवतारकथामृतमेव संतः सेवन्त इत्याह यानि यानीति आमृष्टा परिमार्जिता शुचः शोका येषां ते ॥१३॥ अतः स्वयमवतारानुसमरन्नाह नम इति हयशीर्ष्णे हयग्रीवाय मधुकैटभयोः मृत्यवे हन्त्रे ॥१४॥ अकूपाराय कू-

श्रीमद्भागवते स्कं ५ टी
१८
१५८

भृगूणांपतयेपरशुरामाय २० वासुदेवादिचतुर्व्यूहरूपेणप्रणमति नमस्तइति २१ २२ एवंस्तुत्वाबंधमोक्षं
प्रार्थयितुमाह भगवन्निति ग्रसतिदेहादौयोग्राहस्तद्ग्रहोयस्यसः असद्ग्रहोयस्येतिवा २३ नकेवलमयंलोकः
अहमपितथैवेत्याह अहमिति २४ मूढत्वमेवप्रकटयति विपर्ययमति अनित्येकर्मफलेनित्यमिति।

नमोभृगूणांपतयेदृप्तक्षत्रवनच्छिदे नमस्तेरघुवर्यायरावणान्तकरायच २० नमस्तेवासुदेवा।
यनमःसंकर्षणायच प्रद्युम्नायानिरुद्धायसात्वतांपतयेनमः २१ नमोबुद्धायशुद्धायदैत्यदान।
वमोहिने म्लेच्छप्रायक्षत्रहंत्रेनमस्तेकल्किरूपिणे २२ भगवन्जीवलोकोयंमोहितस्तवमायया
अहंममेत्यसद्ग्राहोभ्राम्यतेकर्मवर्त्मसु २३ अहंचात्मात्मजागारदारार्थस्वजनादिषु भ्रमामिस्वप्न
कल्पेषुमूढःसत्यधियाविभो २४ अनित्यानात्मदुःखेषुविपर्ययमतिर्ह्यहं द्वंद्वारामस्तमोविष्टो
नजानेनात्मनःप्रियं २५ यथाबुधोजलंहित्वाप्रतिच्छन्नंतदुद्भवैः अभ्येतिमृगतृष्णांवैतद्वत्त्वाहंप
राङ्मुखः २६

अनात्मनिदेहेआत्मेति दुःखरूपेगृहदारादौसुखमिति विपरीतमतिरित्यर्थः द्वंद्वेषुसुखदुःखादिषुआरमति।
क्रीडतीतितथासः ननुदुःखेकथंरतिस्तत्राह तमोविष्टःतमसाव्याप्तः अतआत्मनःप्रियंप्रेमास्पदंनाजानाम।
नजानामीत्यर्थः २५ तदेवसदृष्टान्तमाह यथेति तस्माज्जलादुद्भवंतीतितदुद्भवानितृणादीनितैः तथामायाच्छ।

नन्वेवं नानतः कृतो विषयाभिमुखत्वं तत्राह नोत्स्मद् इति कृपणा विषयवासनानुकूला धीर्यस्य सः अत एव
कामकर्मभ्यां हतं अभिनिविष्टं चित्तं यस्य अत एव बलिभिर्विषयसंघैरितस्ततः आकृष्यमाणं मनो रोद्धुं लिप्सन्नपि न शक्नो
मीति ॥२०॥ तदेवमसत्तर्कोपायः सोऽहं तवांघ्रिमुपगतः शरणं प्राप्तः नन्विदृशपरतंत्रस्यैव तदपि कुतस्तत्राह त
च्चापीति दुर्लभत्वं यावन्न तवांघ्र्युपगमनं वासनानुरूपं अतो भगवतोऽनुग्रह एवेत्यहं मन्ये अनुग्रहे सती
ति वा तदुक्तं सेवनेऽहं भवति किं मदनुग्रहेण त्वत्तत्राह पुंस इति जीवस्य संसारस्यापवर्गः समाप्तिर्यदा
तत्कृपया भवेत्तस्य भावना सद्भवति हे अब्जनाभ तदा सदुपासनासंपद्यते तर्हि वैव धीर्मतिर्भवेत् तत्कृ

तोऽस्मीत्यहं कृपणधीः कामकर्महतं मनः रोद्धुं प्रमाथिभिश्चाक्षैर्ह्रियमाणमितस्ततः ॥२०॥ सोऽहं तवां
घ्र्युपगतोऽस्म्यसतां दुरापं तच्चाप्यहं भवदनुग्रह ईश मन्ये पुंसो भवेद्यर्हि संसरणापवर्गस्त्वय्यब्ज
नाभ सदुपासनया मतिः स्यात् ॥२१॥ नमो विज्ञानमात्राय सर्वप्रत्ययहेतवे पुरुषेशप्रधानाय ब्रह्म

णे विज्ञानमस्त्सेवानन्तया सन्मतिः नतयामुक्तिरित्यर्थः ॥२२॥ पादयोः पतनप्रार्थयन्निति द्वयेन नमस्यति ।
विज्ञानमेव मात्रा मूर्तिर्यस्य तस्मै अत एव सर्वप्रत्ययहेतवे समस्तज्ञानकारणाय किंच पुरुषेशप्रधाना
य पुरुषस्य ईशाः स्वावृत्तः प्रापकाः कालकर्मस्वभावादयः तेषां प्रधानाय नियंत्रे अतः ब्रह्मणे परि
पूर्णाय किंचानंताः शक्तयो यस्य तस्मै तत्त्वमायाविद्याशक्तिर्यस्य तस्मै अथवा प्रधानं प्रकृतिः पुरुषस्ता
स्ववर्तकः ईशः कालः एतत्त्रितयात्मने ब्रह्मणे वस्तुनिष्ठभगवान् प्रकृतिरूपो उपादाननमाधारः पुरुषः ।

सर्वस्य प्रत्ययहेतुत्वमभिप्रेत्य तत्र नतोऽस्मीति नमस्त इति वासुदेवाय चित्ताधिष्ठात्रे सर्वभूतक्षयाय क्षयः आश्रयः अ
हंकारस्य प्राणिनामाश्रयः ततस्त्वाहंकाराधिष्ठात्रे संकर्षणायेत्यर्थः हृषीकेशेति बुद्धिमनसोरधिष्ठात्रोः
प्रद्युम्नानिरुद्धयोरैक्योक्तम्प्रपन्नं शरणागतं मां पाहीति प्रार्थना ३० इति श्रीभावार्थे दशमस्कंधे चत्वारिं

नमस्ते वासुदेवाय सर्वभूतक्षयाय च हृषीकेश नमस्तुभ्यं प्रपन्नं पाहि मां प्रभो ३० इति श्रीभागव
ते दशमस्कंधे चत्वारिंशोऽध्यायः ४० शुक उवाच स्तुवतस्तस्य भगवान्दर्शयित्वा जले वपुः भूयः।
समाहरत्कृष्णो नटो नाट्यमिवात्मनः १ सोऽपि चांतर्हितं वीक्ष्य जलादुन्मज्ज्य सत्वरः कृत्वा चावश्यकं
सर्वं विस्मितो रथमागमत २ तमपृच्छद्धृषीकेशः किं ते दृष्टमिवाद्भुतं भूमौ वियति तोये वा तथा त्वां।
लक्षयामहे ३ अक्रूर उवाच अद्भुतानीह यावंति भूमौ वियति वा जले त्वयि विश्वात्मके तानि
किं मेऽदृष्टं विपश्यतः ४

शोऽध्यायः ४० एकचत्वारिंशके दूनर

नेकं प्रविश्य पुरीं ततो वरानदात्तुष्टः सुदा
म्नो वायकस्य च १ सशंकमक्रूरमनः प्रमोदस्तथा संदर्शनतस्तु पातः स्वराज्यपालीमथुरामपश्यद्दलं।
कृत्वा नंतं महोत्सवाप्तो १ २ भूमौ वियति वा जले वा यावंत्यद्भुतानि तानि त्वय्येव संति तं च त्वां पश्यतो।
तो मे किमद्भुतं दृष्टं मयापि तत्सर्वं दृष्टमेवेत्यर्थः ४॥

श्री
भाग
दशी
१९९

नन्वस्माभिः पूर्वमेव त्वं विस्मितमुखो लक्षितोऽसि अतो भूमौ वियति जले वा किमप्यद्भुतं दृष्टमेवेति चेत्तत्रा
ह यत्राद्भुतानीति यत्र त्वयि सर्वाण्यद्भुतानि तं त्वानुपश्यतो मे अत्र भूम्यादौ किमद्भुतं न दृष्टं नाविनानन्तत्र ।
किंचिदद्भुतमित्यर्थः देवलत्वं परमेष्ठ्योऽस्यार्थः ब्रह्मन्निति वा पाठः ५ दृष्टिं नाददुः पश्यन्त एव स्थिता इत्यर्थः ।

यत्राद्भुतानि सर्वाणि भूमौ वियति वा जले तं त्वानुपश्यतो ब्रह्मन्किं मे दृष्टमिहाद्भुतं ५ इत्युक्त्वा चो
दयामास स्यंदनं गांदिनीसुतः मथुरामनयद्रामं कृष्णं चैव दिनात्यये ६ मार्गे ग्रामजना राजंस्तत्र
तत्रोपसंगताः वसुदेवसुतौ वीक्ष्य प्रीता दृष्टिं न चाददुः ७ तावद्व्रजौकसस्तत्र नंदगोपादयोऽग्रतः
पुरोपवनमासाद्य प्रतीक्षंतोऽवतस्थिरे ८ तान्समेत्याह भगवानक्रूरं जगदीश्वरः गृहीत्वा पाणिना पाणिं
प्रश्रितं प्रहसन्निव ९ भवान्प्रविशतामग्रे सहयानः पुरीं गृहं वयं त्विहावमुच्याथ ततो
द्रक्ष्यामहे पुरीं १० अक्रूर उवाच नाहं भवद्भ्यां रहितः प्रवेक्ष्ये मथुरां प्रभो त्यक्तुं नार्हसि मां नाथ भक्तं
ते भक्तवत्सल ११ आगच्छ याम गेहान्नः सनाथान्कुर्वधोक्षज सहाग्रजः सगोपालैः सुहृद्भिश्च ।

र्थः ७ ग्रामजनाग्रामजनं प्रतीक्षमाणाः स्थिताः ८ प्रश्रितं विनीतं यथा भवति तथा ९ सगृहं च प्रविशताना
मः अवमुच्य आत्मानं विश्राम्येत्यर्थः १० ॥ साग्रजः सहगोपालैरागमनतो गृहान्सनाथान्कुर्वित्यर्थः १२

१९९

यच्छौचेनतनयस्यपादरजसः तालनोदकेनगृह्णातागतस्थितनपितरस्तृप्यंति साग्रयः सुराश्चपि ॥ श्लोकः ९।
ए एवकीर्त्यादेः एकांतभक्तानांयागतिस्तांचलेभे ॥ पुनन पवित्रवंतः याभिरद्भिःसगरात्मनाःब्रह्मदंडहता।
अपिसद्यःस्वर्गंसामाः ॥ प्रार्थ्यमानो नमस्करोति देवदेवेति अतः परमन्यच्छ्रेयो नास्तीति मत्वाभक्तिवद्धु

पुनीहिपादरजसा गृहान्नो गृहमेधिनां यच्छौचेनानुतृप्यंति पितरः साग्रयः सुराः ॥ अवनिज्यांघ्रि
युगलमासीच्छ्लोक्यो वलिर्महान् ऐश्वर्यमतुलं लेभे गतिं चैकान्तिनां तु या ॥ आपस्तेंघ्र्यवनेजन्यस्त्री
लोकान्शुचयोपुनन् शिरसाधत्तयाः शर्वः स्वर्याताः सगरात्मजाः ॥ देवदेव जगन्नाथ पुण्यश्रवणा
कीर्तन यदूत्तमोत्तमश्लोक नारायण नमोस्तुते ॥ श्रीभगवानुवाच आयास्ये भवतो गेहमहमार्य।
समन्वितः यदुचक्रद्रुहं हत्वा वितरिष्ये सुहृत्प्रियं ॥ शुक उवाच एवमुक्तो भगवता सोऽक्रूरो विमना
नाइव पुरीं प्रविष्टः कंसायकर्मावेद्यगृहं ययौ ॥ अथापराह्णे भगवान् कृष्णः संकर्षणान्वितः मथु
रां प्राविशद्गोपैर्दिदृक्षुः परिवारितः ॥

यासंयोपयंति ॥ आदौ तावयदुच कायद्रुह्यतीति यदुचक्रध्रुक् तं
कंसंहत्वा सुहृदां प्रियं वितरिष्येदास्यामि ॥ रामकृष्णावानीताविति स्वकृतं कर्मावेद्य समर्प्यगृहं ययौ अथकृ
२ ॥ गोपैः परिवारितः पुरीं प्राविशत् ॥ ॥

श्री
भाग
टी.
१०

170

श्रीकृष्णहृष्टां पुरीमनुवर्णयन्निचतसृभिः ददर्शेति स्फाटिकानि तुंगानि गोपुराणि पुरद्वाराणि गृहद्वाराणि
च यस्यां तां बृहंति हेममयानि कपाटानि तोरणानि च यस्यां तां ताम्रेण आरः आरकूटस्तन्मयाः कोष्ठा
धान्यागाराः शालादयश्च यस्यां तां परिखाः परितः खातगर्तास्ताभिर्दुरासदां दुर्गमां उद्यानानि हृद्यानि
वनानि रम्याण्युपवनानि च निकटानि तैरुपशोभितां २० सौवर्णाः शृंगाटकाः चतुष्पथा हर्म्याणि धा
निनां गृहाणि च निष्कुटा गृहोद्यानानि आरामाश्च तैरुपशोभितां श्रेणीनामेकरूपशिल्पोपजीविनां सभाभिः

ददर्श तां स्फाटिकतुंगगोपुरद्वारां बृहद्धेमकपाटतोरणां । ताम्रारकोष्ठां परिखादुरासदामुद्यानर
म्योपवनोपशोभितां २० सौवर्णशृंगाटकहर्म्यनिष्कुटैः श्रेणीसभाभिर्भवनैरुपस्कृतां वैदूर्यव
ज्रामलनीलविद्रुमैर्मुक्ताहरिद्भिर्वलभीषु वेदिषु २१ जुष्टेषु जालामुखरंध्रकुट्टिमेष्वापारावत
बर्हिनादितां संसिक्तरथ्यापणमार्गचत्वरां प्रकीर्णमाल्यांकुरलाजतंडुलाम् २२

प्रवेशनस्थानैः भवनैरन्यैश्च गृहैः उपस्कृतां अलंकृतां अमलैः स्फाटिकैः हरिद्भिर्मरकतैः वैदूर्यादिभिर्जु
ष्टेषु वलभ्यादिषूपलक्षितां २१ आविष्टरूपविष्टैः पारावतैर्बर्हिभिश्च नादितां तत्र वलभ्यः गृहस्योपरिभागेषु
वक्रदारुकल्पितानि वेदयः वलभीनामधोदेशे विरचितावष्टंभवेदिकाः जालामुखरंध्राणि गवाक्षच्छिद्रा
णि कुट्टिमानि मणिबद्धाभूमयः तेष्विति रथ्या राजमार्गाः आपणाः पण्यवीथयः मार्गाः अन्ये चत्वराः अंगणा
नानि संसिक्तानि रथ्यादीनि यस्यां तां प्रकीर्णमाल्यादयो यस्यां तां २२ ॥

१०

आप्लुतौः कुंभैर्द्वाभ्यां चंदनेन चर्चितैः प्रसूनानां दीपानां वालयोपेषुतैः धूपैः फलगुच्छैः उपलक्षितारंभाः क्रमु
कास्तु तन्मस्तकैः सकेतनभिः केतवोध्वजाः तन्मस्तकैः पट्टिकाविनतिपरिमाणपट्टवस्त्राणि तन्मस्तकैः नेत्रे
पंक्तिः हारेषु भवनस्तंभेषु लालनासुपविक्रमाः तन्मध्ये तु प्रसूनावलयः कंटपट्टिकाः मुक्ताचूतादिपल्लवाः तउ
परिपाशोनरदीपावलयः तन्मस्त्रियोरस्मात्कमुकाः केतनवस्त्रारणानि वेति प्रतिगृहद्वारेवितानियस्यां तां

आपूर्णैः कुंभैर्दधिचंदनोक्षितैः प्रसूनदीपावलिभिः सपल्लवैः सवृंदरंभाक्रमुकैः सकेतनैः स्वलंकृ
तद्वारगृहां सपट्टिकैः ॥२१॥ तां संप्रविष्टो वसुदेवनंदनो वृतो वयस्यैर्नरदेववर्म्मणा द्रष्टुं समीयुस्त्वरि
ताः पुरस्त्रियो हर्म्याणि चैवारुरुहुर्नृपात्मकाः ॥२२॥ काश्चिद्विपर्यस्तधृतवस्त्रभूषणा विस्रस्तवैकं युग
लेष्वथापराः कृत्वैकपत्रश्रवणैकनूपुरा नान्या द्वितीयेनयनाश्चलोचने ॥२३॥ अभ्यंगमेकास्तदपास्य
सान्यस्वाभ्यज्यमाना अकृतोपमज्जनाः स्वपंमन्धायानिशम्यनिःस्वनं प्रधाय ययौ भ्रमपोह्यमाना ॥

॥ नरदेववर्म्मना राजमार्गेण तां पुरीं संप्रविष्टो यदा तदा पुरस्त्रियस्तो द्रष्टुं समुन्नसका हर्म्याण्यारुरुहुः ॥
गोल्लकरमेवारुह्येन काश्चित्ति विपर्यक्षविपरीतानि वस्त्राणि भूषणानि च याभिस्ताः युगलेषु यार्थेषु कुंड
लकंकपादिषु एकं विस्रस्तसमीपुः कृत्वैकमेवपत्रं ययोस्तु श्रवणयोर्यास्ताः एकमेव नूपुरं चरणभूषणं या
सांतास्तथान्याः द्वितीयं एकस्मिन्नेव लोचने कज्जलं निधायैव ॥ तदानीमन्याः अभ्यज्यमानाः सखीभिः कि

प्रमाणलीलावत्यां : शृङ्गारलीला : ... २५

श्री
भाग
दशे
१८

171

प्रगल्भायाः लीलास्ताभिः हसितानि ईक्षणानि च तैः श्रियं रमयतीति श्रीरमणः तेनात्मना वपुषा नासौ
दृशामुत्सवं ददत् मनांसि जहार २२ मुहुः स्फुटमानमहतचेतसः सम्यक् दृष्ट्वा तस्य श्रवणं च उक्तमेव त
देवस्तथा तयोः श्रवणं सेवनं तेन न लब्धो मानो याभिस्ताः स्त्रियः उक्ताः दितनेव हारेण आत्मनि मनसि लब्ध्वा ।

मन्दस्मितामांसविटलोचनैः प्रगल्भलीलाहसितावलोकनैः जहार मत्तद्विरदेन्द्रविक्रमो दृ-
शां ददच्छ्रीरमणात्मनोत्सवं २२ दृष्ट्वा मुहुः श्रुतमनवद्युतचेतसस्तं तस्येक्षणोत्स्मितसुधोक्षण-
लब्धमानाः ज्ञात्वा मूर्तिमुपगूह्य दृशात्मलब्धोल्लासवचोनहरन्ते तमरिंदमापि २३ प्रासादशि-
खरारूढाः प्रीत्युत्फुल्लमुखाम्बुजाः अभ्यवर्षन्सौमनस्यैः प्रमदा बलकेशवौ २४ दध्यक्षतैः ।
सोदपात्रैः स्रग्गन्धैरभ्युपायनैः तावानर्चुः प्रमुदितास्तत्र तत्र द्विजातयः २५ ऊचुः पौरा अहो गोप्य-
स्तपः किमचरन्महत् या ह्येतावनुपश्यन्ति नरलोकमहोत्सवौ २६ रजकं कंचिदायान्तं रंग-
कारं गदाग्रजः दृष्ट्वायाचत वासांसि धौतान्युत्तमानि च २७ देह्यावयोः समुचितान्यंग वासांसि
चार्हतोः भविष्यति परं श्रेयो दातुस्ते नात्र संशयः २८

प्रासंगपरिभूय तदृशामितलितम् नेत्रमात्रप्रियं यां ।
जहुः देहत्रिदशनिर्जितकामवृत्तिसम्बोधनं शृंगाररसेनिमग्ना माभूदिति २८ सौमनस्यैः शोभनकुसुमसमू-
हैः शोभनमनोभवैर्वा २४ २५ पौराः पुरस्त्रियः २६ रजकोवस्त्रनिर्णेजकः सपवक्षाणां रामपि कुर्वन्तं ।

१७१

रुषितः कुपितः ३२ उद्वृत्ताः गिरीवनेचचारथ येनिसंपूर्णंपरिधत्थेति संभावनायांलोट् अभीप्सथइ-
च्छथ ३३ राजकीयाः लुम्पन्तिः स्वीकुर्वन्ति ३४ ३५ वासःकोशान्वस्त्रपुटकान् ३६ वसित्वापरिधायानेकृ।

सयाचितोभगवतापूर्णकामेनसर्वतः साक्षेपंरुषितःप्राहभृत्योराज्ञःसुदुर्मदः ३२ ईदृशान्येव
वासांसिनित्यंगिरिवनेचराः परिधत्तकिमुद्वृत्ताराजद्रव्याण्यभीप्सथ ३३ यातासुबालिशामैवं
प्रार्थ्यंयदिजिजीविषा बध्नन्तिघ्नन्तिलुम्पन्तिदृप्तंराजकुलानिदि ३४ एवंविकत्थमानस्यकुपितो
देवकीसुतः रजकस्यकराग्रेणशिरःकायादपाहरत् ३५ तस्यानुजीविनःसर्वेवासःकोशान्वि
सृज्यवै दुद्रुवुःसर्वतोमार्गंवासांसिजगृहेच्युतः ३६ वसित्वात्मप्रियेवस्त्रेकृष्णःसंकर्षणस्तथा
शेषाण्यदत्तगोपेभ्योविसृज्यभुविकानिचित् ३७ ततस्तुवायकःप्रीतस्तयोर्वेशमकल्पयत्।
विचित्रवर्णैश्चैलेयैराकल्पैरनुरूपतः ३८ नानालक्षणवेशाभ्यांरामकृष्णौविरेजतुः स्वलंकृतौ
बालगजौपर्वणीवसितेतरौ ३९ तस्यप्रसन्नोभगवान्प्रादात्सारूप्यमात्मनः श्रियंचपरमांलोके
बलैश्वर्यस्मृतीन्द्रियं ४०

ता ३७ वायकस्तन्तुवायविशेषः वेशम लंकारं चैलेयैः वस्त्रमयैः आकल्पैर्भूषणैः
३८ पर्वणिउत्सवे ३९ इहलोकेपरमांश्रियंबलमैश्वर्यंस्मृतिंच इन्द्रियंचतस्मादेवप्रादात् ४०

४५ ४६ ४७ क्षेमाय प्रभवाय भवायोद्भवाय ४८ इतः कवचेन वाचकानुग्रहेणाच युवयोर्विषमदृष्टिन
यानीश्वरतानाशंकनीयेत्याह नहि वामिति प्रवेद्ययतः समयोरिति तत्रापि हेतुद्वयं सुहृदोरिति जः

ततः सुदाम्नो भवनं मालाकारस्य जग्मतुः तौ दृष्ट्वा स समुत्थाय ननाम शिरसा भुवि ४३ तयो।
रासनमानीय पाद्यं चार्घ्यार्हणादिभिः पूजां सानुगयोश्चक्रे स्रक्ताम्बूलानुलेपनैः ४४ प्राह नः
सार्थकं जन्म पावितं च कुलं प्रभो पितृदेवर्षयो मह्यं तुष्टा ह्यागमनेन वां ४५ भवन्तौ किल विश्व
स्य जगतः कारणं परं अवतीर्णाविहांशेन क्षेमाय च भवाय च ४६ नहि वां विषमा दृष्टिः सुहृ।
दोर्जगदात्मनोः समयोः सर्वभूतेषु भजन्तं भजतोरपि ४७ तावाज्ञापयतं भृत्यं किमहं करवाणि
वां पुंसोत्यनुग्रहो ह्येष भवद्भिर्यन्नियुज्यते ४८ इत्यभिप्रेत्य राजेन्द्र सुदामा प्रीतमानसः शस्तैः सु।
गंधैः कुसुमैर्माला विरचिता ददौ ४९ ताभिः स्वलंकृतौ प्रीतौ कृष्णरामौ सहानुगौ प्रणताय प्रपन्ना।
य ददतुर्वरदौ वरान् ५० सोपि वव्रेऽचलां भक्तिं तस्मिन्नेवाखिलात्मनि तद्भक्तेषु च सौहार्दं भू।
तेषु च दयां परां ५१

महात्मनो इति निव ५० ५१ इत्यभिप्रेत्य एवं विविंन्य विज्ञापयत अभिप्रेत्य तत्तत्तां नाच विशेषेण।

अन्वयवर्धिनी वंशोवृद्धिमतीमित्यर्थः प्रार्थितेवृषभप्रभृतिकंदत्वा ततोनिर्जगामेति ५२ ५२ इतिश्री।
भावार्थेदशमस्कंधेएकचत्वारिंशोऽध्यायः ४१ द्विचत्वारिंशकेकुब्जोद्धारमनंतरंधनुर्भंगोऽभिधः वधस्तद्रक्षिणांकं
सादिष्टेरंगोत्सवादि च अंगविलेपाश्वन्दमादयः गृहीतानिअंगविलेपभाजनानियया तां वरप्रदः स्वाच

इतितस्मैवरंदत्वाश्रियंचान्वयवर्धिनी बलमायुर्यशःकीर्तिनिर्जगामसहाग्रजः ५२ सैवंचंक्रम्य
पुरेजनकेनिहत्यकृतःप्रतापचवरानयवायकाय मालाकृतंसमनुकंप्यचकारकुब्जामस्त्रीय
नुग्रहमहस्तानमयत्वभंज ५२ इतिश्रीभागवतेदशमस्कंधेएकचत्वारिंशोऽध्यायः ४१ शुकउवाच।
अथव्रजन्राजपथेनमाधवःस्त्रियंगृहीतांगविलेपभाजनां विलोक्यकुब्जांयुवतींवराननांपप्र
च्छयांतीप्रहसन्रसप्रदः १ कात्वंवरोर्वेतदुहानुलेपनंकस्यांगनेवाकथयस्वसाधुनः देह्यावयोरं
गविलेपमुत्तमंश्रेयस्ततस्तेनचिराद्भविष्यति २ सैरंध्र्युवाच दास्यस्म्यहंसुंदरकंससंमतात्रिवा
क्रनामाह्यनुलेपकर्मणि मद्भावितंभोजपतेरतिप्रियंविनायुवांकोन्यतमस्तदर्हति ३

प्रदः १ अंगनेवरोरु इतिसोपहासंसंबोधनद्वयं एकांते त्वंकाएतदनुलेपनंकस्यवा उहइतिनिपातौश्रु
वितपगुल्के वितर्के अस्मभ्यंवासचफलदेवाह नचिरादिति २ नित्यःश्रीवीरःकंसःवक्रायस्याः
त्रिवक्रेतिनामयस्याःसा अनुलेपसाधनक्रियायांकंसस्यबहुमतादास्यस्मिवांयुवयोर्विनातत्वंदत्ते

कोर्हतिकस्यापिभवतोनकस्मिंश्चिदित्यर्थः ३

श्री
भाग
पूर्वो
१८३

रूपं श्रीअंगसौष्ठवं च पेशलं सौकुमार्यं च माधुर्यं रसिकता च हसितं च आलापश्च वीक्षितं च तैः धर्षितात्मा मोहि-
तचित्ता सती सान्द्रं घनं ५ स्ववर्णेतरशोभिना रामकृष्णयोर्वर्णाभ्यामितरः पीतादिवर्णस्तेन शोभिना।
शीलं यस्य तेन संप्राप्तपरभागेन संप्राप्तः परो नाभेरुपरितनो भागो येन स संप्राप्तपरभागः शोभाति।

रूपपेशलमाधुर्यहसितालापवीक्षितैः धर्षितात्मा ददौ सान्द्रमुभयोरनुलेपनं ५ ततस्तावं-
गरागेण स्ववर्णेतरशोभिना संप्राप्तपरभागेन शुशुभातेनुरंजितौ ६ प्रसन्नो भगवान्कुब्जां त्रि-
वक्रां रुचिराननां ऋज्वीं कर्तुं मनश्चक्रे दर्शयन्दर्शने फलं ७ पद्भ्यामाक्रम्य प्रपदे द्व्यंगुल्युत्ता-
नपाणिना प्रगृह्य चिबुकेध्यात्ममुदनीनमदच्युतः ८ सा तदर्जुसमानांगी बृहच्छ्रोणिपयोधरा
मुकुंदस्पर्शनात्सद्यो बभूव प्रमदोत्तमा ९ ततो रूपगुणौदार्यसंपन्ना प्राह केशवं उत्तरीयांतमाकृ-
ष्य स्मयंती जातहृच्छया १० एहि वीर गृहं यामो न त्वां त्यक्तुमिहोत्सहे त्वयोन्मथितचित्तायाः प्रसी-
द पुरुषर्षभ ११

शायो येतेनवा तेनानुरंजितौ ६ सद्दर्शने सद्यः फलं दर्शयति ७ तस्याः प्रपदे पादाग्रद्वयं पद्भ्यामापी-
ड्य द्व्यंगुल्यावुत्तानेऽउत्ताने यस्मिन्पाणौ तेन चिबुके प्रगृह्य अधोभागे धृत्वा अध्यात्मं देहं उन्नमयामास ८
तदैव ऋजुर्दंडसमानमंगं यस्याः बृहन्तौ श्रोणी पयोधरौ च यस्याः मुकुंदस्पर्शनादिति मुख्यं कारणं ९

॥ अपि विकर्षणं मनः पीडयामास केशवयेन स्थापितः अर्थः सल्लक्षप्रयोजनं येन सः अगृहीताणमकृतन्दा।
गणां पांथ्यानां प्रवासिनां परमपवनमाश्रयत्वमसि ॥ मधुरया गिरानो प्रश्याप्रवनल्वाणिभिरचितः ॥ ले

एवं तयायाच्यमानः कृष्णो रामस्य पश्यतः मुखं वीक्ष्यानुगानां च प्रहसंस्तामुवाच ह ॥ एष्यामि ते।
गृहं सुभ्रु पुंसामाधिविकर्षणं साधितार्थो गृहाणां नः पांथ्यानां त्वं परायणं ॥ शुक उवाच विसृज्य
माध्व्या वाण्या तां व्रजन्मार्गे वणिक्पथे नानोपायनतांबूलस्रग्गंधैः साग्रजोर्चितः ॥ तद्दर्शनःस्मर
क्षोभादात्मानं नाविदन्स्त्रियः विस्रस्तवासः कवरवलया लेख्यमूर्तयः ॥ ततः पौरान्पृच्छमानो
धनुषः स्थानमच्युतः तस्मिन्प्रविष्टो ददृशे धनुरैंद्रमिवाद्भुतं ॥ पुरुषैर्बहुभिर्गुप्तमर्चितं परमर्द्धिम
त्. वार्यमाणो नृभिः कृष्णः प्रसह्य धनुराददे ॥ करेण वामेन सलीलमुद्धृतं सज्यं च कृत्वा निमिषे।
णपश्यतां नृणां विकृष्य प्रबभंज मध्यतो यथेक्षुदंडं मदकर्युरुक्रमः ॥ धनुषो भज्यमानस्य शब्दः
खं रोदसी दिशः पूरयामास यं श्रुत्वा कंसस्त्रासमुपागमत् ॥

व्यापिवन्स्थलाप्रवभूतंयोयासांताः ॥ धनुर्भंगशालामैत्तन ॥ प्रसह्य बलात् ॥ निमिषेणातिशीघ्रं।
त्रेमदकरी मत्तहस्ती ॥ ॥

गृह्णंतं वध्नामिति वदंतः जिघृक्षवः अवघ्नुः आहूतवंतः १९ न केवलं क्रुद्धौ किं भग्नस्य धनुषः शाकले।
गृहीनाज्ञ्नुतः २० प्रातर्यंगत्वमिति शालामुखोदेवपुनर्निष्क्रम्य चेरतुः २१ तेजः प्रभावः प्रागल्भ्यं पृ
च्छता २२ शाकटं शकटावमोचनस्थानं २३ मुकुंदस्य विगममेव ज्ञात्वा निर्गमनसमये गोप्यो याश्चाशिषश्च।

तदुल्बणः सानुचराः कुपिता आततायिनः गृहीतकामा आवव्रुर्गृह्णंतं वध्नामिति १९ अथा
तान्दुरभिप्रायान्विलोक्य बलकेशवौ क्रुद्धौ धन्वन आदाय शकले तांस्तत घ्नतुः २० बलं च कंस
प्रहितं हत्वा शालामुखात्ततः निष्क्रम्य चेरतुर्हृष्टौ निरीक्ष्य पुरसम्पदः २१ तयोस्तदद्भुतं वीर्यं निशा
म्य पुरवासिनः तेजः प्रागल्भ्यं रूपं च मेनिरे विबुधोत्तमौ २२ तयोर्विचरतोः स्वैरमादित्योस्तमुपे
यिवान् कृष्णरामौ वृतौ गोपैः पुराच्छकटमीयतुः २३ गोप्यो मुकुंदविगमे विरहातुरा या आशा
सताशिषऋता मधुपुर्यभूवन् संपश्यतां पुरुषभूषणगात्रलक्ष्मीं हित्वेतरान्भजतश्चकमेयनं
श्रीः २४

शाश्वतस्य लक्ष्मीप्रभावात् जनैः तत्रैवं दृष्टो भविष्य तस्मादिय इत्युक्तवन्तः ताश्चाशिषऋताः सत्या।
बभूवुः पुरुषभूषणस्य श्रीकृष्णस्य गात्रस्य लक्ष्मीं शोभां कथंभूतस्य गात्रस्य अन्यदेवतान्त्वलादीन
हित्वा यदवनमाश्रयः कामयामास गात्रलक्ष्मीमिति वा २४ ॥

श्रवणिकं प्रक्षालितमंघ्रियुगलं यस्योष्णो तीरमिश्रमनंतभुक्तामृतस्येव सतामम् २१ परं केवलं नामगोविंदयो।
विक्रीडिते नवपदक्रमः कश्चित् २२ उभयथा स्वप्नजागरितभेदेन प्रत्येकं मृत्योर्दीनकराणीव तथा च मंत्रः ३।
कावलकस्यापच्चनं द्विरुणलोमुखोप्युवः रक्तसाहूनग्रामनइति तथा यदेनदद्भुतामन्याविश्वदेवीवावदद्यनी।
ति २३ नानिरष्टोयनिष्ठ्योक्तद्वयेण तत्तादर्शादौ दर्शनं रूपेदृश्यमाने पिस्वशिरस्त्वादर्शने असन्यपिहितोयेव।

श्रवणिको त्रियुगलोभुक्तातीरोपसेवनं दृष्टनष्टो स्वप्नविकारितानाकं सविकीर्षितं २१ कं सत्त्वपल्व
नोभगोरहितो स्वबलस्य च वर्णनिशम्य गोविंदनामविक्रीडितेपदे २२ दीर्घस्वप्नजागरोभीतो दुर्निमित्तानि
दुर्मतिः बहुत्वाचष्टोभयथा मृत्योर्दीनकराणि च २३ अदर्शनं स्वशिरसः प्रतिरूपे च सत्यपि असत्यपि।
हितो पि च दुदूर्षं ज्योतिषां तथा २४ छिद्रदर्शनं छायायां घ्राणघोषानुपश्रुतिः स्वर्णप्रतीतिर्दीलेशु।
स्वपादानामदर्शने २५ स्वमेधन परिष्वंगः स्वरयानविषादने [illegible] पावलदमाल्यकलेलाभ्यक्तोदिग्गे।
वरः २६ अस्मानि चेन्यभूतानि स्वप्नजागरितानि च यथयन्मरणं संच स्तो निश्चलेभेन चिंतया २७।

तद्यथा तथानि श्रुत्यादौ न्यो निषां वे स्पष्टीनां हितं २८ छायायां प्रतिविंबे छिद्रदर्शनं निःपिहितकर्णपुटयोः श्रंनः
श्रूयमाणो घ्राणः सप्राणघोषानुपश्रुतिः तस्याप्रवर्णो वर्णप्रतीतिः रजः कर्दमादिषु स्वपदानामदर्शनं पत्नानिना
गादितानि दुर्निमित्तानि २९ स्वप्नान्याह स्वप्नदृलिप्तेन मृतेः परिष्वंगः स्वरमाहृत्यायानम् विषभक्षणं नलदमाली
नया कुसुममालीयायादिनियत तदप्येकं दुर्निमित्तमिति ३० ३१ ॥

श्री
भाग
दशे
१७५

व्युष्टायांकथंचित्प्रभातायां पुनः सूर्येचाद्भ्यः समुत्थितेसति तथाचश्रुतिः यउदगात्पुरस्तात्समुद्रतोयुरीषाद्वा।
हिभ्राजमानः सलिलस्य मध्यात् समाम्घोषोलोहितासः सूर्योविपश्चिन्मनसापुनातिति ३१ ३१ यद्यो॥

व्युष्टायांनिशिकौरव्यसूर्येचाद्भ्यः समुत्थिते कारयामासवैकंसोमल्लक्रीडामहोत्सवं ३२ आन।
र्चुः पुरुषारंगंतूर्यभेर्यश्चजघ्निरे मंचाश्चालंकृताः स्रग्भिः पताकाचैलतोरणैः ३३ तेषुपौराजान
पदाब्रह्मक्षत्रपुरोगमाः यथोपजोषंविविशूराजानश्चकृतासनाः ३४ कंसः परिवृतोमात्यैराज।
मंचमुपाविशत् मंडलेश्वरमध्यस्थोहृदयेनविदूयता ३५ वाद्यमानेषुतूर्येषुमल्लतालोत्तरेषु।
च मल्लाः स्वलंकृताः सर्वेसोपाध्यायाः समाविशन् ३६ चाणूरोमुष्टिकः कूटः शलस्तोशलए।
वच तआसेदुरुपस्थानंवल्गुवाद्यप्रहर्षिताः ३७ नंदगोपादयोगोपाभोजराजसमाहूताः निवे
दितोपायनास्तेएकस्मिन्मंचआविशन् ३८ इतिश्रीभागवतेदशमस्कंधेमल्लरंगोपवर्णनेद्वि।
चत्वारिंशत्तमोध्यायः ४२

मल्लतालउत्तरतपरितस्मसूयतेयेषुतेषु उपा
पजोषंयथासुखं ३४ ३५ म
ध्यायामल्लाचार्याः ३६ उपस्थानंमल्लरंगं ३७ समाहूताः सम्याहूताः निवेदितान्युपायनानियैस्ते ३८
इतिश्रीभावार्थदीपिकायांदशमस्कंधेमल्लरंगोपवर्णनेद्विचत्वारिंशत्तमोध्यायः ४२

१७५

175

त्रिचत्वारिंशके हत्वा गजेंद्रं रामकृष्णयोः रंगप्रवेशः सोऽभाषि चाणूरेणैव भाषणं एवं पूर्वेद्युरेव कृतं शौचं स्ना ह्निमन्वेनिरणायत्वे च याभ्यां तौ एतद्युक्तं भवति धनुर्भंगादिना श्रावाभ्यां निजे स्थये सविते पितरौ न मुंचति श्रा वां च पुनर्निर्वासति अतो स्म मातुलस्यापि वधे नावयोर्दोषः स्मेवं कृत्वा परायपरिहारा विति महात्रो दुंदुभी

शुक उवाच अथ कृष्णश्च रामश्च कृतशौचौ परंतप मल्लदुंदुभिनिर्घोषं श्रुत्वा द्रष्टुमुपेयतुः १ रंगद्वारं समासाद्य तस्मिन्नागमवस्थितं अपश्यत्कुवलयापीडं कृष्णोऽंबष्ठप्रचोदितं २ बद्ध्वा परिकरं शौरिः समूह्य कुटिलालकान् उवाच हस्तिपं वाचा मेघनादगभीरया ३ अंबष्ठांबष्ठ मार्गं नौ देह्यपक्रम मा चिरं नो चेत्सकुंजरं त्वाद्य नयामि यमसादनं ४ एवं निर्भर्त्सितोऽंबष्ठः कुपितः कोपितं गजं चोदयामास कृष्णाय कालांतकयमोपमं ५ करींद्रस्तमभिद्रुत्य करेण तरसाग्रहीत् कराद्विगलितः सोऽमुं निहत्यांघ्रिष्वलीयत ६ ॥

तोऽभिनिर्घोषं मल्लतालदुंदुभिनिर्घोषं १ अंबष्ठो हस्तिपस्तेन प्रचोदितं २ परिकरं गूढोपचितं परिधानं कृत्वा समूह्य निबध्य ३ ४ अंतकोऽमृत्युः कालस्तैस्त्रिभिर्मितं यमस्तत्त्रियं तातेस्तदुपमा यस्य तं ५ विगलितो विच्युतः मुष्टिनाभिहत्य प्रलीयत अदृश्यो बभूव ६ ॥

श्री
भाग
टी
१९

176

मचलाणः प्रपशन ज्ञाणमवज्ञाणं तेन दृष्टिर्दृष्टानेयस्य सः लोचनागोचरमपि द्विपश्वाघ्राणेन तथा।
पुंपनीति प्रसिद्धं पराम्पृशन् धृतवान् पुच्छेरणाग्रेणाग्रेण सकृष्णः प्रसन्नवलेन ७ धनुषः धनुषां पंच
विंशतिर्यावत् तावद्देशं गगने विचकर्ष आकृष्य लीनवान् कश्चचकर्ष यथा नागं सर्पं वहन्तमानं गगने
सुपर्णश्व स्वयमिति आविरासीत् यथा प्राच्यां दिशि शीतरश्मिः पुच्छलक्ष्मनिवत् ८ स पर्यावर्तमानेनेति पुच्छ

संक्रुद्धस्समवलाणोघ्राणो दृष्टिः सर्वेशावं पराम्रुष्य पुच्छेरेण स पुनस्तावि निर्गतः ७ पुच्छेप्र
त्वा निवलं धनुषः पंचविंशतिं विचकर्ष यथा नागं सुपर्ण इव लीलया ८ स पर्यावर्तमानेन
सम्यद्दक्षिणतो भ्रुतः वभ्राम भ्राम्यमाणेन गोवत्सेनेव बालकः ९ ततो भिन्नत्वं मस्य तथा।
णीला हृन्मवारणो शाङ्ख्वमानयामास सम्पूर्णमानः पदे पदे १० स यावत्क्रीडयभूमौ पतितावास
हृसोन्वितः तं मत्वा पतितं तत्कृष्णोद्दांदं ताभ्यां सोद्दनत्विति ॥

तं यदि दक्षिणतः परिवर्तते
ग्राहिणां श्रीकृष्णसंग्रहो

गजः तर्हि समन्ततो भ्रामयति यथा सव्यतः परिवर्तते तदा दक्षिणतो भ्रामयं स्तेन सह वभ्राम गोवा।
त्सेन भ्राम्यमाणेन बालकः सपवकृष्णः यथा अन्यो वा बालकस्तथेति ९ वारणं गजं प्रादुवत्प्रका।
र्षेणा समन्ततो धावत् पातयामास यथा पतति तथा अवधयत् माहुर्वदिन्तर्यः १० किंच स यावत्रिति।

१२ १३ १४ रंगं समाविशत् ॥ १५ ॥ तदा वीरश्रिया बभौ कथंभूतः अंसे न्यस्तं विषाणं गजदंतो येन सः प्रसृतो र

स्वविक्रमे प्रतिहते कुंजरेंद्रोत्यमर्षितः चोद्यमानो महामात्रैः कृष्णमभ्यद्रवद्रुषा ॥ १२ ॥ तमापतंतमासाद्य भगवान्मधुसूदनः निगृह्य पाणिना हस्तं पातयामास भूतले ॥ १३ ॥ पतितस्य पदाक्रम्य मृगेंद्र इव लीलया दंतमुत्पाट्य तेनेभं हस्तिपांश्चाहनद्धरिः ॥ १४ ॥ मृतकं द्विपमुत्सृज्य दंतपाणिः समाविशत् ॥ १५ ॥
अंसन्यस्तविषाणोऽसृङ्मदबिंदुभिरंकितः विरूढस्वेदकणिकावदनांबुरुहो
बभौ ॥ १६ ॥ वृतौ गोपैः कतिपयैर्बलदेवजनार्दनौ रंगं विविशतू रा
जन्गजदंतधरावुभौ ॥ १७ ॥

सृङ्मदस्य बिंदुभिः परितोंकितः विमृष्टा उद्गताः स्वेदकणिकाः ताभिरुपलक्षितं वदनांबुरुहं यस्य सः
॥ १५ ॥ न केवलं स एवैकः समाविशत् किंतु गोपैर्वृताविति ॥ १६ ॥

श्री
भाग॰
पू॰टी॰
१७

173

तत्र वसन्ते गान्धारे सर्वरसकन्दं वमूर्तिः श्रीभगवांस्तत्तदभिप्रायानुसारेणैव भो साकल्येन सर्वेषामि
त्याह मल्लानामशनिरिति मल्लादीनां मत्तानां कृष्णस्य मल्लत्वादिरूपेण दृश्यत्वा विदितः सन् साग्रजो रंग
गतः इत्यन्वयः मल्लादिषु भिन्नप्रकारस्ताः क्रमेण श्लोके निबध्यन्ते रौद्रोद्भुतस्य शृंगारो हास्यवीरौ दया
तथा भयानकस्य बीभत्सः शान्तसप्रेमभक्तकः अविदुषां विराट् विकलः अपर्यासो गानन इति

मल्लानामशनिर्नृणां नरवरः स्त्रीणां स्मरो मूर्तिमान् गोपानां स्वजनोऽसतां क्षितिभुजां शा
स्ता स्वपित्रोः शिशुः मृत्युर्भोजपतेर्विराडविदुषां तत्त्वं परं योगिनां वृष्णीनां परदेवतेति वि
दितो रंगं गतः साग्रजः १८ हतं कुवलयापीडं दृष्ट्वा तावपि दुर्जयौ कंसो मनस्व्यपि तदा
भृशमुद्विविजे नृप १९ तौ रेजतू रंगगतौ महाभुजौ विचित्रवेषाभरणस्रगम्बरौ यथा न
टावुत्तमवेषधारिणौ मनः क्षिपन्तौ प्रभया निरीक्षतां २० निरीक्ष्य तावुत्तमपूरुषौ जना
मञ्चस्थिता नागरराष्ट्रका नृप प्रहर्षवेगोत्कलितेक्षणाननाः पपुर्न तृप्ता नयनैस्तदा
ननं २१ ॥

था अनेन वीभत्स उक्तः विकलत्वं वक्रचतुर्थ्यास सर्वेषां विस्मादिना वत्सते शान्तः सप्रेमभक्तिस्त्व
१८ उद्विविजे भीतो बभूव १९ यथा नटा विति निर्भयत्वं दर्शितं २० प्रहर्षवेगेनोत्कलितानि अन्तर्भिन्नानि ईक्ष
णानि आननानि च येषां ते तयोराननं पपुः परं न तृप्ताः नियोकां तान बभूवुरित्यर्थः २१

१७

तदेवाह पिबंतइवेति जिघ्रंतः परिष्वंगं कुर्वंतइव लक्षिताइत्यर्थः २२ यथादृष्टं पत्रभंगादि यथाश्रुतं गोव
र्धनोद्धरणादि तत्र दंतानिकमलनदद्रूपमित्यर्थः प्रत्येकं तयो रूपं गजदंतादियुक्तं गुणाः शौर्यादयः माधुर्यं।

पिबंतइव चक्षुर्भ्यां लिहंतइव जिह्वया जिघ्रंतइव नासाभ्यां श्लिष्यंतइव बाहुभिः २२ ऊचुः परस्परं तेवै
यथादृष्टं यथाश्रुतं तद्रूपगुणमाधुर्यप्रागल्भ्यस्मारिताइव २३ एतौ भगवतः साक्षाद्धरेर्नारायणस्य।
हि अवतीर्णाविहांशेन वसुदेवस्य वेश्मनि २४ एषवैकिल देवक्यां जातो नीतश्च गोकुले का।
लमेतंवसन्गूढो ववृधे नंदवेश्मनि २५ पूतनानेन नीतांतं चक्रवातश्च दानवः अर्जुनौ गुह्यकः केशी
धेनुकोन्येच तद्विधाः २६ गावः सपाला एतेन दावाग्नेः परिमोचिताः कालियो दमितः सर्प इंद्रश्चवि
मदः कृतः २७ सप्ताहमेकहस्तेन धृतोद्रिप्रवरोमुना वर्षवाताशनिभ्यश्च परित्रातं च गोकुलं २८
गोप्योस्यनित्यमुदितहसितप्रेक्षणं मुखं पश्यंत्यो विविधांस्तापांस्तरंति स्माश्रमं मुदा २९

हसितालापादिप्रागल्भ्यं यथास्वं तैः स्मारिताइव स्मरणं प्रापिताइव २३ विस्मितानां वाक्यान्याहुः षड्भिः।
एतावित्यादिभिः २४ किलेति सर्वज्ञान्वयः २५ गुह्यकः शंखचूडः अन्येचावासुरादयः २६ २७ आश्रमं दुः
खश्रमं पुलकं पुलके मश्रममितिवा यद्वा श्रममेयथाभवति तथा तरंति स्मेति २९

अनेन परिरक्षितो यदोर्वंशः सवर्द्धविक्षतस्तत् श्रिया हि लक्ष्यते ऽनिवदंतीति १९ धेनुकबककंसास्तेषु
विपर्ययो किं नेन वादेष्वनिष्प्रयातं २१ जनेष्वेवं ब्रुवाणेषु सत्सु तदः सद्य मनस्थाण संरो ब्रवीदिति २२ २३ २४

वदं त्वनेन वंशोयं यदोः सवर्द्धविक्षतः श्रियं यशो महत्वं च लप्स्यते परिरक्षितः १९ अयं चास्याग्रजः
श्रीमान्रामः कमललोचनः प्रलंबो निहतो येन वत्सको धेनुकादयः २० शुक उवाच जनेष्वेवं ब्रु
वाणेषु तूर्येषु निनदत्सु च कंसो रामो समाभाष्य चाणूरो वाक्यमब्रवीत २१ हे नंदसूनो हे राम भ
वंतौ वीर्यसम्मतौ नियुद्धकुशलौ श्रुत्वा राज्ञाहूतौ दिदृक्षुणा २२ प्रियं राज्ञः प्रकुर्वन्त्यः श्रेयो विंदंति
वै प्रजाः मनसा कर्मणा वाचा विपरीतमतोन्यथा २३ नित्यं प्रमुदिता गोपा वत्सपाला यथास्फुट
वनेषु मल्लयुद्धेन क्रीडंतश्चारयंति गाः २४ तस्माद्राज्ञः प्रियं यूयं वयं च करवामहे भूतानि नः प्रसीदं
ति सर्वभूतमयो नृपः २५ तन्निशम्याब्रवीत्कृष्णो देशकालोचितं वचः नियुद्धमात्मनोभीष्टं मन्य
मानोभिनंद्य च २६ प्रजा भोजपतेरस्य वयं चापि वनेचराः करवाम प्रियं नूनं तन्नः परमनुग्रहः २७

२८ हे क्रुत्स प्रियं करवामेति यातः प्रियेण भूतानि च प्रसीदेयुः २९ अभिनंद्य साधु साधितसक्ता २० २८
रामायनमः

यथोचितं नियुद्धं मल्लयुद्धं भवेत् मल्लसभाधिकृतानां धर्मो मा स्पृशेत् नस्तेन तदर्थं हे मल्ला इति चाणूर ३९ स
हस्रद्विपानां सत्वं बलं विभर्त्तीति सहस्रद्विपसत्वभृत् ४ बलिभिर्मुष्टिकैः सह युवयोः धर्मः विक्रमयतां।

र्बलावयंतुल्यबलैः क्रीडिष्यामो यथोचितं भवेन्नियुद्धं माधर्मः स्पृशेन्नो मल्लसभासदः ३९ चाणूर
उवाच न बालो न किशोरस्त्वं बलश्च बलिनां वरः लीलयेभो हतो येन सहस्रद्विपसत्वभृत् ४० तस्मा
द्भवद्भ्यां बलिभिर्योद्धव्यं नानयोऽत्र वै मयि विक्रम वार्ष्णेय बलेन सह मुष्टिकः ४१ इति श्रीभागवते द
शमस्कंधे कुवलयापीडवधो नाम त्रिचत्वारिंशत्तमोऽध्यायः ४३ शुक उवाच एवं चर्चितसंकल्पो भगवा
न्मधुसूदनः आससादाथ चाणूरं मुष्टिकं रोहिणीसुतः १ हस्ताभ्यां हस्तयोर्बध्वा पद्भ्यामेव च पाद
योः विचकर्षतुरन्योन्यं प्रसह्य विजिगीषया २ अरत्नी द्वे अरत्निभ्यां जानुभ्यां चैव जानुनी शीर्ष्णा शीर्ष्णो
रसोरस्तावन्योन्यमभिजघ्नतुः ३

क्रमं ऊरू बलभद्रेण सह मुष्टिकः विक्रमतामिति ४१ इति श्रीभागवते दशमस्कंधे त्रिचत्वारिंशोऽध्यायः
४३ चतुश्चत्वारिंशके तु मल्लकंसादिमर्द्दनं कंसयोषित्समाश्वासस्ताभ्यां पित्रोश्च दर्शनं चर्चितो निश्चितः।
संकल्प एव यस्य सः १२ बाहुमध्यात्कनिष्ठांगुल्यतिरेकेणाकृतमुष्टिर्हस्तोऽरत्निः ३॥

परिभ्रामणं हस्ते गृहीत्वा परितश्चालनं विक्षेपो नोदनं परिरंभो बाहुभ्यां निष्पीडनं अवपातनमधःक्षेपः उत्सर्पणमुत्तरस्य पुरतो गमनं अपसर्पणं पृष्ठतो गमनं एतैः अन्यस्थं धर्ता प्रत्याहृतवंतौ ४ उत्थापनं पादो न्नामनं नीचपिंडीकृतस्य पतितस्योच्चाटनं उन्नयनं हस्ताभ्यामुद्धृत्य नयनं चालनं केशादिलग्नस्य निसारणं स्था पनं पाणिपादादिभिः पिंडीकरणं एवं परस्परमात्मनो देहस्यापचक्रतुः अपकारं कृतवंतौ ५ तद्युद्धं बला ।

परिभ्रामणविक्षेपपरिरंभावपातनैः उत्सर्पणापसर्पैश्चान्योन्यं प्रत्यहंधतां ४ उत्थापनैरु
न्नयनैश्चालनैः स्थापनैरपि परस्परं जिगीषंतावपचक्रतुरात्मनः ५ तद्बलाबलवद्युद्धं समेताः स
र्वयोषितः ऊचुः परस्परं दृष्ट्वा सानुकंपा वरूथशः ६ महानयं बताधर्म एषां राजसभासदां ये बला
बलवद्युद्धं राज्ञोन्विच्छंति पश्यतः ७ क्व वज्रसारसर्वांगौ मल्लौ शैलेंद्रसन्निभौ क्व चातिसुकु ।
मारांगौ किशोरौ नाप्तयौवनौ ८

बलवत् एकतो बले अन्यतः अबले तद्युद्धं विषममित्यनुचितमित्यर्थः तद्बला
बलवतो युद्धं दृष्ट्वा महानयमधर्म इत्यनुचितमित्यर्थः ६ तदेव दर्शयंति महानिति बालयोर्बलवतोश्च
युद्धं राज्ञा वक्ष्यपति स्वयं वारणीयः एतेन राज्ञः पश्यतः स्वयमप्यन्विच्छंति अनुमन्यंत इति महानयमधर्म
इत्यर्थः ७ बलाबलयुद्धत्वं प्रपंचयंति पंचभिः क्वेति वज्रसाराणि वज्रवत्कठिनानि सर्वांगानि यया ।

समाजस्य सभायाः ॥ ९ ॥ अब्रुवन्नजानन्निव तूष्णीं तिष्ठन् विब्रुवन् विपरीतं ब्रुवन् अतः प्राज्ञः सभां न प्रविशे-
दिति ॥ १० ॥ वल्गतः शत्रुमभितः इति श्लोकैः सर्वतो धावतः श्रीकृष्णस्य श्रमवारिणा न्युप्तं व्याप्तं वदनांबुजं दृश्य-
नाम ॥ ११ ॥ अन्या ऊचुः किं न पश्यतेति सामर्षं सक्रोधं हासेन संरंभ आवेशः तेन शोभितं ॥ १२ ॥ अन्या ऊचुः पु-

धर्मव्यतिक्रमो ह्यस्य समाजस्य ध्रुवं भवेत् । यत्राधर्मः समुत्तिष्ठेन्न स्थेयं तत्र कर्हिचित् ॥ ९ ॥ न सभां प्र-
विशेत्प्राज्ञः सभ्यदोषाननुस्मरन् । अब्रुवन्विब्रुवन्नज्ञो नरः किल्बिषमश्नुते ॥ १० ॥ वल्गतः शत्रुमभितः
कृष्णस्य वदनांबुजं । वीक्ष्यतां श्रमवार्युप्तं पद्मकोशमिवांबुभिः ॥ ११ ॥ किं न पश्यत रामस्य मुखमाता-
म्रलोचनं । मुष्टिकं प्रति सामर्षं हाससंरंभशोभितं ॥ १२ ॥ पुण्या बत व्रजभुवो यदयं नृलिंगगूढः पुरा-
णपुरुषो वनचित्रमाल्यः । गाः पालयन्सहबलः क्वणयंश्च वेणुं विक्रीडयांचति गिरित्ररमार्चितांघ्रि-
ः ॥ १३ ॥

अत एवंभूतस्त्वं वाग्मनेन कृतार्थोऽस्मीत्याह द्वाभ्याम् अद्येति द्वेरेश अद्य नो वसतयो गृहाः तपोवनादपि बहुपुण्याः कृताः याः वसतीः त्वं साक्षात्प्रविष्टः कथंभूतः यस्य तव पादसलिलमेव गंगा त्रिजगत्पुनाति यस्त्वं पंचयज्ञदेवतापितृमूर्तिः सर्वजगद्गुरुरिति २५ त्वमनोरथैः परिपूरितः इति वदन्प्रार्थयन्नाह कः पं

अद्येश नो वसतयः खलु भूरिभागा यः सर्वदेवपितृभूतनृदेवमूर्तिः यत्पादशौचसलिलं त्रि जगत्पुनाति स त्वं जगद्गुरुरधोक्षज याः प्रविष्टः २५ कः पण्डितस्त्वदपरं शरणं समीयाद्भक्तप्रि यादृतगिरः सुहृदः कृतज्ञात् सर्वान्ददाति सुहृदो भजतोऽभिकामानात्मानमप्युपचयापचयौ न यस्य २६ दिष्ट्या जनार्दन भवानिह नः प्रतीतो योगेश्वरैरपि दुरापगतिः सुरेशैः छिन्ध्याशु नः सुतकलत्रधनाप्तगेहदेहादिमोहरशनां भवदीयमायां २७ शुक उवाच इत्यर्चितः संस्तुतश्च भक्तेन भगवान्हरिः अक्रूरं सस्मितं प्राह गीर्भिः संमोहयन्निव २८ श्रीभगवानुवाच त्वं नो गुरुः पितृव्यश्च श्लाघ्यो बन्धुश्च नित्यदा वयं तु रक्ष्याः पोष्याश्च अनुकम्प्याः प्रजा हि वः २९

इत्यर्थति ऋतगिरः सत्यवाचः [illegible] समीपात गच्छेत यतो भवान्भजतः सर्वानभि तः कामान्ददाति आत्मानमप्यपचयः [illegible] नात्मापि इत्यर्थः एव २६ २८ वः युष्माकं प्र

गायो सीतायाहत्वेपण श्रे

ननु नृभिर्देवाः सेव्या इति प्रसिद्धं नात्र विद्वः कथंभूतः र्थाः स्वकार्यसाधनपराः साधवस्तु केवलं परानुग्र
हपराः परमार्थतस्तु साधवएव सेव्या न त्वाद्य इति इत्यर्थः ३० नहि मृच्छिलादिमया किं देवा दृष्यो नैवा
स्यत आह नहीति अम्मयानि तीर्थानि मृच्छिलामयाः शिलामया देवा न भवन्ति इति न अपितु भवन्त्येव तथा
पि साधून्तेषां देवतीर्थानां च महद्वैषम्यमाह ते पुनंतीति ३१ किंच चिकीर्षया गापादि निपदद्वयं तत्का

भवद्विधा महाभागा निषेव्या अर्हसत्तमाः श्रेयस्कामैर्नृभिर्नित्यं देवाः स्वार्था न साधवः ३० नह्य
म्मयानि तीर्थानि न देवा मृच्छिलामयाः ते पुनंत्युरुकालेन दर्शनादेव साधवः ३१ स भवान्सुहृदां
वै नः श्रेयान्श्रेयश्चिकीर्षया जिज्ञासार्थं पांडवानां गच्छस्व गजसाह्वयं ३२ पितर्युपरते बालाः स
ह मात्रा सुदुःखिताः आनीताः स्वपुरं राज्ञा वसन्त इति शुश्रुम ३३ तेषु राजांबिकापुत्रो भ्रातृपुत्रेषु दी
नधीः समो न वर्तते नूनं दुष्पुत्रवशगोंधदृक् ३४ गच्छ जानीहि तद्वृत्तमधुना साध्वसाधु वा विज्ञा
य तद्विधास्यामो यथा शं सुहृदां भवेत ३५

यस्मादिशसि नः सुहृत्त्वं श्रेयो भवान् श्रेष्ठः अतः पांडवानां श्रेयश्चिकीर्षया जिज्ञासार्थं गजसाह्वयं गच्छ
स्व गच्छेति यद्वा स्वेत्येकं पदं देहस्व आत्मीयेत्यर्थः ३२ राज्ञा धृतराष्ट्रेण वसंते निवसंति शुश्रुम श्रुतवं
तो वयं ३३ दुष्टाये स्वपुत्रदुर्योधनादयः तद्वशो न गच्छेति निनया यतः अंधदृक् अंधनेत्रः ३४ ३५

२९ इतिश्रीभागवतेदशमस्कंधेहस्तिनापुरेनामाष्टचत्वारिंशोध्यायः ४८ ऊनपंचाशत्तमे तु गत्वाक्रूरो।
गजाह्वयं गतः स्वभ्रातृपुत्रेषु वृद्धावैषम्यमागमत पौरवेंद्राणांयशोभिः तत्कृतदेवब्राह्मणायतनादि।
भिरंकितं १ बाल्हीकपुत्रः सोमदत्तः भारद्वाजो द्रोणः गौतमः कृपः २ मध्यमेकपाले ३ दुष्पुत्रस्य तु।

इत्यक्रूरंसमादिश्यभगवान्हरिरीश्वरः संकर्षणोद्धवाभ्यांवैततःस्वभवनंययौ २९ इतिश्रीभा
गवतेदशमस्कंधेहस्तिनापुरेऽक्रूरप्रस्थापनंनामाष्टचत्वारिंशत्तमोध्यायः ४८ श्रीशुकउवाच
सगत्वाहास्तिनपुरंपौरवेंद्रयशोंकितं ददर्शतत्रांबिकेयंसभीष्मंविदुरंपृथां १ सहपुत्रेणचबा।
ल्हीकंभारद्वाजंसगौतमं कर्णंसुयोधनंद्रौणिंपांडवान्सुहृदोपरान् २ यथावदुपसंगम्यबंधु
भिर्गांदिनीसुतः संपृष्टस्तैःसुहृद्वार्तांस्वयंचापृच्छदव्ययं ३ उवासकतिचिन्मासान्राज्ञोवृत्त।
विविक्षया दुष्प्रजस्याल्पसारस्य खलच्छंदानुवर्तिनः ४ तेजओजोबलंवीर्यंप्रश्रयादींश्चसद्गुणा
न प्रजानुरागंपार्थेषुनसहद्भिश्चिकीर्षितं ५

पुत्रस्यग्रल्पसारस्य मंदधृतेः खला[illegible]छंदस्य हृत्स्वनुवर्तितं शीलमस्येति तत्तया ४ तेजः प्र
भावं ओजः प्रागल्भ्यादि तेषु गुणेषु वीर्य[illegible]चिकीर्षितमिति उपरिकृतेमिष्टे ५

परस्य विश्वस्य दानादि अपेपशं लेटा लिनापूर्णनामाघ चरणारि शोषयामास ॥ तस्य कथमात्मवेतनं यस्या याहूत
माद्य इत्याहितिः अग्रणीः कलालेशास्य मागमत ऐश्वर्ये दृष्टाणीनां मलिलयं स्वकीयेन मभूमं ॥ अपि किं
नामयः कलाहिपः ॥ पितृस्वसेयाचारह्यजोरे ॥ सोनविघ्नतिसमाख्यासयिष्यति किं ॥ हे महायोगि

कृतेच यातेनाष्ट्वेयं कृरदानाययेपाल आचाख्यो सर्वमेवास्मै इत्याविदुरएवच ॥ इत्यातथ्यातरं या।
ममकृरमुपस्यच उवाचतत्ममनिलयंस्वरं मस्तुकलेवरणा ॥ अपि स्मरंति नः सौम्यपितरौ भ्रात
रश्च मे भगिन्यो भ्रातृपुत्राश्च ज्ञातयः साख्य एव च ॥ भ्राता यो भगवान् कृष्णः शरण्यो भक्तवत्सलः ।
पितृस्वसेयान् स्मरति रामश्चांबुरुहेक्षणः ॥ सपत्नमध्ये शोचंतीं कृपणां हरिणीमिव सांत्वयिष्य
ति मां वाक्यैः पितृहीनांश्च बालकान् ॥ कृष्ण कृष्ण महायोगिन् विश्वात्मन् विश्वभावन प्रपन्नां पा
हि गोविंद शिशुभिश्चावसीदतीं ॥ नान्यत्तव पदांभोजात्पश्यामि शरणं नृणां बिभ्यतां मृत्युसंसा
राद् ईश्वरस्यापवर्गिकात् ॥ नमः कृष्णाय शुद्धाय ब्रह्मणे परमात्मने योगेश्वराय योगाय त्वामहं
शरणागता ३ ॥

त महायोगश्चोपायो मायाख्योप्यास्तीति हे विश्वात्मन् सर्वांतर्यामिन् हे विश्वभावन
विश्वपालक प्रपन्नां शरणागतां अवसीदंतीं क्लिश्यंतीं ॥ आपवर्गिकात् मोक्षप्रदात् ॥ शुद्धाय धर्मो
त्मने ब्रह्मणे अपरिच्छिन्नाय परमात्मने जीवस्वरूपाय योगेश्वराय प्राणिमात्रे हृदिस्थाय योगाय ज्ञानात्म

श्री
भाग
दश
२३

प्रपितामहः पांडुः तस्य जाया पृथा ॥१५॥ पृथया सह समं दुःखं सुखं च यस्य सः तस्याः पुत्राणामुत्पत्तिहेतुभि
र्नेवकैः धर्मानिलेंद्रादिभिः तत्कथनेनेत्यर्थः ॥१६॥ बंधुभिः धृतराष्ट्रादिभिः सौहृदेनोदितं कथं यत्तत्तदा
वददिति ॥१७॥ भ्रातर्युपरते इति पांडोः पुत्रेषु सत्स्वपि राज्यासनं त्वमास्थितः इति कुत्सनं ॥१८॥ भवतस्तथाप्येवं

शुक उवाच इत्यनुस्मृत्य स्वजनं कृष्णं च जगदीश्वरं प्रारुदद्दुःखिता राजन्भवतां प्रपितामही ॥१५॥
समदुःखसुखोऽक्रूरो विदुरश्च महायशाः सांत्वयामासतुः कुंतीं तत्पुत्रोत्पत्तिहेतुभिः ॥१६॥ यास्य
न्राजानमभ्येत्य विषमं पुत्रलालसं अवदत्सुहृदां मध्ये बंधुभिः सौहृदोदितं ॥१७॥ अक्रूर उवाच भो
भो वैचित्रवीर्य त्वं कुरूणां कीर्तिवर्धन भ्रातर्युपरते पांडावधुनासनमास्थितः ॥१८॥ धर्मेण पालयन्नु
र्वीं प्रजाः शीलेन रंजयन् वर्तमानः समः स्वेषु श्रेयः कीर्तिमवाप्स्यसि ॥१९॥ अन्यथा त्वाचरँल्लोके ग
र्हितो यास्यसे तमः तस्मात्समत्वे वर्तस्व पांडवेष्वात्मजेषु च ॥२०॥ नेह चात्यंतसंवासः कर्हिचित्केन
चित्सह राजन्स्वेनापि देहेन किमु जायात्मजादिभिः २१

वर्तमानः श्रेयो वाप्स्यसीत्याह धर्मेणे[illegible]दमितिहह च महद्दुःखमिति भावः ॥२०॥ ननु जायात्मजा
यात्मजादिषु कथं समत्वं स्यात[illegible]वासः सम्यक् स्थितिः २१ ॥

२३

२०४

तत्र तावदुत्पत्तिमरणयोः सुखदुःखयोश्च केनापि साहित्यं नास्तीत्याह एक इति ॥ २१ ॥ किंच यदा च सद्व्य-
सेन तदपि क्लेशोपार्जितं वित्तं विहाय तथा पुत्रनामानः शत्रव एव तेऽपहरन्तीत्याह अधर्मेति संभोजनीयाः।
पोष्याः पुत्रादयः इति व्यपदेशैः अल्पमेधसो मूढस्य वित्तं हरंति जलौकसो मत्स्यास्तज्जीवनभूतानि जलानि
यथा तद्वदिति ॥ २२ ॥ किंच यानेवं पुष्णाति ते धनमादाय हन्तारं जीवंतमपि वा तं परित्यजंतीत्याह पुष्णातीति

एकः प्रसूयते जंतुरेक एव प्रलीयते एकोनुभुंक्ते सुकृतमेक एव च दुष्कृतं ॥ २१ ॥ अधर्मोपचितं वि-
त्तं हरंत्यन्येल्पमेधसः संभोजनीयापदेशैर्जलानीव जलौकसः ॥ २२ ॥ पुष्णाति यानधर्मेण स्वबु-
द्ध्या तमपंडितं तेऽकृतार्थं प्रहिण्वंति प्राणा रायः सुतादयः ॥ २३ ॥ स्वयं किल्बिषमादाय तैस्त्यक्तो
नार्थकोविदः असिद्धार्थो विशत्यंधं स्वधर्मविमुखस्तमः ॥ २४ ॥ तस्माल्लोकमिमं राजन्स्वप्नमाया-
मनोरथं वीक्ष्यायम्यात्मनात्मानं समः शांतो भव प्रभो ॥ २५ ॥ धृतराष्ट्र उवाच यथा वदति कल्या-
णीं वाचं दानपते भवान् तथानया न तृप्याभि मर्त्यः प्राप्य यथामृतं ॥ २६ ॥

ति स्वबुद्ध्या स्वीयास्त्वभिमानेन [illegible] ः अकृतार्थमप्राप्तभोगम् ॥ २३ ॥ स पुनः पापैकपाथेयो नरकं
विशतीत्याह स्वयमिति असिद्ध [illegible] मस्वप्नमायावन्मनोरथवच्चातत्त्वं तेन तत्त्वं ज्ञा-
यनियम्य शांतः सन् समो भव [illegible] मिथ्यालमिति तिनमन्ये ॥ २६ ॥

श्री
भाग
दशे
२७४

सूनृता पिपावाक्व चले ... नहरोद ... एथयासहस्रमेदुःखं ... सदामा पर्वतः तत्र भवा विद्युदिव तस्मिन्
स्फटिकमयेसदृसैवातिस्सु ... कथनेविमर्शं ... ... यदा सदामामालातस्याद्रूपं सौदामि-
नी २८ नत्वेवंज्ञानतोपिकथं ... यांडेः पु... वदतन्नाह ईश्वरस्येति विधिविधानमायामितियावत् २६

तथापि सूनृता सौम्य हृदि न स्थीयते चले पुत्रानुरागविषमे विद्युत्सौदामिनी यथा २७ ईश्वरस्य वि-
धिं को नु विधुनोत्यन्यथा पुमान् भूमेर्भारावताराय यो ऽवतीर्णो यदोः कुले २८ यो दुर्विमर्शपथ-
या निजमाययेदं सृष्ट्वा गुणान्विभजते तदनुप्रविष्टः तस्मै नमो दुरवबोधविहारतंत्रसंसारचक्र-
गतये परमेश्वराय २९ शुक उवाच इत्यभिप्रेत्य नृपतेरभिप्रायं स यादवः सुहृद्भिः समनुज्ञातः पुन-
र्यदुपुरीमगात् ३० शशंस रामकृष्णाभ्यां धृतराष्ट्रविचेष्टितं पांडवान्प्रति कौरव्य यदर्थं प्रेषितः स्व-
यं ३१ इति श्रीभागवते दशमस्कंधे एकोनपंचाशत्तमोऽध्यायः ४९

अतस्तस्मै नमस्यति य इति दुर्विमर्शपथया दुर्वितर्क्यमार्गया गुणान्कर्माणि तत्फलानि च विभजते वि-
विच्य ददाति दुरवबोधो यो विहारस्तस्य क्रीडा सः तंत्रं प्रधानं मुख्यं कारणं यस्य संसारचक्रस्य अत एवा-
तस्य गतिः यस्मात् तस्मै नम इति २९ अभिप्रेत्य ज्ञात्वा ३० ३१ इति श्रीभावार्थदीपिकायां दशमस्कंधे
एकोनपंचाशत्तमोऽध्यायः ४९ समाप्तः पूर्वार्धस्कंधः

क्लेशेन निमि[illegible]सार्धमित्यर्थः ॥१॥ प्राणिनः सजीवानपरे पर्यन्ति पचन्ति अपकरुणा निष्कृपं ॥२॥ खलेसु

एवमेव महावीरवा यत्र निपतितं पुरुषं कल्याणनामकरवः तं क्लेशेन ज्ञानयन्ति यः केवलं देहस्य
रः ॥१॥ यस्मिन्द्वा उग्रः पशुर्भवति तेणावाप्राणानतउपरंपयतितमेपकरुणं पुरुषादेरपि विगर्हितं समु
त्पमावराः कुम्भीपाके तमतैलउपरंपयंति ॥२॥ यस्मिन्द्वपि तत विप्रबलमधुकसकालससंतकेन
रके प्रयुतयोजनपरिमंडले नाम्ना यनेन मलेलउपर्यर्थस्तादगम्यकोष्मा मन्तितम्प्यमाने भिन्निवेशितः
त्लिपमास्याचंदत्मानानवेहिः शरीरगालेशंतेचप्लेनेग्रवतिष्ठति परिधावनिचयावेतिपशु
रोमाणितावद्वर्षसहस्राणि ॥३॥ यस्मिन्दैवनिजवेदपश्चादनापर्युपगतः पाषाण्डोचोपगतः तस्मि
पत्रवृतेप्रवेश्यकशयापदयंतितत्रहासाविततस्ततोधावमानउभयतोधारैस्तालवनासिपत्रैश्छिद्यमा
नसर्वांगोहाहतास्मीतिपरमयावेदनयामूर्छितः पदेपदेनिपतति स्वधर्महापाखंडानुगातंफलंभु
क्ते ॥४॥ यस्मिन्द्वैराजा राजपुरुषो वा अदंड्ये दंडं प्रणयति ब्राह्मणो वा शरीरदंडं स पापीयान्नरके सु
करमुखे निपतति तत्राति बले विनिष्पिष्यमाणावयवो यथैवेक्षवस्तथेवंश्चान्तस्वरेणस्वनयन्क्व।
चिन्मूर्छितः कश्मलमुपगतो यथैवेहादृष्टदोषउपरुद्धाः ॥५॥

मेदेशो ॥२॥ स्वधर्महा स्वधर्मोत्यागी ॥४॥ स्तनयन् रुदन् कश्मलं मोहमुपगतो भवति अदृष्टदोषास्तेनोपरु।

हुः संतोयथाककप्रमलमुपगताःतत्तद ॥५॥

96

ईश्वरेणोपकल्पिता मनुष्यस्य कृपान्नादिलक्षणा वृत्तिर्येषां मत्कुणादीनां न विविक्ता परव्यथा यैस्ते विवेकि
भिरेषां पुरुषेणात्मलक्षणादिभावेन विधिनिषेधपरेवं कस्मुपकल्पिता वृत्तिर्येन स विविक्तापरव्यथायेन वि।
वेकिनाभिद्रुग्धाः हिंसिताः विहिता निद्रारूपा निर्वृत्तिर्यस्य न लब्धमवस्थानं येन सन्नमसि परिक्राम।

२

यस्त्विह वै भूतानामीश्वरकल्पितवृत्तीनामविविक्तपरव्यथानां स्वयं पुरुषोपकल्पितवृत्तिर्वि
विक्तपरव्यथो व्यथामाचरति स परत्रान्धकूपे तदभिद्रोहेण निपतति तत्र हासौ तैर्जन्तुभिः पशुप।
क्षिमृगसरीसृपैर्मशकयूकामत्कुणमक्षिकादिभिर्ये केचाभिद्रुग्धाः तैः सर्वतोभिद्रुह्यमाणस्त।
मसि विहतनिद्रानिर्वृतिरलब्धावस्थानः परिक्रामति यथा कुशरीरे जीवः १७ यस्त्विह वा असंवि
भज्याश्नाति यत्किंचनोपनतमनिर्मितपंचयज्ञो वायससंस्तुतः स परत्र कृमिभोजने नरकाधमे नि
पतति तत्र शतसहस्रयोजने कृमिकुंडे कृमिभूतः स्वयं कृमिभिरेव भक्ष्यमाणः कृमिभोजनो।
यावत्तदप्रत्ताप्रहुतादोनिर्वेशमात्मानं यातयते १८

ति १८ यत्किंचन भक्ष्यादिक मुपनतं संप्राप्तं तदसंविभज्य नाति।
र्मिताः पंचयज्ञा येन अतएव वायसैः संस्तुतः समत्वेन वर्णितः कृमिभोजनः कृमीनेव भुंजानः यावन्न याव
ति योजनानि तत्र कृमिकुंडे तावंति वर्षाणि यावत्तावत्तस्यापमिस्यर्थः अप्रत्तमसंविभक्तं अप्रहुतं चाग्नौ तेन या।

...पक[illegible]...

निकृंतंति छिंदंति १८ तिग्मयातनया सूर्म्याप्रतिमया १९ सर्वाभिगामः पश्वायुपर्यंता २० अधाधोगः सन्कृ

यस्त्विह वै स्तेयेन बलाद्वा हिरण्यरत्नादीनि ब्राह्मणस्य वाऽपहरत्यन्यस्य वानापदि पुरुषस्तममुत्र राजन्

यमपुरुषा अयस्मयैरग्निपिंडैः संदंशैस्त्वचि निष्कुषंति १८ यस्त्विह वा अगम्यां स्त्रियमगम्यं वा पुरुषं योषि

दभिगच्छति तावमुत्र कशया ताडयंतः तिग्मया सूर्म्या लोहमय्या पुरुषमालिंगयंति स्त्रियं वा पुरुषरू

पया सूर्म्या १९ यस्त्विह वै सर्वाभिगामः तममुत्र निरये वर्तमानं वज्रकंटकशाल्मलीमारोप्य निष्कर्षं

ति २० ये त्विह वै राजन्या राजपुरुषा वा अपाषंडा धर्मसेतून् भिंदंति ते संपरेत्य वैतरण्यां निपतंति

भिन्नमर्यादाः तस्यां निरयपरिखाभूतायां नद्यां यादोगणैरितस्ततो भक्ष्यमाणा आत्मना न वियुज्यमा

नाश्चासुभिरुह्यमानाः स्वाघेन कर्मपाकमनुस्मरंतः विण्मूत्रपूयशोणितकेशनखास्थि

मेदोमांसवसावाहिन्यामुपतप्यंते २१ ये त्विह वै वृषलीपतयो नष्टशौचाचारनियमास्त्यक्तलज्जाः प

शुचर्यां चरंति ते चापि प्रेत्य पूयविण्मूत्रश्लेष्मलापूर्णार्णवे निपतंति तदेवातिबीभत्सितमश्नंति २२

ये त्विह वै श्वगर्दभपतयो ब्राह्मणादयो मृगयाविहारा अतीर्थे च मृगान्निघ्नंति तानपि संपरेतान् लक्ष्यभू

तान् यमपुरुषा इषुभिर्विध्यंति २३ ये त्विह वै दांभिका दंभयज्ञेषु पशून्विशसंति तानमुष्मिँल्लोके वैश

लीनाः संतः द्वितीयांतपादे सेत्व विशेषणं नद्याः शिनष्टि विण्मूत्रेति २१ पशुचर्यां स्वेच्छाचारे २२ अतीर्थे विहि।

श्री
भाग
पं टी
५९

लालाभक्षमाह यस्त्विहेति रेतःपानं कारयंति २९ यमदूता ये श्वानः सरभसं सम्भ्रमं ३० द्रव्यविनिमये क्र
यादौ निरवकाशे निरालंबे अवीचिमत् आह यत्रेति वीचिः तरंगाः तद्रहितत्वाद् अवीचिः ३१ यो विप्रः

यस्त्विह वै सवर्णां भार्यां द्विजो रेतः पाययति काममोहितः तं पापकृतममुत्र रेतः कुल्यायां पातयि
त्वा रेतः संपाययंति २९ ये त्विह वै दस्यवोऽग्निदा गरदा ग्रामान्सार्थान्वा विलुम्पंति राजानो भटा वा
तांश्चापि हि परेत्य यमदूता वज्रदंष्ट्राः श्वानः सप्तशतानि विंशतिश्च सरभसं खादयंति ३० यस्त्वि
ह वा अनृतं वदति साक्ष्ये द्रव्यविनिमये दाने वा कथंचित्स वै प्रेत्य नरके वीचीमत्यधःशिरा निरव
काशे योजनशतोच्छ्रायाद्गिरिमूर्ध्नः संपात्यते यत्र जलमिव स्थलमश्मपृष्ठमवभासते तदवीचि
मत् तिलशो विशीर्यमाणशरीरो न म्रियमाणः पुनरारोपितो निपतति ३१ यस्त्विह वै विप्रो राज
न्यो वैश्यो वा सोमपीथः तत्कलत्रं वा सुरां व्रतस्थोऽपि वा पिबति प्रमादतः तेषां निरयं नीतानामुरसि पदा
क्रम्यास्ये वह्निना द्रवमाणं कार्ष्णायसं निषिंचंति ३२

तत्कलत्रं वा सुरां पिबति प्रमादतोऽपि वा अव्रतस्थः सत्री जन्मतो वैश्यो वा सोमपीथः कृतसोमपानस्त्वन्यः तयोः
सोमस्थाने फलचमसविधानात् सोमपाननिषेधाच्च तथा अव्रतस्थः ... प्रतिनिधीनां ... संनिधाने

सस्पर्वमेवमृतकएवसन्नमत्वा २४ पुरुषमेधेनहिंसयाभैरवादीन्यजंते याश्चस्त्रियःकामरूपाःरक्षोगणा

७

अथचस्त्विहवाआत्मसंभावनेनस्वयमधमोजन्मतपोविद्याचारवर्णाश्रमवतोवरीयसोनबहुमन्येत ।
समृतकएवमृत्वाक्षारकर्दमेनिरयेवाक्छिरानिपातितोदुरंतायातनाह्यश्नुते २४ येत्विहवैपुरुषाःपु
रुषमेधेनयजंतेयाश्चस्त्रियोनृपशून्खादंतितांश्चतेपशवइवनिहतायमसादनेयातयंतोरक्षोगणाः
सौनिकाइवस्वधितिनावदायासृक्पिबंतिनृत्यंतिचगायंतिचहृष्यमाणायथेहपुरुषादाः २५ येत्विह
वाअनागसोरण्येग्रामेवावैस्रंभकैरुपसृतानुपविस्रंभ्यजिजीविषून्शूलसूत्रादिषूपप्रोतान्क्रीडना।
कतयायातयंति तेपिचप्रेत्ययमयातनासुशूलादिषुप्रोतात्मनःक्षुत्तृड्भ्यांचाभिहताःकंकवटादिभि
श्चेतस्ततस्तिग्मतुंडैराहन्यमानाआत्मशमलंस्मरंति २६ येत्विहवैभूतान्युद्वेजयंतिनराउल्बणस्व
भावायथादंदशूकाःतेप्रेत्यनरकेदंदशूकाख्येनिपतंतियत्रनृपदंदशूकाःपंचमुखाःसप्तमुखा।
उपसृत्यग्रसंतियथाबिलेशयान् २७ येत्विहवाअंधावटकुसूलगुहादिषुभूतानिनिरुंधंतितथामुत्र
तेष्वेवोपवेश्यसगरेणवह्निनाधूमेननिरुंधंति २८

भूत्वा यथेहतेपुरुषादाःसंतःपूर्वमनन्ततद्वत २५ वैस्रंभकैःविश्वासोपायैःउपविस्रंभ्यविश्वास्य २६ बि

बिलेशयान्मूषकान् २७ सगरेणसविषेण २८

श्री
भाग
पंचा
८०

100

श्रुतिश्रयोऽज्ञातपूर्वाः अभ्यागतास्ताज्ञातपूर्वाः तान्पापेन वक्रीकृतेन २४ आत्माभिमतिः धनगर्वितः प्रदे।
कृतिः श्रेष्ठोऽहं मानी तिर्यक्प्रेक्षणं यस्य सर्वतः गुर्वादीनपि पतंते चौरादयिष्यंतीति विशंकमानः परिशुष्यमा

यस्त्विह वा अतिथीनभ्यागतान्वा गृहपतिरसकृदुपगतमन्युर्दिधक्षुरिव पापेन चक्षुषा निरीक्षते।
तेनस्य चापि निरये पापदृष्टेरक्षिणी वज्रतुंडा गृध्राः कंककाकवटादयः प्रसह्योरुबलादुत्पाट।
यंति २५ यस्त्विह वा आत्माभिमतिरहंकृतिस्तिर्यक्प्रेक्षणः सर्वतोभिविशंकी अर्थव्ययविनाश।
चिंतया परिशुष्यमाणहृदयवदनो निर्वृतिमनवगतो ग्रह इवार्थमभिरक्षति स चापि प्रेत्य तदु।
त्पादनोत्कर्षणसंरक्षणशमलग्रहः सूचीमुखे नरके निपतति यच्च द्रविणग्रहः पापपुरुषधर्म।
राजपुरुषा वा पकार इव सर्वतोऽगेषु सूत्रैः परिवयंति २६ एवंविधा नरका यमालये संति शत।
शः सहस्रशः तेषु सर्वेषु च सर्व एवाधर्मवर्तिनो ये केचिदिहोदिता अनुदिताश्चावनिपते पर्याये
णविशंति धर्मानुवर्तिन इतरत्र २७

णं त्वदयं वदनं च यस्य अनवगतः न
स्वार्थं स्रोत्स्यादनादिभिः शमलं प
हृणातीति तथा परिवयंति सूत्रप्रोतान्कुर्वंति २५ इतरत्र स्वर्गादौ २६।

८०

श्री
भाग
पंटी
१०९

इह मर्त्यलोके पुनर्भवे पुनर्जन्मनिमित्ते उभयोर्धर्माधर्मयोः शोषाभ्यां आद्यावेव द्वितीयस्कंधे वैश्वानरं याती
त्यादिना उपयोगे उपनिषदं श्रद्धाभक्तिभ्यो विशुद्धा बुद्धिर्यस्य १० यथावच्छ्रुता कथंभूता संस्थासकलानां जी

इह तु पुनर्भवे उभयशोषाभ्यां निविशंति निर्गमलक्षणमार्गा आद्यावेव व्याख्यातः एतावानेवांडको
शो यश्चतुर्दशधा पुराणेषु विकल्पित उपगीयते यद्भगवतो नारायणस्य साक्षान्महापुरुषस्य स्थवि
ष्ठं रूपं आत्ममाया गुणमयमनुवर्णितमादृतः पठति शृणोति श्रावयति च उपगेयं भगवतः परमा
त्मनो ग्राह्यमपि श्रद्धाभक्तिविशुद्धबुद्धिर्वेद ११ श्रुत्वा स्थूलं यथा स्थूलं रूपं भगवतो यतिः स्थूले
निर्जितमात्मानं शनैः सूक्ष्मं धिया नयेदिति भूद्वीपवर्षसरिदद्रिनभः समुद्रपातालदिङ्नरकभा
गणलोकसंस्थाणीता मया नात्वरूपाद्भुतमीश्वरस्य स्थूलं वपुः सकलजीवनिकायधाम १२ ३॥
इति श्रीभागवते महापुराणे पंचमस्कंधे षड्विंशतितमोध्यायः २६

वनिकायधानं ग्रा   मस्थाश्रयभूतं वपुः १२ ।
इति श्रीभावार्थे पंचमस्कंधे षड्विंशतितमोध्यायः २६ पंचमस्कंधस्यैवं यिपरमावार्थदीपनैः प्रीयतां

परमात्मनेपिविशेषितमात्रेवस्थितैः ॥

१०९

समाप्तोयं पंचमस्कंधः पत्राणि १०१ अध्याय २६

101

ट = ७ ६ ५०

श्री
भाग
८

ॐ श्रीगणेशाय नमः ॥ ॐ अथाष्टमे चतुर्विंशत्यध्याये मन्वन्तरं ॥ तत्र तेनर्षिदेवेंद्रमूर्तिभिः सदरैः सद
तत्रधर्मा द्विविधा अत्र वर्णिताः शुभाः प्रतिमन्वंतरं चैव मन्वाद्याः षट् पृथक् पृथ
क् प्रवर्तयंति सद्धर्मान्पालयंत्याचरंति च प्रतो मन्वंतरस्योक्तं सर्यं मूर्तिलक्षणं तत्र तु प्रथमे स्वायंभुवः
स्वायोविधिस्तथा ॥ उत्तमस्ताम समस्ते निचवर्मे नु निरूपणं ॥ स्वायं



राजोवाच स्वायंभुवस्येह गुरो वंशोयं विस्तराच्छ्रुतः १
यत्र विश्वसृजां सर्गो मनून्यान्वद नः १ मन्वं
तरे हरेर्जन्मकर्माणि च महीयसः ॥ गृणंति कवयो
ब्रह्मंस्तानि नो वद शृण्वतो २ यद्यस्मिन्नंतरे ब्रह्मन्
भगवान्विश्वभावनः कृतवान्कुरुते कर्ता
तीते नागतेथवान ३ ॥
भवेतरे ने नगुणवर्णानम मह्दितः परिपप्रच्छ सर्वमन्वंतरस्थितिं स्वयंभुवस्येति त्रिभिः १२ यत्र वि
श्वसृजां मरीच्यादीनां मनुकन्यासु पुत्रपादि सर्गः महीयसो हरेः जन्मकर्माणि तत्कविपादवान्तरम
मितं डपेति न मस्माभिः यस्मिन्नतीते यत्कृतवान्यस्मिन्ननागते यत्करिष्यति अथवा वर्तमाने य ।

अस्मिन्कल्पे षण्मनवो व्यतीताः ४ तस्य मनोर्द्दुहित्रोः कपिलयज्ञमूर्त्तिभ्यां पुत्रतां गतः ५ ६ ७ वीरंदुः।
स्वरं तपस्तप्यमानः समाधावनुभूतमिदं वस्यमाणं निर्द्दिशोच्छसितवद्दिस्मितश्चोपदिशत्त्रिवत्रवदस्त्रिव।

ऋषिरुवाच मनवोस्मिन्व्यतीताः षट्कल्पे स्वायंभुवादयः आद्यस्ते कथितो यत्र देवादीनां च।
संभवः ४ आकूत्यां देवहूत्यां च दुहित्रोस्तस्य वै मनोः धर्मज्ञानोपदेशार्थं भगवान्पुत्रतां गतः ५।
कृतं पुरा भगवतः कपिलस्यानुवर्णितं आख्यास्ये भगवान्यज्ञो यच्चकार कुरूद्वह ६ विरक्तः।
कामभोगेषु शतरूपापतिः प्रभुः विसृज्य राज्यं तपसे सभार्यो वनमाविशत् ७ सुनंदायां वर्षशतं
पदैकेन भुवं स्पृशन् तप्यमानस्तपो घोरमिदमाह भारत ८ मनुरुवाच येन चेतयते विश्वं विश्वं।
चेतयते न यं यो जागर्ति शयानेस्मिन्नायं तं वेद वेद सः ९ ॥

दत्रिवचाहृभिः श्लोकैरन्वाह ८ येन चिदात्मना विश्वं चेतयते चेतनी भवति विश्वं तु येन चेतयते न तं लोकः।
रोतिस्वतपश्च चिद्रूपत्वात् न वेदेतः अस्मिन्शयाने स्वपति यो जागर्ति साक्षितया वर्त्तते अहो चित्रं नायं त
तन तं वेद स तु विमं वेद ९

यस्य स्वरूपं दर्शयंल्लोकस्य हितमुपदिशति आत्मना ईश्वरेण आवास्यं खलु नाचैतन्यात्मना संवास्यं विश्वम
स्वं जगत्यां लोके यत्किंचिज्जगदुत्पन्नं सकलेनेश्वरेण यत्र यत्किंचित्त्यक्तं दत्तं धनं तेनैव भुंजीथाः।
भोगान्भुंक्ष्व यद्वा तेन दत्तेन त्यक्तेनेश्वरार्पणेनैव भुंजीथाः तत्रार्थे कस्यचिद्धनं मा गृधः माभि
कांक्षीः यद्वा कस्यस्विदिति कस्यापि स्वधनमस्ति यतो धनाकांक्षा क्रियते इत्यर्थः तथा च श्रुतिः ईशावा
स्यमिति यथाश्लोकमेव ॥१॥ ननु पदिष्टस्य सर्वव्यापिनोऽपि तत्त्वं दृष्टं चक्षुरादिभिः किं न प्रतीयते तत्राह यं पश्यंतं।

आत्मा वा इदं विश्वं यत्किंच जगत्यां जगत् तेन त्यक्तेन भुंजीथा मा गृधः कस्यस्विद्धनं ॥१॥ यं न
पश्यति पश्यंतं चक्षुर्यस्य न रिष्यति तं भूतमिति लयं देवं सुपर्णमुपधावत ॥

तत्तस्य तत्त्वं न पश्यति चक्षुराद्यविषयत्वात् न हि प्रमाणं विषयीकरोतीति भावः तथा च श्रुतिः च
क्षुषश्चक्षुः श्रोत्रस्य श्रोत्रमित्यादि ननु तर्हि घटनाशे देववत्तस्य तद्विषयं वा तत्त्वं ज्ञानमिवेश्वरस्यापि
स्वरूपभूतं तद्विषयज्ञानं नश्यतु तत्राह पश्यंतं पश्यतस्तस्य तत्त्वं न रिष्यति न नश्यति तत्तदाकारेण
न तन्नाया हृत्ते रेव नाशो न स्वतः सिद्धस्य ज्ञानस्य न हि सवितृप्रकाशनाशे नश्यतीति भावः भूतमिति
लयो यस्य तं सर्वान्तर्यामिणं तथापि सुपर्णं शोभनं पतनमसेतोयस्य सः उपधावत भजध्वम् ॥

तत्स्वरूपस्य नित्यत्वमेवोपपादयन्नाह अमूनि आद्यंतादीनि विश्वस्य यस्माद्भवंति विश्वं च यद्यद्रूपं तदृतम
व्यभिचारित्वात्सत्यं महत्परिपूर्णं ब्रह्म १२ ननु विश्वं चेत्तद्रूपं तर्हि विश्ववत्तस्यापि जन्माद्यभावः स्वप्रकाश
त्वेवाच्यं वा तत्र तज्जन्मादिकर्तृत्वेन विकारित्वात् सत्यत्वं पूर्णत्वं वा तत्राह स ईशः अजः सत्यस्य स्वप्रकाशस्य
पुराणस्य निर्विकारः विश्वंकायो यस्य पुरुहूतो नामानि यस्य तथाविधोपि यतोस्य विश्वस्य जन्मादि

न यस्याद्यंतौ मध्यं च स्वः परो नांतरं बहिः विश्वस्यामूनि यद्यस्माद्विश्वं च तदृतं महत् १२ स विश्व
कायः पुरुहूत ईशः सत्यः स्वयंज्योतिरजः पुराणः धत्तेस्य जन्माद्यजयात्मशक्त्या तां विद्ययोदस्य
निरीह आस्ते १३ यथाग्रे ऋषयः कर्माणीहंतेकर्महेतवे ईहमानो हि पुरुषः प्रायोनीहां प्रप
द्यते १४ ईहते भगवानीशो न हि तत्र विषज्जते आत्मलाभेन पूर्णार्थो नावसीदंति येनु तम् १५

स्वशक्त्या मायया धत्ते तां च नित्यसिद्धया विद्यया उदस्य हित्वा निष्क्रिय एवास्ते १३ यस्मादेवमीश्वरः कर्मफल
त्वासेव्यस्तस्मान्नैष्कर्म्यं प्राप्स्ये अथ यस्मादीहेतो ऋषयोप्यग्रे आदौ कर्माणि कुर्वंति किमर्थमकर्महेतवे मो
क्षार्थं यतो ऽनेकर्मनाशाय हि यस्मात् १४ ननु ईहमानः कर्मभिर्बध्यते कोशकारवद्बध्यते वा
न ईहत इति पुरुषमनुवर्तमाना ये ते नावसीदंति न विषज्जंते १५

श्री भाग० टीका

तदेवं लोकानुग्रहाय विस्मरणच्छादयितुः करोति श्रीरामकृष्णाद्यवतारैश्च वेदोक्तमथाचरति तेषां शरणं च
ज्ञानोच्चारात् तन्मिति नित्यं वर्त्मनराणां वर्णाश्रमरूपो मार्गः तत्र सम्यक् स्थितं यतः इदं मानं कर्माचरेत् ना-
थापि जीवेच्छया त्वमस्यात् निरहंकृतं निराशिषं अनन्यचोदितमिति निर्दिष्टं कालदेहतः बुधं निरा-
शीर्देहतः पूर्णं अनन्यनिष्ठत्वं देहतः प्रभुं तथापि कर्मानुष्ठानं देहतः त्वत्वाचरणाच्छिक्षयन्तं ।
तत्किमर्थं तत्राह अखिलात्मा सो भावयति प्रवर्तयति तथा तं ७९ समाहितमपि सर्वं मंत्रोपनिषदं

तमीहमानं निरहंकृतं बुधं निराशिषं पूर्णमनन्यचोदितं नृन् शिक्षयन्तं निजवर्त्मसंस्थि-
तं प्रभुं प्रपद्येऽखिलधर्मभावनं ७९ शुक उवाच इति मंत्रोपनिषदं व्याहरन्तं समाहितं दृष्ट्वा-
सुरा यातुधाना जग्धुमभ्यद्रवन् क्षुधा ८० तांस्तथावसितान्वीक्ष्य यज्ञः सर्वगतो हरिः यामैः
परिवृतो देवैर्हत्वाशासत्त्रिविष्टपम् ८१

व्याहरन्तं दृष्ट्वा सुप्तोत्थित इव हि वमि वमतः असुरा यातुधाना
स्तथावसितान् निश्चितं जग्धुमनुप्रवृत्तान् ८० यामैः स्वपुत्रैः त्रिविष्टपं स्वर्गमपालयत् स्वयमेवेन्द्रो भूत्वे-
त्यर्थः तत्र प्रतिमन्वन्तरं मन्वादयः षड्भेदा भवन्तीत्याह मन्वादि स्वतो द्वादशश्लोकानि मन्वन्तरेषु मनुर्देवा मनु-
पुत्राः सुरेश्वरः ऋषयोंऽशावतारास्तु हरेः षड्विधमुच्यते इति तत्राद्ये स्वायंभुवो मनुः प्रियव्रतोत्तानपादौ मनु-
पुत्रौ यामाख्याः देवाः मरीचिप्रमुखाः सप्त ऋषयः यज्ञो हरिरवतारः इन्द्रस्थानीय इति तदेवं विवृतमेव

द्वितीयादिषु त्रिषु मन्वंतरेषु मन्वादिषट्कमाह स्वारोचिषो द्वितीयस्त्विति यावद्ब्रंहसोत्तमभ्रात १९
२० २१ विभोरसाधारणं चरितमाह अष्टाशीतिसहस्राणीति २२ २३ सत्यजित इंद्रस्य सख उत्तमस्तृती

स्वारोचिषो द्वितीयस्तु मनुरग्नेः सुतोऽभवत् द्युमत्सुषेणरोचिष्मत्प्रमुखास्तस्य चात्मजाः १९ तत्रे-
न्द्रो रोचनस्त्वासीद्देवाश्च तुषितादयः ऊर्जस्तंभादयः सप्त ऋषयो ब्रह्मवादिनः २० ऋषेस्तु वेद-
शिरसस्तुषिता नाम पत्न्यभूत् तस्यां जज्ञे ततो देवो विभुरित्यभिविश्रुतः २१ अष्टाशीतिसह-
स्राणि मुनयो ये धृतव्रताः अन्वशिक्षन्व्रतं तस्य कौमारब्रह्मचारिणः २२ तृतीय उत्तमो नाम
प्रियव्रतसुतो मनुः पवनः सृंजयो यज्ञहोत्राद्यास्तत्सुता नृप २३ वसिष्ठतनयाः सप्त ऋषयः
प्रमदादयः सत्या वेदश्रुता भद्रा देवा इंद्रस्तु सत्यजित् २४ धर्मस्य सूनृतायां तु भगवान्पुरुषो-
त्तमः सत्यसेन इति ख्यातो जातः सत्यव्रतैः सह २५ सोऽनृतव्रतदुःशीलानसतो यक्षराक्षसान्
भूतद्रुहो भूतगणांश्चावधीत्सत्यजित्सखः २६ चतुर्थ उत्तमभ्राता मनुर्नाम्ना च तामसः पृथुः ख्या-
तिर्नरः केतुरित्याद्या दश तत्सुताः २७

योमनुः २४ २५ सत्यजित इंद्रस्य सखा सन् २६ उत्तमभ्राता तामसश्चतुर्थो मनुरिति २७॥

श्री
भाग
टी
४

4

त्रिशिखईश्वरइंद्रः २८ अस्मानपिविशिष्टपराक्रमान् देवानाद देवावैधृतयइति २९ हरिरित्याहृतो।
आहूतः ग्राहाद्ग्राहात् ३० अमूमुचन्मोचयामास ३१ श्रवणेच्छायांहेतुः तत्कथासु महत्पुण्यंस्वविशेष

सत्यकाहरयोवीरादेवास्त्रिशिखईश्वरः ज्योतिर्धामादयः सप्तऋषयस्तामसेन्तरे २८ देवावै।
धृतयोनामविधृतेस्तनयानृप नष्टाः कालेनयैर्वेदाविधृताः स्वेनतेजसा २९ तत्रापिजज्ञेभ।
गवान्हरिण्यांहरिमेधसः हरिरित्याहृतोयेनगजेंद्रोमोचितोग्रहात् ३० राजोवाच बादराय
णएतत्तेश्रोतुमिच्छामहेवयं हरिर्यथागजपतिंग्राहग्रस्तममूमुचत् ३१ तत्कथासुमहत्पुण्यं
धन्यंस्वस्त्ययनंशुभं यत्रयत्रोत्तमश्लोकोभगवान्गीयतेहरिः ३२ सूतउवाच परीक्षितैवंस
तुबादरायणिः प्रायोपविष्टेनकथासुचोदितः उवाचविप्राः प्रतिनंद्यपार्थिवंमुदामुनीनां।
सदसिस्मशृण्वतां ३३ इतिश्रीभागवतेअष्टमस्कंधेप्रथमोध्यायः १ शुकउवाच आसी।
द्गिरिवरोराजंस्त्रिकूटइतिविश्रुतः क्षीरोदेनावृतःश्रीमान्योजनायुतमुच्छ्रितः १

णं धन्यमित्यादि ३२ ३३ इतिश्रीभावार्थदीपिकायामष्टमस्कंधेप्रथमोध्यायः १ तुर्येमन्वंतरेप्रोक्तंगजेंद्रस्य
विमोक्षणं द्वितीयादित्रिभिस्तच्चविस्तरेणोपवर्ण्यते द्वितीयेतुगजेंद्रस्यगजीभिःक्रीडतोजले दे

४

तावता योजनायुतेन पर्यक् कार्त्स्न्येन: त्रिकूटसमाख्या वीनमाह त्रिभिः शृंगैर्मुख्यैः २ अन्यैश्च शृंगैर्नि।
करोभसां निर्घोषैश्च ककुभः सर्वा रोचयन्नास्ते इति एवं गीर्वाणालयः कथंभूतैः शृंगैः रत्नैर्धातुभिश्च विवि
चित्रैः नानाविधाद्रुमलतानां गुल्मायेषु तैः ३ पयसऊर्मिभिः समंतादवनिज्यमानाअंघ्रयो मूलप्रान्ता

तावता विस्तृतः पर्यक् त्रिभिः शृंगैः पयोनिधिं दिशः खानि रोचयन्नास्ते रौप्यायसहिरण्मयैः २ अन्यै
श्च ककुभः सर्वा रत्नधातुविचित्रितैः नानाद्रुमलतागुल्मैर्निर्घोषैर्निर्झरांभसां ३ सचावनिज्य
मानांघ्रिः समंतात्पयऊर्मिभिः करोति श्यामलां भूमीं हरिन्मरकताश्मभिः ४ सिद्धचारण
गंधर्वविद्याधरमहोरगैः किन्नरैरप्सरोभिश्च क्रीडद्भिर्जुष्टकंदरः ५ यत्र संगीतसन्नादैर्नदद्गु
हममर्षया अभिगर्जंति हरयः श्लाघिनः परशंकया ६ नानारण्यपशुव्रातसंकुलद्रोण्य।
लंकृतः चित्रद्रुमसुरोद्यानकलकंठविहंगमः ७

यस्य हरिद्भिः पाला शवर्णैः ४ ५ किन्नरादीनां सं
गीतसन्नादैर्नदंत्यो गुहा यस्मिंस्तं देशं तत्र हरयः सिंहाः अमर्षयः सहनेन ६ ना ये आरण्याः पशु
वस्तेषां व्रातैः संकुलाभिर्द्रोणीभिरलंकृतश्चास्ते किंच चित्राद्रुमायेषु सद्यानेषु कलकंठामयूरा

८ गजेंद्रमोक्ष

श्री
भाग
टी
८

किंच स्वच्छोदकैः सरित्सरोभिर्युतः मणयः शर्करावालुका येषु तैः पुलिनैश्च युतः देवस्त्रीणां मज्जनेन यथा
मोदस्तेन सौरभ्ययुक्तान्यंबून्यनिलाश्च युतश्चास्ते ८ तस्य द्रोण्यां वरुणस्योद्यानमास्ते ९ गिरिवनादिस
र्वैध्येयमिति वक्ष्यति यतो गिरिमप्यवर्णयति पुनर्गिरिं वर्णयति मंदारैरिति चतुर्भिः मंदारादिभिर्वृत

सरित्सरोभिरच्छोदैः पुलिनैर्मणिवालुकैः देवस्त्रीमज्जनामोदसौरभांब्वनिलैर्युतः ८ तस्य
द्रोण्यां भगवतो वरुणस्य महात्मनः उद्यानमृतुमन्नाम आक्रीडं सुरयोषितां ९ सर्वतोलंकृतं दि
व्यैर्नित्यपुष्पफलद्रुमैः मंदारैः पारिजातैश्च पाटलाशोकचंपकैः १० चूतैः प्रियालैः पनसैराम्रैः
तकैरपि क्रमुकैर्नारिकेलैश्च खर्जूरैर्बीजपूरकैः ११ मधुकैः शालतालैश्च तमालैरसनार्जुनैः
अरिष्टोडुंबरप्लक्षैर्वटैः किंशुकचंदनैः १२ पिचुमंदैः कोविदारैः सरलैः सुरदारुभिः द्राक्षेक्षुरं
भाजंबूभिर्बदर्यक्षाभयामलैः १३ बिल्वैः कपित्थैर्जंबीरैर्वृतो भल्लातकादिभिः तस्मिन्सरः सु
विपुलं लसत्कांचनपंकजं १४ कुमुदोत्पलकह्लारशतपत्रश्रियोर्जितं मत्तषट्पदनिर्घुष्टं शकुं
तैश्चकलस्वनैः १५

इत्यन्वयः १० ११ १२ १३ तस्मिन्गिरौ सरश्चास्तेति वर्णयति सुविपुलमित्यादि सार्धैः पंचभिः लसंति
कांचनपंकजानि यस्मिन् १४ कुमुदादीनां श्रिया ऊर्जितं कलः स्वनो येषां तैः शकुंतैश्च निर्घुष्टं १५

पुंडीकृत॥
5

राम्रातकैरपि

५

चक्राह्वैः सारसैरपि क्रौंचैः जलकुक्कुटादीनां कलैः कूजितं ॥ मत्स्यानां कच्छपानां च संचारेण च
ललनात्पद्मानां रजसा युक्तं पयो यस्मिन् ॥ ॥ तत्र नित्यमृतवः फलपुष्पादिसंपन्ना देवतावेष्टं नैरलं
शोभितं ॥ तत्रैव नित्य एकदा तत्र गिरिकानने नाग्रयो वारणयूथपः करेणुभिः परिवृतः तृषार्दितेन सह।

तिलरी

हंसकारंडवाकीर्णं चक्राह्वैः सारसैरपि जलकुक्कुटकोयष्टिदात्यूहकुलकूजितं ॥ मत्स्य
कच्छपसंचारचलत्पद्मरजःपयः कदंबवेतसनलनीपवंजुलकैर्वृतं ॥ कुंदैः कुरवकाशो
कैः शिरीषैः कुटजेंगुदैः कुब्जकैः स्वर्णयूथीभिर्नागपुंनागजातिभिः ॥ मल्लिकाशतपत्रैश्च।
माधवीजालकादिभिः शोभितं तीरजैश्चान्यैर्नित्यर्तुभिरलंद्रुमैः ॥ तत्रैकदा तद्गिरिका।
ननाश्रयः करेणुभिर्वारणयूथपश्चरन् सकंटकान्कीचकवेणुवेत्रवद्विशालगुल्मं प्रभंज
न्वनस्पतीन् ॥ यद्गंधमात्राद्धरयो गजेंद्रा व्याघ्रादयो व्यालमृगाः सखड्गाः महोरगाश्चापि भ
याद्द्रवंति सगौरकृष्णाः शरभाश्चमर्यः २१

यूथेनाग्रहतः सरोवराभ्याशं तत्समीपमगमदिति पंचमेनान्वयः किं कुर्वन् कीचकवेणवेत्रवंतं विशा
लगुल्मं लतादिसंदर्भं वनस्पतींश्च प्रभंजन् ॥ कथंभूतः यस्य गंधमात्राद्धरयः सिंहा गजेंद्रा व्याघ्र

साडीति भाषा विशे
ति:

मालती १

श्रीभाग० स्कं० ८ पत्रं २१

हृकारवत्तलतत्सुन्नप्राणिनः सम्बन्नतहृष्टिषथं सम्मार्चवेति २२ पुनः कोटशः धर्मनमः महस्तुत मा।

हृकावराद्दामषर्देशाल्यागोपुच्छशालाहुकमर्कटाश्च सम्वद्वत्तद्दादृवित्तणः शशादयश्चरंतिभी
तायत्वग्रदेण २२ सत्वमेनमः करिभिः करेणुभिर्वृतोमदच्चुलकलमैरत्नुतः गिरिगरिमणप
तिनः प्रकंपयत्रिषष्ठमाणौलिकलमेवणानैः २२ मगोनिलंपंकैरेणुभूषितेनिम्नत्रहृगान्मदा।
विह्वलेतणः वृतस्वपृष्ठेनतपादिनेनतन्मरोवराभ्याशमेथागमद्रुते २४ विगाल्यतस्मिन्नम।
तांवुनिर्मलेदेमारविंदोत्पलरेणुवासितं पपौनिकामंनिजपुष्करोद्धृतमात्मानमद्भिः स्नपय।
न्गतक्लमः २५ स्वपुष्करेणोद्धृतशीकराम्बुभिर्निपाययन्संस्नपयन्यथागृही घृणीकरेणुः का।
लभांश्चदुर्मदोनाचष्टकृच्छ्रंकृपणोजमायया २६ तेनत्रकश्चिद्भपदैवचोदितोग्राहोवलीयांश्च
रणोरुषाग्रहीत यदृच्छयैवंव्यसनंगतोगजोयथावलंसोतिवलोविचक्रमे २७ तथातुरंयूथपा।
तिंकरेणवोविकृष्यमाणंतरसावलीयसा विचुक्रुशुर्दीनधियोपरेगजाः पार्ष्णिग्रहास्तारयितुंन
चाशकन २८ ॥

दृष्ट्वावीमरदमसुन्नतीतितथाने २३ २४ निजेनपुष्करेणकराग्रेणोद्धृतं गतक्लमः।
सनपयौ २५ २६ २२ दीनधियः केवलंनिचक्रुशुः २८

मनउत्साहः शक्तिः बलं शारीरं गजनेंद्रियं तेषां सकलेवलादिविपर्ययो विपरीतमधिकं जलौकसः
सोग्राहस्य ३० सहस्त्रं यदा प्राणसंकटमाप यतो देही ३१ बुद्धिमेवाह न मामिमे यद्वंचनभवामि यतो
ग्राहरूपेण कवलेविधातुः पाशेनातुरः तथापि तं परमेश्वरं परेषां ब्रह्मादीनामयनमाश्रयभूतं शरणं।

नियुध्यतोरेवमिभेंद्रनक्रयोर्विकर्षतोरंतरतो वहिर्मिथः समाः सहस्रं व्यगमन्महीपते सप्रा
णयोश्चित्रममंसतामराः २९ ततो गजेंद्रस्य मनो बलौजसां कालेन दीर्घेण महानभूद्व्ययः वि
कृष्यमाणस्य जलेवसीदतो विपर्ययोभूत्सकलं जलौकसः ३० इत्थं गजेंद्रः स यदाप संकटं प्रा
णस्य देही विवशो यदृच्छया अपारयन्नात्मविमोक्षणे चिरं दध्याविमां बुद्धिमथाभ्यपद्यत ३१
न मामिमे ज्ञातय आतुरं गजाः कुतः करिण्यः प्रभवंति मोचितुं ग्राहेण पाशेन विधातुरावृतो
प्यहं च तं यामि परं परायणं ३२ यः कश्चनेशो बलिनोंतकोरगात्प्रचंडवेगादभिधावतो भृशं।
भीतं प्रपन्नं परिपाति यद्भयान्मृत्युः प्रधावत्यरणं तमीमहि ३३ इति श्रीभागवते अष्टमस्कंधे

द्वितीयोध्यायः २

यामि ३२ कोसौ यं शरणं यामि तत्राह यः कश्चनेति प्रेतकपर्वोरगात्कालस्मात् शरणं तमीमहि व्रजेमय
द्भयादित्यत्र श्रुतिः भीषास्माद्वातः पवते भीषोदेति सूर्यः भीषास्मादग्निश्चेंद्रश्च मृत्युर्धावति पंचम इति श्रु
तिश्च मद्भयाद्वाति वातोयं सूर्यस्तपति मद्भयात् वर्षतींद्रो दहत्यग्निर्मृत्युश्चरति मद्भयादिति ३३ इति श्री

श्री
भाग
ही
७

तृतीयेन गजेन्द्रेण स्तुतो हरिः स्वरूपेणागतं समुद्दधारतं ग्राहाद् ग्राहं देवलशापतः जाप्यं जपस्तोत्रं प्राग्जन्मस्वनुशि-
क्षितं १ तस्मै नमो नम अभिधीमहि अभिध्यायेम केवलं ग्राहग्रहीतत्वेन कायग्रहणेनैवशक्यत्वात् स्वस्य
त्वानं सम्भावयितं विशिनष्टि यत एतद्रूपादेतद्देहादि चिदात्मकं चेतनं भवति तद्रूपं येन चेतयते विश्व-
मिति तत्र हेतुः पुरुषाय पूर्वं कारणत्वेन प्रकृतिपुरुषौ कारणमिति प्रसिद्धः तत्राह आदिः प्रकृतिर्बी-

शुक उवाच एवं व्यवसितो बुद्ध्या समाधाय मनो हृदि जजाप परमं जाप्यं प्राग्जन्मन्यनुशिक्षि-
तं १ गजेन्द्र उवाच ओं नमो भगवते तस्मै यत एतच्चिदात्मकं पुरुषायादिबीजाय परेशायाभि-
धीमहि २ यस्मिन्निदं यतश्चेदं येनेदं य इदं स्वयं योऽस्मात्परस्माच्च परस्तं प्रपद्ये स्वयंभुवं ३ ॥

जं पुरुषस्तद्रूपाय प्रकृष्टत्वेपि जीववत्स्वामान्तरं वारयन्परेशायेति २ परमैश्वर्यं विवृण्वन्नाह यावत्स्मा-
कामि यस्मिन्नधिष्ठाने यतो उपादानात् तत्कर्त्री यस्य स्वयमेवेदं विश्वं भवति योऽस्मात्कार्यात्परस्मात्कारणा-
च्च परस्तं स्वयंभुवं स्वतःसिद्धं प्रपद्ये शरणं व्रजामि ३ ॥

२

विश्वदेवत्वं स्वतः सिद्धत्वं चोक्तं स्पष्टानी विश्वप्रकाशत्वं च वर्णयन्नार्थयते यः स्वात्मनीति विभातमभि
व्यक्तं सत्क्व चिन्मलयेति तिरोहितं लीनं सत् तदुभयं कार्यकारणं च साक्षी सन्नीक्षते साक्षित्वेदेवतः अवि-
द्धदृक् यत्नमदृष्टिः आत्ममूलः स्वप्रकाशः अतः परात्प्रकाशकात्वतादेरपि परतत्त्वापि प्रकाश-
कात्वमर्थः च तत्वश्रुत्वात्तमादिश्रुतेः ४ तिरोहितमीतत इत्येतत्पंचपूर्वकं तु ज्ञानतत्वं वदन्नार्थयते।

यः स्वात्मनीदं निजमाययार्पितं क्वचिद्विभातं क्वचं तत्तिरोहितं अविद्धदृक्साक्ष्युभयं तदीक्षते स
आत्ममूलोवतु मां परात्परः ४ कालेन पंचत्वमितेषु कृत्स्नशो लोकेषु पालेषु च सर्वहेतुषु ।
तमस्तदासीद्गहनं गभीरं यस्तस्य पारेभिविराजते विभुः ५ न यस्य देवा ऋषयः पदं विदुर्जन्तुः ।
पुनः कोर्हति गन्तुमीरितुं यथा नटस्याकृतिभिर्विचेष्टतो दुरत्ययानुक्रमणः स मावतु ६

कालेनेतिद्वाभ्यां पंचत्वमितेषु नाशप्राप्तेषु गहनं दुरवगाहं गभीरमनंतं तस्य तमसः आदित्यवर्णं त-
मसः परस्तादित्यादिश्रुतेः ५ न यस्य देवा इति यद्यस्य स्वरूपं न विदुः जन्तुर्वा जीवः गन्तुं ज्ञातुं वक्तुं वा
दुरत्ययं दुर्गमं अनुक्रमणं चरितं कथनं वा यस्य सः मां ६ ॥

कथं तर्हि तमेव विदित्वातिमृत्युमेतीत्यादिश्रुतिरित्याशंक्य तज्ज्ञानोपायं कथयन्नाह दिदृक्षव इति सुला-
कथनं वा त्वचर्यादि अव्रणमच्छिद्रं सर्वेषां भूतानामात्मभूताः तेष्वात्मदर्शिनः अतः सुहृदः स मे गतिरस्तु ९ दुरत्य-
यानुक्रमणत्वं प्रपंचयन्नाह न विद्यत इत्यादिना लोकानामप्ययः प्रलयः संभवो जन्म तयोर्हेतु-
र्थं तदर्थं यस्तानि जन्मादीनि स्वीकरोति तस्मै नमः इत्युत्तरेणान्वयः १० अरूपाय अनन्तशक्तये उरु-

दिदृक्षवो यस्य पदं सुमंगलं विमुक्तसंगा मुनयः सुसाधवः चरन्त्यलोकव्रतमव्रणं वने सर्वा-
त्मभूताः सुहृदः स मे गतिः ९ न विद्यते यस्य च जन्म कर्म वा न नामरूपे गुणदोष एव वा न-
थापि लोकाप्ययसंभवाय यः स्वमायया तान्यनुकालमृच्छति १० तस्मै नमः परेशाय ब्रह्म-
णेऽनन्तशक्तये अरूपायोरुरूपाय नम आश्चर्यकर्मणे ११ नम आत्मप्रदीपाय साक्षिणे परमात्म-
ने नमो गिरां विदूराय मनसश्चेतसामपि १२

रूपाय अनन्तानि आश्चर्याणि कर्माणि यस्य तस्मै परेशाय नमः ११ आत्मप्रदीपाय प्रकाशात्मने स्वतः विषया-
य ऋतः साक्षिणे प्रकाय परमात्मने जीवनियंत्रे अत एव गिरां विदूराय अप्रकाश्याय चेतसां विनिवृ-
त्तीनां नयाविष्कृतिः यतो वाचो निवर्तन्ते अप्राप्य मनसा सह इति १२

एवमपि विपश्चिता निपुणेन नैष्कर्म्येण संन्यासेन सत्वेन शुद्धेन संन्यासयोगाद्यतयः शुद्धसत्वाः इति
श्रुतेः प्रतिलभ्याय प्राप्याय कैवल्यनाथाय निर्वाणसुखसंविदे मोक्षानुभूतये ॥ गुणधर्मिणे सत्वादिधर्मा
नुकारिणे ज्ञानघनाय चेति निर्विशेषाय विषयविशेषध्यानवैलक्षण्यमुक्तं ॥ साक्षिणे इति सर्वाध्यक्षत्वेपि
निर्विकारत्वमुक्तं आत्मनां चेतनानां मूलाय मूलस्य प्रधानस्यापि प्रकृतये उद्भवहेतुः पुरुषाय एवं

सत्वेन प्रतिलभ्याय नैष्कर्म्येण विपश्चिता । नमः कैवल्यनाथाय निर्वाणसुखसंविदे ॥ नमः
शान्ताय घोराय मूढाय गुणधर्मिणे निर्विशेषाय साम्याय नमो ज्ञानघनाय च ॥ १२ ॥ क्षेत्रज्ञाय ।
नमस्तुभ्यं सर्वाध्यक्षाय साक्षिणे पुरुषायात्ममूलाय मूलप्रकृतये नमः ॥ १३ ॥ सर्वेन्द्रियगुणद्रष्ट्रे ।
सर्वप्रत्ययहेतवे असताच्छाययोक्ताय सदाभासाय ते नमः ॥ १४ ॥

मेव सते तथात्मकृतिः पूर्वमेवाद्रसिद्धासमिति तत्त्वस्थस्य पुरुषत्वमिति पूर्णाये तिवा ॥ सर्वे
न्द्रियाणां ये गुणा विषयास्तेषां द्रष्टे सर्वप्रत्ययाः इन्द्रियवृत्तयो हेतवो ज्ञापका यस्य तस्मैः तदेवाह आ
सताहंकारादिप्रपंचेन छायया सद्रूपया उक्ताय प्रतिबिंबेन बिंबमिव सूचिताय तत्र हेतुः सद्रूपेषु ।
विषयेष्वाभासो यस्य तस्मै तदुक्तं तृतीये यथा जलस्य आभास इत्यादिना पादांतरे असताच्छाया ।

श्री
भाग
दी
९

अखिलकारणाय सर्वकामकरूपाय अत एव स्वयं निष्कारणाय कारणानेविष्महादिवद्विकारं कारयति
अद्भुतकारणायेति एवंभूतं प्रमाणमाह सर्वेषामागमाः पांचरात्रादयः आम्नायाश्च वेदास्तेषां महार्णवा
य स्तोतव्यामित्वपर्यवसानस्थानाय अपवर्गाय मोक्षरूपाय अत एव परायणेन मनामाश्रयाय ॥९॥ गुणा
एवारणिस्तया छन्नचिद्रूप्यो ज्वालाग्निस्तस्मै तेषां गुणानां क्षोभकार्ये विस्फूर्जितं वहिर्दीप्तिकं मानसं य
स्य सोऽकामयत बहुस्यामिति श्रुतेः नैष्कर्म्यमात्मतत्वं तस्य भावेन भावेन या विवर्जितास्त्रमाविधिनिषे

ॐ नमो नमस्तेऽखिलकारणाय निष्कारणायाद्भुतकारणाय सर्वागमाम्नायमहार्णवाय नमो-
ऽपवर्गाय परायणाय ॥९॥ गुणारणिच्छन्नचिदूष्मपाय तत्क्षोभविस्फूर्जितमानसाय नैष्कर्म्यभा-
वेन विवर्जितागमस्वयंप्रकाशाय नमस्करोमि ॥१०॥ मादृक्प्रपन्नपशुपाशविमोक्षणाय मुक्ताय भूरि-
करुणाय नमोऽलयाय स्वांशेन सर्वतनुभृन्मनसि प्रतीतप्रत्यग्दृशे भगवते बृहते नमस्ते ॥११॥

पलक्षणायैतेषु स्वयमेव प्रकाशो यस्य तस्मै ॥१०॥ मादृक्त्वद्विधस्त्वामेव प्रपन्नः पशुस्तस्य पाशोऽविद्या तस्य
तस्य विशेषेण मोक्षणं येन तत्र योग्यतामाह मुक्ताय मोचने हेतुः भूरिः करुणा यस्य स्वतन्त्रार्थं ऽलिया
आलस्यशून्यतायांशेनान्तर्यामिरूपेण सर्वेषां तनुभृतां मनसि प्रतीताय प्रत्यक्ष्मै तथापि दृश्यते यथा
अग्निरिति भगवते सर्वेषां तनुभृतां नियमनसमर्थाय तेषां मनसि स्थितत्वेऽपि बृहद्

९

ग्रेतः स्ववपि देहादिष्वासक्तैर्दुष्प्रापणाय प्राप्तमशक्याय तत्र हेतुः गुणसंगेन विवर्जिताय अतएव मु-
क्तात्मभिर्देहादिष्वनासक्तैश्चिंतिताय तैः परिभाविते रूपमाह ज्ञानात्मने इत्यादि १८ इष्टां गतिं धर्मा-
दिफलं प्राप्नुवंत्येव न तत्रापदेव किंतु याचितेभ्यः कामितान्यपि आशिषो राति देहमप्यव्ययं राति एवं चे-
दभ्रदयस्त विमोक्षणमेव केवलं करोतु नान्यत् किं प्रार्थये १९ एतावदप्यहं भक्तिसुखानभिज्ञत्वेन।

आत्मात्मजाप्तगृहवित्तजनेषु सक्तैर्दुष्प्रापणाय गुणसंगविवर्जिताय मुक्तात्मभिः स्वहृद-
ये परिभाविताय ज्ञानात्मने भगवते नम ईश्वराय १८ यं धर्मकामार्थविमुक्तिकामा भजंत इ-
ष्टां गतिमाप्नुवंति किं त्वाशिषो रात्यपि देहमव्ययं करोतु मेदभ्रदयो विमोक्षणं १९ एकां-
तिनो यस्य न कंचनार्थं वांछंति ये वै भगवत्प्रपन्नाः अत्यद्भुतं तच्चरितं सुमंगलं गायंत आनंदस-
मुद्रमग्नाः २० तमक्षरं ब्रह्म परं परेशमव्यक्तमाध्यात्मिकयोगगम्यं अतीन्द्रियं सूक्ष्ममतीव
दूरमनंतमाद्यं परिपूर्णमीडे २१

वांछामि यस्यैकांतभक्ताः न कांश्चिदर्थं वांछंति तं परमीश्वरमीडे
स्तौमि अनन्यशरणाः तेषां निष्कामत्वे हेतुः ये वै भगवतः सर्वेशान्मुक्तान् प्रपन्नाः सेवितवंतः २० अ-
स्फुटं सुमंगलत्वप्रदर्शनार्थमक्षरत्वादिविशेषणानि २१

श्री भाग टी ९

परिपूर्णत्वं प्रदर्शयन्नाह यस्य फल्ग्व्या च स्वल्पयैव कलया अंशेन कृताः सत्त्वमनादि निलीयन्तामयः २२ कथं कृता इत्यपेक्षायां दृष्टान्तो यथार्चिषः अग्नेर्निति प्रवाहदृष्टान्तः सवितुर्गभस्तयः स्थानेभ्यो निर्यान्ति उद्गच्छन्ति संयन्ति लीयन्ते गुणसंप्रवाहमेवाह बुद्धिर्मनः खानीन्द्रियाणि शारीरसर्गाः कार्यदेहप्रवाहाश्च यतो भवन्ति सः २३ अतएव देवादीनां मध्ये कोपि न भवति न जन्तुः लिङ्गत्रयस्थूलं प्राणिमात्रमपि किं तर्हि सर्वस्य निषेधावधिर्न निषिध्यते इति निषेधशेषः मायया अशेषात्मकश्च

यस्य ब्रह्मादयो देवा वेदा लोकाश्चराचराः । नामरूपविभेदेन फल्ग्व्या च कलया कृताः ॥ २२ ॥ यथार्चिषोऽग्नेः सवितुर्गभस्तयो निर्यान्ति संयान्त्यसकृत्स्वरोचिषः । तथा यतोऽयं गुणसंप्रवाहो बुद्धिर्मनः खानि शरीरसर्गाः ॥ २३ ॥ स वै न देवासुरमर्त्यतिर्यङ् न स्त्री न षण्ढो न पुमान्न जन्तुः । नायं गुणः कर्म न सन्न चासन्निषेधशेषो जयतादशेषः ॥ २४ ॥ जिजीविषे नाहमिहामुया किमंतर्बहिश्चावृतयेभयोन्या । इच्छामि कालेन न यस्य विप्लवस्तस्यात्मलोकावरणस्य मोक्षं ॥ २५ ॥

जयतात् महिमोत्कर्षेणाविर्भवतु २४ न च ग्राहाच्छरीरस्य मोक्षणेनाहं जीवितुमिच्छामि अमुया अन्तर्बहिश्च अविवेकरूपया गजजात्या किं प्रयोजनं आत्मलोकस्यात्मप्रकाशस्य यदावरणमज्ञानं तस्यैव मोक्षमिच्छामि कालेन नास्ति यद्वा देहस्यैव यो देहनाशेन स एवेदेव किं तन्मोक्षणार्थेन आत्मलोकस्य न कालेन विप्लवो।

10

सोऽहं मुमुक्षुर्विश्वं विश्वव्यतिरिक्तं च विश्वं विग्रहो यत्नमुपकरणं यस्य तं विश्वस्यात्मा च केवलं शरणं गतोऽस्मि
नतं तं नमामि ॥२६॥ योगं विनादुस्तोनकादित्याह योऽनेन भगवद्धर्मेणारंधितानि दग्धानि कर्माणि येषां
ते यं प्रपश्यंति ॥२७॥ तर्हि सर्वैरपि योगमेव किं नाःश्रियतात्तत्राह नमः इति द्वाभ्यां असह्यो वेगो रागादिलक्ष-
णो यस्य तथाभूतं शक्तित्रयं यस्य वहिस्थाखिलधियो सर्वेंद्रियाणां गुणाय शब्दादिरूपेण प्रतीयमानाय ।

सोऽहं विश्वसृजं विश्वमविश्वं विश्ववेदसं । विश्वात्मानमजं ब्रह्म प्रणतोऽस्मि परं पदं ॥२६॥ योगरंधि-
तकर्माणो हृदि योगविभाविते । योगिनो यं प्रपश्यंति योगेशं तं नतोऽस्म्यहं ॥२७॥ नमो नमस्तुभ्यम-
सह्यवेगशक्तित्रयायाखिलधीगुणाय । प्रपन्नपालाय दुरंतशक्तये कदिंद्रियाणामनवाप्यव-
र्त्मने ॥२८॥ नायं वेद स्वमात्मानं यच्छक्त्याहंधिया हतं । तं दुरत्ययमाहात्म्यं भगवंतमितोऽस्म्यहं ॥२९॥
श्रीशुक उवाच । एवं गजेंद्रमुपवर्णितनिर्विशेषं ब्रह्मादयो विविधलिंगभिदाभिमानाः । नैते यदोपस-
सृपुर्निखिलात्मकत्वात्तत्राखिलामरमयो हरिराविरासीत् ॥३०॥

अतः कदिंद्रियाणां कुत्सितानींद्रियाणि
येषां तेषामनवाप्यं वर्त्म यस्य ॥२८॥ यच्छक्त्या यस्य मायया अहंधीः तया हृतमावृतं स्वरूपं न वेद दुरत्ययं
माहात्म्यं यस्य तं तमाश्रितोऽस्मि ॥२९॥ उपवर्णितं निर्विशेषं मूर्तिभेदं विना परं तत्त्वं येन विविधा चासौ लिंग-
भिदा मूर्तिभेदस्तस्यामभिमाना येषां अतएव ते यदा नोपजग्मुः तत्र तदाऽखिलामरमयः सर्वदेवमूर्तिः ॥३०॥

श्री भाग दी ॥

दिविजैर्देवैः सह छंदोमयेनेति शैघ्र्यायोक्तं ३१ खे रह्याउपात्तमुद्यतं चक्रं येन ३२ गहहेपिमेदृशातितिरिति
ततः सहसावतीर्य ग्राहेण चक्रेण विपाटितं मुखं यस्य उस्त्रियाणां देवानां ३३ इति श्रीभावार्थदीपिका ।

तं तद्वदार्तमुपलभ्य जगन्निवासः स्तोत्रं निशम्य दिविजैः सह संस्तुवद्भिः छंदोमयेन गरुडेन समुह्य
मानश्चक्रायुधोभ्यगमदाशु यतो गजेंद्रः ३१ सोंतःसरस्युरुबलेन गृहीत आर्तो दृष्ट्वा गरुत्मति हरिं
खउपात्तचक्रं उत्क्षिप्य साम्बुजकरं गिरमाह कृच्छ्रान्नारायणाखिलगुरो भगवन्नमस्ते ३२ तं वी
क्ष्य पीडितमजः सहसावतीर्य सग्राहमाशु सरसः कृपयोज्जहार ग्राहाद्विपाटितमुखादरिणा गजेंद्रं
संपश्यतां हरिरमूमुचदुस्त्रियाणां ३३ इति श्रीभागवते अष्टमस्कंधे गजेंद्रोपाख्याने तृतीयोध्यायः
३ श्रीशुक उवाच तदा देवर्षिगंधर्वा ब्रह्मेशानपुरोगमाः मुमुचुः कुसुमासारं शंसंतः कर्म तद्धरेः १
नेदुर्दुंदुभयो दिव्या गंधर्वा ननृतुर्जगुः ऋषयश्चारणाः सिद्धास्तुष्टुवुः पुरुषोत्तमं २

यां अष्टमस्कंधे गजेंद्रोपाख्याने नाम तृतीयोध्यायः ३ चतुर्थे तु ततो ग्राहः शापगंधर्वतां पुनः गजं स्वपार्ष
दं कृत्वा हरिर्निन्ये निजं पदम् १ २

॥

असौ देवलस्य शापेन ग्राहो जातः स एव ततः सद्यो मुक्तः सन्नुत्तमश्लोकमगायत् तेनान्वयः एवं ह्येतिह्य।
सोऽत्र मे कथा सरसि स्त्रीभिः क्रीडन्नसौ स्नापनप्रविष्टं देवलं पादे गृहीत्वा विचकर्ष स च प्रकुपितो ग्राहो भवे
ति शशाप तेन च प्रसादितः सन्नुवाच एवमेव गजेन्द्रं गृहीतपादस्ततस्त्वं गजेन्द्रमदत्तान्हरिस्त्वामपि मोच।

यो ऽसौ ग्राहः स वै सद्यः परमाश्चर्यरूपधृक् मुक्तो देवलशापेन हूहूर्गन्धर्वसत्तमः १ प्रणम्य शिर
साधीशमुत्तमश्लोकमव्ययं अगायत यशोधाम कीर्तन्यगुणसत्कथं २ सोऽनुकम्पित ईशेन प
रिक्रम्य प्रणम्य तं लोकस्य पश्यतो लोकं स्वमगान्मुक्तकिल्बिषः ३ गजेन्द्रो भगवत्स्पर्शाद्विमु
क्तोऽज्ञानबन्धनात् प्राप्तो भगवतो रूपं पीतवासाश्चतुर्भुजः ४ स वै पूर्वमभूद्राजा पाण्ड्यो द्रविडस
त्तमः इन्द्रद्युम्न इति ख्यातो विष्णुव्रतपरायणः ५ स एकदाराधनकाल आत्मवान्गृहीतमौनव्र
त ईश्वरं हरिं जटाधरस्तापस आप्लुतोऽच्युतं समर्चयामास कुलाचलाश्रमः ६ यदृच्छया तत्र म
हायशा मुनिः समागमच्छिष्यगणैः परिश्रितः तं वीक्ष्य तूष्णीमकृतार्हणादिकं रहस्युपासी
नमृषिश्चुकोप ह ७

यियासतीति १ कथंभूतं यशः सो धामाश्चर्यं यतः कीर्तनीया गुणाः सत्कथा च यस्य तम् २ स्वं गन्ध
र्वलोकं ३ ४ ५ कुलाचले याम्ये आश्रमो यस्य ६ तूष्णीं रहस्युपासीनं वीक्ष्य ७ ॥

शापमेवाह अकृताशिक्षिताबुद्धिर्यस्य गजो यथा स्तब्धमतिस्तथैवायं अतः स एव गज एव भवतिति ।
शेषः १० दिष्टं दैवं शापितेन तदुपधारयन्नालोचयन् ११ कौंजरीं योनिमापन्नः तर्हि पश्चात्कथं स्मृतिस्तत्रा-
ह हर्यर्चनस्यानुभावेनेति १२ अद्भुतं स्वभवनमगात् १३ एतद्गजराजमोक्षणं नाम कृष्णानुभावस्त

तस्मादिमं शापमदादसाधुरयं दुरात्माकृतबुद्धिरद्य विप्रावमंता विशतां तमिस्रं यथा गजः ।
स्तब्धमतिः स एव १० श्रीशुक उवाच एवं शप्त्वा गतोऽगस्त्यो भगवान्सहपार्षदः इंद्रद्युम्नोऽपि राजर्षि-
र्दिष्टं तदुपधारयन् ११ आपन्नः कौंजरीं योनिमात्मस्मृतिविनाशिनीं हर्यर्चनानुभावेन यद्गजत्वेऽप्यनु-
स्मृतिः १२ एवं विमोक्ष्य गजयूथपमब्जनाभस्तेनापि पार्षदगतिं गमितेन युक्तः गंधर्व-
सिद्धविबुधैरुपगीयमानकर्माद्भुतं स्वभवनं गरुडासनोऽगात् १३ एतन्महाराज तवेरितो मया ।
कृष्णानुभावो गजराजमोक्षणं स्वर्ग्यं यशस्यं कलिकल्मषापहं दुःस्वप्ननाशं कुरुवर्य शृण्वतां ।
१४ यथानुकीर्तयंत्येतच्छ्रेयस्कामा द्विजातयः शुचयः प्रातरुत्थाय दुःस्वप्नाद्युपशांतये १५
इदमाह हरिः प्रीतो गजेंद्रं कुरुसत्तम शृण्वतां सर्वभूतानां सर्वभूतमयो विभुः १६

वेरितः कथंभूतं तत्राह स्वर्ग्यमित्यादि दुःस्वप्नं नाशयतीति १४ अतः श्रेयस्कामाः प्रातर्यथावदनुकीर्त-
यंति १५ एतेन श्रेयो भवतीति कुतोऽतः साक्षाद्भगवद्वचनादेवेत्याह इदमाहेत्यादि यावत्समाप्ति १६

श्री
भाग
टी
८

८

प्रसंगात्स्वप्नस्मरणात्फलमुच्यते सर्वेषां हि तीलानां स्मरंतीसप्तमेनान्वयः १ १८ १४ १४ २१ प्रव्यक्तो
मायाश्रयं यं धर्मं भक्तिलक्षणं सोमकश्यपयोरपि पत्नीर्दाक्षायणीः २२ सितवारणमैरावतम् २३

श्रीभगवानुवाच ये मां त्वां च सरश्चेदं गिरिकंधरकाननं वेत्रकीचकवेणूनां गुल्मानि सुरपादपान्
१७ शृंगाणीमानि धिष्ण्यानि ब्रह्मणो मे शिवस्य च क्षीरोदं मे प्रियं धाम श्वेतद्वीपं च भास्वरं १८ श्रीव-
त्सं कौस्तुभं मालां गदां कौमोदकीं मम सुदर्शनं पांचजन्यं सुपर्णं पतगेश्वरं १९ शेषं च मत्कलां
सूक्ष्मां श्रियं देवीं मदाश्रयां ब्रह्माणं नारदमृषिं भवं प्रह्लादमेव च २० मत्स्यकूर्मवराहाद्यैरवता-
रैः कृतानि मे कर्माण्यनंतपुण्यानि सूर्यं सोमं हुताशनं २१ प्रणवं सत्यमव्यक्तं गोविप्रान्धर्ममव्य-
यं दाक्षायणीर्धर्मपत्नीः सोमकश्यपयोरपि २२ गंगां सरस्वतीं नंदां कालिंदीं सितवारणं ध्रुवं ब्र-
ह्मर्षीन्सप्त पुण्यश्लोकांश्च मानवान् २३ उत्थायापररात्रांते प्रयताः सुसमाहिताः स्मरंति मम
रूपाणि मुच्यंते ह्येनसोऽखिलात् २४ ये मां स्तुवंत्यनेनांग प्रतिबुध्य निशात्यये तेषां प्राणात्यये
चाहं ददामि विमलां मतिं २५ श्रीशुक उवाच इत्यादिश्य हृषीकेशः प्रध्माय जलजोत्तमं हर्षयन्
विबुधानीकमारुरोह खगाधिपं २६ इति श्रीभागवते अष्टमस्कंधे चतुर्थोऽध्यायः ४ ॥

सुसमाहिता एकाग्रचित्ता मम रूपाणि महिभूतिः २४ २५ जलजोत्तमं शंखवरं प्रध्माय वादयित्वा २६

नलादीन्नुरान

पुमनात्मा न मद्दाभिरप्यायेरनुवर्ण्यते स्वभक्तः सत्यपाते तेन यत्र योघायितं प्रभोः पंचमे पंचमस्याथ षष्ठस्य
च कथ्यते मन्वे विष्णोश्यास्तुतिः श्रीकेंद्रैः सहहरिस्तुतिः १ तामसस्य चतस्रो मनुस्तामसोदवो श्रुतः २

शुक उवाच राजन्नुदितमेतत्ते कर्माघनाशनं हरेः गजेंद्रमोक्षणं पुण्यं रैवतं त्वंतरं शृणु १ पंचमो।
रैवतो नाम मनुस्तामससोदरः बलिविंध्यादयस्तस्य सुताहार्जुनपूर्वकाः २ विभुरिंद्रः सुरगणा
राजन्भूतरयादयः हिरण्यरोमा वेदशिरा ऊर्ध्वबाह्वादयो द्विजाः ३ पत्नी विकुंठा शुभ्रस्य वैकुंठैः सुर
सत्तमैः तयोः स्वकलया जज्ञे वैकुंठो भगवान्स्वयं ४ वैकुंठः कल्पितो येन लोको लोकनमस्कृतः
रमया प्रार्थ्यमानेन देव्या तत्प्रियकाम्यया ५ तस्यानुभावः कथितो गुणाश्च परमोदयाः भौमा
न्रेणून्स विममे यो विष्णोर्वर्णयेद्गुणान् ६ षष्ठश्च चक्षुषः पुत्रश्चाक्षुषो नाम वै मनुः पूरुपूरुष
सुद्युम्नप्रमुखाश्चाक्षुषात्मजाः ७ इंद्रो मंत्रद्रुमस्तत्र देवा आप्यादयो गणाः मुनयस्तत्र वै राजन्ह
विष्मद्वीरकादयः ८ तत्रापि देवः संभूत्यां वैराजस्याभवत्सुतः अजितो नाम भगवानंशेन जगतः प
तिः ९

३ ४ ५ तस्य वैकुंठसंज्ञस्य हरेरनुभावः सनकादिशापेन दैत्यतां प्राप्ताभ्यां स्वपार्षदाभ्यां वराहादिरूपेण यु
द्धादिलक्षणः गुणाश्च ब्रह्मण्यतादयो महदुदयः कथितास्तृतीयस्कंधादिषु ६ ७ ८ ९ ॥

सुतोहेतोः स्वयंचक्रधरात्मना कूर्मरूपेणासाधितामृत्येमक्त्वयुद्वायपरिप्लावितम् १० ॥ अतः ऋच्छति किंनाम
द्विति १२ १३ १४ सोतिरुवाच त्वमुनजीवतिस्मेत्यर्थं १५ दुर्वाससादिकदाचिन्मार्गेगच्छतामिदंदृष्टस्त्वकेद

पयोधिंयेननिर्मथ्यसुराणांसाधितासुधा भ्रममाणोंभसिधृतः कूर्मरूपेणमंदरः १ राजोवाच
यथाभगवताब्रह्मन्मथितःक्षीरसागरः यदर्थंवायतश्चाद्रिंदधाराम्बुचरात्मना ॥ यथामृतंसु
रैः प्राप्तंकिमन्यदभवत्ततः एतद्भगवतःकर्मवदस्वपरमाद्भुतम् २ त्वयासंकथ्यमानेनमहि
म्नासात्वतांपते नातितृप्यतिमेचित्तंसुचिरंतापतापितं ३ सूतउवाच संपृष्टोभगवानेवंद्वैपा।
यनसुतोद्विजाः अभिनंद्यहरेर्वीर्यमभ्याचष्टुंप्रचक्रमे ४ शुकउवाच यदायुद्धेऽसुरैर्देवावध्यमा।
नाःशितायुधैः गतासवोनिपतितानोत्तिष्ठेरन्स्मभूयशः ५ यदादुर्वासःशापेनसेन्द्रालोकास्त्रयो
नृप निःश्रीकाश्चाभवंस्तत्रनेशुरिज्यादिकाःक्रियाः ६ निशाम्यैतत्सुरगणामहेन्द्रवरुणाद
यः नाध्यगच्छन्स्वयंमंत्रैर्मंत्रयंतोविनिश्चयं ७

स्थोमालांतस्मैदत्त ततश्चश्रीमदेनानादृत्यैरावतस्य कुंभयोर्निहितांमालांसवगजेन्द्रोतमः पद्भ्यांतांमालांचूर्णी
चकार ततःकोपितोदुर्वासास्तेशापत्रिभिर्लोकैःसहनिःश्रीकोभवेति तदेतदाह यदादुर्वासःशापेन

श्री भाग टी १४

१८ यस्त्वानयथादेवैर्वलस्याप्येनवलपुच्छादिपुच्छात्त्रिलोकीसमर्थः १९ हरिं शरणं गताः संतो यथापू
र्वं प्राप्स्यामहे निहर्षं लोकुलं विकसितं वदनं यस्य २० मनुष्यादयो जरायुजाः स्वेदजाः यस्माव
ताः पुरूषत्वं स्यांशो ब्रह्मानस्य कलामरीच्यादयस्तामिर्विसर्जिताः पुत्रपौत्राभिर्यमाजनिता २१ ततर्हि

ततो ब्रह्मसभां जग्मुर्मेरोर्मूर्धनि सर्वशः सर्वे विज्ञापयांचक्रुः प्रणताः परमेष्ठिने १८ स विलो
क्यं द्वादशादीन्निःसत्वान्विगतप्रभान् लोकानमंगलप्रायानसुरानयथा विभुः १९ समाहितेन
मनसा संस्मरन्पुरुषं परं उवाचोत्फुल्लवदनो देवान्सर्वानसुरः २० अहं भवो यूयमथोसुराद्यो
मनुष्यतिर्यग्द्रुमघर्मजाद्यः यस्यावतारांशकलाविसर्जिता व्रजाम सर्वे शरणं तमव्ययं २१
न यस्य वध्यो न च रक्षणीयो नोपेक्षणीयादरणीयपक्षः अथापि सर्गस्थितिसंयमार्थं धत्ते र
जः सत्वतमांसि काले २२ अयं च तस्य स्थितिपालनक्षणः सत्वं जुषाणस्य भवाय देहिनां ।
स्माद्व्रजामः शरणं जगद्गुरुं स्वानां स नो धास्यति शं सुरप्रियः २३

सर्वे प्रसौम्यः स्यात्किं तद्ध्वरणं अयेणास्तं यच्छेवं तथा समस्तपानीमविष्णुनीतापापेनाद न
यस्तेनिहाभ्यां २२ स्थितिपालनस्य क्षणः कालः अतः सुरप्रियः सत्वीयानां नः शं सुखं करिष्यति २३ ।४

यच्छ्रोत्रवेगोदरो वीरस्तत्ते देवतमसः परं स्थानं यद्ब्रह्मलोकाम्बरलोयत्नमस्ततः परं स्थानं जगाम २४ दैवी
भिर्लोके प्रसिद्धाभिर्गीर्भिः स्तुतिमकरोत २५ देववरं नमामहे देववरं नाम मामेति वा वरवेदेन सत्यं
रूतः अविक्रियं तत्कृतः अनेन माद्यं च अनादिमाद्यं त्वं मोहहिनं ह्यविविक्रिया भवेति किंच यद्ध्याश

शुक उवाच इत्याभाष्य सुरान्वेधाः सह देवैरिरिंदम अजितस्य पदं साक्षाज्जगाम तमसः प
रं २४ तत्रादृष्टस्वरूपाय श्रुतपूर्वाय वै प्रभोः स्तुतिमब्रूत दैवीभिर्गीर्भिस्त्ववहितेंद्रियः २५
ब्रह्मोवाच अविक्रियं सत्यमनंतमाद्यं गुहाशयं निष्कलमप्रतर्क्यं मनोग्रयानं वचसानिरु
क्तं नमामहे देववरं वरेण्यं २६ ॥

यं सर्वोंतरे तत्कृतः निष्कलं निरूपाधि तत्कृतः मनोग्रयानं मनसोपि जविष्ठं मनः प्राप्येस्यानेन ततः
प्रागेव विद्यमानत्वात अनेन तदेकं मनसो जवीयो नैनदेवा आप्नुवन्पूर्वमर्षत तद्धावतोन्यानत्येतितिष्ठ
दिति वचसानिरुक्तमविषयत्वात यतो वाचो निवर्तंते अप्राप्य मनसा सहेति श्रुतेः ततो वचसो गोचरत्वादप्रतर्क्यं यद्येवं तर्हि सर्वेषां देवानां देवमहाभावः २६ ॥

किंच प्राणादीनां विपश्चितेत्तानां श्चात्माहं कारो देहो वा नननन्नस्तिति किं तेयमस्तीत्याह प्रयेर्थो विष-
इंद्रियाणि तज्ज्ञाहकाणि तद्रूपभयद्रूपेणाभासते इति न स्थानम तथाप्यनिद्दृष्टपदृष्टवदत्तानरहितं कृतः
१९ २ ३॥ विद्रुमजालादिभिर्विराजमाने २२ प्रतिसद्म गृहे गृहे उद्दीप्यमानैर्दीपैर्बलिभिः पुष्पादिप्रकरैश्च जुष्टं जालेभ्यो।
गवाक्षेभ्यो निर्गतैर्धूपैः रुचिरं विलसन्त्यः पताका यस्मिन् मूर्धन्या मूर्ध्नि भवा हेमकलशा येषां तैः राजतम।

मानितो मानयामास कुरुसृंजयकेकयान् सूतमागधगंधर्वा वंदिनश्चोपमंत्रिणः १९ मृदंगा।
शंखभेरीभिर्वीणापणवगोमुखैः ब्राह्मणाः सारविद्वेदैर्नृत्यंतो गायका जगुः २० एवं सुहृद्भिः पर्य।
स्तः पुण्यश्लोकशिखामणिः संस्तूयमानो भगवान्विवेशालंकृतं पुरं २१ संसिक्तवर्त्मकरिणां म।
दगंधतोयैश्चित्रध्वजैः कनकतोरणपूर्णकुंभैः मृष्टात्मभिर्नवदुकूलविभूषणस्रग्गंधैर्नृभिर्युव
तिभिश्च विराजमाने २२ उद्दीप्तदीपबलिभिः प्रतिसद्मजालनिर्यातधूपरुचिरं विलसत्पताकं मू
र्धन्यहेमकलशै रजतोरुशृंगैर्जुष्टं ददर्श भवनैः कुरुराजधाम २३ प्राप्तं निशम्य नरलोचनपानपा।
त्रमौत्सुक्यविश्लथितकेशदुकूलबंधाः सद्यो विसृज्य गृहकर्म पतींश्च तल्पे द्रष्टुं ययुर्युवतयः स्म नरें
द्रमार्गे २४

यानि रूप्यमयानि स्थूलानि शृंगाणि कलशाधस्तनभूमिका येषां तैर्भवनैर्जुष्टं कुरुराजस्य धाम पुरं ददर्श २३
नराणां लोचनानि तेषां पानस्य पात्रं विषयं किं पुनर्नारीणामित्यर्थः २४

श्री
भाग
उत्त
८

80

मृत्युवन्नामवेतियस्य सत्वः श्रीकृष्णः करोतिनतनमः कश्चित्स्वपिकर्ते समर्थेश्वतिनिश्चितसर्वानेवनानाह।
मत्कृष्णमुपाचेममर्थः शमाभ्याभ्यामोः कृष्णवन्मलेमेवंसंवोध्य २ विभूतीरेशान २ एवचक्रवर्तिनामनो
रथः कथंतयाक्रियतेश्वनिवेदनम्याद तस्मादुकेश्वति परियेचवंनोनियच्छहृष्णवयानमार्ष परिचरंनिदेह

आचार्येः कलहृदेश्यभ्रान्तसंवोधिवांयवेः मृत्युन्नामेवचैतेषामाभाच्छेदमुवाचाह २ युधिष्ठिर
उवाच कथंनाशेतगोविंदराजसूयेनपावनोः यदस्थविभूतीर्भवनस्तत्संपादयतःप्रभो ३ तस्माद्।
केयविरतंपरियेचवंतिध्यायंत्यभद्रनशनेषुचयोगृणंति विंदंतितेकमलनाभभवापवर्गम्।
शासनेपदिप्राशिषश्चशिनाम्ये ४ तदेवदेवभवतश्चरणारविंदसेवानुभावमिदपश्यतस्वलो
कः येत्वांभजंतिनभजंत्युतवोभयेषांनिष्ठांप्रदर्शयविभोकुरुराजयानां ५

नध्यायंतिमनसा प्रभद्रस्यन।
शनेनाशकेगृणंतिवाचातेभवस्यापवर्गमोक्षंविंदंतियथाशासने तथोशिषोपितएवविंदंतितामेवचक्र
वर्तितोपि ४ भगवतोभक्तपततपानमाविष्कारयन्नाह तदेवदेवेति ततस्तान्स्पष्टमाह तान एवंनिश्चि
तेपियेकर्मादिश्रेयानाः केवलकृष्णंतयाभगवद्भक्तिंनवहृन्मन्यंतेतेषांमोहनिवृत्तयेयेत्वांभजंतितेषां।

श्रीमद्भागवतटिप्पणिकायाम् ७ ८०

प्रानर्वोर्विनवति ५२ अन्याश्चयाः कृष्णपत्न्योभ्यागतास्ताश्चपि ५३ अस्मद्गृहंनवंनवंयथाभवतितथासुखं
निवासयामास ५४ कथंभूतेयः प्रेमणाफल्गुनेनसहितः अतएवतस्यसहायेनसतायेनखांडवेनवह्निंतर्प
यित्वातत्रचमयंमोचयित्वा तेमयंप्रयुज्ययुधिष्ठिरायदिव्यासभाकृतातेश्रीकृ अनेनराज्ञः श्रीकृष्णोपकार

स्वश्वासंचोदिताकृष्णाकृष्णपत्नीश्चसर्वशः आनर्चरुक्मिणींसत्यांभद्रांजांबवतींतथा ५२ कालिं
दींमित्रविंदांचशैब्यांनाग्नजितींसतीं अन्याश्चाभ्यागतायास्तुवासःस्रङ्मंडनादिभिः ५३ सुखंनि
वासयामासधर्मराजोजनार्दनं ससैन्यंसानुगामात्यंसभार्यंचनवंनवं ५४ तर्पयित्वाखांडवेनव
ह्निंफाल्गुनसंयुतः मोचयित्वामयंयेनराज्ञेदिव्यासभाकृता ५५ उवासकतिचिन्मासान्राज्ञःप्रिय
चिकीर्षया विहरन्रथमारुह्यफाल्गुनेनभटैर्वृतः ५६ इतिश्रीभागवतेमहापुराणेदशमस्कंधेएक
सप्ततितमोध्यायः ७१ श्रीशुकउवाच एकदांतःसभामध्येआस्थितोमुनिभिर्वृतः ब्राह्मणैःक्ष
त्रियैर्वैश्यैर्भ्रातृभिश्चयुधिष्ठिरः १॥

नृस्मरणेदृश्यतान्सभायायथामनोरथंसर्वावकाशसम्पादनंचदर्शितं ५५ ५६ इतिश्रीभागवतार्थदीपिका
यांदशमस्कंधेएकसप्ततितमोध्यायः ७१ ततोद्विसप्ततितमेराज्ञाकार्येनिवेदिते जरासंधंमागधंबुद्धाभीमे।
नानानृपहृदिः आस्थितयासनमितिशेषः १॥

नच नृपतिविजयादि कथं शक्यं स्यादत आह एतइति किंचात्मवता जितेंद्रियेण त्वयाहं च जितोस्मि वशी कृतोस्मि अकृतात्मभिरजितेंद्रियैः ॥१०॥ आस्तां तावदेवंभूतस्य तव परैः परिभवशंका अकिंचनमपि नाभिभवितुं प्रभवेदित्याह तेजसा प्रभावेन विभूतिभिः सैन्यादिसामग्रीभिः ॥११॥ एवं युक्त नियुक्तवान् विसृज्य।

एते ते भ्रातरो राजन् लोकपालांशसंभवाः जितोस्म्यात्मवता तेद्य दुर्जयो योकृतात्मभिः ॥१०॥ नाकश्चिन्मत्परं लोके तेजसा यशसा श्रिया विभूतिभिर्वाभिभवेद्देवोपि किमु पार्थिवः ॥११॥ श्रीशुक उवाच निशम्य भगवद्गीतं प्रीतः फुल्लमुखांबुजः भ्रातॄन्दिग्विजये युंक्त विष्णुतेजोपबृंहितान् ॥१२॥ सहदेवं दक्षिणस्यामादिशत्सहसृंजयैः दिशि प्रतीच्यां नकुलमुदीच्यां सव्यसाचिनं प्राच्यां वृकोदरं मत्स्यैः केकयैः सह मद्रकैः ॥१३॥ ते विजित्य नृपान्वीरा आजह्रुर्दिग्भ्य ओजसा अजातशत्रवे भूरि द्रविणं नृप यक्ष्यते ॥१४॥ श्रुत्वाजितं जरासंधं नृपतेर्ध्यायतो हरिः आहोपायं तमेवाद्य उद्धवो य मुवाच ह ॥१५॥

तेजसा उपबृंहितान् संवर्धितान् तेजोपबृंहितानिति संधिरार्षः ॥१२॥ नकुलादीनां मत्स्यादिभिः सहायैर्यथासंख्येन संबंधः ॥१३॥ कथंभूताय यक्ष्यते यागं करिष्यते ॥१४॥ अघोद्धरिः श्रीकृष्णः ॥१५॥

81

ननु रागादिरहितेन मयि कथमिदं वैषम्यं स्यादत आह नेति सः पर इति भेदमतिर्न तव स्यादेव कुतो ब्रह्म। णो निरूपणात् किंच सर्वस्यात्मनः अतः समदृशः किंच स्वसुखानुभूतेः अतो रागाद्यभावादिति भावः तथापि। सेवमानानामेव त्वं प्रसादो नान्येषां तत्रापि सेवानुरूपमुदयः फलं न तत्र विपर्ययो नान्यथाभावः यथा कल्पद्रुम

न ब्रह्मणः स्वपरभेदमतिस्तव स्यात्सर्वात्मनः समदृशः स्वसुखानुभूतेः संसेवतां सुरतरोरिव ते
प्रसादः सेवानुरूपमुदयो न विपर्ययोऽत्र ६ श्रीभगवानुवाच सम्यग्व्यवसितं राजन्भवता शत्रुक।
र्षण कल्याणी येन ते कीर्तिर्लोकाननु भविष्यति ७ ऋषीणां पितृदेवानां सुहृदामपि नः प्रभो
सर्वेषामपि भूतानामीप्सितः क्रतुराडयं ८ विजित्य नृपतीन्सर्वान्कृत्वा च जगतीं वशे संभृत्य।
सर्वसंभारानाहरस्व महाक्रतुं ९

स्वरागादिराहित्येऽपि सेवकेष्वेव फल जनकत्वं नान्येषु ६ सम्यङ्मत्कालाम
वकैवल्यादिलाभे धाम्मिमनुमोदमानः शत्रुकर्षणेति संबोधयन्सर्वराजविजयशक्तिं संचारयति अनु भ।
विष्यति अनुवर्तिष्यते सर्वलोकव्यापिनी भविष्यतीत्यर्थः ७ किं मत्र मयाऽनेन सम्पादनीयं न वस्तु करणं वा तत्रापर
स्याह ऋषीणामिति ८ जगतीं सर्वां पृथ्वीं संभारान्मन्तोपस्करान् सम्भृत्य सम्पाद्य आहर स्वानुतिष्ठेत्यर्थः ९

विश्वामित्रस्यानुग्रहाय हरिश्चंद्रो भार्यात्मजादि सर्वं विक्रीय स्वयं चंडालतां प्राप्तोऽपि निर्विण्णः सदा योग्यावा
मिभिर्जनैः स्वर्गं गतः रंतिदेवः रंतिदेवः सकृद्देवोऽष्टचत्वारिंशद्दिनान्यलब्धान्नोदकोऽपि कथंचिल्लब्धोदकान्न
मतिथिभ्यो दत्वा ब्रह्मलोकं गतः उंछवृत्तिर्मुद्गलः षण्मासे सीदन्नकृद्देवोऽप्यातिथ्यदानेन ब्रह्मलोकं गतः श
रणागतकपोतरक्षणाय स्वमांसं श्येनाय दत्वा शिबिर्दिवं गतः ब्राह्मणवेषधारिणे हरये सर्वस्वं दत्वा तमेव

हरिश्चंद्रो रंतिदेव उंछवृत्तिः शिबिर्बलिः व्याधः कपोतो बहवो ह्यध्रुवेण ध्रुवं गताः २१ शुक उवा।
च स्वैराकृतिभिर्लोकस्य प्रकोपैः स्पृहोदितैरपि राजन्नेवं धूर्त्तिव सावहृष्टपूर्वो न चिंतयन् २२ राजत्वं
यतो येन ब्रह्मलिंगानि बिभ्रति ददामि मिलितं ते भिक्षात्मानमपि दुस्त्यजं २३ बलेर्नृपते कीर्तिं
वितनोति दिव्यकल्मषा ऐश्वर्याद्भ्रंशितस्यापि विश्रब्धात्मजेन धीमता २४

बलिरात्मसाच्चकार कपोतश्चातिथये व्याधाय कपोत्या सहात्ममांसं दत्वा विमानेन दिवं गतः व्याधस्त
योः सत्वं वीक्ष्य स्वयमतिनिर्विण्णो महाप्रस्थानेन वनाग्निदग्धदेहो निष्कल्मषो दिवमारुरोह एवमन्ये बहवो
ऽध्रुवेण शरीरेण ध्रुवं लोकं गताः प्राप्ता इति २१ स्वादितैः स्वाचारितैः कार्णिकैः दृष्टपूर्वो ह्योपदेशस्वयं वा
दिष २२ २३ इंद्रस्य श्रियं जिहीर्षतो विश्रब्धात्मनेन भ्रंशितस्यापि बलेः प्रभुप्रह्वो नेति पाठे न भ्रूयते किमपि त

वल्कलिंगधराः बाललिंगधारिणः यतो यत्र बृहद्दृश्य मनो जगामेत्यर्थः ॥९॥ शृङ्गेषु वर्तमानेसमयावेशेन अग्रावे
तेनार्थः ॥१०॥ नन्विदं कामयामहे इति विशेषो निर्दिश्यते अन्यथा यस्य पुत्रादेर्वियोगो दुःसहः स कथं देयः
तथा राजमंडलं किरीटादि देयं यत्र ज्झितस्पृहः कथं देयं तथा निरस्पृहं रत्नाभरणादि पुत्रादियोगं कथमस्मै दे

भीमसेनोर्जुनः कृष्णो वल्कलिंगधरास्ततः नगमुर्गिरिशिखरं तेनातन् बृहद्दृश्य मनो यतः ॥९॥ ते गता अतिथि
वेलायां शृङ्गेषु शृङ्गमेथिनो वल्कलैः समयावेशात् तन्माऽवल्कलिगिनः ॥१०॥ नरोऽन्विष्यन्ति यामास्मान
र्थिनो ह्यागतान् ततः प्रयच्छ भद्रं ते यद्वयं कामयामहे ॥११॥ किं दुर्लभमिति तित्त्वणो किमकार्यं महा
मायुभिः किन्त्वदेयं वदस्मात्तोकः परः समदर्शिनो ॥१२॥ योनित्यं तव शरीरेण सत्तां गायं यशो ध्रुवं नावि
नोति ह्ययं कल्पः सवाच्यः शाश्वतः ॥१३॥

नमिति वेदत आह किं दुर्लभमित्यादि अग्रदृष्टांतत्वेनार्थांतरमाह किमकार्यमिति यथा माधुलामका
र्यं नास्ति तथा ति नित्यं तो दुर्लभं दुःसहं नास्ति वदन्यानामसदानाणामदेयं नास्ति समदर्शिनां परस्वना
स्ति अतस्त्वं किं विशेषनिर्देशेनेत्यर्थः ॥१२॥ किं चास्थितेथीरेण मृङ्गलादिवल्माणा अपि न वेचनीयाः इत्याश।
येनाह योनित्यनेतिना विकोतिनसंपादयति सवाच्यः ॥१३॥

श्री
भाग
उटी
८३

83

प्रदाय दत्त्वेत्यर्थः ३३ समेखले युद्धांगते ३४ मंडलानि गतागतप्रकारभेदान् सव्यं दक्षिणं च यथा भव-
ति तथा रंगिणो रंगगतयो नटयोरिवेति निर्भयत्वेनोपमा ३५ चटचटेति गदयोः परस्परघातशब्दानुक-

इत्युक्त्वा भीमसेनाय प्रदाय महतीं गदां द्वितीयां स्वयमादाय निर्जगाम पुराद्बहिः ३३ ततः स-
मेखले वीरौ संयुक्तावितरेतरौ जघ्नतुर्वज्रकल्पाभ्यां गदाभ्यां रणदुर्मदौ ३४ मंडलानि विचि-
त्राणि सव्यं दक्षिणमेव च चरतोः शुशुभे युद्धं नटयोरिव रंगिणोः ३५ ततश्चटचटाशब्दो वज्र-
निःपेषसन्निभः गदयोः क्षिप्तयो राजन्दंतयोरिव दंतिनोः ३६ ते वै गदे भुजजवेन निपात्यमाने
अन्योन्यतोंसकटिपादकरोरुजत्रुं चूर्णीबभूवतुरुपेत्य यथार्कशाखे संयुध्यतोर्द्विरदयोरि-
व दीप्तमन्वोः ३७ इत्थं तयोः प्रहतयोर्गदयोर्नृवीरौ क्रुद्धौ स्वमुष्टिभिरयःस्पर्शैरपिंष्टां शब्दस्त-
योः प्रहरतोरिभयोरिवासीन्निर्घातवज्रपरुषस्तलताडनोत्थः ३८

रणं वज्रस्य निष्पेषो घातस्तत्सदृशः युध्यतोर्दंतिनोर्घातशब्द इव शुशुभे ३६ अंसंकट्यादीनुपेत्य दीप्तमो
मन्युर्ययोस्तयोः गजयोरर्कशाखाभ्यां युध्यतोर्दंतिनोः ते यथा चूर्णीभवतस्तद्वत् ३७ अपिंष्टां चूर्णीचक्र-

ग
दि
८३

षुक्रेणावार्यमाणोपि अतएवविस्मयमितिज्ञानत्रपि २५ पतमानेनपतता तत्रवंधुनादेहेनवाल्य।
णार्थाय विपुलं यशो नेदं तानेदमानेनाः संम्पादयता कोन्वर्थः २६ इत्येवं निश्चित्य प्राह हे विप्राइति २७

श्रियं जिह्रीर्षितेदस्य विस्मवेद्धिन्नद्रूपिणे ज्ञानत्रपि मंद्री प्राह प्रार्थमानोपि देहमाह २५ जीवता।
वाल्यणार्थायकोन्वर्थः तत्रवंधुना देहेनपतमानेन नेदंतां विपुलं यशः २६ इत्युदारमतिः प्राह
कृष्णाज्जनन्द्रुकोदरान् हे विप्राद्वियतां कामो ददाम्यात्मशिरोपिवः २७ श्रीभगवानुवाच युद्धं।
नोदेहिराजेन्द्र द्वंद्वशो यदि मन्यसे युद्धार्थिनो वयं प्राप्ता राजन्या नान्नकांक्षिणः २८ असौ वृकोदरः
पार्थस्तस्य भ्राताऽर्जुनोऽयं अनयोर्मातुलेयं मां कृष्णं जानीहि ते रिपुं २९ एवमावेदितो राजन्
जहासोच्चैः स मागधः आह चामर्षितो मंदा युद्धं तर्हि ददामि वः ३० न त्वया भीरुणा योत्स्ये युधि वि।
क्लवचेतसा मथुरां स्वपुरीं त्यक्त्वा समुद्रं शरणं गतः ३१ अयं तु वयसा तुल्यो नातिसत्वो न मे समः
अर्जुनो न भवेद्योद्धा भीमस्तुल्यबलो मम ३२

२८ राजन्यतामेव प्रपंचयति असाविति २९ ३० यतो मद्भियात्समुद्रं शरणं गतः ३१ वयसाप्यतुल्यः नाति
सत्वोः नातिवलश्चनवदेहेनमयासमः अतोर्जुनो योद्धा न भवेत् भीमस्तु भवेद्यतो मम तुल्यबलः ३२ ॥

श्री
भाग
दशी
८४

दुर्हृतत्वात्सोऽहंतान्नयोऽन्याभिलाषिणोऽतिदर्शयन्नाह सहदेवमिति ४८ इति श्रीभावार्थे दशमस्कंधे द्विसप्त
तितमोध्यायः ७२ ततस्त्रिसप्ततितमे मोचयित्वा नृपान्हरिः राजार्हभोगैः स्वान्देशान्प्रस्थाप्य पुनरागमत
प्रस्थंहत्वा मागधं यथावद्दुःस्थभूपतीन् विमोच्य कृपया कृष्णो निजरूपमदर्शयत् ये निर्जिता जरासंधेन।

हाहाकारो महानासीन्निहते मगधेश्वरे पूजयामासतुर्भीमं परिरभ्य जयाच्युतौ ४५ सहदेवं तत्त
नयं भगवान्भूतभावनः अभ्यषिंचदमेयात्मा मगधानां पतिं प्रभुः मोचयामास राजन्यान्संरुद्धा
मागधेन ये ४६ इति श्रीभागवते दशमस्कंधे द्विसप्ततितमोध्यायः ७२ शुक उवाच अयुते द्वे श
तान्यष्टौ लीलया युधि निर्जिताः ते निर्गता गिरिद्रोण्यां मलिना मलवाससः १ क्षुत्क्षामाः शुष्क।
वदनाः संरोधपरिकर्शिताः ददृशुस्ते घनश्यामं पीतकौशेयवाससं २ श्रीवत्सांकं चतुर्बाहुं प
द्मगर्भारुणेक्षणं चारुप्रसन्नवदनं स्फुरन्मकरकुंडलं ३ पद्महस्तं गदाशंखरथांगैरुपलक्षि।
तं किरीटहारकटककटिसूत्रांगदांचितं भ्राजद्वरमणिग्रीवं निवीतं वनमालया ४ ॥

निरुद्धा गिरिद्रोण्यां तेन ततो निर्गताः संतो घनश्यामं ददृशुरित्यन्वयः १ क्षुधा क्षामाः कृशाः संरो
धेन परिकर्शिताः क्लेशिताः २ भ्राजन्मानो वरमणिः कौस्तुभो यस्यां ग्रीवायां यस्य तं कंठे विलय

श्री
भाग
दश
८४

शिलाभ्यासो बलेसंतं डोजः प्रभावः समानितानियमयोः ३९ ४० ४१ तत्सशाकलरूपं मूर्तिः पुनः शाकली
भावः तेविद्याज्ञानेन जरानामगात्तस्मीनल्कृते श्रविनयत्कथमसौ शाकलीभवेदिति ४२ विटपं शाखो करे

तयोरेवं प्रहरतोः समशिलावलोनमोः निर्विशेषमभूयुद्धमहीणजवयोर्नृप ४३ पर्वतयोर्महा
राजयुध्यतोः समविंशतिः दिनानि निरंगस्तत्रसमयुद्धं त्रिंशतितिष्ठतोः ४४ एकदामातलेयं वैप्राह।
राजन्वृकोदरः नशक्तोदंतरामंयंविजेतुंपृथिमाधव ४५ तत्रोजंसम्मतीविद्रांजीवितंचजराकृ
तं पार्थमाप्यायनत्वेन तेनस्माविनप्रहरिः ४६ संविज्ञायाभिवयोपायं भीमस्यामोघदर्शनः दर्शं
यामासविटपं पाटयन्निवसंज्ञया ४७ तदित्तायमहासत्वोभीमः प्रहरतांवरः गृहीत्वापादयोःश
त्रोः पातयामासभूतले ४८ एकंपादंपदाक्रम्यदोर्भ्यामन्यंप्रगृह्यच गृह्णतः पाटयामासशाखा
मिवमहागजः ४९ एकपादोरुवृषणकटिपृष्ठस्तनांसके एकबाहुत्रिभूकर्णौ शकलेददृशु
र्जनाः ५०

विटपं गृहीत्वाहरिर्भीमस्ययथाद्वैविटपं पाटयामितयात्वमेनं विपाटयेतिसंज्ञया संकेतेनकारिवयोपायं।
दर्शयामासेत्यर्थः ४७ ४८ ४९ एकैकः पादादिर्ययोस्ते शकले ५०

श्री
भाग
उत्तं
८५

राज्यस्य योगवियोगयोरस्मर्थो वदनमस्मास्वेव दृष्टमित्याहुः वयमिति हे अभ्यो श्रीमदेन नष्टादृष्टियैर्यान्तो।
स्पर्द्धाः दृष्टिमाः इतरेतरस्पृधः परस्परं स्पर्द्धमानाः पुरः पुरतः स्तां मत्तमविगणय्य पुरायेद्दुर्मदा वयं ॥१२॥
हे कृष्ण तपवद्वर्यमर्याद्विलष्टदर्पास्ते चरणौ स्मरामस्मदभिमानास्महे कथंभूताः भवतस्तन्वा मूर्त्या काले
न श्रियो विचालिता भ्रंशिताः अतो राज्यच्युतिर्भवदनुग्रहरूपैवेत्यर्थः ॥१२॥ अतएवाथो अनेनतेरमगतृष्णिस

वयं पुरा श्रीमदनष्टदृष्टयो जिगीषयास्या इतरेतरस्पृधः घ्नन्तः प्रजाः स्वा अतिनिर्घृणाः प्रभो मृ
त्युं पुरस्त्वा विगणय्य दुर्मदाः ॥१२॥ त एव कृष्णाद्य गभीररंहसा दुरन्तवीर्येण विचालिताः श्रियः ।
कालेन तन्वा भवतोऽनुकम्पया विनष्टदर्पाश्चरणौ स्मराम ते ॥१३॥ अथो न राज्यं मृगतृष्णिरूपितं देहे
न शश्वत्पतता रुजां भुवा उपासितव्यं स्पृहयामहे विभो क्रियाफलं प्रेत्य च कर्णरोचनम् ॥१४॥ तं
नः समादिशोपायं येन ते चरणाब्जयोः स्मृतिर्यथा न विरमेदपि संसरतामिह ॥१५॥

मृगतृष्णारूपं शश्वत्पतता नाशनिरहाणां लीयमानेन तथा रुजां रोगाणां भुवा जन्मस्थानेन देहेनोपासितव्यं न स्पृ
हयामहे प्रेत्य परलोके च क्रियाफलं स्वर्गादिभोगमुपासितव्यं न स्पृहयामहे कथंभूते कर्णरोचनं रु।
विजनकं तत्रगतस्यापायनपगमेन स्वात्माभावादिति भावः ॥१४॥ यद्येवंभूतास्तर्हि ममचरणौ स्मरन्तन्तो।
नायासेन मुक्तिर्भविष्यति किमिदमपेक्षयेति चेदत आहुः तं न इति नन्वरणास्मृतिरेव नन्वरणास्मरणप

पिबंतइवचक्षुर्भ्यामिमाहिनाहरेःपादयोः प्रणामरिसन्नरेणाल्पयः रंभंतः परिरंभमाणाइव ५ श्रीकृष्णद
र्शनाह्लादेनध्वस्तः संरोधक्लमोयेषांते ६ ७ संरोधाद्दुःखितानस्मान्घोरायाः संसृतेरपिपाहिमोचय ८ ननु
भवंतोजनाः संस्थामयाविष्टाइवाशुभोगासक्तास्त्वकथंसंसृतेर्मोचनीयाइत्याशंक्यसंप्रतिनवयंतथाभूताइ
त्याहुः तेनमितमतिभिः हेनाथवयमेतेनानुसूयामः अल्पवृत्तेषुदृष्ट्यानपश्यामः कुतइत्यतआहुरनुग्रहइति।

पिबंतइवचक्षुर्भ्यांलिहंतइवजिह्वया जिघ्रंतइवनासाभ्यांरंभंतइवबाहुभिः ५ प्रणेमुर्हतपाप्मा
नोमूर्धभिःपादयोर्हरेः कृष्णसंदर्शनाह्लादध्वस्तसंरोधनक्लमाः ६ प्रशशंसुर्हृषीकेशंगीर्भिः
प्रांजलयोनृपाः ७ राजानः नमस्तेदेवदेवेशप्रपन्नार्तिहराव्यय प्रपन्नान्पाहिनःकृष्णनिर्विण्णा
न्घोरसंसृतेः ८ नैनंनाथान्वसूयामोमागधंमधुसूदन अनुग्रहोयद्भवतोराज्ञांराज्यच्युतिःप्रभो ९
राज्यैश्वर्यमदोन्नद्धोनश्रेयोविंदतेनृपः त्वन्मायामोहितोनित्यामन्यतेसंपदोचलाः १० मृगतृष्णांय
थाबालामन्यंतउदकाशयं एवंवैकारिकींमायामयुक्तावस्तुचक्षते ११

ति यद्यस्मात् ९ एतदेवव्यतिरेकेणोपपादयंति राज्यैश्वर्येति राज्यैश्वर्याभ्यांमदस्तेनोन्नद्धउच्छृंखलः।
अनित्याश्चचलाश्चसंपदोमन्यते यद्वाऽनित्यासन्तःअचलाःशाश्वतीर्मन्यते १० किंचावस्तुसदस्तुनयाया।
अपतीत्याह मृगतृष्णामिति वैकारिकींसृष्ट्यादिविकारापन्नाम् अयुक्ताअविवेकिनः ११ ॥

श्री
भाग
उत्ती
८९

86

प्रजानां नृपसत्यादि सेवन्तो: शर्मसममम्बेन सेवमाना: २२ २३ स्त्रियश्च तेषां मज्जनकर्मणि गृह्यं गात्राणां नादौ म्यगुं
के २४ २५ सस्नाताना मम्बगलकृतानां भोगैश्च पुष्कलान्वरान्नेन भोजयित्वा पुनस्तेषां सपर्यां सहदेवेन कार।

सेतन्वेत: प्रजानां तन्नस्वेद: स्वंभवाभवौ शर्मेणामेव सेवंतो मच्चित्ता विचरिष्यथ २२ उदासीनाश्च
देहादावात्माराममाधृतव्रता: मय्यावेश्य मन: सम्यङ्मामन्ते ब्रह्मयास्यथ २३ शुक उवाच इत्यादि
श्यनृपान्कृष्णो भगवान्भुवनेश्वर: तेषां नियुक्त पुरुषान्स्त्रियो मज्जनकर्मणि २४ सपर्यां कारया।
मास सहदेवेन भारत नरदेवोचितैर्वस्त्रैर्भूषणै: स्रग्विलेपनै: २५ भोजयित्वा वरान्नेन सुस्नाता।
न्समलंकृतान भोगैश्च विविधैर्युक्तांस्ताम्बूलाद्यैर्नृपोचितै: २६ ते पूजिता मुकुन्देन राजानो मृष्टकुं
डला: विरेजुर्मोचिता: क्लेशात्प्रावृडन्ते यथा ग्रहा: २७ रथान्सदश्वानारोप्य मणिकाञ्चनभूषितान
प्रीणय सूनृतैर्वाक्यै: स्वदेशान्प्रत्ययापयत २८ त एवं मोचिता: क्लेशात्कृष्णेन सुमहात्मना ययुस्त
मेव ध्यायन्त: कृतानि च जगत्पते: २९ जगदु: प्रकृतिभ्यस्ते महापुरुषचेष्टितं यथान्वशासद्भगवां
स्तथा चक्रुरतन्द्रिता: ३० शुक उवाच जरासंधं घातयित्वा भीमसेनेन केशव: पार्थाभ्यां संयुत: प्रा
यात्सहदेवेन पूजित: ३१ गत्वा ते खाण्डवप्रस्थं शंखान्दध्मुर्जितारय: हर्षयन्त: स्वसुहृदो दुर्हृदां चास

यामास २९ गृहाश्चैवं सादयोपयत्ना २२ प्रीणय्यैवं तदयित्वा २८ २९ जगद‍ुरञ्ज: ३० ३१ खाण्डवप्रस्थमिंद्रप्रस्थं ३२ ८९

१८ १९ यथा भवद्भिराशंसितः तथा वाढं निश्चितं भक्तिर्जायते तावत् मामित्यर्थः १९ देहभृतां मद्भजनमेव कर्त-
व्यमिति भवद्भिर्यद्व्यवसितं संकल्पितं दिष्ट्या भद्रं भवद्भिस्तत्कं सम्यगेवेत्याह भवंत इत्यादि श्रीश्चैश्वर्यं च ताभ्यां मद-
त्तेनोन्नाहमहं यतं तेषाचारमित्यर्थः पश्यपश्यामिति १९ ततो वाद देहदः कानि वीर्येष्वक्रवर्तीनरेश्वरः पि

क्रस्वाय वामदेवाय हृदयेषु परमात्मने प्रणतक्लेशनाशाय गोविंदाय नमो नमः १९ शुक उवाच संस्तू-
यमानो भगवान्राजभिर्मुक्तबंधनैः तानाह करुणस्तात शरण्यः श्लक्ष्णया गिराः १९ श्रीभगवानुवा-
च अद्यप्रभृति वो भूपा मय्यात्मन्यखिलेश्वरे सुदृढा जायते भक्तिर्वाढमाशंसितं यथा १९ दिष्ट्या व्य-
वसितं भूपा भवंत ऋतभाषिणः श्रियैश्वर्यमदोन्नाहं पश्य उन्मादकं नृणां १९ हैहयो नहुषो वेनो राव-
णो नरकोऽपरे श्रीमदाद्भ्रंशिताः स्थानाद्देवदैत्यनरेश्वराः २० भवंत एतद्विज्ञाय देहाद्युत्पाद्यमंतवत् मां
यजंतोऽध्वरैर्युक्ताः प्रजा धर्मेण रक्षथ २१ ॥

तः कामयेनुहरणान्मरणस्य रामेण सप्रज्ञो हतः नहुषो देवैरुन्नतां शामगत्मनः शचीसंगमाय ब्राह्मणान् शिविकां
वाहयंस्तैरेव ततो भ्रंशितो जगरत्वमवाप वेनोऽप्युन्मत्तो ब्राह्मणान् धिक्कृत्य पितृस्तैरेव हुंकृतैर्हतः रावणो रामेण
रः सीतामभिलषन् रामेण हतः नरको देवस्त्रीरादितिकुंडले चाहरत् कृष्णेनैव हतः अपरे श्रीमदात्स्थानाद्भ्रं-
शिताः २० यदुत्पाद्यं देहादि नंतवद्विज्ञाय युक्ता अप्रमत्ता रक्षतेत्यर्थः २१

अथवा न वपरिपूर्णस्यात्मापनात्ताधारणाभ्यां न तेजोहानिवृद्धी अतः कृष्णकृपया सर्वं संगच्छते इत्याह
समानासमानरहितस्य ब्रह्मणस्तवैषमाया परमात्मन इति सर्वजीवनियंतृत्वनियम्यत्वं स्वतरां नवा
स्तवे अतः परानुग्रहार्थं दत्तैः कर्मभिस्तव तेजो न वर्धते न च ह्रसते रवेरिवोदयास्तमयादिकर्मभिरि
त्यर्थः तथा च श्रुतिः न कर्मणा वर्धते नो कनीयानिति ४ नन्वेवमप्यहं परमेश्वरः ममेदं कर्म नीचमयो

नह्येकस्मादद्वितीयस्य ब्रह्मणः परमात्मनः कर्मभिर्वर्धते तेजो ह्रसते च यथा रवेः ४ न वै ते
ऽजित भक्तानां ममाहमिति माधव त्वं तवेति च नानाधीः पशूनामिव वैकृता ५ श्रीशुक उवाच ।
इत्युक्त्वा यज्ञिये काले वव्रे युक्तान्स ऋत्विजः कृष्णानुमोदितः पार्थो ब्राह्मणान्ब्रह्मवादिनः ६
द्वैपायनो भरद्वाजः सुमन्तुर्गोतमोऽसितः वसिष्ठश्च्यवनः कंठो मैत्रेयः कवषस्त्रितः ७ विश्वामि
त्रो वामदेवः सुमतिर्जैमिनिः क्रतुः पैलः पराशरो गर्गो वैशम्पायन एव च ८ अथर्वा कश्यपो धौ
म्यो रामो भार्गव आसुरिः वीतिहोत्रो मधुच्छंदा वीरसेनोऽकृतव्रणः ९

ग्यमिति मनसि कथं न भवेदत आह नवैत इति हे अजित इति हे अजित ते तव भक्तानां मोचलावत्वियं ना
नानाधीर्भेदमतिर्नास्ति किं पुनस्त्वं कथं न वेतीत्यर्थः ५ यज्ञिये यज्ञोचिते वसन्तादिकाले युक्तानभिज्ञा
कान्युधिष्ठिर ऋत्विजो होतप्रभृतीनवृणोत् ६ तानाह द्वैपायन इति त्रिभिः ७ ८ अकृतव्रणान्तानवृणोत् ।

यांतेमृतं यामममनोरथोबभूव २२ २४ २५ इतिश्रीभावार्थदीपिकायांदशमस्कंधेत्रिसमतितमोध्यायः ७३
चतुर्थुक्तमर्तिनमेराजस्यषक्रियाहिनैः अग्रश्रुताश्रसंगेनैवयज्ञानादिवर्णितेन राजसूयमविहताराजसंधंतदं
तरे चैयंनदंनेकुवेंनबीजंकलिमिवावपत कृष्णस्यचानुभावमिति चकारात्तस्यराजानविधायित्वमालस्ये

तच्छ्रुत्वाप्रीतमनसइंद्रप्रस्थनिवासिनः निशाम्यमागधंशांतेराज्ञाजातमनोरथः ३३ अभिवंद्याथ
राजानंभीमार्जुनजनार्दनाः सर्वमाश्रावयांचक्रुरात्मनायदनुष्ठितं ३४ निशाम्यधर्मराजस्तत्केशवे
नानुकंपितं आनंदाश्रुकलांमुंचन्प्रेम्णानोवाचकिंचन ३५ इतिश्रीभागवतेदशमस्कंधेत्रिसप्त
तितमोध्यायः ७३ श्रीशुकउवाच एवंयुधिष्ठिरोराजाजरासंधवधंविभोः कृष्णस्यचानुभावंतंश्रुत्वा
प्रीतस्तमब्रवीत् १ येस्युस्त्रैलोक्यगुरवःसर्वेलोकमहेश्वराः वहंतिदुर्लभंलब्ध्वाशिरसैवानुशासनं २
सभवानरविंदाक्षोदीनानामीशमानिनां धत्तेनुशासनंभूमंस्तदत्यंतविडंबनं ३ ॥

अर्थः १ तदाह येस्युरितियेत्रैलोक्यस्यापिगुरवःस्युःसनकादयःसर्वेलोकपालाश्चतेशिरसैवतवानुशा
सनंवहंतीति दुर्लभंलब्ध्वेतिभाग्येनैवतल्लब्धमितिभावः २ सभवानरविंदाक्षोस्माकमनुशासनंधत्ते तदा
दंतविडंबनमननुरूपमनुकरणंयद्वातेजोहानिप्रसंगादित्यर्थः ३

अथार्हणमग्रपूजा तन्नार्हति योग्यं अनेकानामाधेयानां बहुत्वेनैकस्यानिश्चयात् १९ २० सांख्योक्तानं योग-
उपासना २१ तत्र सांख्ये केवलपरं योगः सविशेषणपरः कथमुभयोरेकपरत्वं तत्राह एक इति एक एवा-
द्वितीयोसावतः सांख्यैस्तस्य परत्वं युक्तं विशेषणभूतस्य च सर्वप्रपंचस्य तन्मयत्वात्सविशेषस्य योगस्यापि यु।
क्तमद्वितीयपरत्वमित्याह एतदात्म्यमिति एष श्रीकृष्णस्य आत्माश्रयस्तदेतदात्मनस्तस्य भाव एतदात्म्यं भवति ना-

स तस्याप्यार्हणार्थं वै विमृशंस्तत्र भासदः नाध्यगच्छन्नेकोऽन्यान्सदेवस्तदाब्रवीत् १९ अर्हति त
च्युतः श्रेष्ठं भगवान्सात्वतां पतिः एष वै देवताः सर्वा देशकालधनादयः २० यदात्मकमिदं विश्वं।
क्रतवश्च यदात्मकाः अग्निराहुतयो मंत्राः सांख्यं योगश्च यत्पराः २१ एक एवाद्वितीयोसावैतदा।
त्म्यमिदं जगत् आत्मनात्माश्रयः सभ्याः सृजत्यवति हंत्यजः २२ विविधानीह कर्माणि जनयन्य।
दवीवृधा ईहते यदयं सर्वं श्रेयो धर्मादिलक्षणं २३ तस्मात्कृष्णाय महते दीयतां परमार्हणं ए
वं चेत्सर्वभूतानामात्मनश्चार्हणं भवेत् २४

वैवभावनिर्देशः एतदात्म्यमिदं सर्वमिति श्रुतेः अत्रहेतुरात्मनेति हे सभ्याः आत्माश्रयोन्यनिरपेक्षः स्वय-
मजः इदं जगत्सृजत्यवति हंति चेति २२ किंच यस्यावेदयानुग्रहेण विविधानि कर्माण्युपयोगादीनि जन-
यन्कुर्वन् यद्यस्मादेवं जनः सर्वोपि धर्मादिलक्षणं श्रेय ईहते साधयति कर्माणि तत्फलानि च यद्धीना-

१ अन्ये चोपहूता ये यज्ञे दिदृक्षवस्तेनत्रेयुरिति संबन्धः ॥ ११ देवयजनं यज्ञभूमिं कृष्टाकर्षणादिभिः संशोध्य ।
दीक्षयां चक्रिरे दीक्षां संस्कारायुक्तमकुर्वन् ॥ १२ उपकारणा उपस्करणाः वरुणस्य राजसूयं यथा सन्निति शो

उपहूतास्तथा चान्ये द्रोणभीष्मकृपादयः धृतराष्ट्रः सहसुतो विदुरश्च महामतिः ॥ १ ब्राह्मणाः क्ष
त्रिया वैश्याः शूद्रा यज्ञदिदृक्षवः तत्रेयुः सर्वराजानो राज्ञांश्च कृतयो नृप ॥ ११ ततस्ते देवयजने ब्राह्म।
णाः स्वर्णलांगलैः कृष्ट्वा यत्र यथाम्नायं दीक्षयां चक्रिरे नृपं ॥ १२ हैमाः किलोपकरणा वरुणस्य य
था पुरा इंद्रादयो लोकपाला विरिंचिभवसंयुताः ॥ १३ सगणाः सिद्धगंधर्वा विद्याधरमहोरगाः मुन
यो यक्षरक्षांसि खगकिन्नरचारणाः ॥ १४ राजानश्च समाहूता राजपत्न्यश्च सर्वशः राजसूयं समीयुः
स्म राज्ञः पांडुसुतस्य वै ॥ १५ मेनिरे कृष्णभक्तस्य सूपपन्नमविस्मिताः ॥ १६ अयाजयन्महाराजं याज
का देववर्चसः राजसूयेन विधिवत्प्राचेतसमिवामराः ॥ १७ सुत्येऽहन्यवनीपालो याजकान्सदसस्प
तीन् अपूजयन्महाभागान्यथावत्सुसमाहितः ॥ १८

षः ॥ १३ ॥ १४ ये इंद्रादयो देवगणा ये च राजादयः समाहूताः ते तत्र समीयुः स्म ॥ १५ ते सर्वे कृष्णभक्तस्य राज्ञो रा
ज्ञः सूपपन्नमविस्मिताः संतः सूपपन्नं मेनिरे [illegible] ॥ १६ याजकाः ऋत्विजः ॥ १७ सुत्येऽहनि सोमाभिषवदिने ॥ १८

श्री
भाग
३टी
८४

१४ अस्यैवव्याख्यावोऽर्थः पूर्ववद्ज्ञेयः गोपालो वेदपृथिव्यादिपालः तदर्थः फलस्तितेवेदविपरीतं लपतीति
फलपाः तानस्मतेव्यानयतेतथ्यामः अकाकः केवाः केवकाके नेनविधेनेयस्सोकाकः श्यामकामश्चत्वा।
र्थः सपर्यामनामकामयोग्यो केवले पुरोडाशेनार्हति अपि न सर्वस्वमपि तथायं श्रीकृष्णोपि च सर्वार्थि।
योग्या सपर्यां कथमर्हति किंवात्मसमर्पणमप्यर्हतीत्यर्थः १५ वर्णाश्रमफलेभ्योपेतः बालत्वात् अना
मगोत्रमितिश्रुतेः अनपवानधिकारित्वात्सर्वधर्मबहिष्कृतः स्वैरवर्तीमातात्परमेश्वरत्वात् अनपवर्गी।

तपोविद्याव्रतध्यानस्नाननिर्हृतकल्मषान् परमर्षीन्जनानिष्टांल्लोकपालेश्च पूजितान् १४ स।
दसस्पतीनतिक्रम्यगोपालः फलपोसतः यथाकाकः पुरोडाशं सपर्यां कथमर्हति १५ वर्णाश्रम
फलापेतः सर्वधर्मबहिष्कृतः स्वैरवर्ती गुणैर्हीनः सपर्यां कथमर्हति १६ यद्यातिनैवोहिफलेश
मेसद्भिर्बहिष्कृते वृथापानरतेशाश्वत्सपर्यां कथमर्हति १७

णः तमसाप्रादिरहितः एवंभूतो देवानां योग्यं तत्त्वं सपर्यामात्रं कथमर्हतीत्यर्थः १६ अपि च कथं वर्णनीयो
माहृशेरेषां यहूनां महिमा यस्मादेषां यहूनां फलं यपानिनाशसमपि किं सद्भिर्बहिष्कृतमपि तथा रसाहते
किंचास्मादिफलवहूयपानरतमपि तन्निरतिशयाबाधमित्यर्थः अहो यहूनामेवेतादृशं माहात्म्यं यद्रुफ
लवहृहस्ययथातेशापोनप्राभूदित्यादि अयं तमातावीश्वरः स्वतः सपर्यामात्रं कथमर्हतीतिभावः १७

यात्मनाक्रियमाणमर्हणमात्मनः कथंभवेत्तत्राह सर्वभूतानामात्मभूताय अनन्यदर्शिने निरस्तभेदम
तये २५ श्रीकृष्णानुभाववित् सहदेवस्तस्मात्तूष्णीमभूत् २६ द्विजेरितं साधुसाध्विति घोषं श्रुत्वा हार्द

सर्वभूतात्मभूताय कृष्णायानन्यदर्शिने देयं शान्ताय पूर्णाय दत्तस्यानंत्यमिच्छता २५ इत्युक्त्वा सा
हदेवोभूत्तूष्णींकृष्णानुभाववित् तच्छ्रुत्वातुष्टुवुः सर्वे साधुसाध्विति वादिनः २६ श्रुत्वा द्विजेरितं
राजा ज्ञात्वा हार्दं सभासदां समर्हयद्धृषीकेशं प्रीतः प्रणयविह्वलः २७ तत्पादाववनिज्यापः शि
रसा लोकपावनीः सभार्यः सानुजामात्यः सकुटुम्बो वहन्मुदा २८ वासोभिः पीतकौशेयैर्भूषणै
श्च महाधनैः अर्हयित्वाश्रुपूर्णाक्षो नाशकत्समवेक्षितुं २९ इत्थं सभाजितं वीक्ष्य सर्वे प्रांजलयो
जनाः नमो जयेति नेमुस्तं निपेतुः पुष्पवृष्टयः ३० इत्थं निशम्य दमघोषसुतः स्वपीठादुत्थाय कृ
ष्णगुणवर्णनजातमन्युः उत्क्षिप्य बाहुमिदमाह सदस्यमर्षी संश्रावयन्भगवते परुषाण्यभी
तः ३१ ईशो दुरत्ययः काल इति सत्यवती श्रुतिः वृद्धानामपि यद्बुद्धिर्बालवाक्यैर्विभिद्यते ३२
यूयं पात्रविदां श्रेष्ठा मा मन्ध्वं बालभाषितं सदसस्पतयः सर्वे कृष्णो यत्संमतोर्हणे ३३

अभिप्रायं २७ २८ २९ ३० ३१ ३२ हे सर्वे सदसस्पतयः बालस्य भाषितं मा मन्ध्वं मा जानीत माग्रहीत

श्री भाग टी १०

तावदुत्थायेत्यस्यायमभिप्रायः प्रथमतोर्धहोमन्नल्पबलः सर्वानेतान्हन्यात् अतो मयैव शीघ्रं हंतव्य इति
तत्क्षणमेवोत्थाय शिरो जहारेति ४४ ४५ ४६ ननु वैरानुबंधकस्य कथं वासुदेवप्रवेश इत्यत आह जन्मत्रयेति।

तावदुत्थाय भगवान्स्वान्निवार्य स्वयं रुषा शिरः क्षुरांतचक्रेण जहारापततो रिपोः ४४ शब्दः को-
लाहलोथासीच्छिशुपाले हते महान् तस्यानुयायिनो भूपा दुद्रुवुर्जीवितैषिणः ४५ चैद्यदेहोत्थि-
तं ज्योतिर्वासुदेवमुपाविशत् पश्यतां सर्वभूतानामुल्केव भुवि खाच्च्युता ४६ जन्मत्रयानुगुणित-
वैरसंरब्धया धिया ध्यायंस्तन्मयतां यातो भावो हि भवकारणं ४७ ऋत्विग्भ्यः ससदस्येभ्यो दक्षि-
णां विपुलामदात् सर्वान्संपूज्य विधिवच्चक्रेवभृथमेकराट् ४८ साधयित्वा क्रतुं राज्ञः कृष्णो योगे-
श्वरेश्वरः उवास कतिचिन्मासान्सुहृद्भिरभियाचितः ४९ ततोनुज्ञाप्य राजानमनिच्छंतमपीश्वरः।
ययौ सभार्यः सामात्यः स्वपुरं देवकीसुतः ५० वर्णितं तदुपाख्यानं मया ते बहुविस्तरं वैकुंठ-
वासिनोर्जन्म विप्रशापात्पुनः पुनः ५१

जन्मत्रयेनुगुणितमनुवर्ति तेषां वैरं तेन संरब्धया विष्टया तन्मयतां ता-
त्स्वरूपतां यातः पार्षदो बभूवेत्यर्थः अत्र हेतुः भावो हीत्यादि भावनानुध्यानं भवस्य ध्येयाकारजन्मनः कार-
णं पेशस्कारिध्यानेन कीटादेस्तथा दृष्टत्वादित्यर्थः ४७ ४८ ४९ ५० ५१

९०

किंच येराज्ञानोदुष्टास्तद्वाद्यपतितेतत्तदर्थं कीटकदाकादिदेशानप्याश्रयंति एतेनब्रह्मर्षिसेवितान्नेवदे
शानाश्रिमाब्रह्मवर्चसं दुर्गमपिसमुद्रं हित्वाद्वापयितोनार्थः बाधंते तथायादस्यवः प्रजाताश्च घ्नंतीत्य
र्थः वेदतत्त्वाभिधेयामयोगोब्रह्मवर्चसं मद्धान्यलिंगेतत्समुद्रं वेदविरुद्धलिंगधारणंपाखंडमित्य

ब्रह्मर्षिसेवितान्देशान्नसेवंतेब्रह्मवर्चसं समुद्रंदुर्गमाश्रित्यबाधंतेदस्यवःप्रजाः ३६ एवमादीन्य
भद्राणिबभाषेनष्टमंगलः नोवाचकिंचिद्भगवान्यथासिंहःशिवारुतं ३७ भगवन्निंदनंश्रुत्वादुः
सहंतत्सभासदः कर्णौपिधायनिर्जग्मुःशपंतश्चेदिपंरुषा ३८ निंदांभगवतःशृण्वंस्तत्परस्यजन
स्यवा ततोनापैतियःसोपियात्यधःसुकृताच्युतः ३९ ततःपांडुसुताःक्रुद्धामत्स्यकैकयसृंजयाः
उदायुधाःसमुत्तस्थुःशिशुपालजिघांसवः ४० ततश्चैद्यःस्वसंभ्रांतोजगृहेखड्गचर्मणी भर्त्सयन्कृ
ष्णपक्षीयान्राज्ञःसदसिभारत ४१

र्थः तत्रलिंगमाजीविकावाधंतेतंदंडयंति कथंभूतं दुर्गमंधर्मवत्मतोनेधर्मनयादुस्तैर्यमित्यर्थः तथादस्युत
पिप्रजावेशेनवर्तमानानाश्रयंति ग्रतोयतुभ्यः कोन्योनामधृनाडौसीति ३६ शिवाफेरुस्तस्यारुतंश्रुत्वा
यथासिंहोनकिंचिद्भूतेतद्वत ३६ ८ ३९ ४० ४१

श्री
भाग
दुटी
७१

पूजायां सम्मानेन द्रव्यसाधने नानावस्त्रसंपादने ४ शुश्रूषणे चंदनानुलेपनादौ ५ ६ निरूपिता नियुक्ताः सं
तो नानाकर्मसु प्रवर्त्तनेषु ७ अर्जुनो जन्मसदस्यां सभासदां स्थानेषु स्विष्टेषु सूनृतेषु प्रियतवाक् समर्हणामलं।

भीमो महानसाध्यक्षो धनाध्यक्षः सुयोधनः सहदेवस्तु पूजायां नकुलो द्रव्यसाधने ४ सतां शुश्रूष
णे जिष्णुः कृष्णः पादावनेजने परिवेशने द्रुपदजा कर्णो दाने महामनाः ५ युयुधानो विकर्णश्च हा
र्दिक्यो विदुरादयः बाह्लीकपुत्रा भूर्याद्या ये च संतर्दनादयः ६ निरूपिता महायज्ञे नानाकर्मसु ते तन
दा प्रवर्तिताः राजेंद्र राज्ञः प्रियचिकीर्षया ७ ऋत्विक्सदस्यबहुवित्सु सुहृत्तमेषु स्विष्टेषु सूनृतसम
र्हणदक्षिणाभिः चैद्ये च सात्वतपतेश्चरणं प्रविष्टे चक्रुस्ततस्त्ववभृथस्नपनं द्युनद्यां ८ मृदंगशं
खपणवधुंधुर्यानकगोमुखाः वादित्राणि विचित्राणि नेदुरवभृथोत्सवे ९ नर्तक्यो ननृतुर्हृष्टा गा
यका यूथशो जगुः वीणावेणुतलोन्नादस्तेषां स दिवमस्पृशत् १० चित्रध्वजपताकाग्रैरिभेंद्रैः स्यंद
नार्वभिः स्वलंकृतैर्भटैर्भूपा निर्ययू रुक्ममालिनः ॥ यदुसृंजयकांबोजकुरुकेकयकोसलाः कं
पयंतो भुवं सैन्यैर्यजमानपुरःसराः १२ ॥

कारादिदक्षिणाः प्रसिद्धास्ताभिः युतयां गंगायाम् ८ ९ १० चित्रध्वजपताकाग्राणि येषु तैरिभेंद्रैः स्यंदनैर
र्वभिरश्वैर्भटैश्च एवं चतुरंगैः सैन्यैर्निर्ययुः ॥ यजमानो युधिष्ठिरः सतो येषां ते १२ ॥

७१

७४

५२ स्नातामानवाः ऽविचराः प्रमत्ताश्च ५३ पापं धर्मद्विषां मन्ये इति कलिं कलेरंशो अनेन एव कृष्णकलस्यामयं व्याधिं नाशकम् ५४ वितानं यज्ञम् ५५ इति श्रीभावार्थदीपिकायां दशमस्कंधे पंचसप्ततितमोऽध्यायः ७५
पंचसप्ततितमे पत्तावभृथसंभ्रमः सुयोधनस्य चाप्यत्र मानभंगोऽहृदि शिष्यमात. दुर्योधनस्यैकस्यैव दुःखे

राजसूयावभृथ्येन स्नातो राजा युधिष्ठिरः ब्रह्मक्षत्रसभामध्ये शुशुभे सुरराडिव ५२ राज्ञा सभाजिता। ताः सर्वे सुरमानवखेचराः कृष्णं क्रतुं च शंसंतः स्वधामानि ययुर्मुदा ५३ दुर्योधनमृते पापं कलिं कुरुकुलामयं यो न सेहे श्रियं स्फीतां दृष्ट्वा पांडुसुतस्य तां ५४ य इदं कीर्तयेद्विष्णोः कर्म चैद्यवधादिकं राजमोक्षं वितानं च सर्वपापैः प्रमुच्यते ५५ इति श्रीभागवते दशमस्कंधे पंचसप्ततितमोऽध्यायः ७५
राजोवाच अज्ञातशत्रोस्तं दृष्ट्वा राजसूयमहोदयं सर्वे मुमुदिरे ब्रह्मन्नृदेवा ये समागताः १ दुर्योधनं वर्जयित्वा राजानः सर्षयः सुराः इति श्रुतं नो भगवंस्तत्र कारणमुच्यतां २ शुक उवाच पितामहस्य ते यज्ञे राजसूये महात्मनः बांधवाः परिचर्यायां तस्यासन्प्रेमबंधनाः ३

कारणं प्रष्टुमुक्रमनुवदंति अज्ञातशत्रोरिति १ इति श्रुतं नः मुखाद्देवेभ्यर्थः २ दुर्योधनस्यासहकारणं वक्तुं योगमहोत्सवमेव पुनः सिंहावलोकनेन निरूपयति पितामहस्येत्यादिना एकदशभिः पूर्वेणस्येत्यनेः शाकनेन। ग्रंथेन प्रेमबंधनाः प्रेमयंत्रिताः २

पत्नीसंयाजो यागविशेषः अवभृथसंबंधि अवभृथ्यं च तैश्चरित्वा तान् अनुष्ठाय महर्षयः १९ २० २१ अहते नूतने

पत्नीसंयाजावभृथ्यैश्चरित्वा ते तमृत्विजः आचांतं स्नापयांचक्रुर्गंगायां सहकृष्णया १९ देवदुंदुभयो नेदुर्नरदुंदुभिभिः सह मुमुचुः पुष्पवर्षाणि देवर्षिपितृमानवाः २० सस्नुस्तत्र ततः सर्वे वर्णाश्रमयुता नराः महापातक्यपि यतः सद्यो मुच्येत किल्बिषात् २१ अथ राजाहते क्षौमे परिधाय स्वलंकृतः ऋत्विक्सदस्यविप्रादीनानर्चाभरणांबरैः २२ बंधून्ज्ञातीन्नृपान्मित्रसुहृदोन्यांश्च सर्वशः अभीक्ष्णं पूजयामास नारायणपरो नृप २३ सर्वे जनाः सुररुचो मणिकुंडलस्रगुष्णीषकंचुकदुकूलमहार्घहाराः नार्यश्च कुंडलयुगालकवृंदजुष्टवक्त्रश्रियः कनकमेखलया विरेजुः २४ अथर्त्विजो महाशीलाः सदस्या ब्रह्मवादिनः ब्रह्मक्षत्रियविट्शूद्रा राजानो ये समागताः २५ देवर्षिपितृभूतानि लोकपालाः सहानुगाः पूजितास्तमनुज्ञाप्य स्वधामानि ययुर्नृप २६ हरिदासस्य राजर्षे राजसूयमहोदयम् नैवातृप्यन्प्रशंसंतः पिबन्मर्त्योमृतं यथा २७ ॥

आनर्च अर्चितवान् २२ २३ सुराणामिव रुक् कांतिर्येषां ते मणिकुंडलैः सहिताः स्रगुष्णीषादयो येषां ते कुं-
डलयुगेनालकवृंदेन च जुष्टा वक्त्रश्रीर्यासां ताः २४ २५ २६ २७

सत्स्यान्ऋत्विजः प्रत्येचद्दिनश्रेष्ठानिर्ययुः ॥ किंचगंधादिभिः स्वलंकृतानरानार्यश्चभिर्यो विनङ्कः ॥
रसानिवादैतैलेति किंचसान्द्रकुंकुमादिभिः पुंभिर्लिप्तास्ताश्चलिप्यंतो वारयोनितश्च विनङ्करिति ॥ न
भिर्गंधमारण्यादिभिर्यानैर्नदेव्योराजपत्न्योनिरगमन्त निरगुः एतदुपलक्ष्यं विमानवरैर्देव्योयथातद्वत् मा।

सदस्यर्त्विग्द्विजश्रेष्ठावल्लचोषणभूयसा देवर्षिपितृगंधर्वास्तुष्टुवुः पुष्पवर्षिणः ॥ स्वलंकृता।
नरानार्यो गंधस्रग्भूषणांबरैः विलिंपंत्योभिषिंचंत्यो विजह्रुर्विविधैरसैः ॥ तैलगोरसगंधोदक
हरिद्रासान्द्रकुंकुमैः पुंभिर्लिप्ताः प्रलिंपंत्यो विजह्रुर्वारयोषितः ॥ गुप्तानृभिर्निरगमन्नुपलब्धुमेतत
देव्योयथादिविविमानवरैर्नृदेव्यः तामातुलेयसखिभिः परिषिच्यमानाः सव्रीडहासविकसद्वद
नाविरेजुः ॥ तादेवरावितसखीक्षिप्तचूर्णतोभिः क्लिन्नांबराविवृतगात्रकुचोरुमध्याः औत्सुक्य
मुक्तकबराच्युतमानमाल्याः क्षोभंदधुर्मलधियांरुचिरैर्विहारैः ॥ सम्राडरथमारूढः सदश्वं।
रुक्ममालिनं व्यरोचतस्वपत्नीभिः क्रियाभिः क्रतुराडिव ॥

तलेपैः सखिभिश्च परितः सिच्यमाना सव्री।
डेनहासेनविकसंतिवदनानियासांताः ॥ देवरान्वतिभ्रातृन्ननसार्वीनपितृनीभिरुदकोनोदनचमर्धैः
सचनपात्रैश्च मलधियांकामिनाम ॥ क्रियाभिरंगक्रियाभिः क्रतुराट्सशरीरोराजसूयइव ॥ ॥

मानी साहंकारः किरीटं च माला च विद्येते यस्य सः न्यविशत् प्रविवेश क्षिपन् वस्त्रादीनि विक्षिपन् ३६ तत्र स्थ-
ले वस्त्रान्तमभ्यगृह्णात् आकुंचितवान् ततस्तस्मिन्स्थल एव भ्रान्त्या जलमेतदिति मत्वा जले चापतत् कृतः ।
स्थलवद्भ्रान्त्या ३७ ३८ ३९ समुज्जिहीर्षुरिति ग्रन्थसंग्यादितेन कलहबीजेन कृष्णः संहारं करिष्यामीति म ।

आसीनः कांचने साक्षादासने मघवानिव पारमेष्ठ्यश्रिया जुष्टः स्तूयमानश्च वंदिभिः ३५ तत्र दुर्यो-
धनो मानी परीतो भ्रातृभिर्नृप किरीटमाली न्यविशदसिहस्तः क्षिपन्रुषा ३६ स्थलेभ्यगृह्णा-
द्वस्त्रान्तं जलं मत्वा स्थलेपतत् जले च स्थलवद्भ्रान्त्या मयमायाविमोहितः ३७ जहास भीमस्तं दृष्ट्वा ।
स्त्रियो नृपतयोऽपरे निवार्यमाणा अप्यंग राज्ञा कृष्णानुमोदिताः ३८ स व्रीडितोऽवाग्वदनो रुषा ज्व-
लन्निष्क्रम्य तूष्णीं प्रययौ गजाह्वयं हाहेति शब्दः सुमहानभूत्सतामजातशत्रुर्विमना इवाभवत् ३९
बभूव तूष्णीं भगवान्भुवो भरं समुज्जिहीर्षुर्भ्रमति स्म यद्दृशा ४० एतत्तेऽभिहितं राजन्यत्पृष्टोऽहमिह त्व-
या सुयोधनस्य दौरात्म्यं राजसूये महाक्रतौ ४१ इति श्रीभागवते दशमस्कंधे पंचसप्ततितमोऽध्यायः
७५ ॥

न्त्या किंच यस्य दृष्टिमात्रेण दुर्योधनो भ्रमति स्म भ्रांतिं प्राप मयमायानिमित्तमात्रं स भूभार-
हरणबीजं दुर्योधनस्य भ्रमं भीमादिहासेन च तस्य पराभवं विधाय तूष्णीमासीदित्यर्थः ४० ४१ इति श्री-
भावार्थदीपिकायां दशमस्कंधे पंचसप्ततितमोऽध्यायः ७५

२८ २९ गतज्वरो निर्वृत आसीत् ३० अद्भुते आत्मायस्य ३१ नरेंद्रादीनां लक्ष्मीर्लक्ष्म्यः विभूतयः विश्वसृजा मयेनोपक्लृप्ता विरचिताभिः सह कुरुराट् दुर्योधनोतप्यत् ३२ महिषीसहस्रमिति बहुत्वोपलक्षणं क्वण।

ततो युधिष्ठिरो राजा सुहृत्संबंधिबांधवान् प्रेम्णा निवारयामास कृष्णं च त्यागकातरः २८ भगवान पि तत्रांग न्यवात्सीत्तत्प्रियंकरः प्रस्थाप्य यदुवीरांश्च साम्बादींश्च कुशस्थली २९ इत्थं राजा धर्मसुतो म नोरथमहार्णवं सुदुस्तरं समुत्तीर्य कृष्णेनासीद्गतज्वरः ३० एकदांतःपुरे तस्य वीक्ष्य दुर्योधनः । श्रियं अतप्यद्राजसूयस्य महित्वं चाच्युतात्मनः ३१ यस्मिन्नरेंद्रदितिजेंद्रसुरेंद्रलक्ष्मीर्नाना विभांति किल विश्वसृजोपक्लृप्ताः ताभिः पतीन्द्रुपदराजसुतोपतस्थे यस्यां विषक्तहृदयः कुरुराडतप्यत् ३२ यस्मिंस्तदा मधुपतेर्महिषीसहस्रं श्रोणीभरेण शनकैः क्वणदंघ्रिशोभम् मध्ये सुचारु कुचकुंकुम शोणहारं श्रीमन्मुखं प्रचलकुंडलकुंतलाढ्यम् ३३ सभायां मयक्लृप्तायां क्वापि धर्मसुतोधिपः वृतोनुजैर्बंधुभिश्च कृष्णेनापि स्वचक्षुषा ३४

ङ्घ्रिं अङ्घ्रिभिः शोभा यस्य मध्ये सुचा रु मध्यमित्यर्थः शोण हारा यस्य तत् श्रीमंति सुखानि यस्य तत् चपलैः कुंडलैः कुंतलैश्चाढ्यं सपत्रं सुशोभते इति शेषः ३३ क्वा पि कस्यांचित् सविरेजे इति शेषः स्वस्य चक्षुषा दृष्ट्यादिततापकेन ३४

श्री
भाग
दशे
९५

तमोन्धकारस्य धामाश्रयममै दुर्गमं दुष्प्रापम् ७ प्रासादा गृहाः अट्टालास्तदुपरिगृहाः तोलिकास्तु

सलब्ध्वाकामगंयानंतमोधामदुरासदं ययौद्वारवतींशाल्वोवैरंवृष्णिकृतंस्मरन् ८ निरुध्य।
सेनयाशाल्वोमहत्याभरतर्षभ पुरींबभंजोपवनान्युद्यानानिचसर्वशः ९ सगोपुराणिद्वाराणि
प्रासादाट्टालतोलिका विहारान्सविमानाग्र्यान्निपेतुःशस्त्रवृष्टयः १० शिलाद्रुमाश्चाशनयः।
सर्पाआसारशर्कराः प्रचंडश्चक्रवातोभूद्रजसाच्छादितादिशः ११ इत्यर्द्यमानासौभेनकृष्णस्यन।
गरीभृशं नाभ्यपद्यतशंराजंस्त्रिपुरेणयथामही १२ प्रद्युम्नोभगवान्वीक्ष्यबाध्यमानानिजाःप्रजाः
माभैष्टेत्यभ्यधाद्वीरोरथारूढोमहायशाः १३ सात्यकिश्चारुदेष्णश्चसाम्बोक्रूरःसहानुजैः हार्दि
क्योभानुविंदश्चगदश्चशुकसारणौ १४ अपरेचमहेष्वासारथयूथपयूथपाः निर्ययुर्दंशिता
गुप्तारथेभाश्वपदातिभिः १५

मर्येतत्कृतानिनताः विहाराःक्रीडास्था नानिचसर्वशः १० किंच तस्मा।
द्विमानात्प्राक्कर्करादयोसम्पातवज्रलोपलाः ११ शंसुखंनाभ्यपद्यत १२ १३ १४ १५

९५

ततःषट्सप्ततितमेह्निसाल्वमहामृधे शुभमङ्गदाप्रहारेणाग्रणाम्प्रद्युम्नविनिर्गमः संप्राप्य धर्मराजस्य यज्ञस्य
यमहोत्सवं निरस्तसौभराजादीनथोपारमद्युतः ॥१॥ सकृत्स्नमर्द्दंपांसम्प्रहिंग्रसमभ्यलयत ॥४॥ आशुतोषो
पिभगवानुमापतिः कृत्स्नविद्वेषिसाल्ववस्यैव फलं मन्यमानो न शोच्येशाश्वरभूत पुनस्तस्यातिनिर्वेध।

शुक उवाच यथा मदपि कृत्स्नस्य शृणु कर्माद्भुतं नृप क्रीडानभचारीरस्य यथा सौभपतिर्हतः ॥१॥ शि
शुपालसखः साल्वो रुक्मिण्युद्वाहआगतः यदुभिर्निर्जितः संख्ये जरासंधादयस्तथा ॥२॥ साल्वः प्र
तिज्ञामकरोच्छृण्वतां सर्वभूभुजाम अयादवीं क्ष्मां करिष्ये पौरुषं मम पश्यत ॥३॥ इति मूढः प्रति
ज्ञाय देवं पशुपतिं प्रभुं आराधयामास नृपः पांसुमुष्टिं सकृद्ग्रसन ॥४॥ संवत्सरान्ते भगवानाशुतोष
उमापतिः वरेण छन्दयामास साल्वं शरणमागतं ॥५॥ देवासुरमनुष्याणां गन्धर्वोरगरक्षसां अभे
द्यं कामगं वव्रे स यानं वृष्णिभीषणं ॥६॥ तथेति गिरिशादिष्टो मयः परपुरंजयः पुरं निर्माय साल्वाय
प्रादात्सौभमयस्मयम ॥७॥

सालस्य वरेण छन्दयामासेच्छां कारितवान वरं वृणीष्वेत्युवाच ॥५॥ तथेति प्रति
ज्ञाय गिरिशेनादिष्टः अयस्मयं लोहमयं पुरं सौभपुरसंज्ञं निर्माय रचयित्वा प्रादात ॥७॥

नांम

भृशार्दिता अपि स्वं स्वं रणे स्वां स्वां रणभूमिं न तत्यजुः २४ मौर्व्या कार्ष्ण्याय समसमथ्या व्याहृत्य सहितः २५
अपोवाह अन्यतो निनाय २६ २७ मत् मत्तो विना क्लीबं चित्तं यस्य तेन त्वया सूतेन २८ पितरौ रामकृष्णौ।

साल्वानीकपसैन्यौघैर्वृष्णिवीरा भृशार्दिताः न तत्यजू रणं स्वं स्वं लोकद्वयजिगीषवः २४ सा
ल्वामात्यो द्युमान्नाम प्रद्युम्नं प्राक्प्रपीडितः आसाद्य गदया मौर्व्या व्याहत्य व्यनदद्बली २५ प्रद्यु
म्नं गदया शीर्णवक्षःस्थलमरिंदम अपोवाह रणात्सूतो धर्मविद्दारुकात्मजः २६ लब्धसं
ज्ञो मुहूर्तेन कार्ष्णिः सारथिमब्रवीत् अहो असाध्विदं सूत यद्रणान्मेऽपकर्षणम् २७ न यदूनां कु
ले जातः श्रूयते रणविच्युतः विना मत्क्लीबचित्तेन सूतेन प्राप्तकिल्बिषात् २८ किं नु वक्ष्येऽभिसं
गम्य पितरौ रामकेशवौ युद्धात्सम्यगपक्रान्तः पृष्टस्तत्रात्मनः क्षमम् २९ व्यक्तं मे कथयिष्यन्ति हस
न्त्यो भ्रातृजामयः क्लैब्यं कथं कथं वीर तवान्यैः कथ्यतां मृधे ३० सारथिः धर्मं विजानतायु
ष्मन्कृतमेतन्मया विभो सूतः कृच्छ्रगतं रक्षेद्रथिनं सारथिं रथी ३१ ॥

अभिसंगम्य तत्पार्श्वं गतः ताभ्यां पृष्टः त्वया योग्यं किं नु वक्ष्यामीति २९ भ्रातृजामयो भ्रातृभार्याः निश्चितं
मत्क्लैब्यं कथयिष्यन्तीति तत्कथनमनुकरोति कथं कथमिति ३० विभो हे समर्थ एतदपसरणं धर्ममा

तुमुलं आकुलं लोमहर्षणं रौद्रं १५ नैशं निशाभवं तमः उष्णगुः सूर्य इव १७ किंच स्वर्णमयानि पुंखानि येषां ते
पुंखा येषां तैः अयो लोहं तन्मयान्यग्राणि येषां तैः ध्वजिनीपालं सेनान्यं सन्नतानि पर्वाणि ग्रंथयो येषां
तैः १८ सैनिकान् भटान् नेतृन् सारथीन् १९ पूजयामासुः सम्मानितवंतः २० क्वचिद्बहुरूपं क्वचि

ततः प्रववृते युद्धं शाल्वानां यदुभिः सह यथासुराणां विबुधैस्तुमुलं लोमहर्षणं १५ ताश्च सौभप-
तेर्मायादिव्यास्त्रै रुक्मिणीसुतः क्षणेन नाशयामास नैशं तम इवोष्णगुः १७ विव्याध पंचविंशत्या
स्वर्णपुंखैरयोमुखैः शाल्वस्य ध्वजिनीपालं शरैः सन्नतपर्वभिः १८ शतेनाताडयच्छाल्वमेकैकेना-
स्य सैनिकान् दशभिर्दशभिस्तीक्ष्णैर्वाहनानि त्रिभिस्त्रिभिः १९ तदद्भुतं महत्कर्म प्रद्युम्नस्य महात्म-
नः दृष्ट्वा तं पूजयामासुः सर्वे स्वपरसैनिकाः २० बहुरूपैकरूपं तद्दृश्यते न च दृश्यते मायामयं मय-
कृतं दुर्विभाव्यं परैरभूत् २१ क्वचिद्भूमौ क्वचिद्व्योम्नि गिरिमूर्ध्नि जले क्वचित् अलातचक्रवद्भ्राम्यत्सौ-
भं तद्दुरवस्थितं २२ यत्र यत्रोपलक्ष्येत ससौभः सहसैनिकः शाल्वस्ततस्ततोऽमुंचञ्छरान्सात्वतयू-
थपाः २३ शरैरग्न्यर्कसंस्पर्शैराशीविषदुरासदैः पीड्यमानपुरानीकः शाल्वोऽमुह्यत्परेरितैः २४

दैकरूपं क्वचिद्दृश्यते क्वचिन्न दृश्यते एवं दुर्विभाव्यमतर्क्यमभूत् २१ किंच एवं तद्दुरवस्थितं २२ २३ या
ग्निवदाहकैः अर्कवत्तापकैर्वा तः संस्पर्शो येषां ते आशीविषवदेकदेशस्पर्शमात्रेण मारकत्वाद्दुरासदैः

३

प्राद्रवेति स्वगतमेवपथि चिंताविजृंभितमाधवम् आर्यमिश्राभिसंगतोबलभद्रसहितः ८ दुर्निमित्तदा-
र्शनाकुलचित्तएवचिंतयन्द्वारकामागत्यस्वानीकदनंचवीक्ष्य सौभंचसाल्वराजंचवीक्ष्य रामंपुररक्षायांप्रा-
तिनिरूप्यनियुज्य दारुकंप्राहेत्यन्वयः ९ तेवया १० प्रास्थापयसमागाधिष्ठाय अरुणानुजेनगरुडध्वजेवर्त

प्राहचाहमितोयातआर्यमिश्राभिसंगतः राजन्याश्चैद्यपक्षीयानूनंहन्युःपुरींमम ८ वीक्ष्यत-
त्कदनंस्वानांनिरूप्यपुररक्षणं सौभंचसाल्वराजंचदारुकंप्राहकेशवः ९ रथंप्रापयमेसूत-
साल्वस्यांतिकमाशुवै संभ्रमस्तेनकर्तव्योमायावीसौभराडयं १० इत्युक्तश्चोदयामासरथमा-
स्थायदारुकः विशंतंददृशुःसर्वेस्वेपरेचारुणानुजं ११ साल्वश्चकृष्णमालोक्यहतप्रायबलेश्वरः
प्राहरत्कृष्णसूतायशक्तिंभीमरवांमृधे १२ तामापतंतींनभसिमहोल्कामिवरंहसा भासयंतींदि-
शःशौरिःसायकैःशतधाछिनत् १३ तंचषोडशभिर्विध्वाबाणैःसौभंचखेभ्रमत् अविध्यच्छर-
संदोहैःखंसूर्यइवरश्मिभिः १४ साल्वःशौरेस्तुदोःसव्यंसशार्ङ्गंशार्ङ्गधन्वनः बिभेदन्यपतद्ध-
स्ताच्छार्ङ्गमासीत्तदद्भुतं १५

मातं ११ हतप्रायस्यबलस्येश्वरः १२ १३ सनीलत्वादिभिरुल्कासाम्यमोसौभस्य।
अविध्यद्वेगवत्त्वाद्दलादिभिःशरणोरश्मिसादृश्यं अप्रयत्नेनैवरश्मिवच्छरजालप्रसारणात्सूर्यतुल्यःश्री

द्युपो वाहितोपनीतः उपसृष्ट उपसर्गपीडां प्राप्त इति कृत्वा यतः परेण शत्रुणा गदया हतः सन्मूर्छितोऽतिः संत
तोऽगतो भवानिति ३३ इति श्रीभावार्थदीपिकायां दशमस्कंधे षट्सप्ततितमोऽध्यायः ७६ सप्तसप्ततितमे नानामा
याविदूरथः कृष्णेनागत्य साल्वस्तु हतः सौभं च चूर्णितं दंतिनः सन्नद्धः १ विधमंतं नाशयंतं प्रतिहत्य प्र

एतद्धि विदितं भवान् मया पोवाहितो रणात् उपसृष्टः परेणेति मूर्छितो गदया हतः ३३ इति श्रीभा
गवते दशमस्कंधे षट्सप्ततितमोऽध्यायः ७६ श्रीशुक उवाच स उपस्पृश्य सलिलं दंशितो धृतकार्मुकः
नय मां द्युमतः पार्श्वं वीरस्येत्याह सारथिं १ विधमंतं स्वसैन्यानि द्युमंतं रुक्मिणीसुतः प्रतिहत्य प्रत्यवि
ध्यन्नाराचैरष्टभिः स्मयन् २ चतुर्भिश्चतुरो वाहान् सूतमेकेन चाहनत् द्वाभ्यां धनुश्च केतुं च शरेणा
न्येन वै शिरः ३ गदसात्यकिसांबाद्या जघ्नुः सौभपतेर्बलं पेतुः समुद्रे सौभेयाः सर्वे संछिन्नकंधराः ४
एवं यदूनां साल्वानां निघ्नतामितरेतरं युद्धं त्रिनवरात्रं तदभूत्तुमुलमुल्बणं ५ श्रीशुक उवाच इंद्रप्र
स्थं गतः कृष्ण आहूतो धर्मसूनुना राजसूयेऽथ निर्वृत्ते शिशुपाले च संस्थिते ६ कुरुवृद्धाननुज्ञाप्य मु
नींश्च ससुतां पृथां निमित्तान्यतिघोराणि पश्यन् द्वारवतीं ययौ ७

निहत्य २ अष्टानां विनियोगमाह चतुर्भिरिति ३ सौभेयाः सौभस्थाः ४ नवानां रात्रीणां समाहारो नवरात्रं
त्रयाणां नवरात्राणां समाहारस्त्रिनवरात्रं सप्तविंशतिरहोरात्राणीत्यर्थः तुमुलमाकुलमुल्बणं घोरं ५

श्री
भाग
टी
१८

२२ स्वबोधः स्वतो ज्ञानं वापि स्वजनस्वेहतः प्रकृतौ मनुष्यस्वभावे उपरतो निमग्न आस्ते नितरां ततस्तत्सर्वं मायां हरेर्मायायाम मनुष्यत्वमायेयमिति ज्ञातवान् २८ स्वप्ने स्वप्रपंचं यथा २९ एवं परमेतमुपन्यस्तं निराकरोति। एवमिति केचलान्विताः पूर्वापरसंधानरहिताः तद्दाद्य मन्त्रवाचष्टे इति तत्रानुस्मरेतीत्यर्थः प्रथममभिप्रा।

एवं निर्भर्त्स्यमानाया वीक्ष्य स्वं नानकद्रुमे: उत्क्रम्य शिरस्याशाय वेश्यं सोमं समाविशन् २२ ततो। मुहूर्ते प्रकृतावुपसुतः स्वबोधयात्मिस्वजनानुषंगातः महानुभावस्तदबुध्यदाहरेर्मायां समा लयप्रस्तामयोदितां २८ ततत्रहूतेनपितः कलेवरं प्रबुद्धश्चात्मो ममपश्यपदस्मुतः स्वप्नं यथा चा वरचारिणोरि पुंसो मस्यमालोक्यनिदं तमुपतः २९ एवं वदन्नितरानर्षिद्रुपयः केचलान्विताः या त्ववाचोनिरुध्येरन्नूनं तेनस्मरस्तुन ३० क्वशोकमोहौ स्नेहोवाभयं वायेत्तसंभवाः क्वचाखंडित विज्ञानज्ञानैश्वर्यः स्वरेडितः ३१

यः ननावद्धानस्थ्याथैरामेण सहगतः श्रीकृष्णः संकर्षणामनुज्ञाप्येतिपूर्वमुक्तवान् ३० प्रश्नं भाविनं चेत्यादृक्वशोकमोहादाविति उभयं वाउनिमित्तदर्शनक्रुतेनूनंहस्मः प्रीममेतियद्रक्तं यत्त्वदत्ताच्छाङ्गेन्यपतदिमुक्ते तद्भयंवाक्केति प्रत्तेष्वसंभवोयथाते प्रत्वेडितानि विज्ञानेश्वर्याणि यस्यसः तत्रविज्ञानं स्वरूपं विषयं ज्ञानं बाह्यविषयं ३१॥

१८

१९ साल्वः शिशुपालस्यै तनामस्माकं प्रमत्तो न व हितः व्यापादितो निहतः १९ ग्रपराजितो ह्यतिमानवं

हाहाकारो महानासी कृतानां न उपपत्नां विनयसौभराड्चैविदमाह जनार्दनं १९ एतच्छ्रामूछतः
साल्वः शौनभार्या च्युतेतनो प्रमत्तः ससभामध्ये न याव्यापादितः सखा १९ तेनायं लिखितैर्वीरो
रपराजितमानितं नयाम्यपुनराहृत्तिं यदि तिष्ठेमसमागतः १९ श्रीभगवानुवाच कृष्यार्वकृत्यसमट
नपप्रपसंनिकेतनकं पौरुषं दर्शयं स्तिष्ठेवी यानवद्वभाषितः १९ इत्युक्त्वा भगवान् साल्वं गदया भी
मवेगया तताडजत्रौ संरब्धः स च कंपेव मत्तरक्त २० गदायां सन्निवृत्तायां साल्वस्त्वंतरधीयत ततो
मुहूर्त आगम्य पुरुषः शिरसाच्युत २१ देवक्या प्रहितोस्मीति नत्वा प्राह वचो रुदत् कृष्ण कृष्ण महा।
बाहो पितास्ते पितृवत्सल २२ बद्धापनीतः साल्वेन सौनिकेन यथा पशुः निशम्य विप्रियं कृष्णो।
मानुषीं प्रकृतिं गतः विमनस्को घृणी स्नेहात् बभाषे प्राकृतो यथा २३ कथं राममसंभ्रांतं जित्वाजेयं
सुरासुरैः साल्वेनाल्पीयसा नीतः पिता मे बलवान् विधिः २४ इति ब्रुवाणे गोविंदे सौभराट् प्रत्युपा
स्थितः वसुदेवमिवानीय कृष्णं चेदमुवाच सः २५ एष ते जनिता तातो यदर्थमिह जीवसि वधिष्ये।

तं स पुनराहृत्तिमस्त्वं तिष्ठेत्स्यात्स्वसि १९ १९ २० २१ २२ कृष्णीदयावान् २३ २४ २५ जनिताजनयिता ईशस्येत

श्री
भाग
उटी
९८

ततोऽहस्समन्तितमेदं तव क्वचिद्गृहयो दन्तवक्त्रादिः पुरेसेमेरामः सूतंततनोवधीत् साल्वीनामपतिर्निकृत्वं व्रतस्य ।
कं ततदेवाह शिशुपालस्येति पाणेहस्मोऽहं दंपरोत्तेकराणीयं महत्कृतं ॥ १ ॥ प्रसयायमतिरोध ॥ २ ॥ शुक ।
देशाहृदुमेदः शुल्यादेशभिलेपपरलास्कंदेव परमार्थतत्सुदुमेदः गतमदः शाह शुकं देवततीयजन्मानिमुक्ति
दानार्थमागत श्रयोनितन्मत्रयेल्लिख्यमारोणायब्रह्मशापावमानेभवान्ममस्वामीह छिपथंगतः श्रामः प ।

शुक उवाच शिशुपालस्य साल्वस्य पौंड्रकस्यापि दुर्मतिः परलोकगतानां च कुर्वन्मारोहस्मौहृदं
एकः पदातिसंक्रुद्धो गदापाणिः प्रकंपयन् पद्भ्यामिमां महाराज महासत्वो व्यदृश्यत ॥ २ ॥ तं तथा ।
यान्तमालोक्य गदामादाय सत्वरः अवप्लुत्य रथात्कृष्णः सिंधुं वेलेव प्रत्यधात् ॥ ३ ॥ गदामुद्यम्य कारू
षो मुकुंदं प्राह दुर्मदः दिष्ट्या दिष्ट्या भवानद्य मम दृष्टिपथं गतः ॥ ४ ॥ त्वं मातुलेयो नः कृष्ण मित्रध्रुङ्मां
जिघांससि अतस्त्वां गदया मंद हनिष्ये वज्रकल्पया ॥ ५ ॥ अनृण्यं मित्राणां
नदिष्ट्या दिष्ट्या भद्रं भद्रं ... प्रतिहर्षं वीक्षा ॥ ४ ॥ किंच
हे कृष्ण त्वमस्माकं मातुलेयः बंधुः एवमपि मित्रध्रुङ्मित्राणि घातितवान् मां च जिघांससि तस्मादस्माकं
त्वत्तो महद्भयं ततः किंतस्कायतः प्राप्तो नूनं दुर्बुद्धिः अतस्त्वामेतावन्मात्रमहं याचे किं तदित्याह हे कृष्णं मंद सर्वमा
ह्ननसमर्थ त्वामद्य मेण पाशेनवितत्गदयात्वं हनिष्ये प्रदास्यामि नामकवारं स्वहस्तेन न न न यत्नत्स्यान्नरदो ।
कोवासहेतैनेर्वामित्याह अवज्रकल्पया उग्रमलमालावदनिकोमलयेत्यर्थः ॥ ५ ॥

९८

किंच यस्यपादसेवयाऊर्जितया पुष्कलायाःत्मविद्यानयाःनादिस्थात्मावात्मविपर्ययग्रहस्य ग्रहंकृपाः सतीरुःखीमादिलक्षणास्तेहिवंतिनाशयंतिक्षेनऐश्वर्यंपदंच तस्यसतांगतेःकुतोनुमोहइति ग्रतोनेनः

यत्पादसेवोर्जितयात्मविद्यया हिन्वंत्यनाद्यात्मविपर्ययग्रहं लभंतग्रात्मीयमनंतमैश्वरंकुतोनु मोहःपरमस्यसद्गतेः ३२ तंशस्त्रपूगैःप्रहरंतमोजसा सात्वंशरैःशौरिरमोघविक्रमः विद्धाच्छिन द्वर्मधनुःशिरोमणिंसौभंचशत्रोर्गदयारुरोजसः ३३ तत्कृष्णहस्तेरितयाविचूर्णितं पपाततोये गदयासहस्रधा विसृज्यतद्भूतलमास्थितोगदामुद्यम्यसाल्वोच्युतमभ्यगाद्द्रुतं ३४ ग्राधावतःस गदंतस्यबाहुंभल्लेनछित्वाथरथांगमद्भुतं वधायसाल्वस्यलयार्कसन्निभंबिभ्रद्बभौसार्कइवोद याचलः ३५ जहारतेनैवशिरःसकुंडलंकिरीटयुक्तंपरमायिनोरिपोः वज्रेणवृत्रस्ययथापुरंदरो बभूवहाहेतिवचस्तदानृणां ३६ तस्मिन्निपतितेपापेसौभेचगदयाहते नेदुर्दुंदुभयोराजन्दिवि दे वगणेरिता ३७ सखीनामपचितिंकुर्वन्दंतवक्त्रोरुषाभ्यगात् ३८ इतिश्रीभागवतेदशमस्कंधे सप्तसप्ततितमोध्यायः ७७

हृदवतंसम्यमिमर्थः ३२ किंनदिसन्धंत ३।३ तंशस्त्रपूगैरिति कर्मक मेकवचं सरोजवभंज ३३ ३४ लयार्कसन्निभंप्रलयकालीनसूर्यसदृशम् ३५ ३६ देवगणेरिताः ३७ किंच ३८ इतिश्रीभावार्थदीपिकायांदशमस्कंधेसप्तसप्ततितमोध्यायः ७७ ॥

॥ एवं श्रीकृष्णो महाबलानपि लीलया जयन्नेवेति कृत्वा स कदाचित् गणसंख्यादिभिर्निर्जित इति पश्चर्
च्छीनामीयते निमज्जयेद्रतवः योगेश्वरो भगवांज्जगदीश्वर इति ॥ विदूरथो नाम उल्मुकः पूतनादिरलोः कृल
कृष्णस्तूयपारमत्रारागहामोहस्तनवल्वलो तत्वसेमाद् श्रुवेति ॥ प्रतिस्रोतं प्रतिलोमं ॥ तद्दर्शनेनेती

उपगीयमानविजयः कुसुमैरभिवर्षितः वृतो वृष्णिप्रवीरैश्च विभूषालंकृतांबरो ॥ एवं योगेश्व
रः कृष्णो भगवांज्जगदीश्वरः ईयते पशुदृष्टीनां निर्जितो जयतीति सः ॥ श्रुत्वा युद्धोद्यमं रामः कु
रूणां सह पांडवैः तीर्थाभिषेकव्याजेन मध्यस्थः प्रययौ किल ॥ स्नात्वा प्रभासे संतर्प्य देवर्षि
पितृमानवान् सरस्वतीं प्रतिस्रोतं ययौ ब्राह्मणसंवृतः ॥ पृथूदकं बिंदुसरः त्रितकूपं सुदर्श
नं विशालं ब्रह्मतीर्थं च चक्रं प्राचीं सरस्वतीं ॥ यमुनामनु यान्येव गंगामनु च भारत जगाम नै
मिषं यत्र ऋषयः सत्रमासते ॥ तमागतमभिप्रेत्य मुनयो दीर्घसत्रिणः अभिनंद्य यथान्यायं प्र
णम्योत्थाय चार्चयन् ॥ सोर्चितः सपरीवारः कृतासनपरिग्रहः रोमहर्षणमासीनं महर्षेः शि
ष्यमैक्षत ॥ अप्रत्युत्थायिनं सूतमकृतप्रह्वणांजलिं अध्यासीनं च तान्विप्रांश्चुकोपोद्वीक्ष्य माधवः

र्थं चक्रतीर्थं ॥ यमुनामनु यानि तीर्थानि गंगामनु च यानि तानि सर्वाणि गत्वा नैमिषारण्यं जगाम ॥ अ
भिप्रेत्य श्रीराम इति ज्ञात्वा ॥ महर्षेर्व्यासस्य ॥ सूतं प्रतिलोमजं नकृतं प्रह्वणमंजलिश्च येन तं अध्या

